Digitized by Arya Samaj Foundation Chennai and eGangotri

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

130737

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

[त्रैमासिकी]

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः

श्रुतम् मे गोपाय

130737

५२ वर्षे
१-२ अङ्कौ

ज्येष्ठ-भाद्रपदपूर्णिमे
जून-सितम्बर, १९९७-९८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

[त्रैमासिकी]

सम्पादकः

डॉ. हरिश्चन्द्रमणित्रिपाठी

निदेशकः, प्रकाशनसंस्थानस्य

५२ वर्षे
१-२ अङ्कौ

वार्षिकं मूल्यम् - १०० रूप्यकाणि
जून-सितम्बर, १९९७ ई.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परामर्शदातृसम्पादकमण्डलम्

प्रो. राममूर्तिशर्मा, कुलपतिः, अध्यक्षः

१. **डॉ. उमाशङ्करशुक्लः**, वेदवेदाङ्गसङ्कायाध्यक्षः

२. **डॉ. वशिष्ठत्रिपाठी**, दर्शनसङ्कायाध्यक्षः

३. **डॉ. गङ्गाधरपण्डा**, साहित्य-संस्कृति-सङ्कायाध्यक्षः

४. **डॉ. ब्रह्मदेवनारायणशर्मा**, श्रमणविद्या-सङ्कायाध्यक्षः

५. **डॉ. सत्यव्रतशर्मा**, आधुनिक-ज्ञान-विज्ञान-सङ्कायाध्यक्षः

६. **डॉ. हरिश्चन्द्रमणित्रिपाठी**, संयोजकः

❖ ❖ ❖

प्रकाशकः —

डॉ. हरिश्चन्द्रमणित्रिपाठी

निदेशकः, प्रकाशनसंस्थानस्य

सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

मुद्रकः —

श्रीजी-कम्प्यूटर प्रिण्टर्स

नाटी इमली

वाराणसी - २२१००१

प्राप्तिस्थानम्—

विक्रय-विभागः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य, वाराणसी-२२१००२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयानुक्रमणी

१. **संस्कृतपाण्डुलिपीनां संरक्षणे पण्डितानामवदानम्**
डॉ. गयाचरणत्रिपाठी १-१२

२. **श्रीमद्भागवते दिक्कालानुसन्धानम्**
डॉ. विन्ध्येश्वरीप्रसादमिश्रो विनय: १३-३९

३. **वेदरक्षणं नाम वेदार्थानुशीलनम्**
डॉ. राममूर्तिचतुर्वेदी ४०-५०

४. **वसोर्धारामन्त्रेषु यज्ञस्य विभावना कर्मयोगपरिकल्पिका**
प्रो. इन्द्रवदन-बी. रावल: ५१-५७

५. **वेदाङ्गेषु श्रौतकल्पाङ्गवैशिष्ट्यम्**
डॉ. देवेन्द्रनाथत्रिपाठी ५८-६१

६. **लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति**
डॉ. मुरलीधरपाण्डेय: ६२-६४

७. **धात्वर्थसिद्धान्तविमर्शः**
डॉ. रामकिशोरत्रिपाठी ६५-७८

८. **व्याकरणस्य महत्ता**
डॉ. मङ्गलाराम: ७९-८५

९. **नञर्थाः षट् प्रकीर्तिताः**
डॉ. गायत्रीदेवी ८६-९५

१०. **लिङ्गतत्त्वनिर्णयः**
डॉ. वृजकिशोरत्रिपाठी ९६-१०६

११. **मानवजीवने ग्रहाणां प्रभावः**
डॉ. कृष्णचन्द्रद्विवेदी १०७-१११

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१२. **दर्शनेषु मुक्तिविमर्शः**
श्रीशिवशङ्करमिश्रः ११२-१२९

१३. **वैशेषिकदर्शने व्याप्तिविमर्शः**
डॉ. शशिप्रभा-कुमार १३०-१३९

१४. **मोक्षप्राप्तौ मनसः प्राधान्यम्**
श्रीमती महेश्वरिपिल्ला एस. १४०-१४३

१५. **प्रतिभायाः प्रमाणत्वविचारः**
डॉ. मुरलीमनोहरपाठकः १४४-१५१

१६. **स्वातन्त्र्यशौर्यम्**
पण्डितश्रीशिवजी-उपाध्यायः १५२-१७२

१७. **महाकविभवभूतिनाट्यसाहित्यादर्शे भारतदर्शनम्**
डॉ. बालकृष्णशर्मा १७३-१८६

१८. **माघकाव्ये राजसंस्कृतिः**
डॉ. रामाशीषपाण्डेयः १८७-१९९

१९. **सुहृत्तत्त्वविमर्शः**
डॉ. सङ्कठादेवपाण्डेयः २००-२१७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयानुक्रमणी

१. **निर्विशेषब्रह्मवादः**
प्रो. पारसनाथद्विवेदी ... २१९-२२४

२. **पारस्करगृह्यसूत्रोक्ताशौचनिरूपणम्**
शिवराज-आचार्यः कौण्डिन्न्यायनः ... २२५-२७०

३. **न धातुलोप आर्धधातुके**
पण्डितश्रीमनुदेवभट्टाचार्यः ... २७१-२९४

४. **कर्मसिद्धान्तविवेचनम्**
डॉ. हरिप्रसाद-अधिकारी ... २९५-३००

५. **अद्वैते प्रपञ्चोपादानत्वविमर्शः**
डॉ. रामकिशोरत्रिपाठी ... ३०१-३१६

६. **महाकविभवभूतिनाट्यसाहित्ये जीवनमूल्यदर्शनम्**
डॉ॰ बालकृष्णशर्मा ... ३१७-३२६

७. **भाणश्चतुर्भाणी च**
डॉ. वनेश्वरपाठकः ... ३२७-३३६

८. **आनन्दस्वरूपविमर्शः**
डॉ. मनुलताशर्मा ... ३३७-३५८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

एतदस्माकं महत्सौभाग्यं यत् स्वीयां स्वर्णजयन्तीं संस्कृतवर्षे समुद्धास्य साम्प्रतम् ऋषिकल्पैराचार्यैः समारब्धेयं स्वनामविश्रुता **'सारस्वती सुषमा'** अनुसन्धानपत्रिका द्विपञ्चाशद्वर्षे पदं निदधती प्रकीर्णयति सारस्वतं महः, उत्प्रेरयति च संस्कृतसेवापरायणान् विद्वद्वरेण्यान्। प्रसङ्गेऽस्मिन् पद्यमेकं स्मर्यते प्रासङ्गिकम्—

अये चिरपरिश्रान्ता विद्याकान्तारचारिणः।
समागच्छत वस्तृप्तिं करोमि ज्ञानधारया[1]।।

अत्र वाग्देवता स्वयमेवाह्वयति विद्याकान्तारचारिणो विदुषो ननु श्रान्ता भवन्त आयान्तु, ज्ञानसुधाधारया भवतां तृप्तिं करोमीति। तद्वदेव **'सारस्वती सुषमा'** इयमाह्वयति नानादिग्देशस्थान् विदुषो ननु पठन्तु नाम वेदादारभ्याद्यतनीनं शाखोपशाखपल्लवितं पुष्पितं फलितञ्च ज्ञानराशिं सारस्वती-सुषमायाम्। राष्ट्र-परराष्ट्रव्यापिनीयं 'सारस्वती-सुषमा' सम्प्रेरयति विद्याकान्तारचारिणो विदुषो नवनवोन्मेषशालिनो विचारानाविष्कर्तुम्।

जानन्त्येव विद्वांसो यदचिरमेव सम्पूर्णतां जातः सारस्वती-सुषमायाः स्वर्णजयन्तीमहोत्सवः संस्कतवर्षेऽस्मिन्। अस्याः स्वर्णजयन्तीविशेषाङ्को नूनं बिभर्त्यभिख्यां काञ्चिदलौकिकीम्। स्वर्णमयः स्वर्णजयन्तीविशेषाङ्को दैशिकै-र्वैदेशिकैश्च विद्वद्धौरेयैरुपश्लाघितः। तदन्वनुसन्धानपत्रिकाया अस्या द्विपञ्चाशद्वर्षस्य प्रथम-द्वितीयसंयुक्ताङ्कं प्रकाशयतां प्रकामं मोमुदीति नश्चेतः।

संयुक्ताङ्केऽस्मिन् ऊनविंशतिर्निबन्धानां नानाशास्त्ररसस्रोतःपरिप्लुतानां समुच्चयो द्रष्टुं शक्यते विद्वन्निवहैः। प्रायेणात्र पाण्डुलिपिशास्त्रम्, वैदिका-नुसन्धानशास्त्रम्, व्याकरणशास्त्रम्, ज्यौतिषशास्त्रम्, नानादर्शनशास्त्रम्, साहित्यशास्त्रम्, निरुक्तशास्त्रञ्च विचारकोटौ समानीतं तत्तच्छास्त्रपारङ्गमेभ्यः पण्डितप्रकाण्डेभ्यः। मान्यवर-डॉ. गयाचरणत्रिपाठिमहोदयेन रचितं **'संस्कृत-**

---

१. पद्यमिदं पण्डितश्रीक्षेत्रेशचन्द्रचट्टोपाध्याय-पूर्वानुसन्धाननिदेशकद्वारा निर्मितम्, तत्प्रतिकृति-श्चापि तेनैव परिकल्पितेत्यवसेयम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाण्डुलिपीनां संरक्षणे पण्डितानामवदानम्' इति निबन्धो नवोन्मेषं प्रयच्छति पाण्डुलिपिसङ्ग्रहकर्तृभ्यः संस्कृतसेवापरायणेभ्यो विद्वद्भ्यः। एवमेव डॉ. विन्ध्येश्वरी-प्रसादमिश्रेण नवीना दिगुन्मीलिता **'श्रीमद्भागवते दिक्कालानुसन्धानम्'** इत्यस्मिन् निबन्धे। **'वेदरक्षणं नाम वेदार्थानुशीलनम्'** इति डॉ. राममूर्तिचतुर्वेदिना प्रणीतो निबन्धः काममावर्जयति चेतांसि विदुषाम्। प्रो. इन्द्रवदनरावलमहोदयस्य **'वसोर्धारामन्त्रेषु यज्ञस्य विभावना कर्मयोगपरिकल्पिका'** इति निबन्धो यागपरं कर्मयोगं विविनक्ति। डॉ. देवेन्द्रनाथत्रिपाठिविरचितः **'वेदाङ्गेषु श्रौतकल्पाङ्ग-वैशिष्ट्यम्'** इत्ययं निबन्धः स्पष्टयति श्रौतकल्पाङ्गवैशिष्ट्यम्। पण्डितवरेण डॉ. मुरलीधरपाण्डेयेन प्रणीतो निबन्धः **'लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति'** काञ्चिन्नवीनां दिशमुन्मीलयति विवेचनाशैल्याः। तदनु चत्वारो निबन्धा व्याकरणशास्त्रमवलम्बन्ते, तेषु गभीरतराणि सोहापोहसमन्वितानि चिन्तनतत्त्वानि द्रष्टुं शक्यन्ते पण्डितेन्द्रैः। ज्यौतिषशास्त्रशिरोमणिनाऽऽचार्यपण्डित-श्रीकृष्णचन्द्रद्विवेदिमहानुभावेनोद्भावितः **'मानवजीवने ग्रहाणां प्रभावः'** इति निबन्धः प्रकाममावर्जयति मनांसि विदुषाम्। एवमेव दर्शनपराश्चत्वारो निबन्धा नानाशास्त्रनिष्णातैः सुधीवर्यैरुद्भाविताः। विश्वविद्यालयस्यास्य साहित्यविभागाचार्येण नानाशास्त्रसाधनानिष्ठेन महाकवि-पण्डितश्रीशिवजी-उपाध्यायमहाभागेन विरचितमत्र प्रकाशितञ्च तत्त्वगर्भं **'स्वातन्त्र्यशौर्यम्'** इत्येकाङ्किनाटकं विस्कम्भयति मनांसि यूनां प्रेरयति च चेतांसि स्वातन्त्र्यं कामयमानानां जनानाम्, उद्बोधयति च स्वान्तं स्वातन्त्र्यमभीप्सूनां राष्ट्रसेवाहेवाकिनाम्। एवमेव त्रयोऽन्येऽपि निबन्धाः साहित्य-शास्त्रतत्त्वगर्भा राजन्ते पर्यन्ते पत्रिकायामस्याम्।

तदेवंविधनानाशास्त्रविचारसारसौगन्ध्यगर्भीकृतान् निबन्धकोरकान् बिभ्रती सारस्वतं महः परिपुष्णती च पत्रिकेयं विदुषां करारविन्देषु समुपहरता मयाऽनुभूयतेऽ-मन्दानन्दसन्दोहः। मन्ये, यन्नानाशास्त्रगवेषकाणां सुरगवीसमुपासकानां पत्रिकायाः संयुक्ताङ्कोऽयं महते श्रेयसे कल्पिष्यत इति।

एवं द्विपञ्चाशद्वर्षस्य संयुक्ताङ्कोऽयं सान्नपूर्णाय श्रीकाशीविश्वेश्वराय समर्पयन् कामये, यदियं **'सारस्वती सुषमा'** स्वीयां सारस्वतीं सुषमां प्रसारयन्ती समन्तादा-कल्पमग्रेसरीभवत्विति।

हरिश्चन्द्रमणित्रिपाठी
निदेशकः
प्रकाशन-संस्थानस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

काश्याम्
वासन्तिके नवरात्रे
वि.सं. २०५७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

५२ वर्षे	ज्येष्ठ-भाद्रपदपूर्णिमे, वि.सं. २०५४	१-२ अङ्काः

संस्कृतपाण्डुलिपीनां संरक्षणे पण्डितानामवदानम्[१]

डॉ. गयाचरणत्रिपाठी

प्राचार्यः,

प्रयागस्थ-गङ्गानाथझा-केन्द्रीयसंस्कृतविद्यापीठस्य

❀ ❀ ❀

संहितोपनिषद्ब्राह्मणे, वासिष्ठे धर्मशास्त्रे, निरुक्तादौ च पद्यमेकमुपलभ्यते, यत्र विद्या ब्राह्मणमागत्य प्रार्थयति यद् अहं तव निधिः, अतस्त्वया रक्षणीयास्मि —

विद्या ह वै ब्राह्मणमाजगाम गोपाय मा, शेवधिष्टेऽहमस्मि।

वस्तुतो वैदिककालादेव पारम्परिकज्ञानसरणे रक्षकत्वेन, तद्व्याख्यातृत्वेन च ब्राह्मणानां पण्डितानां वा महती भूमिका भारतीयसंस्कृतौ विद्यत इति सुविज्ञातमेव सर्वेषाम्। ग्रन्थरचनया, ग्रन्थानां कण्ठस्थीकरणेन, तद्व्याख्यान-भूतटीकाभाष्यादिनिर्माणेन, विद्वद्गोष्ठीषु शास्त्रचिन्तनेन, अथ च भूर्जपत्र-ताडपत्रादिषु लिखित्वा ग्रन्थानां संरक्षणेन, पण्डितैर्भौतिकसुखान्यनादृत्य भारते अविच्छिन्नतया प्रवहमाणाया ज्ञानधारायाः सततं संरक्षणं कृतम्। महता त्यागेन, तपस्यया चैतत् सम्भवमासीत्। व्रतबन्धनानन्तरमष्टमवर्षादारभ्य चतुर्विंशति-वर्षपर्यन्तं, यदि वा षोडशवर्षाणि यावत्, सर्वाणि भौतिकसुखानि परित्यज्य

१. शर्मण्यदेशीय-'हाइडेलबर्ग'विश्वविद्यालयस्य दक्षिण-आशिया-संस्थाने "Pandit : The Future of traditional Sanskrit Scholarship" इत्याख्ये विद्वत्सम्मेलने १२।७।१९९९ ई. इत्यस्मिन् दिवसे प्रदत्तम् उद्घाटनभाषणम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भूयोभिः कष्टैर्विद्यामर्जयित्वा, तदनन्तरं गार्हस्थ्यमङ्गीकृत्य जिज्ञासुभ्यो विद्यार्थिभ्य आजीवनं निःशुल्कं विद्यां ददानाः, अवकाशं ग्रन्थनिर्माणलेखनादिकं च कुर्वाणास्ते असौविध्यमसौकर्यं च सोढ्वापि विद्यायाः संरक्षणे, तदभिवर्धने च सर्वदैव कृतप्रयासा बभूवुः। श्रीमद्भिः 'आक्सेल् मिषाइल्'-महोदयैरायोजितायामस्यां गोष्ठ्यामेतादृशां पण्डितानामवदानमिह समुपस्थितानां विदुषां भाषणैः स्पष्टतरं भविष्यतीत्यत्र नाधिकमुच्यते। अस्यामपि शताब्द्यां महापण्डितेन 'राहुल-साङ्कृत्यायनेन' अवर्णनीयानि महान्ति कष्टानि सोढ्वा, भिक्षुकरूपेण तिब्बतदेशस्य चतुर्वारं यात्रां कृत्वा, योऽनेकेषां भारते लुप्तानां 'प्रमाणवार्त्तिक' - 'योगाचारभूमिशास्त्रम्' इत्यादीनां दुर्लभसंस्कृतग्रन्थानामुद्धारः कृतः, स पण्डितानां परम्परागतप्राचीनविद्यासंरक्षणप्रयासेऽद्यापि सर्वेषां कृते निदर्शनभूतः।

केचन सर्वशास्त्रनिष्णाताः संस्कृतपण्डिताः संस्कृतपाण्डुलिपीनां विशालं सङ्ग्रहं कृत्वा स्वकीयं विपुलं पुस्तकालयमपि निर्मान्ति स्म, यस्योदाहरणं सप्तदशशताब्द्यां विद्यमानानां 'सर्वविद्यानिधान' इत्युपाधिविभूषितानां वाराणसेयानां श्रीकवीन्द्राचार्यसरस्वतीमहाभागानां पुस्तकसङ्ग्रहस्य दीर्घया सूच्या प्राप्यते यत्र परःसहस्रं ग्रन्थाः सन्ति। सूच्येषा गंगानाथझामहोदयेन वटोदरनगरात् (Baroda) प्रकाशिता। अद्यत्वेऽपि उत्कलेषु, आन्ध्रेषु, कर्णाटकेषु, केरलेष्वन्यत्र चापि बहूनां पण्डितानां गृहेषु पाण्डुलिपीनां विशालः सङ्ग्रहो विद्यते। ते इदानीं प्राय एतानि पुस्तकानि नैव वाचयन्ति, किन्तु पितृणां, पूर्वजानां वा सम्पत्तिरेषा इति मत्वा तानि महत्या श्रद्धया संरक्षन्ति पूजयन्ति च। विक्रयणे चाप्येतेषां ते भृशं मन्दोत्साहाः।

यदि नाम केचिदत्र सन्दिह्युर्यत् पाण्डुलिपिलेखकास्तु प्रायः कायस्थजातीया आसन्, अतः पाण्डुलिपिसंरक्षणस्य श्रेयस्ते गृह्णन्ति, तदास्माभिरुच्यते यद् ग्रन्थानां रचनाकाराः, तेषां प्रथमलेखकाः, पाण्डुलिपीनां शोधकाः, तासां पाठकाः, तासां संरक्षणकर्तारश्च पण्डिता एवासन्, न तु कायस्थाः। पण्डितानां सदनेष्वेव पाण्डुलिपयोऽद्य सुरक्षितास्तिष्ठन्ति, न तु कायस्थानां गृहेषु। अतो नास्ति तेषां तद्रक्षणे किमपि कर्तृत्वम्।

पाण्डुलिपीनां प्राचीनता

प्रकृतमनुसरन्तः प्रथमं तावद् विचारयामः — कियती प्राचीना खलु भारतीया ग्रन्थलेखनपरम्परा? वैदिककाले सर्वमेव मौखिकमासीत्, श्रुति-शब्दवाच्यत्वात् सर्ववेदानाम्, 'लेखनकलायाः लिपेर्वा ज्ञानं नासीत् तत्कालिकानां जनानाम्' इति बहूनां विपश्चितां विशेषतः पाश्चात्त्यानां मतमिदम्; किन्तु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चिन्त्यमेतत्। एतत्तु विद्वद्भिर्विचारणीयं यद् विभिन्नगोत्रीयैः ऋषिभी रचितानि, अथ च विविधपरिवारेषु यज्ञार्थं देवानामावाहनाय उपयुज्यमानानि सूक्तानि सङ्कलय्य महर्षिणा वेदव्यासेन, केनचिदन्येन वा, ऋग्वेदसंहिताया रचना कृता। 'संहिता' इति शब्दस्य समाहारः, सङ्कलनं वेत्यर्थः। अत्र विचार्यं भवति — केन प्रकारेण बहुभ्यः ऋषिपरिवारेभ्यः सूक्तानि आनीतानि? किं सर्वतस्तानि कण्ठस्थीकृत्यैव कश्चिदानीतवान्? नैतत् श्रद्धास्पदं प्रतिभाति। सङ्ग्रथितायामेकदा संहितायां तस्या मौलिकं स्वरूपं, मण्डलेषु विभाजनं, सूक्तानां संख्या, तेषामानुपूर्वी चेत्यादि केन प्रकारेण स्थिरं, सुरक्षितं च स्थातुं शक्यते यदि तेषां भौतिकं, चक्षुर्ग्राह्यं, प्रत्यक्षं स्वरूपं नैव स्यात्? वैदिकसंस्कृतेः समकालिक्यां पूर्ववर्तिन्यां वा सैन्धव-सरस्वतीसंस्कृतौ लेखनकला सुविज्ञाता आसीत्। भारतीया वणिज एशिया-महाद्वीपस्य 'मेसोपोटामिया'दिदेशेषु सुमेरादिजनैः सह वाणिज्यं कुर्वते स्म इति ऐतिह्यविदः सम्यक्तया विदन्ति। तत्र लेखनकला समुन्नताऽऽसीत्। किं भारते निवसतामार्याणां मनसि लेखनद्वारा वैदिकसंहितानां स्वरूपसंरक्षणस्य विचारोऽपि नोदेत्, इति न श्रद्धास्पदम्। वर्ततां नाम गुरुशिष्यात्मिका मौखिकी परम्परा, कण्ठस्थीकरणपरम्परा, श्रुतीनां शुद्धतया संरक्षणार्थम्; किन्तु प्रथमतया तु तासां स्थिरीकरणं लेखनेन आवश्यकमासीदित्यस्माकमभिमतम्। शतपथब्राह्मणादि-विपुलकायानां ग्रन्थानां निर्माणमथ च तन्मौलिकस्वरूपस्थिरीकरणं प्रथमतया तेषां लेखनेन विना नैव सम्भवति। आदौ तावत् तेषां लिखितं रूपं, तेषां चक्षुर्ग्राह्यत्वमपेक्ष्यते।

पाणिनेः समयेऽपि प्राचीनानां भारतीयानां लेखनस्य लिपेर्वा ज्ञानं नासीदित्यपि केचिद्विद्वांसोऽभिप्रयन्ति। तर्ककर्कशधिया समीक्षणेन किन्तु एतदपि मतं समीचीनं नैव प्रतिभाति। गभीरायाः संस्कृतभाषायाः किमपि सम्पूर्णं व्याकरणं रचयितुं विपुलं सामग्रीसङ्कलनं, सामग्र्याः सविवेकं विश्लेषणं, क्रमबद्धरूपेण च विवेचनं, सूत्रनिर्माणप्रक्रियायां यत्र तत्र तेषां संशोधनं, विस्तृतीकरणं सङ्क्षिप्तीकरणं वा अपेक्ष्यते। तेषामानुपूर्वी अपि एकदा प्रथमवारं लिखितरूपं विना नैव स्थिरीभवितुं शक्नोति। अपरञ्च इदमप्यवधेयं यत् पाणिनिः अष्टाध्याय्याम् ''अधिकृत्य कृते ग्रन्थे'' (४।३।८७), अथ च ''कृते ग्रन्थे'' (४।३।११६) इति सूत्रद्वयनिर्माणेन तत्समये ग्रन्थानामस्तित्वं निर्भ्रान्ततया प्रमाणयति। ग्रथि-धातोर्निष्पन्नस्य 'ग्रन्थ'शब्दस्य आशयो लिखितं पुस्तकमेव भवितुमर्हति, नान्यत् किमपि। ग्रथनं नाम सूत्रेण केषाञ्चिद्वस्तूनां परस्परं सङ्घटनं निबन्धनं वा। ''पुष्पाणि (मालारूपेण) ग्रथ्नाति''''पत्राणि सङ्ग्रथ्नाति'' इत्यादयो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाषायां प्रयोगा भवन्ति। वैदिकोऽयं धातुस्तैत्तिरीयकाठकसंहितादिषु अस्मिन्नेवार्थे प्रयुक्तो दृश्यते। ग्रथनं नाम पुस्तकरचनाकर्म। ''वाल्मीकिरादौ च ससर्ज काव्यं जग्रन्थ यन्न च्यवनो महर्षिः'' इति बुद्धचरिते (१।४८) अश्वघोषवचनम्। 'अधिकृत्य' इत्यस्य अर्थो भवति-कमपि विषयमवलम्ब्य, अतः ''अधिकृत्य कृते ग्रन्थे'', ''कृते ग्रन्थे'' इति सूत्रयोस्तात्पर्यं कमपि एकं निश्चितं विषयमवलम्ब्य कृतेन, लिखितरूपेण चोपलब्धेन पुस्तकेन ग्रन्थेन वा एव भवितुं शक्नोति। एवमेव ''स्वरितेनाधिकारः'' (१।३।११) इति सूत्रेण स्वरितप्रकाशकेन केनचिच्चिह्नेन अङ्कनम्, अथ च ''दिवाविभा.......लिपिलिबिबलिभक्ति......अरुःषु'' (३।२।२१) इत्यादि-सूत्रे लेखनवाचिलिपिशब्दस्योल्लेखः स्पष्टतया पाणिनिना कृतः, अतः पाणिनिसमये लेखनकलायाः, ग्रन्थानां पाण्डुलिपीनां च अस्तित्वं निर्भ्रान्ततया प्रमाणितं भवति।

प्राग्वर्तिषु बौद्धजातकेष्वपि राजशासनपत्राणाम्, ऋणपत्रादीनां, धर्मनियमानां, व्यक्तिगतपत्राणां चोल्लेखेन लेखनकलायास्तत्समयेऽस्तित्वं सिद्ध्यति इत्येष विषयो नाधिकं प्रपञ्च्यते।

लेखनाधाराः

यवनाधिपतेः अलेक्साण्डरस्य सेनया सह भारतमागतेन तत्सेनान्या 'नेआर्ख़ेस्' इत्यनेनोल्लिखितं यद् भारतीया कार्पासं कुट्टयित्वा तेन कर्गदपत्राणि निर्मान्ति, ग्रन्थांश्च तदुपरि लिखन्ति। 'आउरेल स्टाइन्'-महाभागेन मध्यएशियाभागे प्राप्तेषु ग्रन्थेषु कतिचन एवंविधनिर्मितकर्गदस्योपरि एव लिखिताः सन्ति, राजस्थानस्य मेदपाटक्षेत्रे प्राचीनेभ्यो वस्त्रखण्डेभ्यः किञ्चित्कालात् प्राग् आधुनिके युगेऽपि एतादृशं कर्गदं निर्मीयते स्म इति गौरीशंकर-ओझाः स्वकीये 'प्राचीन-भारतीयलिपिमाला'ख्यग्रन्थे सूचयति। अनेन नेआर्ख़ेस्-महोदयस्य कथनं प्रतीतियोग्यं प्रतिभाति। सामान्यतस्तु मध्ययुगे कार्पासनिर्मितं पटं गोधूम-चूर्णनिर्मितश्लेषेण, शालिमण्डादिभिश्च छिद्रपूरणपुरस्सरं दृढीकृत्य, क्वथितचिञ्चा-बीजकल्कलेपनेन समतलं मसृणं च विधाय क्षौद्रमिश्रितखटिकादिलेपनेन श्वैत्यमानीय, शङ्खादिसङ्घट्टनेन चिक्कणं च कृत्वा लेखाधाररूपेण प्रयुञ्जते स्म जना इति बहुषु ग्रन्थागारेषु सुरक्षिताभिर्मातृकाभिर्ज्ञायते। एतादृशीनि पुस्तकानि प्रायः कुण्डलीरूपेण (Scrolls) वलितानि भवन्ति। जैनमतावलम्बिभिः एतादृशी लेखनसामग्री लेखनाधाररूपेण पर्युषणपर्वानन्तरं लिखितानां 'क्षमापन'-पत्राणां कृते, यदि वा साधूनामामन्त्रणार्थं प्रहितानां विज्ञप्तिपत्राणां कृतेऽद्यत्वेऽपि प्रयुज्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उत्कलेषु पटोपरि शोभनानि चित्राण्यपि निर्मीयन्ते यानि तु पुरी-भुवनेश्वरादिस्थानेषु सर्वत्र क्रेतुं शक्यन्ते।

भारतीयानां प्राचीनतमौ ग्रन्थाधारौ भूर्जपत्रं तालपत्रं च स्तः। तत्रापि 'ग्रन्थ'-शब्दस्य व्युत्पत्तिलभ्यार्थस्यानुशीलनेन कदाचित् तालपत्रस्यैव प्राचीनतरत्वं सिद्ध्यति, यतः स्थूलत्वाद् मुख्यतस्तालपत्राण्येव छिद्राण्यासाद्य सूत्रेण सङ्ग्रथ्यन्ते। भूर्जपत्राणि तु उपरि अधस्ताच्च निहितेन काष्ठफलकद्वयेन सुरक्षितानि भवन्ति।अतिसूक्ष्मतया सहजभङ्गुरतया च भूर्जत्वचस्तस्यां छिद्रकरणं सूत्रेण सङ्ग्रथनं च प्रायशः पत्राणां विनाशायोपकल्पते।

भूर्जपत्र-तालपत्रातिरिक्तं 'योगिनीतन्त्रे' ग्रन्थाधाररूपेण तेजपत्रस्य अगुरुत्वचश्चाप्युल्लेखो विद्यते —

भूर्जे वा तेजपत्रे वा ताले वा ताडिपत्रके।
अगुरुत्वचापि देवेशि पुस्तकं कारयेत् प्रिये।।

इत्यस्मिन् श्लोके। किन्तु तेजपत्रेषु अगुरुत्वचि वा लिखितानि पुस्तकानि अद्यत्वे नैव दृष्टिगोचरीभवन्ति।

भूर्जवृक्षस्तु हिमालये प्राप्यते। शर्मण्यभाषायां स Birke इति शब्दवाच्यः। भारोपीयभाषासु अस्य उपलब्धेर्ज्ञायते यद् आर्याणां परिचयोऽनेन वृक्षेण अतिप्राचीनः। कालिदासः स्वकीये कुमारसम्भवे (१।७) अस्य वृक्षस्य त्वचः उल्लेखं पत्रादिलेखनार्थम् आधारसामग्रीरूपेण करोति। हिमालये बाहुल्येन वर्तमानाः भूर्जत्वचो विद्याधरसुन्दरीणामनङ्गलेखनार्थं प्रयुज्यमानाः सत्यः सार्थकत्वमुपयोगित्वं च भजन्ते—

न्यस्ताक्षरा धातुरसेन यत्र भूर्जत्वचः कुञ्जरबिन्दुशोणाः।
व्रजन्ति विद्याधरसुन्दरीणामनङ्गलेखक्रिययोपयोगम्।।

भूर्जवृक्षाणामान्तरिकी तन्वी त्वक् तीक्ष्णेन क्षुरेण लूना, काष्ठफलकेषु आस्तृता सती ऋजुतां प्रापिता अथ च छायायां शुष्का, लेखनार्थमुपयुज्यते स्म। भूर्जपत्रेषु लिखितं प्राचीनतमं पुस्तकं स्टाइन्महोदयैः खोतानतः प्राप्तं खरोष्ठीलिपिनिबद्धं प्राकृतभाषात्मकं 'धम्मपदं', यत्तु द्वितीयशताब्दीकं (तृतीयशताब्दीकं वा) विद्वद्भिराकलितं वर्तते। काश्मीरेषु नेपालदेशे च मध्ययुगे भूर्जपत्रेषु विलिखितानि बहूनि पुस्तकानि अद्यत्वेऽप्युपलभ्यन्ते। भूर्जपत्रेषु केवलं श्यामवर्णया, रक्तवर्णया वा मस्या एव लेखितुं शक्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ताडपत्रं तु तालवृक्षस्य पत्रम्। तस्य श्रीताल-खरताल इति प्रकारद्वयं भवति। श्रीतालः मसृणश्चिक्कणो नम्य आयतश्च। खरतालस्तु किञ्चित् स्थूलः सारल्येन भङ्गुरश्च। अस्य पत्राणि क्षुद्राणि। प्राचीने भारते तालपत्रोपरि प्रायो मस्या लिखन्ति स्म पण्डिताः। शर्मण्यदेशीयविद्वद्भिर्मध्य-एशियास्थ-तुरफानत आसादितं, प्रो. ल्यूडर्समहोदयैश्च प्रकाशितमश्वघोषविरचितं शारद्वतीपुत्रप्रकरणाख्यं नाटकं ताडपत्रेषु मस्या एव लिखितम्। लिपिशास्त्रज्ञैरस्याः पाण्डुलिपेः कालनिर्धारण-मीशवीयद्वितीयशताब्द्यां कृतम्। कठिनतरे खरताले लौहलेखन्या अक्षराणि उट्टङ्क्यन्ते, तदनन्तरं तैलमिश्रितकज्जलेन, यदि वा शिम्बालतायाः पत्राणां रसेन तत्तालपत्रमुपलिप्यते येन कज्जलं रसो वा अक्षररेखासु प्रविशति, तत्रैव च सन्तिष्ठते। पत्रोपरि वर्तमानमवशिष्टं कज्जलादिकं कार्पासेन चैलेन वा अपमृज्यते। उत्कलेषु दक्षिणावर्तगतेषु अन्येषु च प्रदेशेषु एषा एव प्रणाली पाण्डुलिपि-निर्माणस्य।

कर्गदपत्रेषु वर्तमानः प्राचीनतमः पाण्डुलिपिसङ्ग्रहो मध्य-एशिया-स्थिताद् 'यारकन्द'नगराद् महापण्डितेन वेबरेण आसादितो यस्य कालनिर्धारणं 'ह्योर्नले'-महोदयेन पञ्चमशताब्द्यामकारि। अत्र विद्यमानानां पाण्डुलिपीनां मध्ये काश्चन चैलखण्डकार्पासादिनिर्मिते कर्गदपत्रे लिखिताः सन्तीति तज्ज्ञा वदन्ति। दशमशताब्दीतः एकादशशताब्दीतो वा कर्गदस्य व्यापकः प्रयोगो उत्तरभारते दृश्यते, यद्यपि दक्षिणभारते ताडपत्रस्यैव प्राचुर्यम्। कर्गदोपरि लेखनार्थं प्राचीनकाले या मसी निर्मीयते स्म, सा अतीव स्थायिनी। निमज्जितेष्वपि जले पाण्डुलिपिपत्रेषु, लिखितं विवर्णं दुष्पाठ्यं वा नैव भवति। एषा मसी तु अक्षोटादीनां (Walnuss) कठोराणि शल्यकानि दग्ध्वा तत्समुत्थितेन अङ्गारेण, कज्जलं, कीकरवृक्षनिर्यासादिकं च विमिश्र्य निर्मीयते स्म। अस्माकं पितृचरणा अपि अस्मद्बाल्यकाले एतादृशीं मसीं निर्मान्ति स्म, इत्यस्माकं स्मृतिपथे वर्तते।

पाण्डुलिपीनां संरक्षणम्

कर्गदानां ताडपत्राणां च संरक्षणं भारतीयायां जलवायुपरिस्थित्यामतीव दुष्करम्। कर्गदपाण्डुलिपीनां सदैव वम्रीभ्यः (उपदीकाभ्यः, Weisse Ameisen) भयं भवति। प्रायो वर्षाकाले ताः लक्षलक्षसंख्याका गृहेषु भूमितलाद् आविर्भूय कर्गदपत्राणि भक्षयित्वा तत्सर्वं मृत्तिकारूपेण परिणमन्ति। अतः कर्गदपाण्डुलिपीनां सुरक्षा वर्षर्तौ अवश्यं करणीया भवति। भारते पण्डिताः स्वकीयानि हस्तलिखितानि पुस्तकानि प्रायो रक्तवर्णरञ्जितेन पटेनावेष्ट्य धारयन्ति, भूमौ च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तानि नैव निक्षिपन्ति। पटं तु वम्र्यो नैव तादृशेन सारल्येनाभिपतन्ति। भाद्रमासे यदा सूर्यश्चकास्ति तदा पण्डिताः सर्वाणि वेष्टनानि उद्घाट्य हस्तलेखानां पत्राणि च शिथिलीकृत्य तेषामार्द्रतापसारणार्थं तानि 'भाद्रवरौद्रे' रविकिरणैः शोषयन्ति। सायं च पत्राणां मध्ये यत्र तत्र निम्बपत्राणि निधाय पुस्तकं पुनरपि दृढं बध्नन्ति।

तालपत्राणां भयं तु मुख्यतः क्षुद्रकीटेभ्यो भवति यानि पत्राणां मध्ये प्रविश्य तत्र दीर्घकालमुषित्वा च अण्डान्यादधति। एते कीटविशेषा नैरन्तर्येण संवर्धितपरिवाराः शनैः शनैः पत्राणि खादन्तस्तेषु छिद्राणि च कुर्वन्तः कालेन सर्वमपि पुस्तकं विनाशयन्ति। एतेषामपसारणार्थं मारणार्थं वा पत्राणि सम्यक्तया सम्मार्ज्य, धूल्यादिकं चापसार्य निम्बबीजतैलं लेपयन्ति पण्डिताः। केचिद् हरिद्रादिविविधौषधिमिश्रितं सर्षपतैलमपि कार्पासेन आरोपयन्ति पत्रेषु। तदपि कृमिनाशकम्। कर्पूरसारो यवानिकासारोऽपि कृमीन् विनाशयति। ताडपत्रीयकोषाणां संरक्षणार्थं दाक्षिणात्येष्वद्यत्वे निम्बूकशष्पतैलं (citronella) प्राचुर्येण प्रयुज्यते।

विश्वस्मिञ्जगति मूषका एतादृशानां वस्तूनां जातशत्रवः। ते वेष्टनान्तर्गतानि पुस्तकानि प्रायो नैव कर्तयन्ति, किन्तु इतस्ततो गृहकोणेषु विकीर्णानि, बहुकाल-मुपेक्षितानि पुस्तकानि अवश्यमेव एकदा मूषकाणां भोजनं भवन्ति, अत एवैषा प्राचीना उक्तिः —

स्थलाद्रक्ष, जलाद्रक्ष, रक्ष मां श्लथबन्धनात्।
आखुभ्यः परहस्तेभ्य एवं वदति पुस्तकम्।।

पुस्तकानां भूमौ निधानेन भूमिगता आर्द्रता तान्युपसर्पति, येन उपदीकादीनामन्येषां च कीटानां तत्राक्रमणं भवति, मूषकादीनामपि तानि सारल्येन भक्ष्यं भवन्ति। श्लथबन्धनिवारणं कीटादिभ्यो रक्षणार्थम्। दृढतया बद्धे पुस्तके पत्राणां मध्ये कृमयो नैव प्रवेष्टुं शक्नुवन्ति। स्वकीयं पुस्तकं परहस्तेभ्यः प्रदाने महान्तं सङ्कोचमनुभवन्ति पण्डिताः। परहस्तगतं पुस्तकं महता आयासेन, वारं वारं याचनानन्तरमेव पुनः प्राप्यते, पुनरायातस्यापि प्रायस्तस्य पत्राणि भ्रष्टानि भवन्तीति तेषामनुभवः, अत एवोक्तिः —

लेखनी पुस्तकं दाराः परहस्तं गता यदि।
कष्टात्पुनरवाप्ताऽपि नष्टा भ्रष्टा विमर्दिताः।।

हस्तलिखितपुस्तकानां संरक्षणार्थं केचिदतीव उपयोगिनो निर्देशाः प्रदत्ताः केनचित्पण्डितेनास्मिन् पद्ये—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्भूष्यं सदपत्यवत्, परकराद् रक्ष्यं च सुक्षेत्रवत्
संशोध्यं व्रणिताङ्गवत् प्रतिदिनं, वीक्ष्यं च सन्मित्रवत्।
बन्ध्यं वध्यवदश्लथं दृढगुणैः, स्मर्यं हरेर्नामवद्
नैवं सीदति पुस्तकं बहुतिथं ह्येतद् गुरूणां वचः।।

स्निग्धपुत्रवत् पुस्तकं वाससा परिधापनीयम्, स्वकीयप्रियभार्यावत् परकरेभ्यो रक्षणीयम्, व्रणवद् धूल्यादिकमपसार्य संशोधनीयम्, मित्रवत् प्रतिदिनमुद्घाट्य स्निग्धेन चक्षुषा वीक्षणीयम्, दृढैः सूत्रैः अश्लथं निविडं बन्धनीयम्, अथ च कुत्र किंरूपेण तत् तिष्ठतीति सदैव स्मृतिपथे धारणीयम्, तस्योपेक्षणं नैव कार्यम्। यद्येवं क्रियते तदा पुस्तकं बहुकालं यावद् विनाशं नैव उपयाति, इति तत्संरक्षणकृते व्यावहारिका निर्देशाः कस्यचित् पाण्डुलिपिसंरक्षण-विशेषज्ञस्य।

पुस्तकलेखनं लेखकाश्च

ग्रन्थलेखकः कीदृशः स्यादित्यस्मिन् विषयेऽपि तन्त्रग्रन्थेषु, चाणक्यनीतौ च निर्देशाः प्राप्यन्ते। चाणक्यनीतिर्लेखकानां गुणान् एवं प्रकाशयति—

सकृदुक्तगृहीतार्थो लघुहस्तः स्फुटाक्षरः।
सर्वशास्त्रसमालोकी प्रकृष्टो ग्रन्थलेखकः।।

एकवारमेव श्रुत्वा यो ह्युक्तं गृह्णाति, धारयति च, स सकृदुक्तगृहीतार्थः। 'लघुहस्तः' इति शब्देन शीघ्रं जवेन वा लेखनकलाकौशलं व्यज्यते। जवेन लिख्यमानानामप्यक्षराणामाकारस्य आकृतेश्च व्यत्यासो मा भूद् इत्येवाशयः। 'सर्वशास्त्रसमालोकी' इति शब्देन सर्वेषां शास्त्राणां यत्किञ्चिद् ज्ञानं प्रत्येकं लेखकस्य कृतेऽपेक्ष्यते येन स पारिभाषिकशब्दान् शुद्धतया लिखेत्। राजशेखर-कृतायां काव्यमीमांसायामपि (दशमेऽध्याये) प्रायोऽस्यैवाभिप्रायस्यानुवादो दृश्यते—

"सर्वभाषाकुशलः शीघ्रवाक्, चार्वक्षरः, इङ्गिताकारवेदी,
नानालिपिज्ञो लाक्षणिकश्च लेखकः स्यात्"।

मत्स्यपुराणस्य १८९ तमेऽध्याये लेखकस्य योग्यता इत्थं वर्णिता —

सर्वदेशाक्षराभिज्ञः सर्वशास्त्रविशारदः।
बह्वर्थवक्ता चाल्पेन लेखकः स्यान्नृपोत्तम।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शीर्षोपेतान् सुसम्पूर्णान् शुभान् श्रेणिगतान् समान्।
अक्षरान् वै लिखेद् यस्तु लेखकः स वरः स्मृतः।।

लेखकस्य बहुज्ञताऽत्रापि प्रशंसिता। विविधदेशेषु प्रयुज्यमानानां लिपीनां ज्ञानं, सर्वशास्त्रावलोकित्वं, मिताक्षरैर्बह्वर्थप्रकाशनसामर्थ्यम्, अथ च सुलेखलेखनक्षमत्वं तस्मादपेक्ष्यते। अक्षराणि सर्वाभी रेखाभिः समन्वितानि, समानाकृतीनि, एकश्रेणिगतानि भवितुमर्हन्ति। एवं लेखनीयं यथा द्वयोर्वर्णयोरन्तरा भूयान् अवकाशो न स्यात्। अत्र कस्यचित् सहृदयसमालोचकस्येदं प्राचीनं पद्यं स्मृतिपथमवतरति—

अक्षराणि समानानि वर्तुलानि घनानि च।
परस्परविलग्नानि तरुणीकुचकुम्भवत्।।

पुस्तकस्य आकारप्रकारः, दैर्घ्यादिकं मानं च कीदृशं भवेदित्यस्मिन् विषयेऽपि निर्देशाः प्राप्यन्ते, प्रायशस्तन्त्रग्रन्थेषु। योगिनीतन्त्रकारस्य मतानुसारं पुस्तकस्य दैर्घ्यं मुष्टिमानाद् आरभ्य बाहुपर्यन्तं भवितुं शक्नोति—षडङ्गुलं (मुष्टिः) अष्टाङ्गुलं, दशाङ्गुलं, द्वादशाङ्गुलम्, अष्टादशाङ्गुलं, हस्तमात्रं (चतुर्विंशत्यङ्गुलं), यदि वा बाहुमात्रं (षट्त्रिंशदङ्गुलम्) इति पुस्तकस्य मानानि। कुत्र, कियन्ति वा पुस्तकपत्रेषु छिद्राणि क्रियेरन् इत्यस्यापि विवेको विद्यते —

हस्तमात्रं मुष्टिमात्रमाबाहुद्वादशाङ्गुलम्।
दशाङ्गुलं तथाष्टौ च, ततो हीनं न कारयेत्।।
वेधद्वयं मुष्टिहस्ते बाहुमात्रे त्रिरन्ध्रकम्।
समभागे महेशानि हस्तादौ रूपरन्ध्रकम्।।
अष्टाङ्गुलं परित्यज्य मध्ये वेधं तु कारयेत्।
प्रादेशादौ भवेद् रन्ध्रं द्व्यङ्गुले वा समाचरेत्।।

'हयशीर्षपाञ्चरात्रस्य' तृतीये सङ्कर्षणकाण्डे, एकत्रिंशत्तमेऽध्याये पुस्तकानां प्रतिष्ठाविधिर्वर्ण्यते। कस्यापि महत्त्वावहस्य ग्रन्थस्य लेखनात् प्राग् वाग्देव्याः सरस्वत्याः पूजा कार्या। स्वस्तिवाचनपुण्याहवाचनानन्तरं लेखकः प्राङ्मुखमुपविश्य रजतपात्रे मसीं स्थापयित्वा स्वर्णलेखन्या प्रथमान् पञ्चश्लोकान् लिखेत्। अक्षराणि स्निग्धानि, नातिकृशानि, नातिस्थूलानि, ह्रस्वदीर्घादिमात्रासंयुतानि, सम्पूर्णावयवानि, यथास्थानं बिन्दुविसर्गदण्डादियुक्तानि, शुद्धानि च भवितुमर्हन्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उत्तरभारते प्रणीतत्वाद् हयशीर्षसंहिता नागराक्षरैः शारदाक्षरैर्वा ग्रन्थस्य लेखनं वरं मनुते—

ततः पुण्याहघोषेण प्रारभेल्लेखनं बुधः।
प्राङ्मुखः पद्मिनीं ध्यायन्नालिखेच्छ्लोकपञ्चकम्।।
रौप्यपात्रे मषीं स्थाप्य लेखन्या हेमया शुचिः।
काश्मीरैर्नागरैर्वर्णैः समशीर्षैः समांशकैः।।
स्निग्धैर्नातिकृशैः स्थूलैर्ह्रस्वदीर्घादिलक्षितैः।
सम्पूर्णावयवैर्मात्राबिन्दुसंयोगलक्षितैः।
लेखयेल्लेखको धीमान् शब्दशास्त्रविशारदः।।

पाठसंशोधनम्

स्वयं लेखकेन वा पुस्तकस्य लेखनानन्तरं पण्डितास्तत्पुस्तकमतिसावधानतया निरीक्षन्ते स्म, तत्र वर्तमाना लेखनत्रुटीर्निरस्य भ्रष्टं पाठं च संशोधयन्ति स्म। योंऽशोऽधिकोऽशुद्धो वा, तं हरतालेन आच्छाद्य, तदुपरि शुद्धं पाठं लिखन्ति स्म। कुत्रचिद् अवशिष्टं च्युतं वा पाठं ते 'काकपद'-(V) चिह्नाङ्कनपूर्वकं पङ्क्तिसंख्यामुल्लिख्य तस्यैव पत्रस्य उपरि अधस्ताद् वा योजयन्ति स्म।

कस्यापि ग्रन्थस्य सामीक्षिकसम्पादनपूर्वकं मौलिकशुद्धपाठनिर्धारणस्य य आधुनिको विधिस्तस्यापि किञ्चित् परिज्ञानं प्राचीनानां पण्डितानामासीदित्यत्र नास्ति कापि संशीतिः। भाष्यटीकादिनिर्माणसमये ते आलोच्यग्रन्थस्य यथाशक्ति अधिकाधिकाः मातृकाः सङ्गृह्य, शुद्धं पाठं च सम्यक्तया विविच्य तत्पश्चादेव स्वकीयां टीकां विरचयन्ति स्म।

कालिदासस्य यशस्वी टीकाकारो मल्लिनाथः कालिदासकृतीष्टीकयन्ननेकशः पाठविवेचनं करोति, पाठस्य शुद्ध्यशुद्धिविषये च स्वाभिमतं प्रकाशयति। स्थालीपुलाकन्यायेन केवलमेकमेवोदाहरणमत्र प्रस्तूयते। मेघदूतस्य द्वितीये श्लोके 'आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुम्' इति तृतीयश्चरणः। अत्र 'प्रथम' इत्यस्य स्थाने 'प्रशम' इत्यपि पाठोऽनेकासु मातृकासु अवलोक्यते। केचिट्टीकाकारा अमुमेव पाठं साधुं मन्यन्ते, किन्तु 'प्रशमदिवसे' (अर्थात् पूर्णिमादिवसे आषाढमासस्य) इति पाठो मल्लिनाथस्य नोऽभीष्टः। सञ्जीवनीटीकायां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वकीयमभिमतं पक्षं च सविस्तरं पोषयन् स लिखति — "केचिद् 'आषाढस्य प्रथमदिवसे' इत्यत्र 'प्रत्यासन्ने नभसि' इति वक्ष्यमाणनभोमासप्रत्यासत्त्यर्थं 'प्रशमदिवसे' इति पाठं कल्पयन्ति, तदसङ्गतम्, प्रथमातिरेके कारणाभावात्.......। प्रथमदिवसातिक्रमेण मेघदर्शनकल्पनायां प्रमाणाभावेन तदसम्भवात्......। इत्यादि।

महाभारतस्य ख्यातनामा टीकाकारो नीलकण्ठ उल्लिखति यद् महाभारतस्य शुद्धपाठनिर्धारणे तेन महत् काठिन्यमनुभूतम्। अतस्तेन विभिन्नेभ्यो देशेभ्यो विविधासु लिपिषु लिखिता बह्वीर्मातृका आनीताः, सर्वास्ताः सम्यगालोचिताश्च। समालोचनानन्तरं स्वविवेकपूर्वकं तेन शुद्धः प्रकृष्टश्च पाठोऽङ्गीकृतः। गुरवोऽपि तेन पाठनिर्धारणविषये पृष्टाः, प्राचीनाष्टीकाश्चापि दृष्टाः। एवं शुद्धतमं पाठं विनिश्चित्य तेन तदनन्तरमेव टीका विहिता—

बहून् समाहृत्य च भिन्नदेश्यान्
कोषान् विनिश्चित्य च पाठमग्र्यम्।
प्राचां गुरूणामनुसृत्य वाचं
प्रतन्यते भारतभावदीपः।।

आनन्दतीर्थोऽपि (१२३८-१३१७ ई.) स्वकीये 'महाभारततात्पर्यनिर्णये' पाठाविलत्वं प्रति स्वकीयमुद्गारमेवं प्रकटयति —

क्वचिद् ग्रन्थान् प्रक्षिपन्ति, क्वचिदन्तरितान्यपि।
कुर्युः क्वचिच्च व्यत्यासं प्रमादात् केचिदन्यथा।।

येन स्पष्टं प्रतिभाति यत् पाठाविलत्वमर्थात् पाठप्रक्षेपम् (अधिको, ग्रन्थकर्त्रा नैव रचितः पाठः), पाठभ्रंशं, पाठवैपरीत्यादिकं प्रति जागरूकाः प्राचीनाः पण्डिताः परिशील्यमानग्रन्थस्य शुद्धं मौलिकं च पाठं निर्धारयितुं सततं सचेष्टा आसन्। एतादृश्यस्त्रुटयस्तु प्रमादादपि भवितुं शक्नुवन्ति, दुराशयेनापि, इत्यपि ते जानन्ति स्म।

अस्मत्सविधे महेश्वरविरचितस्य 'शब्दभेदप्रकाश' इत्याख्यस्य कोशग्रन्थस्यैका वाराणसीतः समानीता मातृका विद्यते। एषा मातृका द्वे प्राचीनतरे मातृकेऽवलोक्य तयोः पाठं च परस्परं तुलयित्वा केनचित् पण्डितेन निर्मिता, यतः प्रायः प्रत्येकं पृष्ठस्य प्रान्तभागे उपरि अधस्ताद् वा पाण्डुलिपिलेखकस्य एवंविधा टिप्पणी वर्तते— "द्वितीयमातृकायां तु.......पाठः"। एवं यदि कश्चिद् अंशः पाठे त्रुटितः (Lacuna) स्यात्तदा त्रुटिस्थाने 'काकपदं' दत्त्वा त्रुटितांशं प्रान्तभागे संयोज्य, तल्लेखनानान्तरं लेखकः त्रु. इति सङ्केतं प्रददाति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतग्रन्थलेखकाः स्वकीयानामन्यमनस्कत्वात्, प्रमादाद् वा सञ्जातानां त्रुटीनां कृते पाठकानां सविधे सर्वदैव क्षमाशीला आसन्। क्षमां याचमानास्ते पुस्तकस्यान्ते लिखन्ति —

यदतिहृदयवेगाल्लेखनीभ्रान्तिभावान्-
नयनचलनसङ्गाच्छ्रोत्रशब्दावलम्बात्।
लिखितमपकृतं यन्मामकीनात् प्रमादात्
करकृतमपराधं क्षन्तुमर्हन्ति सन्तः।।

ग्रन्थः शोधयित्वा पठनीयः, लिपिकाराय दोषो न दातव्यः, अयमेव सज्जनानां स्वभावो यत् क्वचित् स्खलने जाते दुर्जना हसन्ति; किन्तु सज्जनास्त्वरितमागत्य तं समालम्बन्ते, पुनरपि चोत्थापयन्ति —

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः।।

कष्टेन लिखितस्य ग्रन्थस्य स्वकीयपुत्रवत् सस्नेहं पालनं संरक्षणं च विधेयमित्यपि ग्रन्थलेखकेन प्रार्थ्यते—

भग्नपृष्ठकटिग्रीवं तुल्यदृष्टि ह्यधोमुखम्।
कष्टेन लिखितं ग्रन्थं पुत्रवत्परिपालयेत्।।

पर्यन्ते ग्रन्थशोधकानां, पाठकानां च कृते प्राय आशीर्वचनमपि प्राप्यते संस्कृतपाण्डुलिपिषु। सर्वेषां तद्ग्रन्थसम्बन्धिनामायुष्यमारोग्यं चिरञ्जीवितां च कामयमानो विद्वान् लेखको विरमति। वयमपि अस्मच्छ्रोतृणां मङ्गलं कामयमाना अनेनैव पद्येन विरमाम—

शोधकाः पाठकाश्चैव चिरं जीवन्तु पण्डिताः।
चिरं जीवन्तु विद्वांसो ये पठन्त्विह पुस्तकम्।। इति।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीमद्भागवते दिक्कालानुसन्धानम्

डॉ.विन्ध्येश्वरीप्रसादमिश्रो विनयः

वरिष्ठप्राध्यापकः

उज्जयिनीस्थ-विक्रमविश्वविद्यालयस्य

संस्कृतप्राध्ययनकेन्द्रे (स्नातकोत्तरसंस्कृतविभागे)

❀ ❀ ❀

पपीमपि निपीय यः स्वपिति शून्यतल्पे, क्वचित्
पिपर्ति परमाणुतां ननु परार्धवत्तां ततः।
कपिं त्वथ पिपीलिकां नयति च प्लुतिं मन्दतां
प्रचण्डकलनाकलोऽवतु स कालमूर्त्तिः प्रभुः।।१।।

ध्रुवामिह तु निम्नगामथ च पूर्वगां पश्चिमा-
मुदङ्मुखमयीमुमामपि विलक्षणां दक्षिणाम्।
सकोणसरलाकृतिं क्वचन वक्रचक्रात्मिकां
दिशन्ति बहुधा जना दशतनुं तु यां तान्नुमः।।२।।

यं भान्तमनुभान्त्यन्ये युष्मदर्थास्तदाश्रिताः।
तं दिक्कालकलातीतमहमर्थमहं श्रये।।३।।

जगज्जन्माद्युपक्रम्य परसत्यान्तमुज्जगौ।
स्वरूपं ब्रह्मणो यत्तच्छ्रीमद्भागवतं भजे।।४।।

श्रीमद्भागवतं पुराणमुकुटालङ्कारभूतं पुन-
र्विद्याम्भोजवनीविकासनपरः श्रुत्यन्तभानुर्नवः।
भक्तानां हरिपादसेवनजुषां सत्तत्त्वचिन्तामणि-
स्तद्वन्दे त्रिविधं बुधैर्हृदि धृतं पुण्यं शरण्यं महः।।५।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शास्त्रेषु दर्शननिदर्शनतत्त्ववादे
दिक्कालकल्पनविधौ विविधा विकल्पाः।
तेष्वेवमस्त्यभिनवो विहितो विमर्शः
सन्तः परीक्ष्य सुतरां निगदन्तु सारम्।।६।।

ब्रह्मसूत्रकृतो भाष्यं स्वोपज्ञं रसविग्रहम्।
श्रीमद्भागवतं यस्मात्तस्माद् वेदान्तमुत्तमम्।।७।।

किन्त्वत्रास्ति पुराणत्वं बहुविद्यात्वमप्यतः।
संश्लिष्टं दर्शनं गूढं विवेक्तव्यं प्रयत्नतः।।८।।

परिश्रान्तं विमृश्यैतत्सर्वं रीत्या मयाऽनया।
ययाऽध्यात्माधिदैवञ्चाप्यधिभूतं स्फुटं भवेत्।।९।।

दिक्कालयोः स्वरूपं यद्ग्रन्थेऽस्मिन्नुपलभ्यते।
तत्राप्यस्ति त्रिधात्वं यत्प्रोक्तमाध्यात्मिकादिभिः।।१०।।

प्रत्येकं तु भिदा पश्चात्त्रिद्विरूपत्वमाश्रिता।
दृश्यते तत्त्वदृष्ट्या यत्तदग्रे वक्ष्यते क्रमात्।।११।।

अथ स्वसिद्धान्तनिरूपणात्प्राक् तैस्तैर्वादिभिरभ्युपगतं दिक्कालस्वरूपमुपस्थापनीयं सङ्क्षेपेणेति प्रथमं तार्किकाभिमतं मतमनूद्यते, यदाह केशवमिश्रः— ''कालोऽपि दिग्विपरीतपरत्वापरत्वानुमेयः संख्यापरिमाणपृथक्त्वसंयोगविभागवान् एको नित्यो विभुश्च....। स चैकोऽपि वर्तमानातीतभविष्यत्क्रियोपाधिवशाद्-वर्तमानादिव्यपदेशं लभते। कालविपरीतपरत्वापरत्वानुमेया दिक्। एका नित्या विभ्वी च। संख्यापरिमाणपृथक्त्वसंयोगविभागवती। पूर्वादिप्रत्ययैरनुमेया तेषामन्य-निमित्तासम्भवात्। पूर्वस्मिन् पश्चिमे वा देशे स्थितस्य वस्तुनस्तादवस्थ्यात् सा चैकाऽपि सवितुस्तद्देशसंयोगोपाधिवशात् प्राच्यादिसञ्ज्ञां लभते''[१]। इत्येतेषां मते, दिक्कालौ द्रव्यविशेषौ, आकाशव्यतिरिक्तौ प्रमेयत्वेनाङ्गीकृतौ' तथाऽप्यनयो-र्व्यवहारहेतुत्वमेवाङ्गीकारकारणम्। कालोऽत्र, अतीतादिव्यवहारहेतुः' कार्यावच्छिन्नं सर्वमप्यर्थजातं प्रत्यस्य निमित्तकारणता, नित्यत्वे विभुत्वेऽथ च सर्वकारणत्वेऽ-प्यस्य जडत्वं नाभ्युपगमनीयम्। एवमेव प्राच्याद्यापेक्षिक-व्यवहारमात्रसाधिका,

१. तर्कभाषा, प्रमेयनिरूपणम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कार्यमात्रे निमित्तकारणकथनान्तपरा, तद्वदेव जडरूपा च दिगपि समाम्नाता, उभयमप्यनुमानैकलब्धसत्ताकमित्यत्र नैके प्रश्ना वरीवृत्यन्ते, तद्यथा—

(क) ज्योतिर्विज्ञानमनुसृत्य पृथक् पृथग् भौतिकपिण्डेषु कालगतिर्भिन्नेति गण्यते, भवन्मते यत्परत्वापरत्वं कालस्य लक्षणं तेनास्य कथं सङ्गतिः?

(ख) ज्योतिर्विज्ञाने पुराणादिषु च 'लोकानामन्तकृत्कालः' इत्युक्त्या कालस्य कर्तृताप्युक्ता, लोकेऽपि कालविपर्ययातज्जडचेतनयोरुभयत्र तत्प्रभावं प्रत्यक्षमवगन्तुं न दुःशकमित्यत्र भवद्भिर्निरूपितो निमित्तकारणमात्रत्वाद-किञ्चित्करः कालः, कथमुक्तकालेन कर्तृरूपेण सङ्गमनीयः?

(ग) कालश्चेज्जडो विभुरेकश्च, कथमस्य ज्योतिर्विदुक्तायाः परमाण्वाद्यारभ्य द्विपरार्धपर्यन्ताया गतेः सार्थक्यम्?

(घ) पूर्वस्मिन् हायने काश्यां दृष्टचरस्य अद्य चोज्जयिन्यां साक्षात्कृतस्य 'देवदत्तस्य', 'सोऽयं देवदत्त' इति प्रत्यभिज्ञाने, सत्यपि देवदत्तरूपपिण्डैक्ये तत्तेदन्तयोरन्तरं निरन्तरमनुभूयते काश्युज्जयिनीत्यन्तरवदित्यत्रोपाधि-भेदाभावात्कथं कालद्वयस्य पार्थक्यानुभवसम्भवः, भवदभिमतकालस्यैकत्व-प्रसङ्गात्।

(ङ) दिक्कालौ सूर्यसापेक्षौ, स्वशरीरान्तःकरणसापेक्षावपि भवतः, 'मत्तो पूर्वस्यां दिशि घटः', 'घटिकाद्वयं क्षणार्धमिवानुभवामी'ति च प्रायशः सर्वस्याप्यनुभवादित्यत्र तार्किकाभ्यूहितयोः परत्वापरत्वयोः कीदृशी सङ्गतिः सूर्यपिण्डस्वशरीरादिपिण्डद्वयापेक्षितकालयोरपि द्वैतापत्तेर्दुर्वारत्वात्।

इति तार्किकमतं न क्षोदक्षममभ्युपगच्छामः। सांख्यास्तु दिशःप्रदेशे कालस्य च क्षणरूपायामुपाधावन्तर्भावः स्वीकुर्वते।

'दिक्कालावाकाशादिभ्यः'[१] इति कपिलसूत्रस्य प्रवचनभाष्ये सांख्याचार्यो श्रीविज्ञानभिक्षुस्तु दिक्कालावाकाश एवान्तर्भवयति—"तत्तदुपाधिविशिष्टाकाशमेव खण्डदिक्कालौ। यौ नित्यौ दिक्कालौ तावाकाशप्रकृतिभूतौ प्रकृतेर्गुणविशेषावेव। खण्डदिक्कालौ तत्तदुपाधिसंयोगादाकाशादुत्पद्येत"[२] इत्येवमादिभिर्वचनैः।

आपातरमणीयोऽयमुपन्यासः स्वसिद्धान्तनिरूपणावसरे निरस्यत इति पर्यायेण योगदर्शनस्याभिमतिरनुसन्धेया। भगवता पतञ्जलिना—

---

१. सांख्यसूत्रे-२।१२; २. तत्रैव, सांख्यप्रवचनभाष्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"स एष पूर्वेषामपि गुरुः कालेनाऽनवच्छेदात्"[१] इति सूत्रवर्णमुपन्यस्यता अवच्छेदकरूपात्कालस्य सङ्केतो व्यधायि। योगभाष्यकृद् भगवान् व्यासश्च—'पूर्वे हि गुरवः कालेनावच्छेद्यन्ते, यत्रावच्छेदार्थेन कालो नोपावर्तते स एष पूर्वेषामपि गुरुः' यथाऽस्य सर्गस्यादौ प्रकर्षगत्या सिद्धस्तथाऽतिक्रान्तसर्गादिष्वपि प्रत्येतव्यः"[२] इति विवृण्वन्, कालस्यावच्छेदकताम्[३], ईश्वरं व्यतिरिच्य निखिलप्रपञ्चे व्यापकताम्[४], गतिशीलताम्[५], अनादितां[६] चाभिव्यनक्ति। अत्रैव तत्त्ववैशारद्यां श्रीवाचस्पतिः, "कालस्तु शतवर्षादिः" इति वाक्येन एतस्य संख्यावत्वमपि सूचयति।

इत्थमानुषङ्गिकरीत्याऽपि योगदर्शनप्रतिपादितं कालस्वरूपं श्रीमद्भागवतप्रस्थानोक्तकालस्वरूपस्यैकदेशं परामृशतीति तत्प्रतिपादनावसरे निरूपयिष्यते, अधुना गुरुमतानुयायिनां मीमांसकचणानां हार्दमाविष्क्रियते विषयेऽस्मिन्, यथा—

परत्वमपरत्वञ्च कार्यमागन्तुहेतुजम्।
विना दिक्कालयोर्योगमन्यथा नोपपद्यते[७] ।।

इत्यमीषां मते नैय्यायिकानामिवासज्जते दिक्कालधारणा। इमेऽपि दिक्कालयोरनुमानेनैव ग्रहणमुद्भावयाञ्चक्रुः, यथा—

'चिरादिविशिष्टप्रत्ययलिङ्गः कालः'[८] इत्यत्र लिङ्गसद्भावादनुमितिजनकता, नीरूपत्वाच्चास्य प्रत्यक्षपराङ्मुखता। कालसत्त्वे प्रयोगस्त्वित्थम्—

---

१. पातञ्जलयोगसूत्रे, समाधिपादे २६ तमं सूत्रम्।
२. तत्रैव (१।२६ सूत्रे) व्यासभाष्यम्।
३. कालेनावच्छेद्यन्त इति वाक्यात् कालस्यावच्छेदकता शक्तिमत्ता चाभिव्यज्यते।
४. पूर्वे हि गुरवः कालेनावच्छेद्यन्ते यत्रावच्छेदार्थेन कालो नोपावर्तते, स एष पूर्वेषामपि गुरुरित्यनेनेश्वरातिरिक्तसर्वप्रपञ्चव्यापित्वम्।
५. नोपावर्तते, प्रकर्षगत्या....अनेन गतिशीलता।
६. अतिक्रान्तसर्गादिष्वपीत्यनेन कालस्यानादिता स्फुटीभवति।
७. गुरुसम्मताः पदार्थाः (लघुग्रन्थोऽज्ञातकर्तृकः') योगीन्द्रानन्दस्वामिसम्पादित-मानमेयोदयस्य परिशिष्टभूतः (चौखम्बाविद्याभवनम्, वाराणसी १९९६, पृ. २९७) इत्यत्र।
८. तत्रैव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१. स्थविरादौ परत्वं, तपनविप्रकर्षबुद्धिजन्यं तदनुविधायित्वात्कुविन्दपटवत्।

२. तपनपरिस्पन्दाः स्थविरशरीरसम्बद्धास्तदवच्छेदकत्वात् पटावच्छेदकमहारजतरागवत्।

३. तेषां तत्सम्बन्धस्तदाश्रयसंयुक्तद्रव्यद्वारकः प्रकारान्तरासम्भवे सति सम्बन्धत्वात् पटे महारजतरागसम्बन्धवत्। अन्यथा परत्वादिविशिष्टप्रत्ययानुपपत्तेः।

तस्मात् तपनपरिस्पन्दानां स्थविरादिसम्बन्धद्वारभूतं द्रव्यं कालः[1]।

एवमेव दिङ्लक्षणपूर्विका दिगनुमितिप्रक्रिया, यथा— इतः प्रागित्यादिविशिष्टप्रत्ययलिङ्गा दिक्।

तपनसंयोगानां मूर्त्तसम्बन्धे द्वारभूतं द्रव्यं दिक्। स्थविरादौ परत्वादेस्तपनादिक्रियाया असमवायिकारणत्वात्। इत्थमन्यत्र संयोगस्यासमवायिकारणत्वात् तेन तत्सिद्ध्यर्थं दिक्कालावाश्रयणीयौ तौ च प्रत्यक्षौ विशेषगुणरहितनित्यद्रव्यत्वान्मनोवत्।

अस्मिन् मते, परिणामपृथक्त्वसंयोगविभागाख्यचतुर्णामेव गुणानां स्वीकारात्संख्यासहितगुणपञ्चकाभ्युपयायिनां गौतमानुयायिनां मतेन किञ्चिद्व्यतिरेकः। गुरुमतावलम्बिनस्तु संख्यां पृथक्पदार्थत्वेन समामनन्तीत्यवधेयम्[2]। अत्र कौमारिलास्त्वेवं सङ्गिरन्ते—"दिक्कालाकाशाः प्रत्यक्षाः' अमनस्त्वे सति विभुत्वाद् आत्मवत्"[3]।

इमे दिक्कालयोरनुमेयत्वं साटोपमुत्कुर्वते। 'अस्यां दिश्ययं शब्दः' इत्यनुभवाच्छब्दस्य विशेषणत्वेन प्रत्यक्षत्वं मन्वानानामेषामियं वाचोयुक्तिः— "यद्यपि न स्वातन्त्र्येण दिशः श्रोत्रग्राह्यत्वम्, तथापि रावे गृह्यमाणे तद्विशेषणतया दिगपि श्रोत्रेण गृह्यते"[4] इति। एवमेव, 'अस्मिन् क्षणे मयोपलब्धो घटः' इत्याद्यनुभवप्रसङ्गेषु घटादिविशेषणत्वेन — "प्रातःकालोऽयं सायंकालोऽय"-

---

१. गुरुसम्मताः पदार्थाः (लघुग्रन्थोऽज्ञातकर्तृकः, योगीन्द्रानन्दस्वामिसम्पादितमानमेयोदयस्य परिशिष्टभूतः, चौखम्बाविद्याभवनम्, वाराणसी, १९९६, पृ. २९७) इत्यत्र।

२. द्रव्यजातिगुणाः कर्मसंख्यासादृश्यशक्तयः।
समवाय इतीमेऽष्टौ पदार्था गुरुसम्मताः।। (गुरसम्मताः पदार्थाः, पृ. २९३)

३. मानमेयोदये, प्रमेयपरिच्छेदे, द्रव्यनिरूपणम्, पृ. १७९।

४. शास्त्रदीपिकायाम्, कृष्णदास-अकादमी, वाराणसी, १९८८, पृ. १३९।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मित्यादिप्रत्ययानां सूर्योदयादिदर्शनानुगृहीतनयनजन्यत्वात्[१] कालस्यापि प्रत्यक्षवेदितामुद्भावयन्ति। भाट्टानां प्रत्यक्षलक्षणं तु विलक्षणमेव—

"न हि रूपिप्रत्यक्षमित्यस्माकं प्रत्यक्षलक्षणं किन्तु संविदेव परोक्षापरोक्षनिर्भासा जायमाना, इदं प्रत्यक्षमिदं प्रत्यक्षमिति विभजते"[२] इति।

अत्रापि तार्किकवद्दिक्कालयोरेकत्वं विभुत्वञ्चोररीकृत्योपाधिवशादेव क्रमशो निमेषादारभ्य संवत्सरान्ताः प्राच्योदीच्यादयश्च व्यावहारिकव्यपदेशाः सम्मता इति तन्नयसङ्क्षेपः[३]।

अद्वैतवेदान्तिनस्तु—दिक्कालयोरस्तित्वं नितरां प्रत्यवतिष्ठन्ते, यथाहुः श्रीचित्सुखाचार्याः—

प्रत्यक्षागोचरत्वेन परत्वादेरलिङ्गतः।
स्वरूपतोऽनिमित्तत्वादुपाधौ निष्फलत्वतः।।
दिवाकरपरिस्पन्दपिण्डसङ्गतिसम्भवात्।
व्यापिनश्चेतनादेव कथं कालः प्रसिद्ध्यति[४]।। इति।।

अपि च—

इन्द्रियानधिगम्यत्वान्नाध्यक्षं नानुमा दिशि।
वर्णैरर्थान्तरत्वेन साध्यासिद्धिर्निदर्शने[५]।।

इत्यत्र च रूपादिरहितद्रव्यत्वेन बाह्यत्वेन च बहिरन्तःकरणागोचरत्वात्प्रत्यक्षेण, परत्वादेस्तल्लिङ्गाभावादुपाधिनिष्फलत्वाच्चानुमानेनापि न कालसत्तासिद्धिः। एवमेव दिक्साधनेऽपि, इन्द्रियानधिगम्यत्वात्प्रत्यक्षस्य, अलिङ्गत्वाच्चानुमानस्याप्रसक्तित्वकारणान्न तत्सिद्धिरित्यमीषां राद्धान्तितमुपलभ्यते। श्रीमधुसूदनसरस्वतीपादा अपि—"आकाशातिरिक्ता च दिङ् नास्त्येव, कालश्च नेश्वरादतिरिच्यते, अतिरिक्ते वा दिक्कालशब्दावप्युपाधिविशेषप्रवृत्तिनिमित्तकाविति जातिशब्दावेव"[६]।

---

१. मानमेयोदये, प्रमेयपरिच्छेदे, द्रव्यनिरूपणम्, पृ. १८१।
२. शास्त्रदीपिकायाम्, पृ. ४६; ३. मानमेयोदये, पृ. १८३।
४. तत्त्वप्रदीपिकायाम्, द्वितीयपरिच्छेदे, ६०-६१ कारिके।
५. तत्रैव, द्वितीयपरिच्छेदे, ६२ कारिका।
६. श्रीमधुसूदनसरस्वतीकृत-गीताभाष्ये, १३।१२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्युक्त्या, दिश आकाशे, कालस्य चेश्वर एवान्तर्भावं स्वीकुर्वन्ति। केचिच्चाचार्या 'अविद्यैव काल' इति मन्वते, यथाहुः श्रीनृसिंहाश्रमस्वामिनोऽद्वैतदीपिकायाम्—"वस्तुतस्तु अविद्यादिरेव काल इत्युक्तम्"[१]। इति।

विशिष्टाद्वैतिनां तत्त्वमीमांसायां कालस्य द्रव्यत्वं जडत्वञ्च निरूपितम्, यथेयं वेङ्कटनाथोक्तिः सर्वदर्शनसङ्ग्रहे—

"द्रव्यं द्वेधा विभक्तं जडमजडमिति प्राच्यमव्यक्तकालौ"[२] इति। व्याकरणदर्शने निमेषादिक्रियोपहिता परमेश्वरस्य स्वतन्त्रा शक्तिरेव कालशब्देन व्यपदिश्यते। इयं कालशक्तिर्जन्मादिषड्विकाराणां निमित्तभूता एकाऽप्युपाधिवशादनेकत्वं क्रमिकत्वञ्चाश्रित्य विराजते, यदुक्तं हरिणा वाक्यपदीये—

अध्याहितकलां यस्य कालशक्तिमुपाश्रिताः।
जन्मादयो विकाराः षड् भावभेदस्य योनयः[३]।।

नास्तिकेष्वार्हता अस्तिकायत्वाभावेऽपि, गुणपर्यायवद्द्रव्यमिति[४] स्वाविष्कृतद्रव्यलक्षणाद् वर्तनाहेतुत्वगुणस्याभिव्यक्तिरूपस्य च पर्यायस्य तस्मिन् सद्भावात् कालस्य द्रव्यत्वमभ्युपयन्तीति कृतमसन्निबन्धनविस्तरेण।

अधुना ज्योतिर्विद्योपपादितकालसिद्धान्तमुपस्थाप्यते। सूर्यसिद्धान्ते कालस्य लक्षणं भेदाश्च यथा—

लोकानामन्तकृत्कालः कालोऽन्यः कलनात्मकः।
स द्विधा स्थूलसूक्ष्मत्वान्मूर्तश्चामूर्त उच्यते[५]।। इति।

अयमाशयः—अस्मिन् शास्त्रे कालो द्विधा, अखण्डदण्डायमानः शास्त्रान्तरेषु प्रसिद्धो लोकानां चेतनाचेतनानां विनाशकृदेकः, कलनात्मको व्यावहारिकः खण्डकालश्चान्यः। प्रथमः, "कालः सृजति भूतानि कालः संहरति प्रजाः" इत्युक्त्या उत्पत्तिस्थितिकृदपि सिद्ध्यति, विनाशकरत्वञ्चात्रोपलक्षणमात्रम्।

---

१. अद्वैतदीपिकायाम्, तृतीयपरिच्छेदे, पृ. ४४३, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयसंस्करणम्-१९८४।
२. सर्वदर्शनसङ्ग्रहे, रामानुजदर्शनम्, पृ. १८७, चौखम्बाविद्याभवनम्, वाराणसी, १९९४।
३. वाक्यपदीये, ब्रह्मकाण्डे, का. ३।
४. तत्त्वसूत्रे-५।३८।
५. सूर्यसिद्धान्ते-१।१० (खेमराज-श्रीकृष्णदास-वेंङ्कटश्वर-प्रेस, बाम्बे, १८९६ ई.)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्थं कालस्य कर्तृरूपताऽत्र सुतरां सम्मता। द्वितीयः कलनात्मकः, पुनर्भेद-द्वयेनोपलक्षितः स्थूलसूक्ष्मत्वान्महत्त्वाणुत्वाभ्यां वा। यः स्थूल इयत्तावच्छिन्न-परिमाणोऽसौ मूर्त्तः, सूक्ष्मस्तद्भिन्नश्चामूर्त्त इत्युच्यते ज्योतिर्विद्भिः। सूक्ष्मस्यैवामूर्तस्य त्रुट्यादिभिर्व्यपदेशो यथा—

सूच्या भिन्ने पद्मपत्रे त्रुटिरित्यभिधीयते।
तत्षष्ट्या रेणुरित्युक्तो रेणुषष्ट्या लवः स्मृतः।।
तत्षष्ट्या लीक्षकं प्रोक्तम्[1] ....।।इति।।

लीक्षकषष्टिगुणत्वेन[2] प्राणसञ्ज्ञा तत आरभ्य स्थूलत्वं मूर्त्तत्वञ्चाम्नायते, यदुक्तं तत्रैव— 'तत्षष्ट्या प्राण उच्यते' इति। अनेन क्रमेण, षट्प्राणाः पलम्, षष्टिपलान्येका नाडी, षष्टिनाड्य एकं नाक्षत्रमहोरात्रम्, त्रिंशदहोरात्राणि एको मासः, द्वादशमासा एकं मानुषं वर्षमिति व्यवहारः प्रवर्त्तते। एवञ्च दिव्यवर्षयुगचतुर्युग-मन्वन्तरक्रमेण ब्रह्मणो दिनस्थानीयस्य कल्पस्य तदनु ब्राह्मदिवसमास-वर्षादिगणनपद्धत्या ब्रह्मणोरायोरर्धभागस्य परार्धस्य परस्ताद्द्विपरार्धरूपस्य ब्रह्मणोरायुमानस्य व्यवस्थाऽत्र कल्प्यते। आगमशास्त्रेषु मायायाः पञ्चकञ्चुकेष्वन्यतम एकः परमशिवस्वरूपश्चान्यो महाकालसञ्ज्ञक इति द्विधात्वमुपलभ्यते कालतत्त्वस्येतिविस्तरभयात्प्रकृतावनुपयोगित्वान्नेह प्रतन्यते। सम्प्रति श्रीमद्भागवतमनुसृत्य दिक्कालावनुसन्धाय तल्लभ्यप्रमाणवचनैरनयोः स्वरूपं व्यवस्थाप्यते।

श्रीमद्भागवते तत्त्वनिरूपणपद्धतिः

श्रीमद्भागवते आध्यात्मिकाधिदैविकाधिभौतिकमिति तत्त्वनिरूपणस्य त्रिधात्वमुपलभ्यते, तत्र पारिभाषिकपुरुषत्रयस्वीकारात्। एतदपि व्यवहारमूलं प्रातिभासिकमेव पारमार्थिक्यां सत्तायां तु त्रयश्चैते पुरुषा वस्तुतोऽभिन्ना एव मताः। पुरुषत्रयस्य यो निरुपाधिकः साक्षी स आत्मा परमात्मा वैतेषां त्रयाणामाश्रयः, यथोक्तं द्वितीयस्कन्धे—

य आध्यात्मिकोऽयं पुरुषो सोऽसावेवाधिदैविकः।
यस्तत्रोभयविच्छेदः पुरुषो ह्याधिभौतिकः।।

---

१. सूर्यसिद्धान्ते-१।१० (खेमराज-श्रीकृष्णदास-वेंकटेश्वर-प्रेस, बाम्बे, १८९६ ई.)।

२. लीक्षकषष्टिगुणपरिमितेनेत्यर्थः। एकः प्राणः ६०-लीक्षकात्मक-१० दीर्घाक्षरोच्चारण-समकालः, आधुनिकगणनया ४ 'सेकेण्ड' इत्यात्मक इति तज्ज्ञाः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकमेकतराभावे यदा नोपलभामहे।
त्रितयं तत्र यो वेद स आत्मा स्वाश्रयाश्रयः[1] ।। इति।

अत्र विवृण्वन्ति भावार्थदीपिकाकृतः श्रीधरस्वामिनः—'योऽयमाध्यात्मिकः पुरुषश्चक्षुरादिकरणाभिमानी द्रष्टा जीवः, स एवाधिदैविकश्चक्षुराद्यधिष्ठाता सूर्यादिः। तत्रैकस्मिन्नेव द्विरूपो विच्छेदो यस्मात्स आधिभौतिकश्चक्षुर्गोलकाद्युपलक्षितो दृश्यो देहः पुरुष इति पुरुषस्य जीवस्योपाधिः......। तत्र तदा तत्त्रितयमालोचनात्मकेन प्रत्ययेन यो वेद, साक्षितया पश्यति, स परमात्मा आश्रयः''[2]।

इत्यनेन तत्त्वमीमांसायां प्रत्येकं त्रैविध्यमश्नुवान एव सन्तिष्ठतेऽस्मिन् श्रीमद्भागवताख्यवेदान्तप्रस्थाने। प्रागुक्तेष्वन्येषु शास्त्रेषु दिक्कालादीनां तत्त्वानां प्रतिपादनं क्वचित्केवलमाध्यात्मिकदृशा, क्वचिच्चाधिभौतिकदृष्ट्यैव तत्तद्वादिभिः साभिनिवेशमुपपाद्यते, स्वसिद्धान्तसरणिसङ्कीर्णतापारवश्यात्परमतं च सर्वथा तिरष्क्रियते। पुराणेष्वन्येषु प्रायः शास्त्रकृद्भिः परित्यक्ता आधिदैविकी पद्धतिरेवाश्रितेति मिथः सङ्गतिरेकवाक्यता वा कस्मिंश्चिदपि प्रसङ्गे सर्वथा खकुसुमायितैव परिदृश्यत इति न तिरोहितं तत्तद्राद्धान्तानुशीलनजुषां विदुषाम्।

श्रीमद्भागवते तु तिसृणामपि पद्धतीनां समाहारोऽधिकारभेदाद्रुचिभेदाद्वा समेषामपि समादर इत्यनतिसाधारण्यमस्य शास्त्रस्य, यथैकादशे, तत्त्वनिरूपणोपक्रमे उद्धवं प्रति विविधरीत्या तत्त्वप्रसंख्यानमुक्तवान्-भगवाञ्छ्रीकृष्णः[3], तदनन्तरं समेषामप्यौचित्यमप्याह युक्तिमत्त्वमार्षत्वञ्चोद्भावयन्, यथा—

इति नाना प्रसंख्यानं तत्त्वानामृषिभिः कृतम्।
सर्वं न्याय्यं युक्तिमत्वाद् विदुषां किमशोभनम्[4] ।। इति।

इत्थं दिशः कालस्यापि निरूपणमत्र क्वचित्तत्त्वनिरूपणात्मिकयाऽऽध्यात्मिकरीत्या क्वचिद्देवचरित्रकथात्मिकयाऽऽधिदैविकपद्धत्या कुत्रचिच्च पदार्थविवेचनात्मिकया भौतिकसरण्या बहुधा विप्रकीर्णम्।

---

१. श्रीमद्भागवते-२।१०।८-९;
२. तत्रैव 'भावार्थदीपिकाख्या' श्रीधरी टीका।
३. द्र. तत्रैव-११।२२।१-२५;
४. तत्रैव २५ तमे श्लोके।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्प्रति सम्प्रतिपाद्यते मुख्यं प्रतिपाद्यमस्मिन् दिक्कालयोः स्वरूपं भेदाः समन्वयश्च प्रतिपदं प्रमाणोपन्यासपुरस्सरम्।

श्रीमद्भागवते दिक्स्वरूपं तद्भेदाः समन्वितिश्च

अत्र दिक्प्रसङ्गाः सङ्क्षिप्ताः कथाप्रसङ्गेष्वेव च निक्षिप्ता अवलोक्यन्ते। यद्यपि तत्त्वपरिगणनायां साक्षादस्याः समुल्लेखो न दृश्यते, तथापि—

भूपातालककुब्व्योम...............।
त्रैलोक्यमासीत्सह दिग्भिराप्लुतम्[१]।
दिशः प्रसेदुः[२]
भूः खं दिशो द्यौर्विवरापयोधयः[३]।

एवमादिभिः सन्दर्भैर्दिशः पृथग्द्रव्यत्वमाकाशाच्च भिन्नत्वं सुतरामवगम्यते। वस्तुतो दिङ्नामापेक्षिकत्वं, तच्च द्विधा, ब्रह्माण्डोपलक्षितं पिण्डोपलक्षितञ्च। ब्रह्माण्डे सूर्यस्थितिमवलम्ब्य दिशां व्यवस्थितिः पिण्डे च चक्षुषी समाश्रित्य, श्रीमद्भागवते—

भूतानां छिद्रदातृत्वं बहिरन्तरमेव च।
प्राणेन्द्रियात्मधिष्ण्यत्वं नभसो वृत्तिलक्षणम्[४]।।

इत्युक्तदिशा आकाशस्यावकाशत्वं सर्वाधारत्वमेव सिद्ध्यति। अत्रापेक्षिकत्वं नापादयितुं शक्यमेकत्वाद्विभुत्वाच्च। दिशश्चापेक्षाबुद्धिसम्प्रसूता भिन्ना बह्व्यश्चेत्यत्र प्रायः सर्वत्रैव तत्प्रसङ्गे बहुवचनप्रयोगदर्शनादिति परस्तादुदाहरिष्यते। अपेक्षाबुद्धिस्तु पुरुषतन्त्रा, कदाचन मनसोऽवस्थानाद्दिग्भ्रमानुभवदर्शनात्। न पुनः कस्यचनापि क्वाप्याकाशभ्रमः समुत्पद्यत इति दिशां पृथक्त्वं वक्तुमुचितमेव।

श्रीमद्भागवते त्वस्या दिशश्चैते भेदा इत्थमुपपादयितुं शक्याः। यथा— प्रथमतया, आध्यात्मिक्याधिदैविक्याधिभौतिकीति दिशस्तिस्रो भिदाः। आध्यात्मिकी दिगपेक्षाबुद्धिरूपा सूक्ष्मा, सापि व्यष्टिसमष्टिभेदात्पुनर्द्विधात्वं भजमाना प्रतिशरीर-पिण्डकेन्द्रितत्वात्प्रतिब्रह्माण्डस्थसूर्यकेन्द्रितत्वाच्च सम्भावयितुं शक्यते। आधिदैविकी श्रोत्रेन्द्रियाधिष्ठातृदेवतारूपा, इयमपि द्वैविध्यं व्यापृण्वाना

१. श्रीमद्भागवते, १२।९।१५; २. तत्रैव-८।१८।४,१०।
३. तत्रैव-८।२०।२१; ४. तत्रैव-३।२६।३४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यष्टिसमष्टिरूपा। व्यष्टिर्जीवशरीरस्थश्रवणेन्द्रियाधिष्ठिता समष्टिश्च हिरण्यगर्भ-विग्रहस्थश्रोत्रेन्द्रियाधिष्ठानाधिष्ठिता, अनेनैव क्रमेणाधिभौतिक्यपि अधिष्ठान-(गोलक)रूपा व्यष्टिशरीरसमष्टिशरीरसन्निवेशवैलक्षण्येन द्विधैवेत्याहत्यास्याः षड्भेदाः सम्भवन्ति।

'श्रुतिः प्रत्यक्षमैतिह्यमनुमानं चतुष्टयम्'[1]।

इति स्वप्रस्थानाङ्गीकृतप्रमाणचतुष्टयस्यात्र इत्थमुपयोगः — प्रथमभेदस्य व्यष्टिरूपदिग्ग्रहणं समष्टिरूपदिग्ग्रहणञ्च प्रत्यक्षेणानुमानेन, द्वितीयस्य ग्रहणं श्रुत्या, ऐतिह्येन च तृतीयभेदगता व्यष्टिरूपा दिक्प्रत्यक्षग्राह्या, समष्टिरूपा चैतिह्यग्राह्येति चतुर्णामपि मानानामत्र सार्थक्यम्। सुखबोधाय चेदं लेखावितानम्, यथा—

श्रीमद्भागवते दिक्स्वरूपम्



---

१. श्रीमद्भागवते-११।१९।१७।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अधुना विवेच्यग्रन्थात्क्रमशो निदर्शनसन्दर्भा यथा—

१. अपेक्षाबुद्धिरूपाया आध्यात्मिक्या व्यष्टिस्वरूपम्

प्रथमस्कन्धे—

तदा तदहमीशस्य भक्तानां शमभीप्सतः।
अनुग्रहं मन्यमानः प्रातिष्ठं दिशमुत्तराम्[१]।।

इत्यत्र व्यासं प्रति स्वपूर्वजन्मवृत्तान्तं वर्णयता देवर्षिणा 'प्रातिष्ठं दिशमुत्तरामि'ति यदुक्तम्, तस्य स्वपिण्डसापेक्षं, गमनाव्यवहितपूर्वकालावस्थित-शरीरस्य वामभागमुद्दिश्य प्रातिष्ठं प्रस्थितवानहमित्यर्थः। अथ किंप्रमाणकोऽयमर्थ-श्चेदुच्यते—अत्रैवाध्याये पूर्वं बालकस्य (नारदस्य) दिगादिज्ञानराहित्यवर्णनात्। यथा—'दिग्देशकालाव्युत्पन्नो बालकः पञ्चहायनः'[२]। एवमेव—'प्राङ्निषण्णं मृडं दृष्ट्वा'[३] इत्यादीन्युदाहरणान्यप्यन्वेष्टव्यानि[४]।

२. आध्यात्मिक्या दिशः समष्टिरूपम्

'सूर्येण हि विभज्यन्ते दिशः'[५] इति श्रीमद्भागवतवचनात् सूर्याश्रितास्तद-वस्थित्या समूह्या या अपेक्षाबुद्धयस्ता भेदमिममन्वर्थयन्ति, एतन्निर्देशो विस्तरेण पञ्चमे स्कन्धे, अत्र तु प्रादेशमात्रमुदाह्रियते, यथा—'यन्मध्यगतो भगवांस्तपतां पतिस्तपन आतपेन त्रिलोकीं प्रतपत्यवभासयत्यात्मभासा स एष उदगयन-दक्षिणायनवैषुवतसञ्ज्ञाभिः[६] इति।

'एवं नवकोटय एकपञ्चाशल्लक्षाणि योजनानां मानसोत्तरगिरि-परिवर्तनस्योपदिशन्ति तस्मिन्नैन्द्रीं पुरीं पूर्वस्मान्मेरोर्देवधानीं नाम दक्षिणतो याम्यां संयमिनीं नाम पश्चाद्वारुणीं निम्नलोचनीं नाम उत्तरतः सौम्यां विभावरीं नाम तासूदयमध्याह्नास्तमयनिशीथानीति भूतानां प्रवृत्तिनिवृत्तिनिमित्तानि समयविशेषेण मेरोश्चतुर्दिशम्[७]'। विद्वद्भिः स्वयमपि विभावनीयान्यन्यान्युदाहरणानि।

---

१. श्रीमद्भागवते-१।६।१०; २. तत्रैव-१।६।८।
३. तत्रैव-४।२।८।
४. दिग्भ्रमस्य कारणमप्येतदेव, दिग्भ्रमस्य निदर्शनं श्रीमद्भागवते, यथा—
यथाऽम्भसा प्रचलता तरवोऽपि चला इव।
चक्षुषा भ्राम्यमाणेन दृश्यते भ्रमतीव भूः।। (११।२२।५३)
५. तत्रैव-५।२०।४४; ६. तत्रैव-५।२१।३।
७. तत्रैव-५।२१।७।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३. आधिदैविकी दिक् श्रोत्रेन्द्रियाधिष्ठातृदेवतारूपा

तत्र व्यष्टिरूपा प्रथमा, यथा—

'एवं गदिः कर्मगतिर्विसर्गो घ्राणो रसो दृक् स्पर्शः श्रुतिश्च'।

अत्र जीवशरीरे श्रुतिपदोपलक्षिता आधिदैविकी दिगेव समाम्नाता। अथ च—

पितृहूर्नृप पुर्याद्वार्दक्षिणेन पुरञ्जनः।
राष्ट्रं दक्षिणपाञ्चालं याति श्रुतधरान्वितः।।
देवहूर्नाम पुर्याद्वारुत्तरेण पुरञ्जनः।
राष्ट्रमुत्तरपाञ्चालं याति श्रुतधरान्वितः[१]।।

इत्यत्र पुरञ्जनोपलक्षितजीवस्य शरीरस्थश्रोत्राधिष्ठाने पितृहूर्देवहूर्नाम दक्षिण-वामकर्णयोः श्रुतधराख्यो यः प्रतिपादितः सखा, स एवाधिदैविकदिगित्यवगन्तव्यम्।

समष्टिरूपा द्वितीया—हिरण्यगर्भपदोपलक्षिते प्रजापतौ विराट्पुरुषे च श्रोत्रसञ्ज्ञया अस्या दिशोऽवस्थानमित्थं वर्णितम्—

कर्णावस्य विनिर्भिन्नौ धिष्ण्यं स्वं विविशुर्दिशः[२]।
कर्णौ च निरभिद्येतां दिशः श्रोत्रं गुणग्रहः[३]।
श्रोत्रेण कर्णौ च दिशो............[४]।
तत्कर्णयोः ककुभो द्यौश्च मूर्ध्नि[५]।
श्रोत्राद्दिशो यस्य..........[६]।
दिशश्च कर्णौ[७]।
इत्यन्येऽपि सन्दर्भा अनुसन्धेयाः।

---

१. श्रीमद्भागवते ४।२५।५०-५१; २. तत्रैव-३।६।१७।
३. तत्रैव-२।१०।२२; ४. तत्रैव-३।२६।६४।
५. तत्रैव-१२।२०।२६; ६. तत्रैव-८।५।३८।
७. तत्रैव-८।७।२६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४. आधिभौतिकी अधिष्ठान (गोलक) रूपा

तत्र व्यष्टिसमाश्रिताया दिश उदाहरणं पूर्वोदाहृतं पुरञ्जनप्रसङ्गस्य पद्यद्वयम्[१]। अपि च तत्रैव एकोनत्रिंशाध्याये पद्यमिदम्—

पितृहूर्दक्षिणः कर्ण उत्तरो देवहूः स्मृतः[२]।

अथ समष्टेरुदाहरणानि श्रीमद्भागवते, तद्यथा हि—

चत्वारि लेभेऽनुदिशं मुखानि[३]।

प्रजापतिपतिस्तन्वं तत्याज व्रीडितस्तदा।
तां दिशो जगृहुर्घोरां नीहारं यद्विदुस्तमः[४]।।

कर्णौ दिशः प्रभोः[५]।

इत्थं श्रीमद्भागवते दिक्तत्त्वमाकाशात्पृथग्रूपेणोपगम्यते तत्र तत्र संश्लिष्टम्। श्रुतयोऽपि[६] बहुशोऽस्याः सुस्पष्टं निरूपणं विदधतीति दिगपलापिनां मतं तात्त्विकं न प्रतिभाति। श्रीमद्भागवते सर्वत्र स्वीकृताः प्रथिताः प्राच्यादयो दशसंख्याका दिश एव कक्षीकृताः सर्वास्वेतासु तात्त्विकमैक्यं पूर्वोक्तदृष्टिभेदाद् व्यावहारिकं प्रातिभासिकमेव पार्थक्यमिति न जातु भ्रमितव्यम्।

श्रीमद्भागवते कालस्वरूपं, तद्भेदाः समन्वितिश्च

श्रीमद्भागवते मुख्यतया स्थलद्वये स्वप्रस्थानाभिमतानि तत्त्वानि परिगणितानीति प्राक्प्रतिपादितमेव, कालस्य तूभयत्र सन्निवेशो व्यधायि भगवता पुराणकृन्महर्षिव्यासेन, प्रथमं कपिलगीतायाम्। यथा—

महाभूतानि पञ्चैव भूरापोऽग्निर्मरुन्नभः।
तन्मात्राणि च तावन्ति गन्धादीनि मतानि मे।।
इन्द्रियाणि दश श्रोत्रं त्वग्दृग्रसननासिकाः।
वाक्करौ चरणौ मेढ्रं पायुर्दशम उच्यते।।

---

१. श्रीमद्भागवते-४।२५।५०-५१; २. तत्रैव-४।२९।१२।
३. तत्रैव-३।८।१६; ४. तत्रैव-३।१२।३३।
५. तत्रैव-१२।११।६;
६. द्रष्टव्यम्-कठोपनिषदि-२।३१, प्रश्नो. १।६, ऐतरेयोपनिषदि-१।४, २।४, छान्दोग्य. ३।२, १४।२, बृहदारण्यक. २।५।६ इत्यादि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनो बुद्धिरहङ्कारश्चित्तमित्यन्तरात्मकम्।
चतुर्धा लक्ष्यते भेदो वृत्त्या लक्षणरूपया।।
एतावानेव संख्यातो ब्रह्मणः सगुणस्य ह।
सन्निवेशो मया प्रोक्तो यः कालः पञ्चविंशकः[१]।।

इत्यत्र पञ्चविंशे पर्याये कालस्य समन्वयः। अपरत्र, एकादश-स्कन्धान्तर्वर्तिनि श्रीकृष्णोद्धवसंवादेऽपि —'गुणव्यतिकरः कालः स्वभावः सूत्रमेव च'[२]। इति कालस्याभ्युपगमो विहितः। किन्त्वत्र विविधरूपेण तत्र तत्र कालस्याविष्करणाद् भागवतप्रस्थाने किंस्वरूपकोऽयमित्यापाततो निश्चेतुं न शक्यत इति स्वोपकल्पितेन प्रमाणपुरस्सरं भेदनिर्देशद्वारेणात्र कालस्वरूपमपि व्यवस्थीयते।

श्रीमद्भागवतशास्त्रे दिग्वत्कालस्यापि मुख्यतस्त्रैविध्यमाध्यात्मिकाद्युपलक्षणेन, यथा—प्रथमम् आध्यात्मिकाधिदैविकाधिभौतिकरीत्या कालस्त्रिविधः, तदनु प्रत्येकं पारमार्थिकव्यावहारिकप्रातिभासिकसत्तानुरोधात्पुनस्त्रिविध इति सङ्कलनेन नव भेदानुपगच्छामः। सम्प्रति क्रमेण नवानामेव विशेषाभिधानानि स्वरूपाणि च निर्दिश्यन्ते, तद्यथा—

१. आध्यात्मिक इति भेदे पारमार्थिकः कालः

श्रीमद्भागवते बहुत्र कालस्य ब्रह्मापरपर्यायता भगवद्रूपता ईश्वरात्मकता च सुस्पष्टतयाऽऽम्नायते, यथैते सन्दर्भाः—

एतद्भगवतो रूपं ब्रह्मणः परमात्मनः।
परं प्रधानं पुरुषं दैवं कर्मविचेष्टितम्।।
रूपभेदास्पदं दिव्यं काल इत्यभिधीयते[३]।
योऽन्तः प्रविश्य भूतानि भूतैरत्याखिलाश्रयः।
स विष्ण्वाख्योऽधियज्ञोऽसौ कालः कलयतां प्रभुः[४]।।
कालस्येश्वररूपस्य...[५]।।

---

१. श्रीमद्भागवते-३।२६।१२-१५; २. तत्रैव-१।२२।१३।
३. तत्रैव-३।२९।३६-३७; ४. तत्रैव-३।२९।३८।
५. तत्रैव-३।२९।४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न चास्य दयितः कश्चिन्न द्वेष्यो न च बान्धवः।
आविशत्यप्रमत्तोऽसौ प्रमत्तं जनमन्तकृत्।।

यद्भयाद्वाति वातोऽयं सूर्यस्तपति यद्भयात्।
यद्भयाद्वर्षते देवो भगणो भाति यद्भयात्।।

यद्वनस्पतयो भीता लताश्चौषधिभिः सह।
स्वे स्वे कालेऽभिगृह्णन्ति पुष्पाणि च फलानि च।।

स्रवन्ति सरितो भीता नोत्सर्पत्युदधिर्यतः।
अग्निरिन्धे सगिरिभिर्भूर्न मज्जति यद्भयात्।।

नभो ददाति श्वसतां पदं यन्नियमाददः।
लोकं स्वदेहं तनुते महान् सप्तभिरावृतम्।।

गुणाभिमानिनो देवाः सर्गादिष्वस्य यद्भयात्।
वर्तन्तेऽनुयुगं येषां वश एतच्चराचरम्।।

सोऽनन्तोऽन्तकरः कालोऽनादिरादिकृदव्ययः।
जनं जनेन जनयन्मारयन्मृत्युनान्तिकम्[१]।।

अपि च, कालेनेश्वरमूर्तिना[२]।

कालस्याव्यक्तगतेर्योऽन्तर्धावति जन्तुषु[३]।
अनाद्यन्तवतानेन कालेनेश्वरमूर्त्तिना।
अवस्था नैव दृश्यन्ते वियति ज्योतिषामिव[४]।।

कालस्तु हेतुः सुखदुःखयोश्चेत्
किमात्मनस्तत्र तदात्मकोऽसौ[५]।
कालो बलीयान् बलिनां भगवानीश्वरोऽव्ययः[६]।
मध्वादिषु द्वादशसु भगवान् कालरूपधृक्।
लोकतन्त्राय चरति पृथग् द्वादशभिर्गुणैः[७]।।

---

१. श्रीमद्भागवते-३।२९।४०-४५; २. तत्रैव-३।३२।१४।
३. तत्रैव-३।३२।३७; ४. तत्रैव-१२।४।३७।
५. तत्रैव-११।२३।५६; ६. तत्रैव-१०।५१।१९।
७. तत्रैव-१२।११।३२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एभिर्वचनैरस्य भगवद्रूपता अव्यक्तमयता उत्पत्तिस्थित्यन्तकर्तृता सुतरामभिव्यज्यते। अयं कर्तृरूप इति विशेषेणावधेयम्। सर्वं खल्विदं ब्रह्मेति श्रुत्याऽस्य परमार्थता।

२. आध्यात्मिकभेदे व्यावहारिकः कालः

अद्वैतवेदान्तवद् भागवतप्रस्थानेऽपि सृष्टिलयादिप्रक्रिया व्यावहारिकी-तत्परत्वादस्यान्वर्थकता। अयं भगवत्सङ्कल्पात्मकः, सृष्टिपूर्वदशायां गुणत्रय-रूपप्रकृतेः साम्यावस्थायां भगवदिच्छया क्षोभमुत्पाद्य तेषु गुणत्रयेषु वैषम्यमादधात्यतः कारणरूपः करणरूपो वाङ्गीकर्त्तुमुचितः। श्रीमद्भागवत एतत्स्वरूपसाधकवचनान्येतानि—

कालाद् गुणव्यतिकरः[१]।

सन्नियच्छति कालेन घनानीकमिवानिलः[२]।

कालवृत्त्या तु मायायां गुणमय्यामधोक्षजः[३]।

आद्योऽवतारः पुरुषः परस्य कालः[४]।

कालमायांशयोगेन भगवद्वीक्षितं नभः[५]।

कालमायांशयोगतः[६]।

कालसञ्ज्ञां तदा देवीं बिभ्रच्छक्तिमुरुक्रमः[७]।

कालाख्ययाऽऽसादितकर्मतन्त्रः[८]।

गुणेन कालानुगतेन विद्धः[९]।

कालेन कर्मप्रतिबोधनेन[१०]।

इत्येतेषु कालस्य गुणक्षोभकत्वं भगवदिच्छारूपकरणत्वञ्चोपपादयितुं शक्येते।

---

१. श्रीमद्भागवते-२।५।२२;
२. तत्रैव-२।१०।४३।
३. तत्रैव-३।५।२६;
४. तत्रैव-२।६।४१।
५. तत्रैव-३।५।३२;
६. तत्रैव-३।५।३४,३५।
७. तत्रैव-३।६।२;
८. तत्रैव-३।८।१२।
९. तत्रैव-३।८।१३;
१०. तत्रैव-३।८।१४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३. आध्यात्मिककालभेदस्य प्रातिभासिकः प्रभेदः (विशेषद्रव्यरूपः)

प्रतिभासो नामाज्ञानस्यावरणशक्तेरुत्पादितो भ्रमविशेषः। अज्ञानदशायामेव प्रमातुः कालस्य पृथक्पदार्थरूपत्वं भगवद्व्यतिरिक्तत्वञ्चेत्यभिमतिः सम्भाव्या, अत एवात्रैतद्व्यपदेशसामञ्जस्यम्। श्रीमद्भागवतशास्त्रेऽनयाऽपि दृष्ट्या कालस्यापदेशा विशेषणानि च दृष्टिपदवीमुपयान्ति, तेषु कानिचन प्रस्तूयन्ते—

द्रव्यं कर्म च कालश्च स्वभावो जीव एव च।
वासुदेवात्परो ब्रह्मन् न चान्योऽर्थोऽस्ति तत्त्वतः[१]।।

इत्यस्मिन् पूर्वार्द्धेन प्रातिभासिकदृष्टेरनुवादं विधायोत्तरार्द्धेन तत्परिहारो विनिवेशित इति नास्ति काचन विप्रतिपत्तिः। एवमेव—

कालं कर्म स्वभावञ्च[२]।
देशतः कालतो योऽसाववस्थातः स्वतोऽन्यतः[३]।
अथैषां कर्मकर्तॄणां भोक्तॄणां सुखदुःखयोः।
नानात्वमथ नित्यत्वं लोककालागमात्मनाम्।।

इत्यारभ्य—

कालावयवतः सन्ति भावा जन्मादयोऽसकृत्[४]।।

इत्यन्तः सन्दर्भोऽवलोकनीयः।

द्वादशेऽपि—

न तस्य कालावयवैः परिणामादयो गुणाः[५]।।
शक्तयः सम्प्रलीयन्ते विवशाः कालविद्रुताः[६]।।
इति बहुत्राऽस्योपलब्धिः श्रीमद्भागवते[७]।

एतत्त्रयमाध्यात्मिककालस्य प्रभेदरूपम्, आत्मानमधिकृत्य तात्त्विकममूर्तमव्यक्तविभुरूपमवलम्ब्यैतस्य प्रसरस्तस्मादस्मत्कृत 'आध्यात्मिक' इति व्यपदेशो नोपालम्भनीयः।

---

१. श्रीमद्भागवते-२।५।१४;		२. तत्रैव-२।५।२१।
३. तत्रैव-३।७।५;		४. तत्रैव-११।१०।१४,१६।
५. तत्रैव-१२।४।१९;		६. तत्रैव-१२।४।२२।
७. अन्यदपि द्रष्टव्यम्, श्रीमद्भा. ३।११।३७, ६।१।४२, ६।१।४७, ७।२।४१, ७।२।५२, ७।२।५६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४. आधिदैविकभेदे पारमार्थिक इति प्रथमः प्रभेदः

पौराणिकदेवशास्त्रे प्रत्येकं वस्तुजातं तत्तदधिष्ठातृदेवता दिव्यरूपेण व्याप्नोति, देवतायाः सैषा मूर्त्तिर्भावगम्या स्वर्गादिलोकस्थिता उपासनार्हा। श्रीमद्भागवतमहापुराणे अनयाऽपि दृष्ट्या उक्तपारमार्थिकादिभेदत्रयेण सह सङ्कलय्य कालमीमांसा विन्यस्ता, अत्र क्रमशः सङ्क्षेपेणैव तदुद्भाव्यते—

सोऽयमद्य महाराज भगवान् भूतभावनः।
कालरूपोऽवतीर्णोऽस्यामभावाय सुरद्विषाम्[1]।।

कालात्मना भगवता शक्रदर्पं जिघांसता[2]।

दुरत्ययः काल उपात्तदण्डः[3]

त्वमप्रमत्तः सहसाऽभिपद्यसे
क्षुल्लेलिहानोऽहिरिवाखुमन्तकः।
स एव कालेन दुरत्ययेन ते...[4]।

भगवाञ्ज्ञातसर्वार्थ ईश्वरोऽपि तदन्यथा।
कर्त्तुं नैच्छद् विप्रशापं कालरूप्यन्वमोदत[5]।।

नस्योतगाव इव यस्य वशे भवन्ति
ब्रह्मादयस्तनुभृतो मुहुरर्द्यमानाः।
कालस्य ते प्रकृतिपूरुषयोः परस्य
शं नस्तनोतु चरणः पुरुषोत्तमस्य[6]।।

कालो गभीररय उत्तमपूरुषस्त्वम्......[7]।

एको नारायणो देवः पूर्वसृष्टं स्वमायया।
संहृत्य कालकलया कल्पान्त इदमीश्वरः।।
एक एवाद्वितीयोऽभूदात्माधारोऽखिलाश्रयः।
कालेनात्मानुभावेन साम्यं नीतासु शक्तिषु[8]।।

---

१. श्रीमद्भागवते-१।१३।४८;
२. तत्रैव-१०।२४।३१।
३. तत्रैव-१०।२७।६;
४. तत्रैव-१०।५१।५०-५१।
५. तत्रैव-११।१।२४;
६. तत्रैव-११।६।१४।
७. तत्रैव-११।६।१५;
८. तत्रैव-११।९।१५-१६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भ्रूभङ्गमात्रेण हि सन्दिधक्षोः
कालात्मनो यस्य तिरोभविष्यति[१]।

विष्णौ त्र्यधीश्वरे चित्तं धारयेत्कालविग्रहे।
स ईशित्वमवाप्नोति क्षेत्रक्षेत्रज्ञचोदनाम्[२]।।

कालः कलयतामहम्[३]।

कालो देशः क्रिया कर्त्ता करणं कार्यमागमः।
द्रव्यं फलमिति ब्रह्मन् नवधोक्तोऽजयो हरिः[४]।।

इति सर्वत्र चिन्मयविग्रहवति भगवति श्रीविष्णौ तदवतारमूर्तौ श्रीकृष्णे च, कालत्वभावना कृता। भगवतः श्रीविग्रहस्य चिद्घनरूपत्वादथ च मायाविरहितत्वाद् दृष्टेरस्याः पारमार्थिकत्वम्, अत्रापि कालरूपो भगवान् सृष्टिस्थितिसंयमनकृद् दण्डपाणिः कर्तृरूपः किन्त्वत्र लीलामयत्वान्मूर्तत्वादाधिदैविकी सञ्ज्ञेति तद्रहस्यज्ञैरनुमोदनीयमेवास्मन्मतम्।

५. आधिदैविकभेदे व्यावहारिको भेदो विष्णुचक्रसुदर्शनात्मकः करणरूपः

श्रीमद्भागवते यत्र भगवच्चक्रस्य सुदर्शनस्य कालसञ्ज्ञा व्यपदिष्टा, तत्र आधिदैविकी व्यावहारिकी दृष्टिरेवोद्भावनीया पुराणकर्त्तुः श्रीद्वैपायनमहर्षेः। भगवतः श्रीविग्रहे तस्यायुधौ च भेदाभावाद् यद्यपि तात्त्विकी भिदाऽत्र नैव सङ्गच्छते, तथापि स्वयमेव कर्तुमकर्तुं समर्थो विग्रहवान् भगवान् हरिः लीलादृष्ट्या दुष्टानां संहारे स्वायुधं सुदर्शनमपेक्षत एव। निदर्शनानि तु—

'विष्णोश्चक्रात्परमाण्वादि द्विपरार्धापवर्गकालोपलक्षणा...कालचक्रं निजायुधम्'[५]।

'यस्यैकं चक्रं द्वादशारं षण्णेमित्रिणाभिसंवत्सरात्मकं समामनन्ति तस्याक्षो....'[६]।

१. श्रीमद्भागवते-९।४।५३; २. तत्रैव-११।१५।१५।
३. तत्रैव-११।१६।१०; ४. तत्रैव-१२।११।३१।
५. तत्रैव-५।१४।२९; ६. तत्रैव-५।२१।१३-१४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अजस्य चक्रं त्वजयेर्यमाणं
मनोमयं पञ्चदशारमाशु।
त्रिणाभिविद्युच्चलमष्टनेमि
यदक्षमाहुस्तमृतं प्रपद्ये[1]।।
चक्रं युगान्तानलतिग्मनेमि
भ्रमन् समन्ताद् भगवत्प्रयुक्तम्[2]।

एकस्मिन् स्थले कालस्वरूपमिदं शार्ङ्गधनुरित्यप्युक्तम्, यथा— कालरूपं धनुः शार्ङ्गमिति[3]।

६. आधिदैविककक्षायां प्रातिभासिकः कालः सूर्यात्मकः

सूर्यमण्डलस्याधिष्ठाता कश्यपपुत्रत्वेन पुराणेषु प्रथितो विवस्वान्, भगवतो नारायणस्य प्रातिभासिक्यधिदैवतमूर्त्तित्वेन स्वीकृत इत्यस्मादेव सूर्यनारायणेत्यादि तस्य सञ्ज्ञा सङ्घाघटीति, सन्ध्याद्याह्निककृत्येषु गायत्र्यर्थरूपेण च "ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायण" इत्यसौ प्रत्यहमुपास्यते। एवमेवास्य मण्डलमपि कालमानोपलक्षणीकृतं कार्यरूपम्, यथाह मैत्रायणी-श्रुतिः— 'सूर्यो योनिः कालस्य'[4] इति वस्तुतोऽमूर्ते काले सूर्यगतिघटितायनादिमानजातं प्रातिभासिकमेव, अतोऽस्माभिः श्रीमद्भागवतोक्ता आदित्यसन्दर्भाः कालस्याधिदैवतकक्षायां प्रातिभासिकत्वेनाङ्गीकृतास्तदनुसृत्य एतान्युदाहरणान्युपन्यस्यन्ते, यथा—

"ॐ नमो भगवते आदित्यायाखिलजगतामात्मस्वरूपेण कालस्वरूपेण चतुर्विधभूतनिकायानां ब्रह्मादिस्तम्बपर्यन्तानामन्तर्हृदयेषु बहिरपि चाकाश इवोपाधिना व्यवधीयमानो भवानेक एव क्षणलवनिमेषावयवोपचितसंवत्सरगणेनापामादान-विसर्गाभ्यामिमां लोकयात्रामनुभवति[5]"।

अपि च—

एता भगवतो विष्णोरादित्यस्य विभूतयः।
द्वादशस्वपि मासेषु देवोऽसौ षड्भिरस्य वै[6]।।

---

१. श्रीमद्भागवते-८।५।२८;
२. तत्रैव-६।८।२३।
३. तत्रैव-१२।११।१५;
४. मैत्रायण्युपनिषदि (षष्ठप्रपाठके)।
५. श्रीमद्भा. १२।६।६७;
६. तत्रैव-१२।११।४५-४६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्यन्यान्यपि यथायथमनुसन्धेयानि[१]। आधिदैविकं त्वस्य ग्रहर्क्षतारामयमाधिदैविक[२] इति शुकोक्त्या तत्रैवाम्नायते।

आधिभौतिकः कालः—अस्याप्युक्तपूर्वास्त्रयो भेदाः—आधिभौतिकपारमार्थिकः, आधिभौतिकव्यावहारिकः, आधिभौतिकप्रातिभासिकश्चेति प्रथमं वत्सरपञ्चकात्मकः कर्तृरूपो, द्वितीयः परमाण्वाद्यारभ्य द्विपरार्धान्तःकरणरूपस्तृतीयो मनःकल्पनोद्भावितो यादृच्छिकः प्रत्यन्तःकरणभिन्नः कार्यरूपः। अस्यान्तिमस्य च दिव्यादिव्यत्वेन पुनर्भेदद्वयीति प्रकरणसङ्क्षेपः, विवरणं तु यथा—

७. आधिभौतिकपारमार्थिकः कालः

श्रीमद्भागवते संवत्सराद्यात्मकस्य कालस्य भौतिकत्वेऽपि भगवन्मूर्तित्वमुपपादितम्, यथा—

यः सृज्यशक्तिमुरुधोच्छ्वसयन् स्वशक्त्या
पुंसोऽभ्रमाय दिवि धावति भूतभेदः।
कालाख्यया गुणमयं क्रतुभिर्वितन्वं-
स्तस्मै बलिं हरत वत्सरपञ्चकाय[३]॥

अत्र च भगवती श्रुतिरपि— "द्वे वाव ब्रह्मणो रूपे कालश्चाकालश्चाथ यः प्रागादित्यात्सोऽकालोऽकालोऽकलोऽथ य आदित्याद्यः स कालः सकलः। सकलस्य वा एतद्रूपं यत्संवत्सरः। संवत्सरात्खल्वेमाः प्रजाः प्रजायन्ते संवत्सरेणेह वै जाता विवर्धन्ते संवत्सरे प्रत्यस्तं यान्ति, तस्मात्संवत्सरो वै प्रजापतिः"[४]। इति।

अत्रत्यः संवत्सरो वत्सरपञ्चकस्योपलक्षकः। वत्सरपञ्चकञ्च श्रीमद्भागवते—

संवत्सरः परिवत्सर इडावत्सर एव च।
अनुवत्सरो वत्सरश्च विदुरैवं प्रभाष्यते[५]॥

एतेषां संवत्सरादीनां मिथो भेदिका आदित्यस्य मन्दमध्यशीघ्रात्मिकाश्च गतयो यथोक्तं तत्रैव—"अथ च यावन्नभोमण्डलं सह द्यावापृथिव्योर्मण्डलाभ्यां कार्त्स्न्येन सह भुञ्जीत तं कालं संवत्सरं परिवत्सरमिडावत्सरमनुवत्सरं वत्सरमिति भानोर्मान्द्यशैघ्र्यसमगतिभिः समाम्नन्ति"[६] इति।

---

१. द्र.-श्रीमद्भा. ५।२०।३०, पञ्चमस्कन्धस्य एकोनविंशोऽध्यायो विंशतिप्रभृत्यध्यायाश्च।
२. श्रीमद्भा. ५।२३।९; ३. तत्रैव-३।११।१५।
४. मैत्रायण्युपनिषदि-६।१५; ५. श्रीमद्भागवते-३।११।१४।
६. तत्रैव-५।२२।७।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

८. आधिभौतिकव्यावहारिककालः

श्रीमद्भागवते ज्योतिर्विदां पद्धतिमाश्रित्य परमाण्वाद्यारभ्य द्विपरार्धपर्यन्तं यस्याकलनं कृतमत एवासौ भौतिको व्यावहारिकश्चेति व्यपदिश्यमानः कालभेदोऽस्मदुपकल्पितस्तस्य मूलोद्धरणद्वारेणैव विवृतिरुपस्थाप्यते, सङ्क्षेपधिया प्रकरणस्य सुगमत्वादिति विशेषस्तु टीकाग्रन्थैरवगन्तव्यः—

चरमः सद्विशेषाणामनेकोऽसंयुतः सदा।
परमाणुः स विज्ञेयो नृणामैक्यभ्रमो यतः।।

सत एव पदार्थस्य स्वरूपावस्थितस्य यत्।
कैवल्यं परममहानविशेषो निरन्तरः।।

एवं कालोऽप्यनुमितः सौक्ष्म्ये स्थौल्ये च सत्तम।
संस्थानभुक्त्या भगवानव्यक्तो व्यक्तभुग्विभुः।।

स कालः परमाणुर्वै यो भुङ्क्ते परमाणुताम्।
सतोऽविशेषभुग्यस्तु स कालः परमो महान्।।

अणुर्द्वौ परमाणू स्यात्त्रसरेणुस्त्रयः स्मृतः।
जालार्करश्म्यवगतः खमेवानुपतन्नगात्।।

त्रसरेणुत्रिकं भुङ्क्ते यः कालः स त्रुटिः स्मृतः।
निमेषस्त्रिलवो ज्ञेय आम्नातस्ते त्रयः क्षणः।।

क्षणान् पञ्च विदुः काष्ठां लघुता दश पञ्च च।
लघूनि वै समाम्नाता दश पञ्च च नाडिका।
ते द्वे मुहूर्तः प्रहरः षड्यामः सप्त वा नृणाम्।।

द्वादशार्धपलोन्मानं चतुर्भिश्चतुरङ्गुलैः।
स्वर्णमाषैः कृतच्छिद्रं यावत्प्रस्थजलप्लुतम्।।

यामाश्चत्वारश्चत्वारो मर्त्यानामहनी उभे।
पक्षः पञ्चदशाहानि शुक्लः कृष्णश्च मानद।।

तयोः समुच्चयो मासः पितॄणां तदहर्निशम्।
द्वौ तावृतुः षडयनं दक्षिणं चोत्तरं दिवि।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अयने चाहनी प्राहुर्वत्सरो द्वादशः स्मृतः।
संवत्सरशतं नृणां परमायुर्निरूपितम्।।
ग्रहर्क्षताराचक्रस्थः परमाण्वादिना जगत्।
संवत्सरावसानेन पर्येत्यनिमिषो विभुः।।इति।

मानुषोपभोग्य इतः परं दिव्यवर्षादारभ्य ब्रह्मणोरायुमानं द्विपरार्धं यावद्गणनाप्रायः सर्वत्र पुराणेषु ज्योतिर्ग्रन्थेषूपलब्धा सा देवादीनां ब्रह्मणश्चेति विस्तरभिया नेह प्रतन्यते।

श्रीमद्भागवते अध्यात्मपारोक्ष्यपद्धत्या अयमेव कालः पुरञ्जनकथायां चण्डवेग[1] इति नाम्ना श्रीकृष्णकथायाञ्च 'कालयवन'[2] (जवनो वेगवान् काल) इति नाम्ना च लक्षितो भगवद्व्यासपादैः।

आधिभौतिकः प्रातिभासिकः—कालस्यैकाऽभिव्यक्तिर्व्यक्तिवैशिष्ट्यमवलम्बमानाऽप्यनुभूयते तत्तदवसरेषु सर्वैरप्यस्मदादिभिरिति प्रागुक्तमप्यस्माभिः। यथा, प्रियजनप्रियवस्तुसंयोगरूपसुखे बंहीयानपि कालः साक्षिचैतन्यस्य सुखानुभवनिमज्जनोत्थवृत्तिरूपताताटस्थ्यात्कदाचिदल्पीयाननुभूयते क्वचिच्च प्रियवियोगादिजन्यदुःखप्रतीक्षादिप्रसङ्गेष्वल्पीयानपि निमेषो युगायितमिवासह्यतामापद्यत इत्ययं मानसोत्थः प्रातिभासिककालो भौतिकत्वावच्छिन्नः।

अस्यापि भेदद्वयी समुपकल्पयितुमुचिता पुराणकृन्निबन्धनमनुसृत्य। तत्र भगवल्लीलारूपस्वजनविमोहिनी योगमायाजन्या प्रथमा, भगवद्वैमुख्यकारिण्यविद्योत्था द्वितीया, पर्यायेण निदर्शनानि—

(क) भगवल्लीला(योगमाया)जन्या कालस्य प्रातिभासिकी कालप्रतीतिः

यथा ब्रह्मविमोहलीलाऽवसरे श्रीकृष्णसखायो गोपा वर्षमेकं क्षणार्धमिति भावयाञ्चक्रुः —

एकस्मिन्नपि यातेऽब्दे प्राणेशं चान्तरात्मनः।
कृष्णमायाहता राजन् क्षणार्धं मेनिरेऽर्भकाः।।

---

१. श्रीमद्भागवते, चतुर्थे स्कन्धे २७,२८ इत्यध्यायौ द्रष्टव्यौ।
२. तत्रैव दशमस्कन्धे, ५१ तमोऽध्यायोऽध्येयः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किं किं न विस्मरन्तीह मायामोहितचेतसः।
यन्मोहितं जगत्सर्वमभीक्ष्णं विस्मृतात्मकम्[१]।।

अत्र कृष्णमायेति शब्दव्याख्याने वंशीधराचार्याः, यथा— 'योगमायैव बहिरङ्गमायात्वेनात्र ज्ञेया, अतो भगवदिच्छाबलायास्तस्यास्तादृशेष्वपि मोहनत्वं घटत एवेति भावः'[२]।

एवमेव, रासपञ्चाध्याय्यां कल्पपर्यन्ताया रजन्या गोपिकाभिरप्रतीतिरन्ये च प्रसङ्गा ऊहनीयाः।

(ख) अविद्योत्था प्रातिभासिकी कालप्रतीतिः

यथाऽविद्यावशगः पुरञ्जनः प्रमदोपलालननिरतो महान्तमपि कालं पराक्रान्तं नानुभूतवान्—

तयोपगूढः परिरब्धकन्धरो रहोनुमन्त्रैरपकृष्टचेतनः।
न कालरंहो बुबुधे दुरत्ययं दिवानिशेति प्रमदापरिग्रहः[३]।।

इत्थं श्रीमद्भागवते कालतत्त्वस्यानुसन्धानमस्माभिर्यथामति प्रत्यपादि विद्वज्जनमनोमोदाय, अधुना पूर्ववत्तस्य तस्य कालभेदस्य तेन तेन च प्रमाणेन ग्राहकताऽप्युपपाद्यते, तद्यथा—

१. आध्यात्मिककालस्य— श्रुत्यैतिह्ये।

२. आधिदैविकस्य— ऐतिह्यं योगजप्रत्यक्षञ्च।

३. आधिभौतिकस्य— परत्वापरत्वाद्युपाधिलिङ्गेनानुमानमात्रम्।

झटित्यवबोधसम्पादनाय एतस्यापि रेखाचित्रमित्थं प्रस्तवीमहि, यथा—

---

१. श्रीमद्भागवते-१०।१४।४३-४४।

२. तत्रैव, श्रीभावार्थदीपिकाप्रकाशः।

३. तत्रैव-४।२७।३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीमद्भागवते कालतत्त्वम्



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रदर्शितप्रकारकाणां दिक्कालभेदानां तात्त्विकसमन्वयः

दशलक्षणात्मिकाब्रह्मविद्याऽपरपर्यायः श्रीमद्भागवतग्रन्थः।

सर्ववेदान्तसारं यद् ब्रह्मात्मैकत्वलक्षणम्।
वस्त्वद्वितीयं तन्निष्ठं कैवल्यैकप्रयोजनम्[1]।।

इत्युपसंहारोक्त्याऽस्याद्वैतपरत्वेऽपि समेषां वेदान्तप्रस्थानानामभ्यर्णत्वं प्रत्यपीपदद् भगवान् कृष्णद्वैपायनो व्यासः, अथ च पुनस्तत्रैव—

सर्ववेदान्तसारं हि श्रीभागवतमिष्यते।
तद्रसामृततृप्तस्य नान्यत्र स्याद्रतिः क्वचित्।।

इत्युपश्लोकनभङ्ग्या भगवता तेनैव पुराणमुकुटमणेरस्य '**रसो वै सः**' इति श्रुत्युपलक्षितब्राह्मरसपरत्वमप्युपवर्णितमित्यत्र नैकेषां दार्शनिकपौराणिकादि-राद्धान्तानां तत्त्वज्ञानोत्थभगवद्भक्त्यनुगुणं समन्वयश्चकास्तीत्युपक्रम एवास्माभिः प्रादर्शि। एवं रीत्या यद्यप्यत्र दिक्कालयोः स्वरूपविषये वैविध्यं वरीवर्त्यथापि तात्त्विकदृष्ट्या संसृतेरवास्तविकत्वात्सर्वोऽपि भेदप्रपञ्चः वस्तुरूपिणं परमसत्य-पदेनोपलक्षितं श्रीकृष्णाख्यं भगवन्तं परं ब्रह्मैव वाऽन्वञ्चति समन्वेति च। अधिकारिभेदाद्रुचिभेदाद्दर्शनान्तरेषूपक्लृप्तायां तत्त्वमीमांसायां पृथग्द्रव्यरूपेण पठिता दिक्कालादयोऽत्र व्यावर्णितास्तत् तद्रीत्या, श्रीमद्भागवतदृष्ट्या तु—

मायामात्रमिदं राजन् नानात्वं प्रत्यगात्मनि।
यथा जलधरा व्योम्नि भवन्ति न भवन्ति च।।
ब्रह्मणीदं तथा विश्वमवयव्युदयाप्ययात्[2]।।

इति ब्रह्मैव सद्वस्तु दिगपरिच्छेद्यात् कालत्रयानवच्छिन्नत्वाच्चेति सर्वमपि समञ्जसम्।

शं बोभवीतु भुवने नववत्सरेऽस्मिन्,
राष्ट्रञ्च धर्मनिरतं बिभृयात्समृद्धिम्।
गावो विभान्तु बहुदुग्धभराः सवत्साः,
सन्तः सदैव सुखिनो विचरन्तु लोके।।इति।।

●

---

१. श्रीमद्भागवते-१२।१३।१२। २. तत्रैव-१२।४।२५-२६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदरक्षणं नाम वेदार्थानुशीलनम्

डॉ. राममूर्तिचतुर्वेदी

वेदविज्ञानसंकायाध्यक्षः
महर्षिमहेशयोगीवैदिकविश्वविद्यालयस्य
जबलपुरम् (मध्यप्रदेशः)

❀ ❀ ❀

इह भारतभूमौ साक्षात्कृतधर्माणां तपःपूतचरितानामृषीणां समाधिसमनुभूतविषयो विशालो विमलश्च शब्दराशिः "वेद" इति ज्ञायते।

भारतीयवाङ्मये वेदानां स्थानमतीवमहत्त्वपूर्णमस्ति, सम्प्रत्यनेनेदं वक्तुं शक्यते, यदिदानीं वेदराशिं प्रति न केवलं भारतीयानामपि तु वैदेशिकानामपि मनांसि भूयोभूय आकृष्टानि दृश्यन्ते, अतो वेदा न केवलं भारतीयसाहित्येष्वपि तु वैश्विकवैभवेषु गौरवपूर्णं स्थानं लभन्ते। विश्वस्मिन् विश्वे सर्वविधस्य धर्मस्य मूलस्रोतांसि सनातनवैदिकधर्मस्य भारतीयसंस्कृतेश्चाधारभूता वेदा वर्त्तन्ते। तद्यथा—

वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च।।

यः कश्चित्कस्यचिद्धर्मो मनुना परिकीर्तितः।
स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः।। (मनुस्मृतिः- २।६-७)

लौकिकवस्तूनां दर्शनाय यथा नेत्रस्यावश्यकता भवति, तथैव अलौकिकतत्त्वानां परिज्ञानाय वेदरूपं सनातनं चक्षुर्नितरामावश्यकीयते। तद्यथा—

पितृदेवमनुष्याणां वेदश्चक्षुः सनातनम्।
अगम्यं चाप्रमेयञ्च वेदशास्त्रमिति स्थितिः।। (मनुस्मृतिः - १२।९४)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋग्वेदभाष्यभूमिकायां सायणाचार्येणापीदं प्रतिपादितं यद् वेदो हि मानवानामिष्टप्राप्तेरनिष्टपरिहारस्य चालौकिकमुपायं बोधयति, अपि च य उपायः प्रत्यक्षानुमानाभ्यां दुर्बोध्योऽविज्ञेयश्च भवति सोऽपि वेदेन सुतरां बोध्यते। तद्यथा—

इष्टप्राप्तिरनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति, स वेदः। अपि च—

प्रत्यक्षेगानुमित्या वा यस्तूपायो न बुध्यते।
एनं विदन्ति वेदेन तस्माद्वेदस्य वेदता।।

प्रत्यक्षानुमानोपमानैर्यस्तूपायो ज्ञातुं न शक्यते, तदलौकिकोपायो वेदेनैव परिज्ञातुं शक्यते। तद्यथा—'ज्योतिष्टोमेन स्वर्गकामो यजेत्, न कलञ्जं भक्षयेत्' इत्यनयोरेकत्र विधिः, अपरत्र निषेधो वेदोपदिष्टः। ज्योतिष्टोमयागस्य स्वर्गरूपं फलं प्रति कारणता न प्रत्यक्षविषया नाप्यनुमातुं शक्या, एवमेव कलञ्जभक्षणाभावेन अनिष्टपरिहारोपलब्धिर्जायत इति तार्किकशिरोमणिरपि नैवानुमातुं शक्नोति, तथापि वेदेन विधिनिषेधाभ्यामिष्टप्राप्तेरनिष्टपरिहारस्य चालौकिकोपायो बोध्यते। अत एव वेदा आर्यजातेः सर्वस्वं मन्यन्ते। भारतीया संस्कृतिः, भारतीये ज्ञानविज्ञाने चेति सर्वं वेदानेवाधारीकृत्य प्रवर्तते। एतादृशः शब्दराश्यात्मको वेदोऽद्यापि भारतेऽस्तीत्येवं स्वीयं गौरवं समग्रे जगति वयं समुद्घोषयितुं प्रभवामः।

वेदानां नित्यत्वमपौरुषेयत्वञ्च

पुरा गौतम-कपिल-कणाद-व्यास-जैमिनि-प्रभृतयो पारदृश्वानो महर्षयो विभिन्नदृष्ट्या वेदं निरूपयामासुः। तत्र न्यायवैशेषिकमतप्रतिष्ठापयितारो गौतम-कणादयो ''वेदम्'' ईश्वरीयवाक्यं नित्यञ्च मन्वते। तदनुसारेण— ''मन्त्रायुर्वेद-प्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात्'' (न्यायसूत्रम् २।१।६८)' 'तद्वचना-दाम्नायस्य' (वै.सू. १।१।३)' 'बुद्धिपूर्वो वाक्यकृतिर्वेदे' (वै.सू. ६।१।१) इत्यादिभिः सूत्रैर्वेद ईश्वरप्रणीतत्वात् पौरुषेयः, तस्य नित्यत्वान्नित्यश्चेति। न्यायसूत्र-भाष्यकारेण वात्स्यायनेनेदं प्रत्यपादि यद् महाप्रलये नित्यः सर्वज्ञश्च परमेश्वरः स्वात्मनि वेदान् निलीय सृष्ट्यादौ स्वयमेव वेदाध्ययनसम्प्रदायं प्रवर्तयति, अत एव नित्यस्य परमेश्वरस्य बुद्धिपूर्वकप्रयासजन्यप्रवर्तकत्वाद् वेदः पौरुषेयो नित्यश्चेति मन्यते। परं सांख्यवेदान्तमीमांसादर्शनप्रवर्तकाः कपिलव्यासजैमिनिप्रभृतयो महर्षयो वेदानां नित्यत्वमपौरुषेयत्वञ्च स्वीकुर्वन्ति। तदनुसारम् ऋग्वेदादयस्तस्य महतो भूतस्य परमेश्वरस्य निःश्वासरूपा वर्तन्ते। तद्यथा— ''तस्यैतस्य महतो भूतस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निःश्वसितमेतद् यद् ऋग्वेदः'' इति। निःश्वासो नाम मुखाद्बहिर्निर्गमनीयो वायुः, प्रश्वासो नाम अन्तःप्रविश्यमाणो वायुः, यथा मनुजस्यापि निःश्वासप्रश्वासे स्वत एवाविर्भूयेते, न तस्योत्पादने पुरुषेण कश्चित्प्रयासः क्रियते, तद्वद् निःश्वासरूपस्य वेदस्याप्याविर्भावे परमेश्वरस्य न कश्चिदायासविशेषो जायते, किञ्च वेदेषु यथार्थज्ञानोत्पादिकायाः शक्तेर्विद्यमानत्वाद् वेदानां स्वतः प्रामाण्यं जायते, यथा हि सांख्यसूत्रमुपन्यस्यति—''निजशक्त्यभिव्यक्तेः स्वतःप्रामाण्यमिति, (सा.सू.५।५१)।

वेदानां नित्यत्वं श्रुतिवाक्यानुशीलनेनाप्यवगन्तुं शक्यते, तद्यथा—'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै। तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये''। (श्वेताश्वतरोपनिषदि - ६।१८) अत्र मन्त्रगतवचनेनेदं विज्ञायते यद् विधात्रा परमेश्वरेण सर्वतः प्रथमं ब्रह्मा विधीयते, न च वेदा विधीयन्ते, किन्तु नित्यसिद्धा एव ते वेदा ब्रह्मणो हृदि प्रहीयन्ते — प्रेष्यन्ते। एतेन वेदानां ब्रह्मण आविर्भावात् पूर्वमपि विद्यमानता प्रमाणीक्रियते, यतो हि पूर्वतो विद्यमानानामेव प्रेषणं सम्भवति। परमेश्वरेण ब्रह्मविधानवद् यदि वेदानामपि विधाननिर्माणप्रसङ्गः स्यात्, तर्हि मन्त्रे क्वचिद् ब्रह्मनिर्माणप्रसङ्गवद् वेदनिर्माण-प्रसङ्गोऽपि वक्तव्य एव स्यात्।

वेदैरेव ब्रह्मा सृष्टिं करोतीति प्रसिद्धिः श्रुतिस्मृतिपुराणेषूपलभ्यते, अत एव ''भूरिति व्याहरत् तस्माद् भुवमसृजत्'' इत्यादिभिः श्रुतिभिः शब्दव्याहरणपूर्विका सृष्टिः श्रूयते। तद्यथा—

सर्वेषां तु नामानि कर्माणि च पृथक् पृथक्।
वेदशब्देभ्य एवादौ पृथक्संस्थाश्च निर्ममे।। (मनु. १।२)

यथा लोके कुलालो घटशब्देन घटार्थं कम्बुग्रीवादिमन्तं स्मृत्वा दण्डचक्रादिव्यापारेण तं निर्माति, तथैव विधाता ब्रह्माऽपि तैस्तैः शब्दै-स्तांस्तानर्थान् संस्मृत्य यथायथं समग्रं जगत् सृजति। तद्यथा—

चातुर्वर्ण्यं त्रयो लोकाश्चत्वारश्चाश्रमाः पृथक्।
भूतं भव्यं भविष्यञ्च सर्वं वेदात् प्रसिद्ध्यति।।
शब्दः स्पर्शश्च रूपञ्च रसो गन्धश्च पञ्चमः।
वेदादेव प्रसूयन्ते प्रसूतिगुणकर्मतः।। (मनु. १२।९७-९८)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदाङ्गानां वेदरक्षकत्वम्

पुरा इह भारते वेदानामध्ययनमेव भारतीयानां मुख्यं शिक्षणमासीत्। वेदाक्षरग्रहणपूर्वकं तदर्थावबोधनं वेदाध्ययनं कथ्यते स्म। वेदाक्षराणां साधु समुच्चारणाय तदर्थावबोधनायैव शिक्षा कल्पोऽथ व्याकरणं निरुक्तं छन्दो ज्यौतिषमिति षडङ्गानि प्रवृत्तानि आसन्। यतो वेदानां भाषा तदर्थो भावश्चेति उभावपि दुरूहावास्ताम्, अतः कानिचनाङ्गानि वैदिकभाषां साधुतरं बोधयितुं प्रवृत्तानि, कानिचन च भावं वेदार्थं निरूपयितुं प्रवृत्तानि। एवं प्रकारेण वेदाङ्गानि वेदानां शब्दात्मकं बाह्यकलेवरं तदर्थात्मकञ्चान्तःस्वरूपं परिरक्षन्ति स्म। अतो वेदानां सर्वतः संरक्षणार्थं वेदाङ्गानामप्यध्ययनं तदानीमनिवार्यमासीत्। वेदाध्ययनं तदङ्गाध्ययनपूर्वकमेव प्रवृत्तमासीत्, यथा हि महाभाष्ये पस्पशाह्निके भगवता पतञ्जलिना प्रोक्तमस्ति यत्—"ब्राह्मणेन निष्कारणो धर्मो षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति"। तदानीं ब्राह्मणानामिदं परमं प्रयोजनं मुख्यं कर्त्तव्यञ्चासीद्, यत्ते षडङ्गसहितं वेदाध्ययनं तदर्थावबोधनञ्चावश्यं कुर्युः। शिक्षाकल्पादिवेदाङ्गानां कया रीत्या वेदोपकारकत्वं वेदरक्षकत्वञ्चेति सम्प्रति समासेनाऽत्र किञ्चिदुपस्थाप्यते।

शिक्षा

शिक्षासम्बन्धे सायणाचार्येण ऋग्वेदभाष्यभूमिकायामुक्तं यत् "स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते उपदिश्यते, सा शिक्षेति"। वेदमन्त्राणां पाठावसरे वर्णानां शुद्धोच्चारणम्, उदात्तादिस्वराणां यथानियमं हस्तप्रदर्शनञ्चावश्यकमासीत्। वेदमन्त्राणामशुद्धोच्चारणं भ्रष्टस्वरपाठश्चेति महते दुष्फलाय कल्पते स्म। श्रूयते यत् पुरा "इन्द्रशत्रुर्वर्धस्व" इत्येतन्मन्त्रस्याशुद्धोच्चारणमेव यजमानस्य वृत्रस्य विनाशकारकमभूत्। तद्यथा पाणिनीयशिक्षायामुक्तम्—

मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्।।

"स्वाहेन्द्रशत्रुर्वर्धस्व" इति तैत्तिरीया श्रुतिः।

अत्र इन्द्रशत्रुरित्यत्र इन्द्रस्य शत्रुरिति तत्पुरुषसमासाश्रयणाद् ऋत्विजा अन्तोदात्तत्वं प्रयोक्तव्यमासीद्; परन्तु प्रमादवशात् तेन इन्द्रशत्रुरित्यस्योच्चारणमाद्युदात्तस्वरेण प्रयुक्तम्, अत आद्युदात्तस्य "इन्द्रः शत्रुर्यस्य" इति बहुव्रीह्याश्रयणाद् अर्थान्तराभिधानं जातम्, तेन इन्द्र एव वृत्रस्य शमयिता सञ्जातः। अतः साधुशब्दोच्चारणोपदेशेन शुद्धस्वरप्रयोगोपदेशेन च शिक्षा वेदं भृशं रक्षति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्पः

कल्पो हि वेदविहितानां कर्मणामानुपूर्वेण कल्पनाशास्त्रमुच्यते। अत्र वैदिकानां यागानां क्रमपूर्वकं व्यवस्थापनं प्रकल्पितमस्ति। इदं हि श्रौतसूत्रम्, गृह्यसूत्रम्, धर्मसूत्रम्, शुल्बसूत्रञ्चेति चतुर्विधं परिगण्यते। तत्र श्रौतसूत्रे ब्राह्मणग्रन्थे वर्णितानां श्रौताग्निसाध्ययागानां क्रमबद्धं वर्णनं वर्तते। गृह्यसूत्रे गृह्याग्नि-साध्ययागानामुपनयनविवाहादिसंस्काराणां सानुष्ठानप्रकारकं विवरणं कृतमस्ति। धर्मसूत्रे चतुर्णां वर्णानामाश्रमाणाञ्च कार्याणि तथा च राज्ञां कर्त्तव्यानि निर्दिष्टानि सन्ति। शुल्बसूत्रे श्रौतयागप्रयुक्तो विविधवेद्यादिनिर्माणप्रकारो विशेषतो वर्णितः। एतत्सर्वं तदानीं वेदार्थावबोधाय तदनुकूलयागानुष्ठानसम्पादनाय चानिवार्यतयाऽ-ध्येतव्यमासीत्।

व्याकरणम्

व्याकरणं नामाङ्गं वेदाङ्गेषु मुखस्थानापन्नं विद्यते। यथा—"मुखं व्याकरणं स्मृतमिति"। वेदेषु प्रकृतिप्रत्ययविचारस्य स्वरस्य च महन्महत्त्वं वर्त्तते, तत्र तदर्थं व्याकरणमेव साहाय्यमनुतिष्ठति। इदं हि प्रकृतिप्रत्ययोपदेशपुरस्सरं पदस्वरूपं तदर्थावबोधनञ्च करोति, अतो वेदार्थावबोधने व्याकरणं मुख्यं साधनं वरीवर्ति। पुरा वेदानां प्रतिशाखामाश्रित्य व्याकरणग्रन्था आसन्, ते प्रातिशाख्यग्रन्था उच्यन्ते स्म। साम्प्रतं केचनैव प्रातिशाख्यग्रन्थाः कमप्येकैकं वेदमाश्रित्योपलभ्यन्ते। तद्यथा—ऋग्वेदस्य शौनकप्रणीतम् ऋक्प्रातिशाख्यम्। शुक्लयजुर्वेदस्य कात्यायनविरचितं शुक्लयजुःप्रातिशाख्यम्। कृष्णयजुर्वेदस्य तैत्तिरीयप्रातिशाख्यम्। सामवेदस्य सामप्रातिशाख्यं पुष्पसूत्रं वा। अथर्ववेदस्य अथर्वप्रातिशाख्यम्। किमर्थं व्याकरणमध्येतव्यमिति जिज्ञासायां महाभाष्यकारेणोत्तरितम्—रक्षोहागमलघ्वसन्देहा व्याकरणप्रयोजनम्, रक्षार्थं वेदानामध्येयं व्याकरणमिति।

निरुक्तम्

निश्चयेनोच्यते, निश्शेषेणोपदिश्यते वा पदार्थो यत्र तन्निरुक्तमिति। वस्तुतो वैदिकपदानां व्युत्पादनं तदर्थावबोधनाय यया कयाऽपि रीत्या तेषां निर्वचनं निरुक्तशास्त्रस्य मुख्यं प्रयोजनमस्ति। वैदिकानां कठिनपदानां सङ्ग्रहात्मको ग्रन्थो "निघण्टुः" इति प्रसिद्धः, तस्यैव भाष्यरूपं व्याख्यानात्मकमनुपमं ग्रन्थरत्नं निरुक्तमिति। शब्दलक्षणपरिज्ञानं सर्वशास्त्रेषु व्याकरणाद् भवति, परन्तु वैदिकशब्दार्थनिर्वचनपरिज्ञानन्तु निरुक्तादेव जायते। एतन्निरुक्तशास्त्रं पञ्चधा शब्दान् निर्वक्ति, तद्यथा—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ।
धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्।।

छन्दः

"छन्दांसि छादनात्" इति यास्कोक्तनिर्वचनानुसारं वेदावरणकारित्वात् छन्द इति पदं छद्-छादने धातोर्निष्पाद्यते। प्रायशो वेदाः सन्ति छन्दोबद्धाः, अतस्तेषामुच्चारणाय छन्दोज्ञानं नितरामपेक्षितं भवति। विना छन्दोज्ञानं यो वेदाध्ययनाध्यापने यजनयाजनादि च कर्माणि करोति, तस्य सर्वाण्यपि कार्याणि निष्फलानि भवन्ति। उक्तञ्चात्र कात्यायनेन—"यो ह वा अविदितार्षेयच्छन्दो दैवतब्राह्मणेन मन्त्रेण याजयति वा अध्यापयति वा स्थाणुं वार्च्छति गर्ते वा पात्यते प्रमीयते वा पापीयान् भवति।

वैदिकानि छन्दांसि भेदोपभेदाभ्यां यद्यपि बहुलानि सन्ति, तथापि तत्रेमानि प्रधानतया परिगण्यन्ते, तद्यथा—गायत्री, उष्णिक् अनुष्टुप्, बृहती, पंक्तित्रिष्टुप्, जगती, अतिजगती, शक्वरी, अतिशक्वरी, कृतिः, प्रकृतिः, आकृतिः, विकृतिः, संस्कृतिः, अभिकृतिः, उत्कृतिश्चेति।

"यदक्षरपरिमाणं तच्छन्दः" इति कात्यायनीयसूत्रानुसारं वैदिकछन्दांसि अक्षरगणनया परिमितानि भवन्ति, तत्राक्षराणां गुरुलघुक्रमस्य कश्चिन्नियमविशेषो न भवति।

ज्यौतिषम्

वेदेषु बहुविधा यज्ञा विहिताः सन्ति, तत्र केचन यज्ञाः संवत्सरसम्बन्धिनः, केचन ऋतुसम्बन्धिनः, केचन तिथिमासपक्षनक्षत्रसम्बन्धिनश्च दृश्यन्ते। एतेषां विभिन्नकालेषु विहितानां यागानां यथाविध्यनुष्ठानं ज्योतिषज्ञानमन्तरा न भवितुमर्हति। अतो वैदिकयज्ञानां यथाकालमनुष्ठानसम्पादनाय वेदार्थोपकारितया ज्यौतिषं नाम वेदाङ्गमवश्यमध्येतव्यम्। यथा हि लगधप्रणीते वेदाङ्गज्योतिषग्रन्थे प्रोक्तम्—

वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानि पूर्वाविहिताश्च यज्ञाः।
तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद वेदम्।।

भारतीयवाङ्मये ज्योतिषशास्त्रस्यायं ग्रन्थ आद्यग्रन्थरूपेण सम्मान्यते। गच्छता कालेन शास्त्रमिदं संहिता-गणित-जातकाख्येषु त्रिषु भागेषु स्वात्मानं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रकटीचकार। एतेन परोक्षं भाविनि भूयमानं च वृत्तं प्रत्यक्षतया ज्ञातुं शक्यते। यथा सत्यमेवोक्तम्—

वेदस्य निर्मलं चक्षुर्ज्यौतिःशास्त्रमकल्मषम्।
विनैतदखिलं श्रौतं स्मार्तं कर्म न सिद्ध्यति।।

अनेन प्रकारेण शब्दार्थरक्षणपराणि शिक्षादि वेदाङ्गानि यथायथं स्वात्मज्ञान-साधनेन वेदानुपकुर्वन्ति। एभिरेव साधनैरस्मदाचार्याः शाकल्यात्रेयगार्ग्याः सायणो-व्वटमहीधरप्रभृतयो मनीषिणश्च वेदेषु निगूढं सुधारसमधिगन्तुं प्रायतन्त। एतेषां प्रदर्शितेनैव मार्गेण वयमपि वैदिकरहस्यं तत्र निहितं हार्दञ्चाधिगन्तुं प्रभवामः।

वेदानां विश्वानुग्राहकत्वम्

वेदा न केवलं भारतीयानामपि तु विश्वस्य सर्वासामपि मानवजातीना-मनुग्राहकाः पुरातनग्रन्था वर्तन्ते। भारतीयसंस्कृतेः सभ्यतायाश्च ते प्राणभूता वर्तन्ते। साक्षात्कृतधर्माणो महर्षयो वेदानाधारीकृत्यैव विश्वानुग्राहकं यज्ञीयं धर्मतत्त्वमुद्भा-वयामासुः। को हि धर्म? इति जिज्ञासायाम्—''धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः'' (मनु. २।१३) इति स्मृतिवचनानुसारं वेदार्थानुशीलनमेवैकशरणमस्ति। सम्प्रति भारते वर्षे यावन्ति दर्शनानि मतानि, उपमतानि च प्रसृतानि सन्ति, सर्वाणि तानि वेदेभ्य एव निर्गतानि सन्ति। अद्यापि वैदिकज्ञानस्य विमला धारा न केवलं भारतभुवमाप्लावयति, अपि तु समस्ते क्षितिमण्डले सर्वास्वपि दिक्षु अजस्रं प्रवहन्ती तत्रत्यान् मनुजान् पावयति। अस्मदीयाः पूर्वजाः केन प्रकारेण जीवनं यापयामासुः? काभिः क्रीडाभिस्ते स्वकीयं मनो मोदयामासुः? का देवतास्ते पूजयामासुः? विवाहसम्बन्धस्योद्देश्यं किं ते निर्धारयामासुरित्यादिविषये जिज्ञासा जायते चेद् एतदर्थं वेदा अध्येतव्यास्तदर्थाश्चानुशीलयितव्याः।

वेदरक्षणस्य साम्प्रतिकप्रयासः

सम्प्रति वेदानां रक्षणाय बहव उपायाः क्रियन्ते। तत्र वैदिकसंहिताकण्ठी-कृतेभ्यः कतिपयेभ्यो वेदविद्भ्यो भूयान् पुरस्कारराशिर्दीयते। स्व-स्ववेदशाखा-मन्त्रान् श्रावयितृभ्यो विविधाः पुरस्काराः प्रकल्प्यन्ते। परन्त्वत्रेदं विचार्यते, किम् एतेनैव वेदरक्षणं सम्भविष्यति? केवलं वेदाक्षरसंरक्षणमेव वेदरक्षणमस्ति? इति। तत्र मीमांसादर्शने प्रथमाध्यायस्य प्रथमपादस्य प्रथमाधिकरण एव एतद्विचारितं विद्यते यद् वेदाध्ययनं नाम किं वेदाक्षरराशिग्रहणमुताहो वेदार्थग्रहणमिति। तत्र

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"स्वाध्यायोऽध्येतव्यः" इत्यध्ययनविधिमाश्रित्य विचारः कृतो विद्यते, तत्र पूर्वपक्षो वेदाक्षरग्रहणमात्रं वेदाध्ययनमस्तीति वदति, तत्रैतादृशस्य वेदाध्ययनस्य किं फलमिति पृष्टेऽदृष्टं स्वर्गरूपं फलमुपजायत इति सतर्कं प्रतिपाद्यते; परन्तु सिद्धान्तपक्षो वेदाध्ययनस्य वेदार्थावबोध एव फलमिति सप्रमाणमुद्घोषयति, तन्मते "लभ्यमाने फले दृष्टे नादृष्टपरिकल्पना" इति न्यायेन वैदिकवाक्यानां निगमनिरुक्तव्याकरणादिज्ञानसहकारेण अर्थाः प्राप्यन्ते, अतो वेदार्थावबोध एव वेदाध्ययनस्य फलमिति विमृष्टो निर्णीतश्च पक्षः।

वेदाध्ययनप्रसङ्गे शतपथश्रुत्या एतत् सुस्पष्टं ज्ञायते यद् धनपरिपूर्णायाः पृथिव्या दानेन यावत्फलं प्राप्यते, ततोऽधिकं फलं वेदाध्ययनात्प्राप्यते, अतो नित्यं वेदोऽध्येतव्य इति। तद्यथा—

"यावन्तं ह वै इमां पृथिवीं वित्तेन पूर्णां ददत्, लोकं जयति, त्रिभिस्तावन्तं जयति, भूयांसं चाक्षय्यं च य एवं विद्वान् अहरहः स्वाध्यायमधीते, तस्मात् स्वाध्यायोऽध्येतव्यः"। (श.ब्रा. ११।५।६।१)

अत एव मनुर्वेदाध्ययनं द्विजातेः परमं कर्त्तव्यं मनुते, तदनुसारं वेदाध्ययनमुपेक्ष्य यदि कश्चिद् द्विजः शास्त्रान्तराध्ययनं कुरुते, स जीवन्नेव सपरिवारः शूद्रत्वमुपगच्छति। अथ च वेदार्थं जानन् पुरुषो यत्र कुत्रापि वसति आत्मनः कर्मजं दोषं दग्ध्वा ब्रह्ममयो भवति। तद्यथा—

योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः।। (मनु. २।१६८)

यथा जातबलो वह्निर्दहत्यार्द्रानपि द्रुमान्।
तथा दहति वेदज्ञः कर्मजं दोषमात्मनः।। (तत्रैव-१२।१०१)

वेदशास्त्रार्थतत्त्वज्ञो यत्र कुत्राश्रमे वसन्।
इहैव लोके तिष्ठन् स ब्रह्मभूयाय कल्पते।। (तत्रैव-१२।१०२)

वेदाध्ययनं वेदार्थपरिज्ञाने पर्यवसितम्

वैदिकसनातनधर्मावबोधयितुं भारतीयसंस्कृतेश्च विशुद्धं स्वरूपञ्चावगन्तुं शास्त्रान्तरापेक्षया वेदाध्ययनं तदर्थानुशीलनञ्च कदाचिदिह भारते महत्त्वपूर्णमासीत्, परन्तु हा! कष्टं, वेदाध्ययनं तदर्थानुशीलनञ्चात्र उत्तरोत्तरं ह्रासतामुपगच्छति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतज्ञा अपि वेदाध्ययनं प्रति रुचिं न दधते, तेषु बहवः पाणिनीयगौतमीयादिषु शास्त्रेषु रात्रिन्दिवं परिश्राम्यन्तोऽपि तत्र नवनवां कल्पनामाविष्कुर्वन्तोऽपि न जानन्ति वेदेषु किमस्ति अग्निहोत्रम्? कौ वा स्तः दर्शपूर्णमासौ? कानि वा सन्ति चातुर्मास्यानि, कश्च वर्तते सोमयाग इति।

यस्या वेदविद्याया परिपोषणार्थमेव पुरा सर्वा विद्याः सर्वाणि च शास्त्राणि प्रवर्तन्ते स्म, यस्या रहस्यमधिगमयितुं सिद्धान्तपक्षञ्च निर्णेतुं जैमिन्यादयः सर्वज्ञकल्पा महर्षयः सर्वप्रकारेण प्रायतन्त, यस्याः परिज्ञानं विना आत्मानं विद्यावन्तमेव न मन्वते स्म, प्राचीनतमा पण्डितानामेव वेदविद्यां सर्वाधारभूतां साम्प्रतं वयं परित्यजामः कृतघ्ना इव मातरमिति कियदस्माकं शोकस्थानमिति विचारयन्तु विद्वांसः।

साम्प्रतं हि यथाकथञ्चिदत्र काश्यां दक्षिणभारते च समाजस्य भूयसीमवहेलनां सहन्तोऽपि वेदाक्षररक्षणे नितरां परिश्राम्यन्तः केचन श्रुतिधरा वैदिका अद्यापि अनादिकालतोऽविच्छिन्नपरम्पराप्राप्तं वेदशब्दराशिं जटाद्यष्टविकृति-पाठपरिज्ञानपुरस्सरं परिरक्षन्तो दृश्यन्ते। ते नूनमस्माकं भारतीयानां वन्दनीयाः पूजार्हाश्च वर्तन्ते। एतेषां कण्ठेन इदानीमपि वयं तादृश्या एव स्वरलहर्य्या मन्त्रान् श्रोतुं प्रभवामः, यादृशा मन्त्राः कदाचित् सुदूरप्राचीनकालेऽस्माकमनूचानै-र्ऋषिभिरुच्चारिता भवन्ति स्म। परन्तु तत्रापि वेदानां स्वरमात्राऽनुस्वारविसर्गमपि कण्ठीकृतवन्तो विद्वांसो भूयांसः, तदर्थजानानोऽल्पीयांसो वर्तन्ते, वेदार्थं ज़ानन्तोऽपि तदनुसारेण कार्यं कुर्वाणास्तदाचरणशीलास्तु द्वित्रा एव श्रूयन्ते। अत एव मनुना प्रोक्तम्—

अज्ञेभ्यो ग्रन्थिनः श्रेष्ठा ग्रन्थिभ्यो धारिणो वराः।
धारिभ्यो ज्ञानिनः श्रेष्ठा ज्ञानिभ्यो व्यवसायिनः।। (मनु. १२।१०३)

वेदानामक्षरज्ञाः सन्तोऽपि यदि ते तदर्थज्ञा अपि स्युस्तथा चार्थज्ञाः सन्तोऽपि तदनुकूलाचरणशीलाः स्युस्तर्हि नूनं ते देवकल्पा विश्ववन्द्या जगत्पूज्याश्च वर्त्तन्ते।

वेदज्ञेषु ब्राह्मणेषु सर्वा देवता वसन्ति, अतस्ते प्रतिदिनं नमस्कार्या भवन्तीति साक्षात् श्रुतिरेवोपदिशति। तद्यथा—

"यावतीर्ह वै देवतास्ताः सर्वा वेदविदि ब्राह्मणे वसन्ति।
तस्माद् ब्राह्मणेभ्यो वेदविद्भ्यो दिवे दिवे नमस्कुर्यात्।। (तैत्तिरीयसं.)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतो वेदाध्ययनं नाम वेदार्थपरिज्ञानम्। वेदार्थपरिज्ञानवन्तो ब्राह्मणाः श्रेष्ठाः कथ्यन्ते, कस्मिंश्चिदपि धर्मसंशये तेषामेव वचनं प्रमाणं भवति। अत एव मनुना प्रोक्तम्—

धर्मेणाधिगतो यैस्तु वेदः सपरिबृंहणः।
ते शिष्टा ब्राह्मणा ज्ञेयाः श्रुतिप्रत्यक्षहेतवः।।
अनाम्नातेषु धर्मेषु कथं स्यादिति चेद्भवेत्।
यं शिष्टा ब्राह्मणा ब्रूयुः स धर्मः स्यादसंशयः।। (मनु. १२।१०८।९)

अत एव निरुक्तकारेण यास्केन वेदार्थज्ञो विद्वान् प्रशंस्यते, अक्षरज्ञानसहितोऽपि तदर्थज्ञानरहितो विद्वान् भारवाहक इव भवति। तद्यथा—

स्थाणुरयं भारहारः किलाभूद् अधीत्य वेदं न विजानाति योऽर्थम्।
योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति विधूतपाप्मा।। (नि. ११६)

"वेदात् सर्वं प्रसिध्यति" इति मनुस्मृत्युक्तेर्वेदार्थानुशीलनद्वारैव सर्वमवाप्तुं शक्यते। स्मृतिकारो मनुर्विश्वस्य सर्वासां प्रजानां पिता अस्ति, अतः प्रजापतिः कथ्यते। स एव विश्वमानवतां हस्तामलकवत् समानीय मानवजातेः समष्टिशो व्यष्टिशश्च सर्वोदयाय सर्वाङ्गीणसदाचारसंहितां प्रवर्तितवान्। सैव गच्छत्सु कालेषु "मनुस्मृति"-नाम्ना प्रसिद्धिमगात्। वेदेष्वपि तपःपूता महर्षयो भगवतो मनोः लोकहितसमुदाचारप्रवर्तनेन प्रभाविताः सन्तो भूयिष्ठं प्रशसन्तो दृश्यन्ते। तद्यथा तैत्तिरीयसंहितायाम्—

यद्वै किञ्च मनुरवदत् तद्भेषजम्। (११।२।१०।२)

अपरञ्चान्यत्र स्थले—

मनुर्वै यत्किञ्चावदद् भेषजं भेषजतायै।। (२३।१६।१७)

ऋग्वेदेऽपि मनुः पितारूपेण वर्णितः। तद्यथा—

यच्छं चयोश्च मनुरायेजे पिता। (ऋ. १।११४।२)

अपरञ्च—

यानि मनुरवृणीता पिता नः। (ऋ. २।३३।१३)

शतपथब्राह्मणेऽपि—

मनुर्ह वा अग्रे यज्ञेनेजे। तदनुकृत्येमाः प्रजा यजन्ते।
(श.ब्रा. १।५।१।७)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनुरेव वदति यद् वेदार्थानुशीलनपटीयान् विद्वान् न केवलमेकराज्यस्य; अपि तु समग्रस्य लोकस्य राष्ट्रस्य वा आधिपत्यं कर्तुं प्रभवति। तद्यथा—

सैनापत्यञ्च राज्यञ्च दण्डनेतृत्वमेव च।
सर्वलोकाधिपत्यञ्च वेदशास्त्रविदर्हति।।

अत एव तैत्तिरीया श्रुतिरस्मानुपदिशति—"स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यमिति"। अत्र स्वाध्यायो नाम अर्थज्ञानाय वेदशब्दराशिग्रहणं तथा प्रवचनं नाम तदर्थानुशीलनद्वारा लोकहितकथनम्। एवं रीत्या वेदार्थानुशीलनाय क्रियमाणं वेदाध्ययनं नूनं वेदरक्षणाय कल्पयिष्यत इति मे द्रढीयान् विश्वास इति शम्।

●

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वसोर्धारामन्त्रेषु यज्ञस्य विभावना कर्मयोगपरिकल्पिका

प्रो. इन्द्रवदन-बी. रावलः

संस्कृतविभागाध्यक्षः
वेरावलस्थ-श्रीसोमनाथमहाविद्यालयस्य
सौराष्ट्रे

❀ ❀ ❀

शुक्लयजुर्वेदस्य माध्यन्दिनशाखाया अष्टादशेऽध्याये प्रारम्भिकाः २९ मन्त्रा 'वसोर्धारामन्त्राः' इति परिज्ञाताः। मन्त्रेष्वेतेषु यज्ञस्य या विभावना स्फुटीभवति, सा श्रीमद्भगवद्गीतायाः कर्मयोगस्य पीठिकां रचयति। एतदनुलक्ष्य काश्चिद् विचारकण्डिकाश्चात्र प्रस्तुताः।

वसोर्धारासम्बन्धे सुष्ठूक्तं शतपथब्राह्मणे—'अथातो व्वसोर्धारां जुहोति। अत्रैष सर्वोऽग्निः संस्कृतः स एषोऽत्र व्वसुस्तस्मै देवा एतां धारां प्रागृह्णँस्त-यैनमप्रीणँस्तद्यदेतस्मै व्वसव एतां धारां प्रागृह्णँस्तस्मादेनां वसोर्धरित्याचक्षते[1]।' यज्ञेन संस्कृतोऽग्निरेवात्र 'वसु' इति संज्ञितः। आहुतिष्वाज्य-धाराणां ग्रहणेन विस्तारेण च देवास्तं वसुमप्रीणयन्। तस्मादेता वसोर्धारा इत्युच्यन्ते। अग्रतश्चास्मिन्नेव ब्राह्मणे वृष्टे रूपकेनापि वसोर्धारा वर्णिता। यथा 'सैषा व्वसुमयी धारा यथा क्षीरस्य वा सर्पिषो वैवमारम्भायैवेयमाज्याहुतिर्हूयते, तद्यदेषा व्वसुमयी धारा तस्मादेनां व्वसोर्धरित्याचक्षते[2]।' यथा वा— 'तस्यै वा एतस्यै व्वसोर्धारायै द्यौरेवात्माभ्रमूधो विद्युत्स्तनो धारैव धारा दिवोऽधि गामागच्छति।। तस्यै गौरेवात्मा। ऊध एवोध स्तन स्तनो धारैव धारा गोरधि यजमानम्[3]।।, यथाकाशाद् वृष्टेर्धारा भूमिं सस्यादिसम्पन्नां कुर्वन्ति, तथैवाज्यस्य मन्त्राहुतियुक्ताभिर्वसुमयीधाराभिः सम्पन्नो यज्ञो याजकाय वाजादीनां सम्प्राप्तिं कारयतीत्यर्थः।

---

१. शत.ब्रा. ९।३।२।९; २. तत्रैव - ९।३।२।४।
३. तत्रैव - ९।३।३।१५-१६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एतेषु २७ मन्त्रेषु प्रत्येकस्यान्ते 'यज्ञेन कल्पन्ताम्' इति वाक्यांशस्य पुनरुक्तिः सविशेषं ध्यानास्पदा। एतादृशी निरपवादा पुनरुक्तिः केवलं वर्णनशैल्याश्चमत्काराय भवितुं नार्हति। सम्भवति यद् 'यज्ञेन कल्पन्ताम्' इति गीतात्मके शब्दावर्तने प्रातिभचक्षुर्गीताकारः काँश्चिद् विचारस्फुलिङ्गान् दृष्टवान्। अस्मिन् विषयेऽधिकमग्रतो विचार्यते। अत्र तु—

> व्वाजश्च्च मे प्रसवश्च्च मे प्रयतिश्च्च मे प्रसितिश्च्च मे
> धीतिश्च्च मे क्रतुश्च्च मे स्वरश्च्च मे लोकश्च्च मे
> श्रुतिश्च्च मे ज्योतिश्च्च मे स्वश्च्च मे यज्ञेन कल्पन्ताम्।।१।।

ईदृश्येव परिपाटी २७ मन्त्रेष्वनुसृता विद्यते। 'आयुर्यज्ञेन कल्पताम्' इत्याद्यात्मको नवविंशतितमो मन्त्रः—एषु मन्त्रेषु सम्मिल्य प्रायः २५५ संख्यकानां पदार्थानां परिगणनं वर्तते। इदं पदार्थजातं '.....मे यज्ञेन कल्पन्ताम्' इत्यत्राभिलषितम्। मध्यान्तरस्य षोडशे सप्तदशे चेति मन्त्रद्वये—'अग्निश्च्च मऽइन्द्रश्च्च मे सोमश्च्च म इन्द्रश्च्च मे....' इति क्रमेण अग्निः सोमः सविता सरस्वती पूषा बृहस्पतिर्मित्रो वरुणो धाता त्वष्टा मरुतो विश्वेदेवा इति प्रत्येका देवता 'इन्द्र' इत्युल्लेखसंयुतास्ति। अष्टादशे मन्त्रे पुनरनेनैव क्रमेण 'पृथिवी अन्तरिक्षं द्यौः समा नक्षत्राणि दिश' इति प्राकृतिकतत्त्वान्यपि प्रत्येकं 'इन्द्र' इत्युल्लेखसंयुतानि। सर्वञ्चात्र 'इन्द्रसमन्वितम्' इति ज्ञायते।

'तेजः' आदीनां भूतानामधिष्ठातृभूता या अग्न्यादिदेवतास्ताश्चक्षुरादीन्द्रियाणामिन्द्रियविशिष्टशक्तीनां वा प्रतीकरूपेणावतिष्ठन्ति। इन्द्रियाणां केन्द्रं मनः, तस्य प्रतीकम् 'इन्द्रः'। पृथिव्यादयोऽपि 'इन्द्रसमवेताः' एव स्वसार्थक्यं भजन्ते। इदमत्राभिप्रेतमवगम्यते। (शुक्ल-) यजुर्वेदस्य चतुस्त्रिंशेऽध्याये शिवसङ्कल्पमन्त्रेषु मनसो यत्सर्वाश्लेषिचित्रमुपलभ्यते तेन विचारस्यास्य पुष्टिर्भवति। केनोपनिषदि 'उमा हैमवती' इत्यस्या आख्यायिकामालिखतः ऋषेः समक्षमपि 'इन्द्रस्य' ईदृग्विधं स्वरूपमस्ति। वसोर्धारामन्त्रेषु चतुर्विंशतितमे क्रमे 'एका च' तिस्रः च तिस्रः च पञ्च च, पञ्च च सप्त च' इति क्रमेण त्रयस्त्रिंशत्पर्यन्तं विषमसंख्यात्मकं परिगणनं कृतम्, तदनु पञ्चविंशतितमे मन्त्रे 'चतस्रः चाष्टौ च, अष्टौ च द्वादश च, द्वादश च षोडश च' इति क्रमानुसारमष्टचत्वारिंशत्पर्यन्तं चतुष्कसंख्यात्मकं परिगणनं विहितमस्ति। तत्सर्वमपि यज्ञेन प्राप्यमिति कृत्वा प्रार्थितम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सङ्क्षेपतः पर्याप्तमिदं वक्तुं यन्महतीयं परम्परा यस्यां भौतिकैः सहाभौतिकानां, नैसर्गिकैः सह मानवकल्पितानां, स्थूलैः सह सूक्ष्माणां, चेतनैः सहाचेतनानां चेत्यनेकविधानां द्रव्याद्यात्मकानां पदार्थानां कुसुमस्तबकवत् सङ्गुम्फनं दरीदृश्यते। 'यज्ञेन कल्पन्ताम्' इत्यनेन याचितेषु पदार्थेषु 'यज्ञ-क्लृप्त-क्लृप्ति' इत्येतेषामपि समावेशः किञ्चिदाश्चर्यमावहन्नपि साभिप्रायत्वाद् विशिष्यते।

'यज्ञेन कल्पन्ताम्' इति द्वे पदे नामाख्याते। यज्ञेनेति यज्ञशब्दस्य करणार्थकं रूपम्। 'यज्ञः कस्मात्? प्रख्यातं यजतिकर्मेति नैरुक्ताः'[१] इति यास्कानुसारं यज्ञः यज्धातुमूलकः। पाणिनिः 'देवपूजासङ्गतिकरणदानेषु' (यज् १।७२८उ.) पठित्वा 'यजयाचयतविच्छप्रच्छो नङ्' (३।३।९०) सूत्रेण नङ्प्रत्ययात् 'यज्ञ'शब्दं साधयति। 'याञ्चो भवतीति वा' इत्यतः याच्धातोरप्यस्य निरुक्तिर्यास्केन विकल्पितास्ति[२]। दुर्गाचार्यष्टीकते—'याञ्चो भवति इति यज्ञः। याच्यते हि अत्र'। सत्यम्, वसोर्धारामन्त्रा एवात्रोदाहरणम्, याञ्चामूलत्वात्। द्वावप्यर्थावत्रोपपन्नौ[३]। तथापि प्रथमः प्रामुख्यं भजते, प्रख्याततत्वाद् व्यापकत्वाच्च। कोशकारैरपीदं[४] समर्थ्यते— अग्निष्वाहुतिपूर्वकं देवतापूजनरूपं वेदोक्तं कर्म, वैश्वदेवादिरूपं स्मार्तकर्म, विष्णुः, अग्निः, [५]पूजा, यत्किञ्चिदपि पावनं समर्पणात्मकं वा कर्म, इत्यादयो यज्ञशब्दस्य कोशगता अर्थाः। 'त्रिवृद् यज्ञः त्रिभिर्ऋग्यजुःसामभिर्वर्तते' इत्यप्युक्तम्। इष्टिः पशुबन्धः सौमिकश्च, अथवा नित्यो नैमित्तिकः काम्यश्चेत्याख्येन त्रिविधस्वरूपेणापि यज्ञः परिज्ञायते[६]।

'कल्पन्ताम्' इति 'क्लृप्-धातोः (लोट्-लकारे) आज्ञार्थकं रूपम्। क्लृपि सामर्थ्ये[७]। कार्यसामर्थ्यसाधनं, सम्प्रापणं, सम्पन्नीभवनं परिणमनम्—इत्यादयोऽर्थाः शब्दकोशे पठ्यन्ते। 'क्लृपि सम्पद्यमाने च' इत्यतेद्वार्तिकस्य सन्दर्भे

---

१. निरुक्तम् - ३।१९; २. तत्रैव।

३. यास्काचार्यप्रणीतं निरुक्तम्, प्रथमो भागः, सम्पा. वैजनाथ-काशीनाथ-राजवाडे, प्रका. भाण्डारकरप्राच्यविद्यासंशोधनमन्दिरम्, पूना, पृ. ५०९-५१० (आंग्लटीका)।

४. संस्कृत-गुजराती, विजीतकोश; पृ. ०३९१।

५. Sanskrit-English Dictionary, V.S.Apte.

६. संस्कृत-हिन्दी-इंगलिश-कोश, सं. सूर्यकान्तः, पृ. ४७१।

७. तत्रैव, पृ. १६०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीभट्टोजीदीक्षितेन 'सम्पद्यते जायते' इति, तत्त्वबोधिनीकारेण च 'सम्पत्तिरिहाभूतप्रादुर्भावः सम्पद्यते प्रादुर्भवति' इति व्याख्यातम्[१]।

प्रस्तुतविषयं स्पष्टीकुर्वता भाष्यकारेणोवटेनोक्तम्[२]—'वाजप्रभृतीनि च शब्दसमुच्चितानि मम यज्ञेनानेन क्लृप्तानि भवन्तु। यज्ञोऽस्मभ्यमेतेषां दाता भवत्वित्यर्थः।' भाष्यकारो महीधरो[३] व्याख्यामिमामधिकस्पष्टतया प्रस्तौति—"यज्ञेनानेन मया कृतेन वाजादयः पदार्थाः कल्पन्तां क्लृप्ताः सम्पन्ना भवन्तु।... यद्वा वाजादयः पदार्था मे मम यज्ञेन कल्पन्ताम्। विभक्तिव्यत्ययः। यज्ञेऽग्निं तर्पयन्तु अभिषिञ्चन्तु वा। 'अनेन च त्वा प्रीणाम्यनेनेन च त्वाभिषिञ्चामि।'..... एते मे मम यज्ञेन कल्पन्ताम्। कल्पन्तामिति कण्डिकान्तस्य समुदायापेक्षया बहुत्वम्। मे पदानामावृत्तिः प्रत्येकं प्राप्त्यर्था।" 'यज्ञेन कल्पन्ताम्' इत्यस्य 'अहमेतान् वाजादीन् पदार्थान् यज्ञेन प्राप्नुयाम्' इति सरलार्थः। सङ्क्षेपतः, यज्ञः साधनं, वाजादयश्च साध्याः प्राप्तव्याः सम्पाद्या इति स्थितम्।

जगत्यस्मिन् सम्भूताः प्रायः सकलाविष्कारा उपयोगमूलाः। साधूच्यते आङ्ग्लभाषायाम्— Necessity is the mother of invention. यज्ञविषयेऽपि नैषा स्थितिरपवादपरा। विचार्यते यद् आदिमानवस्तु गुहावासी बभूव। तत्कालीने परिवेशेऽकस्मादेवाग्निदर्शनात् कालक्रमेण च तस्य परिचयानन्तरं मानवो यथा यथा स्थिरजीवनः संञ्जातः, तथा तथा अग्निसकाशात् प्राप्यमाणानां प्रकाशोष्मणोः आश्चर्य-आह्लाद-उपयोग-शालिनां तत्त्वानामुपलब्ध्यर्थमग्नेर्महत्त्वमप्यनन्यत्वेन प्रस्थापितं भवेत्। फलतश्च अग्नेश्चयने पोषणे संवर्धने च जनः सन्तततायासो स्यात्। तादृशेषु प्रयासेषु शुष्केन्धनस्योपयोगस्तावत्प्रथमः, तदनन्तरं पशूनां वसायाः प्रयोगः (वसासम्पर्कादग्निरधिकं प्रज्वलतीत्यतो वसाया अग्नौ होमेन यज्ञीयहिंसायाः पशुबलेर्वा प्राकृतं स्वरूपमनुमातुं शक्यते), तदनु यदा घृतमाविष्कृतं तदा घृतहोमस्य दैनन्दिनी व्यवस्था प्रचलिता स्यात्। अग्नेश्चयनं संरक्षणं निर्वहणं चेति क्रमेण कालान्तरेऽग्निसम्बद्धानीमानि कर्माणि धर्मक्रियाया अङ्गत्वं भेजिरे। इयमेव प्रक्रिया यज्ञसंस्थामजनि। सर्वोऽयमुपयोगमूलो विकासक्रमः स्वाभाविको भाति प्रतीतिं चावहति। याजकस्य ज्ञानसंस्कारादीनां वृद्ध्या सह यज्ञभावनापि सपरिष्कारा

---

१. वैयाकरणसिद्धान्तकौमुदी बालमनोरमातत्त्वबोधिनीसहिता; मोतीलाल-बनारसीदासः' प्रथमो भागः, पृ.६५०-६५१।

२. शुक्लयजुर्वेदसंहिता (उवटमहीधरभाष्योपेता); मोतीलाल-बनारसीदासः पृ. ३४०।

३. तत्रैव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भूत्वा विकासोन्मुखिनी स्थिता। सङ्क्षेपेण, यज्ञसंस्थाया उद्भवस्य विकासस्य चायमितिहासः।

वैदिकयुगस्य मन्त्रदर्शनाख्यः कालखण्डः समाप्तिं गतः, ब्राह्मणाख्यश्च कालखण्डः समायातः, तस्यापि यदा मध्याह्नो जातस्तावता कालेन तु 'यज्ञो वेदधर्मस्य सर्वस्वमिव' इति महतीं प्रतिष्ठां प्राप्तः। परिणामतः, यज्ञस्य क्रियात्मकः काम्यश्च योंऽशः, स चरमसीमां स्पृष्टवान्। यज्ञकार्यं वेदधर्मोपदिष्टत्वादनुष्ठेयं श्रद्धेयं चेति, अस्तु तावत्। अपि तु यज्ञः स्थूलस्वरूपेण (मन्त्रेषु याचितानां) सर्वेषां पदार्थानामुपादानं निमित्तं वा, इति मान्यतायां तु न केवलमन्धश्रद्धाऽतिश्रद्धा वा, काम्यताऽप्यस्ति। काम्यता वै प्रत्याघातस्य जननी। 'प्लवा ह्येतेऽदृढा यज्ञरूपाः'[1] 'येनाहं नामृता स्यां किमहं तेन कुर्याम्[2]', 'न वित्तेन तर्पणीयो मनुष्यः'[3] इत्यादिषु श्रुतिवचनेषु प्रत्यक्षं वा परोक्षं वा, इदमेव प्रतिध्वन्यते।

अन्यच्च, काम्यत्वात् 'यज्ञशाश्वतानन्द'योर्मध्ये प्रवर्तमानोऽनुबन्धो न प्रत्यायकत्वं निर्वहति। यज्ञो नाम मूलत एव कर्म। अत एव परमलक्ष्यस्यानन्दस्यावरोधि[4]। सृष्टिश्च सकलैव कर्ममयी। न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्। अतो यथा कर्मत्यागोऽशक्यस्तथा परमलक्ष्यस्य प्राप्तिरप्यशक्या। अतिविचित्रा गहना चेयं गतिः। यद्ययं विचार एतावतैव विरमति, तदानन्दरूपः परमात्मा, तस्य प्राप्तिः, इत्यादिकं विमर्शजातं निरर्थकमेव स्यात्। किन्तु विशुद्धसत्त्वे परमात्मनि 'आनन्दः' 'स्वाभाविकी क्रिया' च नैव निषिद्धे[5]। अतः परमात्मनि या क्रिया, मनुष्यगता च या क्रिया, तयोर्मध्ये विशुद्धिमालिन्ययोर्भेदः स्वीकरणीयः। अस्ति किञ्चित्कर्म यद्विगलितमालिन्यं भवेत्?

---

१. मुण्ड. उप. १।२।७; २. बृह. उप. २।४।३।

३. कठ. उप. १।१।२७।

४. ब्रह्म; उपनिषत्सु 'आनन्दः ब्रह्म' इत्यात्मकं वर्णनं प्रसिद्धम्, यथा—

आनन्दरूपममृतं यद्विभाति। (मुण्ड. उप. २।२।७)
अथैष एव परम आनन्दः। एष ब्रह्मलोकः। (बृह. उप. ४।३।३३)
आनन्द आत्मा। (तै. उप. २।५)
आनन्दो ब्रह्मेति व्यजानात्। (तत्रैव-३।६)
सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो.....। (मां.उप. १।५)

५. परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च। (श्वेता.उप. ६।२)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किं तद्वस्तु, यत् कर्म मलिनीकरोति? मन इति यावत्। ममत्वेन यत्र तत्रासञ्जनं मनसोऽतिबलिष्ठो भावः। स एवं मालिन्येन मनोऽवलिम्पति।

एतादृश्यामवस्थायां 'यज्ञो वै श्रेष्ठतमं कर्म'[१] 'यज्ञेन यज्ञमयजन्त देवाः'[२] 'यज्ञो यज्ञेन कल्पताम्'[३] इत्यादिषूक्तिषु परम्परितमर्थमतिक्रम्य किञ्चिद् विलक्षणं पश्यन् गीताकारस्तस्यां दिशि चिन्तनं प्रेरयामासेति नायुक्तिकं मन्तुम्। यज्ञः श्रेष्ठतमं कर्म। कर्म साधनमप्यस्ति। श्रेष्ठतमञ्च कर्म तदैव भवितुमर्हति यत् श्रेष्ठतमं साधयितुं क्षमम्। इत्थं यज्ञः श्रेष्ठतमस्य साधनक्षम इति स्थितम्। पदार्थसम्प्राप्त्यर्थे समुचितस्वरूपा स्तुतिप्रार्थनापि सैव स्याद् या वदति—श्रेष्ठतमं साधनं नः कल्पताम्। यज्ञ एवेदृक्साधनम्। अत्रैव यज्ञशब्दान्तर्निहितस्य निगूढार्थस्य प्रतीतेः प्रारम्भः। यज्ञशब्दे 'देवपूजासङ्गतिकरणदान' इत्येषां समन्वितोऽर्थः। यज्ञरूपेण क्रियमाणं कर्म 'आमूलात्' पूजारूपं पवित्रमिति। अतस्तस्मिन् मालिन्यक्षपयितृकं सामर्थ्यम्। अथ च, दानशब्दः 'दो अवखण्डने' (४।३९प.)[४] इत्यतोऽपि निष्पाद्यते, एतदपि सूचकमेव। कुतः सम्भवति 'सम्यक्-दानं' यदि पदार्थं प्रति स्वामित्वममत्वयोर्तन्तुर्न त्रुट्यति? अग्निस्त्वन्यथापि दोषदहनेन पावकत्वाय कल्पते। अतः 'ज्ञानाग्निः' ममत्वस्य मालिन्यं दग्ध्वा कर्मशुद्धिं सम्पादयितुं समर्थः। यतः 'न हि ज्ञानेन सदृशं पवित्रमिह विद्यते' इति गीताकारस्य विश्रम्भवचनम्[५]। सर्वथा कर्मत्यागस्याशक्यत्वे, आसक्तिं प्रज्वाल्य, कृते कर्मणि, कर्मणः श्रेष्ठत्वं निरूह्यते। इदमेव 'कर्मसु कौशलं'[६] नाम।

यज्ञस्थः सङ्गतिकरणस्य भावः समाजलक्षितां सूचयति। स भावः समष्टिहितसंवलितैः कार्यैः सम्मूर्तो भवति। एतादृशाः कार्यकलापाः समाजस्य स्वस्थधारणार्थमावश्यकाः; किन्तु नैव ते वित्तश्रमसमयकलाकौशलादिषु यस्य कस्यापि निरपेक्षं समर्पणं विना सम्पद्यन्ते—आम्, समर्पणस्य मात्रा लघ्वी गुर्वी वा या कापि भवतु। स्पष्टं यत्, जनमङ्गलस्य मूले पूजादानाद्यात्मिका यज्ञभावना विलसति। सम्प्रति श्रमयज्ञ-नेत्रयज्ञ-ज्ञानसत्र-आदिनामका बहुप्रचलिताः प्रयोगा

---

१. काठक-सं. ३०।१; कपिष्ठलकठ-सं. ४६।८; तै.सं. ३।२।१।४; माध्यं. शत. ब्रा. १।७।१।५।

२. शु.यजु.सं. ३१।१६; ३. तत्रैव-१८।२९।

४. पाणिनीयधातुपाठः; ५. श्रीमद्भगवद्गीता-४।३८।

६. तत्रैव—योगः कर्मसु कौशलम्।(२।५०)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अप्यनया दृष्ट्या यज्ञसंज्ञानुरूपाः। 'लोकसंग्रहे'[१] या कर्तव्यमुद्रा दृश्यते, सा यज्ञमूलैव।

यज्ञो यज्ञेन कल्पताम्— यज्ञोऽपि यज्ञेन सम्पन्नो भवत्विति प्रार्थना यज्ञस्योपर्युक्तं समन्वितमर्थमनुलक्षति। सर्वञ्चात्र यज्ञाधारम्। एकेन यज्ञभावितेन कर्मणाशेषमपि जीवनं यज्ञभावितं स्यात्। उक्तं च—योऽर्थशुचिः, स शुचिः। वैपरीत्ये, 'अयज्ञेन' अशुचिमार्गेण, यया कयापि प्रयुक्त्या भ्रष्टाचारेण वा लब्धेन धनेन क्रियमाणः (तथाकथितः) धर्मोऽप्युपरितः साधुदर्शनो यशोवर्धनो वा भवतु, तत्त्वतस्तु नैव स यज्ञः। यतः स धर्मः 'अल्पस्य' हितेन बहूनां हितं बाधते। यज्ञशब्दे यज्धातोर्दानमिति परम्परितोऽर्थोऽप्युपपद्यतेऽत्र। 'दानं संविभागः।'[२] विचारोऽयमद्यतनीयस्य समाजवादस्यार्थशास्त्रस्य चाप्यनुकूलो नास्ति किम्? यज्ञः स्वयमेव स्तेनवृत्तेर्विरोधी। साधनसाध्यविवेको 'यज्ञेन कल्पन्ताम्' इत्यस्य पारदर्शनम्।

'यज्ञो वै श्रेष्ठतमं कर्म' इति श्रुतिवचनं विपरीतक्रमेणापि सार्थकम्। श्रेष्ठतमं कर्म वै यज्ञः। अर्थात् पूजा-पावित्र्ययुक्तं स्वभावानुगतम्, अत एव कर्तव्यबुद्ध्या निरासक्ततया क्रियमाणं (यथा अर्जुनसन्दर्भे युद्धम्) लोकसङ्ग्रहक्षमं यत्कर्म, तदेव श्रेष्ठतमम्, तदेव यज्ञः। यज्ञस्येयं भावना कर्मयोगेऽनुस्यूता।

ब्राह्मणकालस्य मध्याह्ने व्यतीते क्रियाकाण्डस्य यन्त्रवद् बाहुल्यं जातम्। अनेन प्रामुख्येन यज्ञसंस्था निःसत्त्वप्राया सञ्जाता। तादृश्यां दुरवस्थायामपि यज्ञस्य विरोधेन तं नामावशेषं कर्तुं गीताकारो नैच्छत्। अतो नवपरिमाणेन व्यापकभाव-भूमेश्च सन्दर्भेण यज्ञस्य नवसंस्करणमिव कृत्वा स यज्ञसंस्थां पुनरुज्जीवयामासेति।

●

---

१. इत्याख्यो विचारोऽनन्यरूपतया श्रीमद्भगवद्गीतासु प्रस्तुतः।

२. श्रीमदादिशङ्कराचार्यः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदाङ्गेषु श्रौतकल्पाङ्गवैशिष्ट्यम्

डॉ. देवेन्द्रनाथत्रिपाठी
प्राध्यापकः, संस्कृतविभागस्य
स्वामी-देवानन्द-स्नातकोत्तर-महाविद्यालये
मठ-लार, देवरिया

❀ ❀ ❀

निखिलं खलु दरीदृश्यमानस्य स्थावरजङ्गमात्मकस्य जगतो धारकोऽप्रतिहतशक्तिसम्पन्नश्च वेदः; यथोक्तं महर्षिणा मनुना—

'बिभर्ति सर्वभूतानि वेदशास्त्रं सनातनम्'[१]।

वेदो हि भारतीयवाङ्मयस्य नूनमेव प्रकर्षरूपः। भारतस्य सांस्कृतिकं दार्शनिकमाध्यात्मिकञ्च विश्वगुरुत्वं वेदमूलकमेव। विद्-ज्ञाने धातुना करणेऽर्थे घञ्प्रत्यये कृते सति वेदशब्दो निष्पद्यते। अतो हि धर्मादिपुरुषार्थचतुष्टयोपाया येन वेद्यन्ते ज्ञायन्ते, असौ वेद इति वेदशब्दस्य व्युत्पत्तिमूलकोऽर्थः। यथोक्तं सायणाचार्येण—''इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः''[२] इति। लौकिकपदार्थानां सम्यगवबोधनाय नयनस्य यदुपयोगित्वम्, अलौकिकानां तत्त्वानां रहस्यावगमाय तदेवोपयोगित्वं वेदस्य। अलौकिकानां तत्त्वानां निरूपणे लौकिकानां प्रमाणानां शक्तिस्तु प्रतिहता भवति। इदमेवोरीकृत्योक्तं श्रीमता शङ्कराचार्येण—

''चोदना हि भूतं भवन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवंजातीयकमर्थं शक्नोत्यवगमयितुमिति''[३]। तथा हि ज्ञा-विद्-धातुद्वयस्यार्थसाम्ये सत्यपि तन्निष्पन्नयोर्ज्ञानवेदशब्दयोरर्थपार्थक्यमस्त्येव। एको हि ज्ञानशब्दो लौकिकानां बाह्यपदार्थानामर्थावबोधकोऽपरश्च वेदशब्दोऽलौकिकानां तत्त्वानां विश्लेषणपरः। भौतिकविद्यावबोधकं ज्ञानम्, आध्यात्मिकत्वावबोधको वेदः। इदमेवानुमोदयन् निगदितम्, यत्—

---

१. मनु. १२।९९; २. ऋ.भा.भू., पृ. २; ३. ब्रह्मसू., शां.भा. १।१।२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते।
एवं विदन्ति वेदेन तस्माद्वेदस्य वेदता[1] ।। इति।

मन्त्रसंहितानामाविर्भावादनन्तरं वेदषडङ्गानां समुदयो जातः। अयं नवीनस्य युगस्योदयो ह्युत्तरवैदिकयुगशब्देन विद्वद्भिर्व्यवह्रियते। अस्मिन्नेव युगे वैदिक-रीतिव्यवहारयोराचारविचारयोः शिक्षादीक्षयोरविचला प्रतिष्ठा सञ्जाता। शिक्षाकल्प-व्याकरणादीनां वेदषडङ्गानां प्रयोजनं तु वेदस्वरूपसंरक्षणं तदर्थज्ञानावबोधन-ञ्चैवास्ति। इदमेवानुमोदयन्—'वेदार्थावबोधयितुं शिक्षादीनि षडङ्गानि प्रवृत्तानी'त्युक्तं सायणाचार्येण ऋग्वेदभाष्यभूमिकायाम्[2]। यैरुपायैर्वेदा अङ्ग्यन्ते ज्ञायन्ते तानि वेदाङ्गानीति वेदाङ्गशब्दस्य व्युत्पत्तिमूलकोऽर्थो वेदार्थप्रतिपत्तये वेदाङ्गानामप्रतिमं महत्त्वं द्योतयति। षड्वेदाङ्गानां निर्धारणं त्वतिप्राचीनकालादेव जातम्। गौतमधर्म-सूत्र-गोपथब्राह्मण-बौधायनधर्मसूत्र-रामायणप्रभृतिषु प्राचीनेष्वर्वाचीनेषु च प्रामाणिकेषु ग्रन्थेषु वेदाङ्गानां माहात्म्यं विशदीकृतम्। अतोऽसन्दिग्धा खल्वेतेषां प्रामाणिकता। प्राक्तना ऋषयो हि साक्षात्कृतधर्माण आसन्, अतस्ते द्रष्टारः। परवर्त्तिभिश्च ऋषिभि-र्ग्रन्थरूपेणार्थरूपेण च मन्त्राः श्रुताः। एवं श्रवणादनन्तरं तेषु धर्मदर्शनयोग्यता-पादनात्ते श्रुतर्षित्वेन प्रथिताः। तैरेव श्रुतर्षिभिरल्पज्ञानां मानवानां कल्याणार्थं वेदार्थावबोधनोपयोगिशिक्षाकल्पादिषडङ्गानि विरचितानि। इदमेव समर्थयन् यास्काचार्येण निगदितं यत्—

''साक्षात्कृतधर्माणो हि ऋषयो बभूवुस्तेऽवरेभ्योऽसाक्षात्कृतधर्मेभ्य उपदेशेन मन्त्रान् सम्प्रादुः। उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणाय इमं ग्रन्थं समाम्नाषिसुर्वेदं च वेदाङ्गानि चेति''[3]।

एवं विश्रुतेषु वेदाङ्गेषु कल्पस्य महत्त्वं द्योतयन् महर्षिणा पाणिनिनोक्तं यत्—'हस्तौ कल्पोऽथ पठ्यते'। कथनस्यास्यायं हृदयस्पर्शी भावो यत्—यथा शारीरिकमानसिकदृष्ट्या च परिपुष्टोऽपि कश्चिज्जनो हस्तं बिना शक्तिप्रत्यायकं कर्मकौशलं व्यावहारिकोपयोगित्वं च न परिपुष्यति, तथैव कल्पसाहित्यं बिना अप्रतिहतशक्तिसम्पन्नोऽपि वेदः पुरुषार्थोपयोगित्वं न साधयति। अतो वेदाङ्गेषु कल्पस्य स्थानमतीवमहत्त्वपूर्णमस्ति। कल्पसाहित्यं वैदिककर्मकाण्डयज्ञानुष्ठान-विधिप्रत्यायकम्। कल्प्यते समर्थ्यते यागप्रयोगोऽत्र, इति कल्पशब्दस्य

---

१. ऋ.भा.भू., पृ. १०५;   २. ऋ. भाष्यम्, पृ. ११६।
३. पा.शि., श्लो. ४१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्युत्पत्तिमूलकोऽर्थो निगदति सायणाचार्यः स्ववेदभाष्यभूमिकायाम्। ब्राह्मणग्रन्थेषु यज्ञानुष्ठानविधिवर्णनमतीवविस्तृतरूपेण कृतमासीत्। कालान्तरे ब्राह्मणग्रन्थानामिदमतीवपरिपुष्टं विस्तृतञ्च यज्ञानुष्ठानवर्णनं क्षीणज्ञानवतां मानवानां मनो नानुरञ्जयति स्म। अत एव ब्राह्मणवर्णितानां यज्ञकर्मणामानुपूर्विक्रमबद्धञ्च सङ्क्षिप्तं तद्वर्णनमपेक्षितं जातम्। तदनन्तरं ह्युत्तरवैदिकयुगस्य युगधर्ममनुसृत्य एतेषां ग्रन्थानां रचना सूत्ररूपेण जाता। कल्पसूत्रं नूनमेव वैदिककर्मणां सुव्यवस्थितरूपेण कल्पनाशास्त्रम्। इदमेव समर्थयति ऋक्प्रातिशाख्यवृत्तिर्यथा—"कल्पो वेदविहितानां कर्मणामानुपूर्वेण कल्पनाशास्त्रम्"[१]। अनेन प्रकारेण येषां यज्ञकर्मणां विवाहोपनयनादीनाञ्च विस्तृतं विवेचनं ब्राह्मणेषूपलभ्यते, तेषामेव क्रमबद्धरूपेण सङ्क्षिप्तञ्च वर्णनं कल्पसूत्रेषु विद्यते। कल्पसूत्राणि ब्राह्मणैरारण्यकैश्च सह साक्षात् सम्बद्धानि सन्ति। अतस्तेषां प्राचीनताऽसन्दिग्धा। कल्पसूत्राणि प्रतिशाखाभिन्नानि सन्ति। ब्राह्मणयुगे वैदिकानामार्याणां यज्ञ एव प्रधानं धार्मिकं कर्म आसीत्। तेषां यज्ञानामतीवविस्तृतत्वाद् ऋत्विग्भ्यो यागोपयोगिव्यावहारिकाणां संक्षिप्तनियमानामावश्यकता जाता। अत एव तदानीं प्राक्तनैर्महर्षिभिः कल्पसूत्राणि रचितानि। कल्पसूत्राणि अत्यल्पेषु शब्देषु सारगर्भितमधिकाधिकं भावं प्रकटयन्ति।

कल्पसूत्राणां चत्वारो भेदाः सन्ति—श्रौतसूत्रं गृह्यसूत्रं धर्मसूत्रं शुल्बसूत्रञ्चेति। एतेषां विभागानां मध्ये श्रौतसूत्रस्य महत्त्वमतीवसमृद्धमस्ति। यतो हि श्रौतसूत्रेष्वेव ब्राह्मणग्रन्थेषु वर्णितानां देवाग्नौ सम्पद्यमानानां यागानुष्ठानानां साङ्गोपाङ्गं वर्णनं मिलति। गृह्यसूत्रेषु गृह्याग्नौ क्रियमाणानामुपनयनविवाहादिसंस्काराणां वर्णनम्, धर्मसूत्रेषु वर्णानामाश्रमाणाञ्च कर्तव्यतावर्णनम्, शुल्बसूत्रेषु च वेदिप्रमाणप्रतिपादनमस्ति। सर्वे वेदाः प्रधानरूपेण यज्ञकर्मैवाभिनन्दयन्ति। यथोक्तम्—'वेदा हि यज्ञार्थमभिप्रवृत्ताः' इति। यज्ञकर्मणि एव सृष्टिधारणस्य पोषणस्य चाप्रतिमं सामर्थ्यमस्ति। यज्ञस्य सृष्टिसाधकं सामर्थ्यं प्रतिपादयन् मनुनोक्तं यत्—

अग्नौ प्रास्ताहुतिः सम्यग् आदित्यमुपतिष्ठति।
आदित्यज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः[२]।।

इदं दृश्यमानं निखिलं जगद् यज्ञादेव प्रवर्तितम्। यज्ञं विना न कदापि सृष्टिः प्रभवितुं शक्नोति। यथोक्तं महाभारते—'अनुयज्ञं जगत्सर्वं यज्ञश्चानुजगत्सदा"[३]। क्रियमाणे यज्ञकर्मणि ब्रह्मण एव सर्वतोभावेन प्रतिष्ठा भवति। अतो

---

१. ऋ.प्रा., वर्गद्वयवृत्तिः, पृ. १३; २. मनु. ३।७६।
३. महा., शा.प., २६७।३४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हि ब्रह्मणः सर्वगतत्वेन यज्ञस्य प्राथम्यं सर्वत्रैव दुर्निवारं वेदोपबृंहितञ्च। श्रौतसूत्राणि जराजन्मपीडितानां मानवानां कृते सर्वतोऽभ्युदयसाधकानां यज्ञाग्नौ सम्पद्यमानानां कर्मणां सुव्यवस्थितं वर्णनं कुर्वन्ति। अतस्तेषां वैशिष्ट्यं सुतरां युक्तियुक्तम्। श्रौतसूत्राण्यतिरिच्य जन्मजरामृत्युबन्धनोच्छेदो न सहजरूपेण भवितुं शक्नोति। यतो हि ब्राह्मणग्रन्थानां सुविस्तृतमक्रमञ्च यागवर्णनं न क्षीणमेधाविनां बुद्धिमेति। यागफलविरहितानामल्पज्ञानां जनानां कृते उपनिषदां ज्ञानासिधाराचुम्बनं सर्वथैवाशक्यम्। अतो नूनमेव श्रौतसूत्राणि परमं पुरुषार्थं प्रति जननमरणपाशबद्धान् मानवान् सुपथा नयन्ति। इदमेव समर्थयन् आथर्वणिका आमनन्ति—

"एहि एहीति तमाहुतयः सुवर्चसः,
सूर्यस्य रश्मिभिर्यजमानं वहन्ति।
प्रियां वाचमभिवदन्त्योऽर्चन्त्य
एष वः पुण्यः सुकृतो ब्रह्मलोकः[1]।।

यद्यपि श्रौतकल्पसूत्राणामश्वमेधवाजपेयराजसूयादियज्ञानुष्ठानानां वर्णनमतीवगहनं गभीरञ्च विद्यते, यत्र न सामान्यजनानामाकर्षणबन्धस्तथापि धार्मिकधिया स्वप्रतिपाद्ययागानुष्ठानदृष्ट्या च तानि सूत्राण्यद्वितीयानि सन्ति। यथा शरीरसौष्ठवयुक्तस्य सर्वाङ्गसंवलितस्यापि जनस्य हस्तं बिना स्वसामर्थ्यप्रदर्शनं व्यवहारोपयोगित्वञ्च न सिद्ध्यति तथैव श्रौतकल्पसूत्रं विनाऽप्रतिमसामर्थ्ययुक्तस्यापि वेदस्याशेषपुरुषार्थसाधनता न प्रसिद्ध्यति। एवमुपर्युक्तेन वर्णनेनेदं सुस्थिरीकृतं यत् श्रौतकल्पस्य वैशिष्ट्यं दुर्निवारमेवेति।

---

१. मु.उ., २।६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति

डॉ. मुरलीधरपाण्डेयः

निदेशकः
श्रीपट्टाभिरामशास्त्रिवेदमीमांसानुसन्धानकेन्द्रस्य
वाराणस्याम्

❀ ❀ ❀

पुण्यश्लोकानां वन्दनीयचरितानां केषाञ्चन महावैयाकरणानां कानिचित् पदानि कानिचिद् वाक्यानि चैवं लभामहे। येन तेषां तत्र क आशय इति विज्ञातुं न पारयामहे। यथा— मनोरथः = मनसोऽर्थः अभिलाषः प्रयोजनं वा मनोऽर्थ इति पदम्। अस्यैवापभ्रंशो मनोरथ इति पदम्। अस्य विग्रहो मनसो रथ इति। मनसो रथस्तु न कश्चन प्रसिद्धोऽस्ति तथापि लक्षणया अभिलाषार्थे प्रयुज्यते। पूज्यैर्वैयाकरणैरेतदपभ्रंशपदं साधु मत्वा साधयितुं महान् प्रयासो विहितः। मनसः सकारस्य रुत्वे कृते 'हशि चे'ति सूत्रेण उत्वे प्राप्ते 'रोरि' इति सूत्रेण लोपे प्राप्ते 'विप्रतिषेधे परं कार्यमि'ति सूत्रानुरोधेन लोपस्यैव प्राप्तौ तैरुक्तम्— पूर्वत्रासिद्धमिति रोरीत्यस्यासिद्धत्वादुत्वमेव मनोरथ इति। मनोरथपदस्यापभ्रंशत्वस्वीकारे एतावान् प्रयासो न भवेत्।

यथा च— रामादित्यत्र वैयाकरणसिद्धान्तकौमुद्यामुक्तम्—जश्त्वं वावसाने रामात्, रामादिति। अत्र तत्त्वबोधिन्यामुक्तम्—अत्राहुः—जश्त्वे कृतेऽवसाने चर्त्वमिति न मन्तव्यम्; किन्तु येन नाप्राप्तिन्यायेनावसाने चर्त्वस्य जश्त्वापवादत्वाच्चर्त्वा-भावपक्षे जश्त्वमिति बोध्यम्; किन्तु लिट्प्रयोगसाधने उक्तम्—जश्त्वचर्त्वे=अर्थात् ढस्य पूर्वं जश्त्वं ततश्चर्त्त्वम् लिट् लिडिति। अत्र स्पष्टं पूर्वापरवैपरीत्यम्। अत्र केचनैव वदन्ति यद् जश्त्वचर्त्वे इत्यत्र पदच्छेदः— जश् तु अचर्त्वे इति; परन्तु इदमकिञ्चित्करमिव प्रतिभाति।

यथा च—राजा इति प्रयोगसाधने वैयाकरणसिद्धान्तकौमुद्याम्— हल्ङ्यादिलोपात् परत्वाद् नान्तलक्षणदीर्घः क्रियते; किन्तु दीर्घाहन्शब्दे तु प्रथमं हल्ङ्यादिलोपस्ततो नान्तलक्षणोपधादीर्घः क्रियते। अत्रापि पूर्वापरवैपरीत्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथा च— पुरतः = रसगङ्गाधरे उपमालङ्कारप्रकरणे श्रीमता पण्डितराजेन जगन्नाथेन श्रीमदप्पयदीक्षितस्यैकं श्लोकमुद्धृत्य तत्र प्रयुक्तस्य पुरतः इति पदस्य विषये उक्तं यत् पुर्शब्दात् तसिल्प्रत्यये पुर् + तः = पुस्त इति भवितुमर्हति, न तु पुरत इति। अत एव श्रीकालिदासेन रघुवंशे द्वितीयसर्गे 'अमुं पुरः पश्यसि देवदारुमि'त्युक्तमित्यादि। अत्र श्रीमता नागेशभट्टेन रसगङ्गाधरस्य टीकायां पुरत इत्यस्य सिद्ध्यर्थं त्रय उपायाः प्रदर्शिताः = पुरत इति निपातनम्। अथवा पुर आदेशं कृत्वा सर्वविभक्तिभ्यस्तसिल्, अथवा पुर्अग्रगमने चौरादिकाद्धातो-र्ण्यन्ताभावे पुरशब्दं संसाध्य पुरत इति साधनीयम्; किन्तु पुर्-अग्रगमन इति धातुस्तुदादिगणे पठितो न तु चुरादिगणे। वस्तुतस्तु पुरशब्दोऽकारान्तोऽपि दृश्यते, यथा—'पुरः पाटलिपुत्रेऽङ्गे गुग्गुलौ तु पुमानयमिति रभसः, स्यात् पुरः पुरतोऽग्रतः' इत्यमरकोषः, 'यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः' इति नीतिशतके भर्तृहरिः।

यथा च मीमांसा— मीमांसेति पदं मान्-धातोर्निष्पद्यते। अत्र त्रयो मान्-धातवः-मान्-पूजायामिति भ्वादौ, मान्-स्तम्भे इति चुरादौ, मान्-पूजायामित्यपि चुरादौ; किन्तु मान्-पूजायामिति ३०१ संख्याकेऽङ्किते चौरादिके धातौ श्रीमता भट्टोजीदीक्षितेनोच्यते—'विचारणे तु भौवादिको नित्यसन्नन्तः' इति। एतेन प्रतीयते यद् भ्वादौ मान्-विचारणे इत्यपि कश्चन धातुरासीत्। केनापि कारणेन भ्वादावस्य पाठोऽधुना नोपलभ्यते।

वञ्चयति वञ्चयते = 'गृधि-वञ्चोः प्रलम्भने' (१।३।६९) इति सूत्रानुसारं वञ्चनेऽर्थे वञ्चयते भवति, वर्जनेऽर्थे वञ्चयति भवति। यथा अहिं वञ्चयति वर्जयतीत्यर्थः। किन्तु 'लियः सम्मानशालिनी करणयोश्च' (१।३।७०) इति सूत्रे बालमुल्लापयते वञ्चयतीत्यर्थो वैयाकरणसिद्धान्तकौमुद्यामुच्यते। वस्तुतोऽत्र वञ्चनमर्थो वञ्चयते इत्यात्मनेपदेन स्यात्।

भूवादयो धातवः (१।३।१)—अस्य सूत्रस्यार्थः = क्रियावाचिनो भ्वादयो धातुसंज्ञकाः स्युः। अस्यार्थस्य निष्पत्तये भूश्च वाश्चेति भूवौ आदिश्च आदिश्चेति आदी भूवौ आदी येषां ते भूवादयः। अत्र आदिशब्दे श्लेषः एकशेषश्च। एक आदिशब्दः प्रभृत्यर्थकः, अपरः सदृशार्थकः। तेन भूप्रभृतयो वासदृशा इत्यर्थः। सादृश्यं च क्रियावाचित्वेन। अतः क्रियावाचिनो भ्वादयो धातुसंज्ञकाः स्युरित्यर्थः सम्पद्यते।

किन्त्वत्र भूश्च वाश्चेति इतरेतरयोगद्वन्द्वप्रयासोऽकिञ्चित्कर इव प्रतिभाति। यथा आदिशब्दे एकशेषः श्लेषमूलकस्तथैव भूशब्देऽपि एकशेषः श्लेषमूलको भवितुमर्हति, भू + आदिशब्दयोर्यणि कृते भ्वादय इति स्यात्, भूवादय इत्यपि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्यात्। प्राचीनकाले यणि कृते स्वराणामपि श्रवणमासीत्। यथा— सु + अर्णम् = स्वर्णम्, सुवर्णमिति च। यथा च-सु + अः = स्वः, सुवश्चेति। श्रीपिङ्गलाचार्यकृते पिङ्गलसूत्रे 'इयं वा' (२।२) इति सूत्रमपि वर्तते। उदाहरणं च—त्रि + अम्बकम् = त्र्यम्बकम्, त्रियम्बकं च-स्वर्गः सुवर्गश्चेत्यादि। इयङुवङा-देशोऽप्यस्यैवैकरूपम्। तथैव भगवता पाणिनिना भ्वादयः, भूवादय इत्युभयपद-प्रयोगार्हतायां भूवादय इत्येवाङ्गीकृतं भवेत्। यद्यपि श्रीपाणिनिनये पिङ्गलच्छन्दः-सूत्रमियं वा इतिवद् यणि कृते स्वरश्रवणमूलकं किमपि सूत्रं नास्ति किन्त्वेवं-विधमन्यदपि सूत्रं न वर्तते, यथा-रेफशब्दसिद्ध्यर्थं रादिफ इत्यौणादिकं सूत्रम्। यथा च हरिर्गच्छतीति सिद्ध्यर्थं वाक्यसंस्कारपक्ष आश्रीयते; किन्तु चान्द्रव्याकरणे 'नामिनो र' इति सूत्रमेव विद्यते। अत्र क्रियावाचिवाशब्दाभावे पृथिवीवाचिभू-शब्दग्रहणशङ्का नोचिता। यतो हि यथा—'अदिप्रभृतिभ्यः शपः' (२।४।७२), 'दिवादिभ्यः श्यन्' (३।१।६९) चेत्यादौ अदादि-दिवादिगणपठितानामेव ग्रहणं भवति, तथैव भ्वादिगण पठितानामेवात्रापि ग्रहणं स्यात्। सर्वत्रैव गणपाठेषु गणपठितानामेव स्वरूपतः शब्दानामेव ग्रहणं भवति, न तु तत्तच्छब्दार्थवाच्यन्य-शब्दानाम्। एवमेव वाशब्दाभावे भूशब्दार्थवाचिपृथिव्यादिग्रहणं न भविष्यति। यथा-'भृशादिभ्यो भुव्यचेर्लोपश्च हलः' (२।१।१२) इति पाणिनिसूत्रे भृशादिभ्य इति कथनेन भृशादिगणपठिता भृश-शीघ्रचपलमन्दादिशब्दा एव गृह्यन्ते, न तु 'भृशु अधःपतने' (१२२४) भ्वादिगणपठितो धातुः, 'भृशि-आप्यायने' (१७८८) इति चौरादकिश्च गृह्येते। एवमेव भ्वादि इत्युक्ते भ्वादिधातुगण एव ग्रहीष्यते।

एवमेव वैयाकरणसिद्धान्तकौमुद्यां कारकप्रकरणं, लघुसिद्धान्तकौमुद्यां विभक्त्यर्थप्रकरणं, परमलघुमञ्जूषायां कारकार्थविचारप्रकरणं, वैयाकरणभूषणसारे च सुबर्थनिर्णयप्रकरणं सन्ति। अत्रेदं विचारणीयं यत् षष्ठ्याः कारकत्वं नास्तीति स्वीकुर्वतां कारकप्रकरणे षष्ठ्यर्थविचारः कथं सम्भवति? विभक्तिश्च (१।४।१०४) पाणिनिसूत्रेण सुप्तिङोर्विभक्तिसंज्ञायां विभक्त्यर्थप्रकरणे तिङर्थ-विचारोऽपि सम्भवति। एवमेव परमलघुमञ्जूषायामपि। वैयाकरभूषणसारोक्तं सुबर्थनिर्णयप्रकरणमिति नाम रोचते।

अत एवंविधानां शब्दानां वाक्यानां च प्रयोगे तेषां तेषां पूज्यानां परममहावैयाकरणानां चेतःसु किमासीदिति त एव विदाङ्कुर्वन्तु। यतो हि लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हतीति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धात्वर्थसिद्धान्तविमर्शः

डॉ. रामकिशोरत्रिपाठी

व्याकरणविभागाध्यक्षः
श्रीमाथुरचतुर्वेदसंस्कृतमहाविद्यालयस्य
डैम्पियरनगरम्, मथुरा

शब्दमूलं जगत्सर्वं स्मृतं व्याकरणे नये।
शब्दाश्च धातुजाः सर्वे मन्यते शाकटायनः।।
धातुर्द्रव्यमयो लोके शुक्रादयश्च भैषजे।
क्रियारूपश्च मन्यन्ते पदवाक्यप्रमाविदः।।
फलव्यापाररूपोऽयमर्थः कैश्चन मृग्यते।
कृतिरेव प्रमाविज्ञैः फलं वाक्यविशारदैः।।
व्याकरणेऽप्ययं भेद आचार्यैरनुमन्यते।
पृथक् शक्तिधराः केचित् खण्डशो वादिनोऽपरे।।
शास्त्राणि वै प्रभिन्नानि तेषाञ्च विविधं मतम्।
तत्तच्छास्त्रविदैः सर्वैर्धात्वर्थोऽपि विखण्ड्यते।।
अन्यन्मतं समाख्याय शब्दशास्त्रमतं मुदा।
वच्मि धात्वर्थसंवादे सर्ववादप्रधानकम्।।

लोके सुवर्णादिद्रव्याणि धातुपदवाच्यानि। चरकसुश्रुतादिचिकित्साशास्त्रेषु शुक्रादिकं धातुः। अथ च गन्धकः, अभ्रकमादीनि गिरिसमुद्भवानि वस्तून्यपि धातुपदेनैव व्यवहृतानि। तथा चाह लक्ष्मीकारः —

[१]सुवर्णरूप्यताम्राणि हरितालं मनःशिला।
गैरिकाञ्चनकासीससीसलोहाः सहिङ्गुलाः।।

१. सिद्धान्तकौमुद्यां लक्ष्मीटीकायां संज्ञाप्रकरणे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गन्धकोऽभ्रकमित्याद्या धातवो गिरिसम्भवाः।

श्लेष्मादिरसरक्तादिमहाभूतानि तद्गुणाः।।

इन्द्रियाण्यश्मविकृतिः शब्दयोनिश्च धातवः।।

यद्यप्येष्वर्थेषु धातुशब्दः प्रसिद्धस्तथापि आर्षपरम्परया सङ्केतानुरोधेन पाणिनिना 'भूवादयो धातवः'[१] इति सूत्रमाध्यमेन भू-आदिषु क्रियावाचकशब्देषु सङ्केतितः, स एवार्थो न्यायमीमांसादिशास्त्रज्ञैः शब्दशास्त्रविज्ञैर्वैयाकरणैश्च सादरं समादृतः। पाणिनेः पूर्वाचार्या अपि धातुपदं क्रियावचनेषु व्यवहरन्ति स्म। उक्तञ्च काशिकावृत्तौ-'धातुशब्दः पूर्वाचार्यसंज्ञा। ते च क्रियावचनानां संज्ञां कृतवन्तः। तदिहापि पूर्वाचार्यसंज्ञाश्रवणात् क्रियावाचिनामेव भूवादीनां धातुसंज्ञा विधीयते[२]'। एवं महाभाष्येऽपि-क्रियावचनो धातुरित्येतल्लक्षणं क्रियते। का पुनः क्रिया? ईहा। का पुनरीहा? चेष्टा। का पुनश्चेष्टा? व्यापारः[३]'। प्रदीपे तु 'ईहा-चेष्टाशब्दयोरन्यत्र व्यापारविशेषवचनत्वेऽपि इह व्यापारमात्रवचनत्वं बोद्धव्यम्[४]'। लघ्वर्थं हि संज्ञाकरणमिच्छन्त्याचार्या इत्येकाक्षरायां संज्ञायां कर्त्तव्यायां महत्याः पूर्वाचार्यसंज्ञाया यदाश्रयणं तस्यैतत्प्रयोजनम् — यथाविधानां ते धातुसंज्ञां कृतवन्तः, तथाविधानामेवैषा संज्ञा यथा स्यादिति। ते च क्रियावचनानामेव धातुसंज्ञां विहितवन्तः। तदिहापि पूर्वाचार्यसंज्ञाश्रयणात् क्रियावचनानामेव धातुसंज्ञा विधीयते। तेन या वा दिव् इत्येवमादीनां धातुसमानशब्दानामक्रियावचनान्न भवतीति भावः।

'भूवादयो धातवः' इति सूत्रे क्रियावाचित्वरूपार्थविषये भाष्यकारेण पक्षत्रय-मुपवर्णितम्। तत्र प्रथमपक्षे भूवासङ्घातेन क्रियावाचित्वलाभः। तद्यथा — भूश्च वाश्च भूवौ आदिश्चादिश्चादी। भूवौ आदी येषां ते भूवादयः। अत्र भूशब्देन सम्बद्ध आदिशब्दो व्यवस्थावाची अवयववाचीति यावत्। वाशब्देन सम्बद्धः प्रकारवाची सदृशवाचीति यावत्। तदुक्तं भाष्ये—'भू इत्यत्र य आदिशब्दः स व्यवस्थायां वर्तते। वा इत्यत्र य आदिशब्दः स प्रकारे वर्तते[५]'।

न चैवं प्रत्येकमन्वये द्वन्द्वानुपपत्तिः, भूवासमुदायस्य आदिसमुदायेऽन्वयं स्वविशिष्टसम्बन्धेन कृत्वा समासे पुनर्यथासंख्यसूत्रसामर्थ्येन यथासंख्यमन्वयः। यथासंख्येनान्वयस्थले द्वन्द्वस्योक्तरीत्यैवोपपाद्यतया पुनर्यथासंख्येनान्वयाभावे यथासंख्यसूत्रवैयर्थ्यापत्तिस्तादृशद्वन्द्वघटितसूत्रवैयर्थ्यापतिश्च स्पष्टैव। सम्बन्ध-

---

१. पा.सू. १।३।१;
२. काशिकावृत्तौ, पा.सू.१।३।१।
३. महाभाष्ये, पा.सू. १।३।१;
४. महाभाष्यप्रदीपे, पा.सू. १।३।१।
५. महाभाष्ये, पा.सू. १।३।१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

घटकवैशिष्ट्यञ्च प्रकृते स्वघटकाभिन्नघटितत्वस्वघटकप्रतियोगिकसादृश्यवद्घटितत्वोभयसम्बन्धेन। स्वम्— भूवासमुदायस्तद्घटकाभिन्न आदिस्तद्घटितत्वम्, स्वघटको वाशब्दस्तत्प्रतियोगिकसादृश्यमादिस्तद्घटितमपि आदिसमुदाये सुलभम्। तथा च एकधर्मावच्छिन्नस्यैकधर्मावच्छिन्नसम्बन्धेनैकधर्मावच्छिन्नेऽन्वयरूपसाहित्यस्य सत्त्वेन साहित्ये एव द्वन्द्व इति नियमस्यापि न व्यभिचारः। पुनर्यथासंख्येनान्वये वादय इत्यस्याभेदेन भ्वादय इत्यत्रान्वये वासदृशाभिन्ना भ्वादयो धातुसंज्ञका इत्यर्थः सिध्यति।

तत्र सादृश्यस्य साधारणधर्मसाकाङ्क्षत्वेन लक्ष्यानुरोधात् क्रियावाचिनो धातुरिति भाष्यादिप्रामाण्याच्च क्रियावाचित्वेनैव सादृश्यमिति क्रियावाचिनो भ्वादय इति फलितार्थमाह—क्रियावाचिन इति। यदि त्वेकेन समस्तेन वा पदेन उपस्थितयोरर्थयोः परस्परमुद्देश्यविधेयभावेनान्वयोऽनुपपन्नः, काव्ये विधेयाविमर्शदोषवत्, तदा तन्त्रेण भूवादय इत्यस्यावृत्त्या वा पदद्वयं विधायोक्तार्थः साधनीयः।

नन्वेवमपि क्रियावाचित्वेन सादृश्यमसङ्गतम्, सादृश्यप्रतियोगितावच्छेदकधर्मव्यापकधर्मेणैव सादृश्यमिति नियमः। अन्यथा कतिचिद् ब्राह्मणगतधनिकत्वमादाय 'ब्राह्मणवत् क्षत्रियो धनिकः' इति प्रयोगापत्तेः। व्यापकधर्मेण सादृश्ये तु ब्राह्मणत्वव्यापकत्वं धनिकत्वे नास्तीति न तादृशप्रयोगः। एवं प्रकृते वात्वव्यापकत्वं क्रियावाचित्वे नास्ति, अव्ययवाशब्दे वात्वसत्त्वेऽपि क्रियावाचित्वाभावात्। साध्यरूपक्रियावाचित्वं धातोरेवासाधारणधर्म इति चेत्, न, भूवाशब्दयोः परस्परसाहचर्येण क्रियावाचिन इत्यर्थलाभात्। तथा हि वाशब्दोऽपृथिवीवाचीति तत्साहचर्येण भूशब्दोऽपि अपृथिवीवाच्येवात्र, अपृथिवीवाची भूशब्दश्चानव्ययमिति वाशब्दोऽपि अनव्ययमेव, अनव्ययवाशब्दश्च क्रियावाचीति भ्वादयोऽपि क्रियावाचिन एव गृह्यन्त इति क्रियावाचिन इत्यस्य लाभः। इत्ययमेव पक्षः सिद्धान्तरूपेण कौमुद्यामुक्त इत्येकः पक्षः।

अत्र क्रियावाचिनो भ्वादय इत्यत्र भ्वादिपदेन धातुपाठस्थभूशब्दादारभ्य कण्ड्वादिस्थ-संवरान्ता २०१८ धातवो गृहीतव्याः। न त्वदादितः पूर्व एव भ्वादयश्चुराद्यन्ता एव वा अदादीनां कण्ड्वादीनाञ्च धातुत्वानापत्तेः। किञ्च भ्वादिगणपठिता धातुसंज्ञका इत्यपि नार्थः, गणे पठितानां स्वरूपबोधकत्वेन क्रियावाचकत्वाभावात्, लक्ष्यस्थस्य गणस्थत्वाभावेन धातुत्वानापत्तेश्च; किन्तु भ्वादिगणपठितवृत्त्यानुपूर्वीमन्तः क्रियावाचिनो धातुसंज्ञका इत्येवार्थः। क्रियाबोधकास्तु लक्ष्यस्थाः 'भवति, पचति, एधते' इत्यादयो न च गणपठिता भू-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पच्-एधित्यादयः। न कश्चित् सत्तार्थं भू, विक्लित्त्यनुकूलव्यापारार्थञ्च पचिति प्रयुङ्क्ते। अतो लक्ष्यस्थं भवति, पचति आदिगतं क्रियावाचित्वं तत्तद्गणपठितेषु भू-पच्-आदिष्वारोप्यते। उक्तञ्च भाष्ये—'धातोश्चार्थभेदात्प्रत्ययान्तरेषु मन्यामहे, धातुरेव क्रियामाहेति पक्तिः पचनं, पाक इति। प्रत्ययश्चार्थोऽन्यान्यश्च भवति प्रकृत्यर्थः स एव[१]'।

एवं गणेऽपठितानां सौत्राणां शिष्टप्रयोगे उपलब्धानाञ्च भ्वादिषु पाठं प्रकल्प्य धातुसंज्ञा विधेया। भूरादिर्येषां ते भूवादयः। न च यणि भ्वादय इति वाच्यम्, मङ्गलार्थं वकारागमनिपातनात्। न च वकारेण मङ्गलं दुर्वचम्, 'मङ्गलार्थं वकारागमं प्रयुङ्क्ते[२]' इति भाष्यस्यैव मानत्वात्। तच्च भाष्यं वकारागमेऽविकलभूशब्दश्रवणेन व्याहृतिस्मारकतया मङ्गलप्रयोजकता वस्येत्यभिप्रायकम्। अत्र पक्षे क्रियावाचिन इत्यस्य लाभस्तु पूर्वाचार्यैः क्रियावाचिनां धातुसंज्ञा कृता तस्या महासंज्ञाया आश्रयणस्य उद्देश्यदले क्रियावाचित्वनिवेशतात्पर्यकत्वादिति द्वितीयः पक्षः।

यद्वा, भुवं जायमानमर्थं ये वदन्ति ते भूवादयः। वदेरौणादिक-'वसि वपि......[३]'। इति सूत्रेण इञ् क्रियावाचिनो धातव इत्यर्थः। धातुत्वे सति क्रियावाचित्वं क्रियावाचित्वे सति धातुत्वमित्यन्योन्याश्रयस्तु न, शब्दानां नित्यत्वात्। इति तृतीयः पक्षः। तदुक्तं भाष्ये—'नेदमादिग्रहणम्। वदेरयमौणादिक इञ् कर्तृसाधनः। भुवं वदन्तीति भूवादय इति[४]'।

अपरश्च भवनं भूः, वा आदिर्येषां ते, वा गतीत्यारभ्य कण्ड्वाद्यन्ता वादयः। तथा वा गतीत्यस्यादयो भ्वादयो वापर्यन्ताः। वादयश्च वादयश्च वादयः, बहुव्रीहितत्पुरुषयोरेकशेषः। भुवो वादयो भूवादयः। वाच्यवाचकभावः षष्ठ्यर्थः। क्रियावाचका भूप्रभृतयो वाप्रभृतयश्च धातुसंज्ञका इति चतुर्थः पक्षः। क्रियात्वं नाम फलव्यापाररूपम् —

'फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः।
फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्[५]'।।

इत्यभियुक्तवचनात्। फलव्यापारयोरित्यत्र द्विवचननिर्देशेन, द्वन्द्वनिर्देशाद्वा, फलबोधिका व्यापारबोधिका च शक्तिः पृथगस्तीति सूच्यते। पृथक्शक्तिस्वीकारेणैव

१. महाभाष्ये, पा.सू. १।३।१; २. तत्रैव-१।३।१।
३. उ.सू. ४ पा. १२५; ४. महाभाष्ये, पा.सू. १।३।१।
५. वैयाकरणभूषणसारे, धात्वर्थनिरूपणे, का. २।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'स्तोकं पचति' इत्यत्र फलरूपस्तोकपदार्थस्य पचति-क्रियायामभेदेनान्वयः। 'ईषद्धसति' इत्यत्र च ईषदिति क्रियाविशेषणस्य हास्यरूपफलेऽभेदेन संसर्गेणान्वयः। 'देवदत्तो ग्रामं गच्छति' इत्यत्र देवदत्तस्योत्तरदेशसंयोगानुकूलव्यापारे तथा च ग्रामस्य संयोगरूपफले भेदेन वृत्तित्वसम्बन्धेनान्वयः। एकत्वविशिष्ट-पुंस्त्वविशिष्ट-देवदत्तकर्तृको ग्रामकर्मक उत्तरदेशसंयोगानुकूलो व्यापार इति शाब्दबोधः।

'स्वरितञितः कर्त्रभिप्राये क्रियाफले'[1] इति सूत्रे फलपदं प्रवृत्त्युद्देश्यमुख्य-फले प्रसिद्धम्। तथा च तादृशफलस्य धातुवाच्यत्वे विक्लित्त्यनुकूलव्यापारदशायां तण्डुलस्य धात्वर्थतादृशफलाश्रयत्वाभावात् कर्मत्वानुपपत्तिः। तज्जन्यतादृशफला-श्रयस्य तदापत्तिश्चेत्यत आह—'फलं विक्लित्त्यादि'[2]। विक्लित्तिर्विक्लेदनम् (अवयवानां शिथिलीभवनम्)। अयमाशयः—फलपदस्य लोके रूढ्या तादृशार्थो-पस्थापकत्वेऽप्यत्र पारिभाषिकार्थपरतयैव। अन्यथा सकर्मत्वादिव्यवहारो दुरुपपादः स्यादिति। ननु धातुवाच्यत्वमेव फलत्वं तर्हि व्यापारस्यापि फलत्वापत्तिरिति चेत्, न, धातुविशिष्टत्वं फलत्वम्, वैशिष्ट्यञ्च स्वनिष्ठशक्तिप्रयोज्योपस्थितिविषयत्वं स्वनिष्ठशक्तिप्रयोज्योपस्थितिविषयनिष्ठजनकतानिरूपितजन्यत्वप्रकारतानिरूपक-प्रतीतिविषयत्वोभयसम्बन्धेन। परे तु धातुवाच्यत्वे सति धातुवाच्यव्यापारजन्यत्वमेव फलत्वं परिष्कुर्वन्ति। तदुक्तं हरिणा —

'यस्यार्थस्य प्रसिद्ध्यर्थमारभ्यन्ते पचादयः।
तत्प्रधानं फलं तेषां न लाभादिप्रयोजनम्'[3]।।

व्यापारस्तु भावनाभिधा साध्यत्वेनाभिधीयमाना क्रिया। सा च मीमांसकनये लिङादिवाच्या शाब्दी भावना, तिङ्वाच्या चार्थी भावना। सैवार्थी भावना चास्माकं शाब्दिकानां व्यापारः। स च धात्वर्थ एव, न तु तिङर्थ इति भेदः। नव्यास्तु धात्वर्थफलजनकत्वे सति धातुवाच्यत्वं व्यापारत्वमिति स्वीकुर्वन्ति। अयञ्च व्यापारः फूत्कारत्वाधःसन्तापनत्वयत्नत्वादितत्तद्रूपेण वाच्यः। तथा चोक्तम्—

'यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते।
आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते'[4]।।

सिद्धं वा भवत्वसिद्धं वा, शब्देन तु यद्वस्तु साध्यत्वेनाभिधीयते सा क्रिया, साध्यत्वे चाश्रितक्रमरूपत्वात्पूर्वापरीभूतावयवत्वं विततरूपत्वं यत्तद्रूपमभिधीयते

---

१. पा.सू. १।३।७२;
२. वैयाकरणभूषणसारे धात्वर्थनिरूपणे।
३. वाक्यपदीये-३।८।४;
४. तत्रैव-३।८।१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्यैकस्मिन् क्षणेऽनवस्थानम्,, यदाह— क्रियानामेयमत्यन्तापरिदृष्टाऽशक्या च सा पिण्डीभूता निदर्शयितुमिति। एकैकस्य क्रियाक्षणस्य प्रत्यक्षत्वेऽपि समूहरूपा धातुवाच्या क्रिया न प्रत्यक्षेत्यर्थः। क्रमवन्त एव क्षणा एकफलोद्देशेन सम्पाद्यमानत्वाद् ऐक्यमिवापन्ना धातुवाच्याः। तद्यथा— पचतीत्यधिश्रयणादयोऽधः-श्रयणान्ताः। सिद्धमिति भूकालावच्छिन्नम्, "अपाक्षीदित्यादौ। असिद्धमिति वर्तमानभविष्यत्कालावच्छिन्नम्, पचति, पक्ष्यतीत्यादौ। आख्याते क्रियैकत्व-व्यवस्थाऽप्यवच्छेदकबुद्धिविशेषैक्यमादायैव। उक्तञ्च वाक्यपदीये —

'गुणभूतैरवयवैः समूहः क्रमजन्मनाम्।
बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते'[1]।।

अत्र नागेशः— पृथक्शक्तिस्वीकारे फलव्यापारयोरुद्देश्यविधेयभावेनान्व-यापत्तिः। 'पृथगुपस्थितयोस्तथा अन्वयस्यौत्सर्गिकत्वात्'[2]। किञ्च तत्पक्षे फल-विशेषणकव्यापारबोधे कर्तृभावप्रत्ययसमभिव्याहृतधातुजन्योपस्थितेर्व्यापार-विशेषणकफलबोधे कर्मप्रत्ययसमभिव्याहृतधातुजन्योपस्थितेः कारणत्वमिति कार्यकारणभावद्वयकल्पनं धातोरर्थद्वये शक्तिद्वयकल्पनं धातोर्बोधजनकत्व-सम्बन्धद्वयकल्पनं चेत्यतिगौरवम्। तस्मात् फलावच्छिन्ने व्यापारे व्यापारावच्छिन्ने फले च शक्तिः। कर्तृकर्मार्थकतत्तत्प्रत्ययसमभिव्याहारश्च तत्तद्बोधे नियामकः।

न च फलावच्छिन्नव्यापारत्वस्य व्यापारावच्छिन्नफलत्वस्य च शक्यता-वच्छेदकद्वयकल्पनप्रयुक्तं गौरवमेतेषामिति वाच्यम्, भिन्नशक्तिवादिनां फल-विशेषणकव्यापारविशेष्यकावान्तरवाक्यार्थबोधे कर्तृप्रत्ययसमभिव्याहृतधातुजन्य-समूहालम्बनात्मकोपस्थितिः कारणम्, व्यापारविशेषणकफलविशेष्यकबोधे कर्मप्रत्य-यसमभिव्याहृतधातुजन्यसमूहालम्बनात्मकोपस्थितिः कारणमिति, कार्यकारणभाव-द्वयकल्पनेऽतिगौरवात्। विशिष्टशक्तिवादिनां तु तत्तत्समभिव्याहारवशादवान्तर-वाक्यार्थबोधस्थानीयविशिष्टोपस्थितिरेकैवेति न तेषामुक्तकार्यकारणभावद्वयम्। एवं धातोः फलव्यापारसमूहार्थे उपस्थितिशक्तिद्वयकल्पनं, विशिष्टार्थे शाब्दबोध-शक्तिकल्पनं शक्तेर्बोधजनकतायाश्चासम्बद्धे धातावनुपपत्त्या विशिष्टार्थनिरूपित-सम्बन्धद्वयकल्पनं च विशिष्टधातावित्यतिगौरवमित्येतत्परमलघुमञ्जूषारीत्या सिद्धान्तितम्। वस्तुतस्तु विशिष्टे शक्तिकल्पने शक्यतावच्छेदकत्वं फलावच्छिन्न-व्यापारत्वस्य व्यापारावच्छिन्नफलत्वस्य च कल्पितमिति गौरवम्। फलव्यापारयोः पदार्थैकदेशत्वेन तत्र कर्तृकर्मादीनामन्वयासम्भवोऽपि 'पदार्थः पदार्थेनान्वेति, न तु

---

१. वाक्यपदीये-३।८।९; २. परमलघुमञ्जूषा, धात्वर्थनिरूपणम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पदार्थैकदेशेने'ति न्यायस्य जागरूकत्वात्। प्राचां सिद्धान्ते एकवृन्तावलम्बित-फलद्वयवत् उभयांशे एका खण्डशः शक्तिरिति न शक्तिद्वयकल्पनम्, न वा बोध-जनकत्वसम्बन्धद्वयकल्पनमस्ति। तथा च कर्तृप्रत्ययसमभिव्याहारे फलविशेषणक-व्यापारविशेषकः, कर्मप्रत्ययसमभिव्याहारे व्यापारविशेषणकफलविशेष्यकश्च शाब्दबोधोऽपि शाब्दिकानां सिद्धान्तविरुद्धः। शब्दशास्त्रनये व्यापारमुख्यविशेष्यक-शाब्दबोधस्यैवादरात्। उक्तञ्च मञ्जूषायाम्—'अस्तु वा फलव्यापारयोः पृथगेव शक्तिः। तत्र फलांश उत्सर्गतो व्यापारं प्रति विशेषणम्, जन्यत्वं संसर्गः प्रायेण। क्वचित्तु विषयत्वं संसर्गः'[1]। यत्तु परमलघुमञ्जूषायामुक्तं न तत्सिद्धान्तप्रमाणकम्, स्वसिद्धान्तविरोधकत्वात्। अत एव परमलघुमञ्जूषा नागेशस्य कृतिरेव नास्तीति केचन मन्यन्ते। सिद्धान्तमञ्जूषोक्तसिद्धान्तविरुद्धविषयप्रतिपादनमेव तत्र हेतुः। पदे पदे पदार्थवैपरीत्यं विषयभेदश्चावलोक्येते।

वैयाकरणानामिव मीमांसकानामपि नये धात्वर्थविषये वैमत्यमवलोक्यते। तत्र नव्यमीमांसकाः फलव्यापारौ धात्वर्थः। उभयत्र खण्डश एका शक्तिः। तत्र जन्यजनकभावः संसर्गः। व्यापारमुख्यविशेष्यकश्च बोधः, तत्रैव कर्मातिरिक्त-कारकाणामन्वयः, कर्मकारकस्य च कर्तृपदसमभिव्याहारे फलेऽन्वयश्चेति मन्यन्ते। अत्र पक्षे 'गुणानां च परार्थत्वादसम्बन्धः समत्वात् स्यात्'[2] इति जैमिनीयसूत्रमेव मानम्। यथा सर्वे सेवका राजानमेवाश्रयन्ति, तथैव परस्परनिरपेक्षपदार्थाः प्रधानभूतां भावनामेवाश्रयन्ति। 'न हि भिक्षुको भिक्षुकान्तरं याचितुमर्हति सत्यन्यस्मिन्नभिक्षुके'[3] इति न्यायेनापि कर्मातिरिक्तकारकाणां भावनायामेवान्वयः। सा च भावना व्यापाररूपैव। तथा चोक्तम्—'भावना नाम भवितुर्भवनानुकूलो भावयितुर्व्यापारविशेषः'[4]।

प्राभाकरास्तु फलमेव धात्वर्थः, भावना तु वाच्यैव। जातौ शक्तिं स्वीकुर्वन्तस्ते आश्रयमन्तरा जात्यन्यथाऽनुपपत्त्या समवायेन स्वाश्रयीभूतां व्यक्तिमाक्षिप्य यथा तस्याः शाब्दबोधविषयत्वं प्राधान्यञ्च मन्यन्ते, तथापि लिङ्त्वाख्यातप्रत्ययाभ्यामाक्षिप्तभावनाया एव प्राधान्यं स्वीकुर्वन्ति। सा च भावना द्विधा—शाब्दी भावना, आर्थी भावना चेति। तत्र प्रवृत्त्यनुकूलो भावयितु-

---

१. वैयाकरणसिद्धान्तमञ्जूषायां धात्वर्थनिरूपणे।
२. जै.सू. ३।१।२।
३. वै. भूषणसारे धात्वर्थनिरूपणे पठितोऽयं न्यायः।
४. अर्थसङ्ग्रहे, लक्षणपरिच्छेदे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यापारविशेष: शाब्दी भावना। सा च लिङ्त्वांशेनोच्यते। लिङ्श्रवणेऽयं मां प्रवर्तयति, मत्प्रवृत्त्यनुकूलव्यापारवानिति नियमेन प्रतीतेः। प्रयोजनेच्छाजनित-क्रियाविशेषो व्यापार आर्थी भावना। सा चाख्यातत्वांशेनोच्यते, आख्यातसामान्यस्य व्यापारवाचित्वात्। साऽप्यंशत्रयमपेक्षते। साध्यं साधनमितिकर्तव्यतां च। किं भावयेत्, केन भावयेत्, कथं भावयेदिति।

मण्डनमिश्रानुयायिनस्तु फलमेव धात्वर्थः, अनुकूलव्यापारस्तु आख्यातार्थः, लडाद्यर्थवर्तमानत्वादीनां व्यापारेऽन्वयः, एकपदोपात्तत्वात् फलस्याख्यातव्यापारं प्रति विशेषणमिति मन्यन्ते। तेषां मते प्रत्ययार्थव्यापारव्यधिकरणफलवाचकत्वं सकर्मकत्वम्। तत्समानाधिकरणफलवाचकत्वञ्चाकर्मकत्वम्। व्यापारेणाश्रयस्याक्षेपाद् व्यापारमात्रं प्रत्ययार्थः,व्यापारस्य प्रत्ययेनैव लाभाच्च। 'अनन्यलभ्यः शब्दार्थः[१]' इति न्यायात् फलमात्रं धात्वर्थ इति सिद्धान्तः।

अथ च 'सोमेन यजेत' इत्यत्र सोमपदस्य सोमवति लक्षणायां लक्ष्यार्थस्य धात्वर्थयागेऽभेदेनान्वयः। सोमवता यागेनेष्टं (स्वर्गादिकं) भावयेदित्याकारकस्य शाब्दबोधस्यानुभवसिद्धत्वात्। यागरूपायां भावनायां सोमस्य न करणतयाऽन्वयः, तथा सति यज्धात्वर्थफलस्यापि करणत्वेनान्वयात्। सोमेन यागं भावयेत्, यागेनेष्टं (स्वर्गादिकं) भावयेदिति वाक्यभेदापत्तेश्च। सोमपदार्थोऽपि याग एव सोमादिपदानां 'स्वर्गकामो ज्योतिष्टोमेन यजेत' इत्यादौ नामधेयपरत्वाच्च।

एवञ्च प्रत्ययवाच्यभावनायाः समानपदोपात्तत्वाद्धात्वर्थफलेनैव करणतयाऽन्वयेन करणाकाङ्क्षायाः शान्तौ सत्यां भिन्नपदोपात्तसोमस्य तत्र करणतयाऽन्वयानुपपत्तेश्च। सोमपदस्य धात्वर्थफलेऽभेदेनान्वयस्वीकारे हि सोमपदात्तृतीया-विभक्तेरनापत्तिः, क्रियाविशेषणानां कर्मत्वाद् द्वितीयाविभक्तेरापत्तेश्च। ननु यत्र फलस्य कर्मतयाऽन्वयस्तत्रैव तद्विशेषणवाचकाद् द्वितीया, यत्र तु फलस्यैव भावनायां करणतयाऽन्वयस्तत्र तत्समानाधिकरणपदात्तृतीया स्यादिति वाच्यम्, कुत्र कर्मत्वेनान्वयः, कुत्र च करणत्वेनेति विनिगमनाभावात् सिद्धान्तानुपपत्तेश्च।

फलमात्रं धात्वर्थ इति पक्षेऽपि 'लः कर्मणि च भावे चाकर्मकेभ्यः[२]' इति सूत्रविरोधापत्तेः। यतश्च तेन सूत्रेण सकर्मकेभ्यो धातुभ्यो लकाराः कर्तरि कर्मणि, अकर्मकेभ्यो धातुभ्यश्च कर्तरि भावे च विधीयन्ते। फलसमानाधिकरणव्यापार-वाचकत्वरूपाकर्मकत्वस्य तद्व्यधिकरणव्यापारवाचकत्वरूपसकर्मकत्वस्य च

---

१. वै.भू., धात्वर्थप्रकरणे न्यायोऽयम्; २. पा.सू. ३।४।६९।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

फलस्य धात्वर्थत्वे व्यापारस्य च प्रत्ययार्थत्वे उच्छेदापत्तिः स्पष्टैव। अत एवाह— न हि तेन व्यापारस्य प्रत्ययार्थता लभ्यते, अथ च भूतभविष्यद्वर्तमानादिभेदेन भिन्नस्य फूत्कारादिव्यापारस्य प्रत्ययेऽनेकशक्तिकल्पनापत्तेश्च[1]। तथा चोक्तम्— 'किञ्च पचति, पक्ष्यतीत्यादौ फूत्कारादिप्रतीतये तत्रानेकप्रत्ययानां शक्तिकल्पनापेक्षयैकस्य धातोरेव शक्तिकल्पनोचिता[2]'।

एवञ्च फलमात्रस्य धात्वर्थत्वे भावार्थकप्रत्ययस्यापि फलमेवार्थः स्यात्तथा सति गम्धातोरुत्तरदेशसंयोगरूपोऽर्थः, गमनमित्यस्याप्युत्तरदेशसंयोग एवार्थस्तद्वान् ग्राम इति प्रयोगापत्तिश्च। तथा चाह—'भावविहितघञादीनां व्यापारवाचकत्वाच्च न ग्रामो गमनवान्[3]' इत्याद्यापत्तिः। अथ च प्रयोज्यप्रयोजकोभयविधव्यापारस्थे णिजर्थव्यापारस्य विशेषणीभूते प्रत्ययार्थव्यापारस्य प्राधान्यात् तदाश्रयस्यैव कर्तुरभिधानं स्यात्। अत एवोक्तम्—'गुरुः शिष्याभ्यां पाचयति[4]' इत्यादौ 'हेतुमति च' इति सूत्रबलात् प्रयोजकव्यापारस्य णिजर्थत्वे स्थिते प्रयोज्यव्यापार आख्यातार्थो वाच्यः। एतच्च संख्यायाः स्ववाचकाख्यातार्थव्यापारेऽन्वयिन्येवान्वयाच्छिष्याभ्यामिति द्विवचनानापत्तिः, पाचयतीत्यत्रैकवचनानापत्तिश्च, गुरोरनभिधानेन तत्र प्रथमाया अनापत्तेश्च, शिष्यशब्दात्तदापत्तेश्च।

भावनाया अवाच्यत्वेऽपि दोषानाह— तत्र भावनाया धातोरवाच्यत्वे 'घटं भावयति'[5] इत्यत्रेव 'घटो भवति' इत्यत्रापि द्वितीया स्यात्, धात्वर्थफलाश्रयत्वस्य द्वितीयोत्पत्तिप्रयोजकस्य सत्त्वात्। व्यापारस्यापि धातुवाच्यत्ववादिमते तु परया कर्तृसंज्ञया बाधान्न द्वितीयेति भावः। तथा चोक्तम्—''घटं भावयतीत्यादौ कर्मणोऽपि घटस्य 'घटो भवति' इत्यादौ कर्तृत्वमेव'। अथ च धातोः फलमात्रमर्थस्वीकारे यती-प्रयत्ने, डुकृञ्-करणे इत्यनयोः समानार्थापत्तिश्च स्यात्। यथोक्तं भूषणे—

'व्यापारो भावना सैवोत्पादना सैव च क्रिया।
कृञोऽकर्मतापत्तेर्नहि यत्नोऽर्थ इष्यते[6]'।।

---

१. परमलघुमञ्जूषायां धात्वर्थनिरूपणे; २. तत्रैव;
३. तत्रैव।
४. पा.सू. ३।१।२६।
५. वै.सि.मञ्जूषायां धात्वर्थनिरूपणे।
६. वै.भूषणसारे धात्वर्थनिरूपणे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न च पचति, पाकं करोतीति यत्नार्थककरोतिना विवरणदर्शनाद् यत्न एवाऽऽख्यातार्थ इति वाच्यम्, रथो गमनं करोति, बीजादिना अङ्कुरः कृत इति दर्शनात्कृञो यत्नार्थकताया अप्रसिद्धेः। अतः फलव्यापारौ धातुवाच्यौ। भावना तु सा व्यापार एव। नैयायिकेषु नव्यनैयायिकाः फलव्यापारौ धात्वर्थः, आख्यातार्थः कृतिः प्रथमान्तमुख्यविशेष्यकश्च शाब्दबोध इत्यामनन्ति। प्राचीननैयायिकास्तु अनेकधातूनां फले शक्तिकल्पनस्य गौरवमिति मत्वा व्यापारमात्रं धात्वर्थः फलञ्च द्वितीयाविभक्तेरर्थ इति स्वीकुर्वन्ति। तत्पक्षं दूषयता नागेशेनोक्तम्—'धातोः केवलं व्यापार एव शक्तिः, फलं कर्मप्रत्ययार्थः, कर्मप्रत्ययापेक्षया बहूनां धातूनां फले शक्तिकल्पनस्य गुरुत्वात्[१]'। तच्च फलं कर्मणि लकारपक्षे तिङर्थः, कर्तरि लकारपक्षे च विभक्त्यर्थः। कृतिर्नाम चेष्टा, यत्नविशेषः। तस्याश्च 'रथो गच्छति' इत्यत्र अचेतनस्य रथस्य यत्नशून्यत्वेन व्यापारे आश्रयत्वे वा लक्षणा मन्तव्येति गौरवम्। वैयाकरणनये कृतेरनन्तत्वेऽपि एकस्यामेव कृतित्वजातौ तत्कल्पनाल्लाघवम्।

अथ च व्यापारमात्रस्य धात्वर्थत्वे संयोगानुकूलव्यापारार्थकस्य गम्धातोर्विभागानुकूलव्यापारार्थकस्य त्यज्धातोश्च समानार्थताऽऽपत्तिः संयोगनाशात्मकविभागस्य प्रत्ययार्थत्वात्। उक्तञ्च—'न चैवं त्यागो गमनमित्यनयोरविशेषापत्तिः, एकस्या एव संयोगविभागजनकत्वादिति वाच्यम्, अनादितात्पर्यवशेन कर्मपदासमभिव्याहृततादृशप्रयोगे विभागाद्यवच्छिन्ने व्यापारे धातोर्लक्षणास्वीकारेणादोषात्[२]'। स्वान्वितप्रत्ययार्थफलव्यधिकरणव्यापारवाचित्वं सकर्मकत्वम्। कर्मत्वञ्च धात्वर्थान्वितप्रत्ययबोध्यफलवत्त्वमेव। अकर्मकत्वञ्च तदभाव एव कर्मणि तादृशफलकृतविशेषवत्त्वमेव।

किञ्च यत्नोऽपि व्यापारसामान्यं धातुत एव लभ्यते, स्थालीस्थे यत्ने पचिना कथ्यमाने स्थाली पचतीति 'कारके'[३] इत्यधिकारसूत्रभाष्यप्रयोगादनन्यलभ्यस्यैव शब्दार्थत्वात् कृतौ शक्तेरुक्तिसम्भव एव न। तथा च भाष्यम्—'एवं तर्हि स्थालीस्थे यत्ने कथ्यमाने स्थाली स्वतन्त्रा, कर्तृस्थे यत्ने कथ्यमाने परतन्त्रा। अथ च लकाराणां कृतौ शक्तिस्वीकारे सामानाधिकरण्याभावात्पुरुषव्यवस्थाऽनुपपत्तिः स्यात्[४]'। 'युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः[५]' इति सूत्रे स्वलकारवाच्यकारकवाचित्वरूपसामानाधिकरण्यस्य स्वीकारेण कृतिवाच्यत्वादिना

---

१. वै.सि.मञ्जूषायां धात्वर्थनिरूपणे; २. तत्रैव।
३. पा.सू. १।४।२३; ४. महाभाष्ये, पा.सू. १।४।२३।
५. पा.सू. १।४।१०५।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तार्किकाणां मते तदसम्भवात्। एवञ्च प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधविषयेऽपि 'पश्य मृगो धावति' इत्यत्र अन्यदेशसंयोगानुकूलधावनानुकूलकृतिमन्मृगकर्मकं प्रेरणाविषयीभूतं यद्दर्शनं तदनुकूलकृतिमांस्त्वमिति शाब्दबोध इति। शाब्दबोधे विशेष्यभूतार्थवाचकस्य मृगशब्दस्य प्रातिपदिकसंज्ञायां धावन्तं मृगं पश्येतिवत् पश्य मृगं धावतीत्यापत्तिः स्यात्।

शाब्दिकमते पश्य मृगो धावतीत्यादौ मृगकर्तृकं धावनं दृशिक्रियाया कर्म, प्रधानं दृशिक्रियैव। तथा च मृगकर्तृकधावनकर्मकं प्रेरणाविषयीभूतं त्वत्कर्तृकं दर्शनमिति बोधः। तत्र मृगो धावतीत्यत्र विशेष्यभूतधावनरूपार्थवाचकस्य धावतीत्यस्य प्रातिपदिकत्वाभावान्न द्वितीया। कर्मत्वन्तु संसर्गमर्यादया भासते। एवं पचति भवतीत्यत्र पचिक्रियाकर्तृका सत्तेति बोधः। उक्तञ्च भाष्ये—'पच्यादयः क्रिया भवति-क्रियायाः कर्त्र्यो हरिरप्याह—'भवन्ति'[1] इति।

'सुबन्तं हि यथाऽनेकं तिङन्तस्य विशेषणम्।
तथा तिङन्तमप्याहुस्तिङन्तस्य विशेषणम्'[2]।।

ननु व्यापारस्य धात्वर्थत्वेऽस्ति-विद्यतीनां धातुत्वं न स्यादिति चेत्, न, तेषां सत्तामात्रस्यैव व्यापारत्वात्। उक्तञ्च—'अस्ति-भवति-वर्तते-विद्यतीनामर्थः सत्ता। सा चानेककालस्थायिनीति कालगतपौर्वापर्येण क्रमवतीति तस्याः क्रियात्वम्'[3]। आत्मधारणानुकूलो व्यापारः सत्ता। सा च यद्यप्यनेककालस्थायिनी तथापि यावता कालेन आत्मधारणं तावतः कालस्य अवयवान् परिकल्प्य तेषां पौर्वापर्यस्य प्रसिद्धतया तद्गतं क्रमिकत्वं तत्रारोप्य क्रियात्वमिति बोध्यम्। अत एवाह—

'अस्त्यादावपि धर्म्यंशे भाव्येऽस्त्येव हि भावना।
अन्यत्राशेषभावात्तु सा तथा न प्रकाशते'[4]।।

धर्मो विशेषणं प्रकृते सत्तादिरूपं फलं तदस्यास्तीति धर्मी विशेष्यः, स च प्रकृते कर्तृरूपः, अकर्मकधातुस्थले फलाश्रयस्य कर्तृत्वात्। यो यो धर्मी, स धर्मघटित इति नियमात् फले धर्म्यंशत्वव्यवहारः। भाष्येऽपि—'एवं हि कश्चित् कञ्चित् पृच्छति, किमवस्थो देवदत्तस्य व्याधिरिति ? स आह—वर्द्धत इति। अपर

---

१. महाभाष्ये, पा.सू. १।३।१; २. वै.सि. मञ्जूषास्थहरिकारिकेयम्।
३. परमलघुमञ्जूषायां धात्वर्थनिरूपणे; ४. वै. भूषणसारे कारिकेयम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आह—अपक्षीयत इति। अपर आह—स्थित इति। स्थित इत्युक्ते वर्द्धतेश्चाऽपक्षीयतेश्च निवृत्तिर्भवति। अथवा नान्तरेण क्रियां भूतभविष्यद्वर्तमाना: काला व्यज्यन्ते। अस्त्यादिभिश्चापि भूतभविष्यद्वर्तमाना: काला व्यज्यन्ते'[१]। 'स ततो गतो न वा इति प्रश्ने महता यत्नेन तिष्ठतीति प्रयोगे सत्तारूपफलानुकूला भावना प्रतीयत एव, उत्पत्त्यादिबोधने तु सुतराम्। रोहितो लोहितादासीद् धुन्धुस्तस्य सुतोऽभवदित्यत्र सत्तारूपफलानुकूला भावना सिद्धैव'[२]।

ज्ञाधात्वर्थविषये वैयाकरणेष्वपि वैमत्यम्। तत्र प्राचीना विषयावच्छिन्नावरणभङ्गादिफलवाचित्वं ज्ञाधातोरर्थ इति स्वीकुर्वन्ति। कर्मवद्भावनिवृत्तये तु—

'निर्वर्त्त्ये च विकारे च कर्मवद्भाव इष्यते।
न प्राप्ये कर्मणीति सिद्धान्तो व्यवस्थित:'[३]।।

इति कारिकामाश्रयन्ति। प्राप्यं कर्म हि—

'क्रियाकृतविशेषाणां सिद्धिर्यत्र न दृश्यते।
दर्शनादनुमानाद्वा तत् प्राप्यमिति कथ्यते'।। इति।

नव्यास्तु ज्ञाधातोर्ज्ञानमेव फलं तदनुकूल-आत्ममन:संयोगात्मको व्यापार:। उक्तञ्च—'नन्वेवं जानाते: सकर्मकत्वानापत्ति:, धात्वर्थज्ञानव्यधिकरणव्यापारस्य देवदत्तादौ बाधादिति चेत्, न, फलतावच्छेदकविषयतासम्बन्धेन ज्ञानानधिकरणवृत्तित्वरूपस्यैव वैयधिकरण्यस्य व्यापारे सत्त्वेनाक्षते:'[४]। अत एव मनो जानातीत्युपपद्यते आत्माऽत्रान्त:करणम्, मनोऽपि तद्वृत्तिविशेषरूपम्। आत्मा आत्मानं जानातीत्यादौ अन्त:करणावच्छिन्न: कर्ता शरीरावच्छिन्नं कर्मेति 'कर्मवत् कर्मणा तुल्यक्रिय:'[५] इति सूत्रे भाष्ये स्पष्टम्। 'द्वावात्मानौ अन्तरात्मा शरीरात्मा च। अन्तरात्मा तत्कर्म करोति येन शरीरात्मा सुखदु:खेऽनुभवति। शरीरात्मा तत्कर्म करोति येनान्तरात्मा सुखदु:खेऽनुभवति'[६]।

यत्तु आवरणभङ्गो विषयता वा फलम्, व्यापारस्तु ज्ञानमेवेति। तन्न, कर्मस्थक्रियकत्वापत्ते:। घटादिविषयेषु आवरणभङ्गस्य सम्भवेन सौकर्यातिशयद्योतनाय कर्तृव्यापारस्याविवक्षायां कर्मण एव स्वातन्त्र्यविवक्षायां च कर्मणो घटादेरेव कर्तृसंज्ञायां कर्मवद्भावापत्तौ 'ज्ञायते घट' इत्यनुव्यवसीयमानोऽर्थ इति प्रयोगापत्ति: स्यात्। तद्व्यवस्था चेत्थमुक्ता हरिणा—

---

१. महाभाष्ये, पा.सू. १।३।१;
२. वै. भूषणसारे धात्वर्थनिरूपणे।
३. वै.सि.मञ्जूषा, धात्वर्थनिरूपणे।
४. तत्रैव।
५. पा.सू. ३।१।८७;
६. महाभाष्ये, पा.सू. ३।१।८७।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'विशेषदर्शनं यत्र क्रिया तत्र व्यवस्थिता।
क्रियाव्यवस्था त्वन्येषां शब्दैरेव प्रकल्पिता'[१]।।

सा च क्रिया सिद्धभावेन साध्यभावेन च विभज्यते, उक्तञ्च भूषणे—

'साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना।
सिद्धभावस्तु यस्तस्याः स घञादिनिबन्धनः'[२]।।

ननु कृत्तद्धितसमासादिवृत्तिषु समुदाये शक्तिं स्वीकुर्वतां शाब्दिकानां मते घञन्ते शक्तेरावश्यकतया घञन्तानुपूर्व्याः शक्ततावच्छेदकत्वमपि स्वीकार्यमिति चेत्, सत्यम्, समुदाये शक्तिस्वीकारेऽपि 'कर्तरि'[३] कृत्' भावे'[४] इत्याद्यनुशासनात् 'कृदभिहितो भावो द्रव्यवत्प्रकाशते'[५] इति भाष्याच्च प्रक्रियादशायां घञादीनामपि शक्तिस्वीकारात्। द्रव्यञ्च सत्त्वरूपमेव। शब्दशास्त्रे सत्त्वशब्दस्योभयार्थपरतया व्यवहारात्। तथा चाह भाष्यकारः —'अयं सत्त्वशब्दोऽस्त्येव द्रव्यपदार्थकः। तद्यथा — सत्त्वमयं ब्राह्मणः, सत्त्वमियं ब्राह्मणीति। अस्ति क्रियापदार्थकः। सद्भावः सत्त्वमिति'[६]। प्रदीपेऽपि 'अर्थद्वयेऽपि सत्त्वशब्दस्य प्रयोगदर्शनाद्विशेषावगतौ प्रमाणाऽनुपलम्भात्प्रश्नः'[७]। तत्र सीदन्त्यस्मिञ्जातिगुणक्रिया इति सत्त्वं द्रव्यमुच्यते। यदा तु सतो भावः सत्त्वमिति, तदा साध्यमानतया क्रियारूपापन्ना सत्ता सत्त्वशब्देनोच्यते।

द्विधा हि क्रिया—सिद्धा साध्या चेति। तत्र सिद्धभावा क्रिया घञादिकृत्प्रत्ययनिबन्धनेति पूर्वमेवोक्तम्। सा च घञादिकृत्प्रत्ययनिबद्धत्वेन द्रव्यरूपत्वाल्लिङ्गकारकसंख्याद्यन्विता सती क्रियान्तरमपेक्षते। साध्या तु पचतिभवतीत्यादिधातुरूपनिबन्धनेति। अत्रापि प्राच्यनव्यसिद्धान्तयोर्वैमत्यमवलोक्यते। तत्र प्राच्याः क्रियान्तराकाङ्क्षोत्थापकतावच्छेदकवैजात्यवत्त्वे सति कारकत्वेन क्रियान्वयित्वे सति कारकान्तरान्वयायोग्यत्वं सिद्धत्वम्। साध्यत्वञ्च क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकं सत् कारकान्तरान्वययोग्यतावच्छेदकरूपवत्त्वम्। तथा चोक्तं भूषणे— 'साध्यत्वं क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपवत्त्वम्। साधनत्वं कारकत्वेनान्वयित्वम्'[८]। ननु हरिं नमेच्चेत्सुखं यायाद् इत्यत्र क्रियाया अपि क्रियान्तराकाङ्क्षत्वेन सिद्धत्वमस्तीति चेत्, न, चेच्छब्दसमभिव्याहारेणाकाङ्क्षोत्थापनादिति।

---

१. परमलघुमञ्जू. हरिकारिकेयम्;
२. वै.भूषणसारे धात्वर्थनिरूपणे।
३. पा.सू. ३।४।६७;
४. तदेव-३।३।१८।
५. महाभाष्ये, पा.सू. ३।३।१८;
६. तत्रैव-१।४।५७।
७. महाभाष्यप्रदीपे, पा.सू. १।४।५७;
८. वै. भूषणसारे धात्वर्थनिरूपणे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नागेशस्त्वत्र—'सिद्धत्वम् उद्देश्यत्वावधित्वाभ्यामन्वययोग्यतावच्छेदकम्। लिङ्गाद्यन्वययोग्यतावच्छेदकञ्च यद्वैजात्यं तद्रूपम्। इदमेव च क्रियान्तराकाङ्क्षोत्थापकतावच्छेदकम्। साध्यत्वञ्च पूर्वापरीभूतावयवत्वसमानाधिकरणं कारकान्वयादियोग्यतावच्छेदकं यद्वैजात्यम्, तद्रूपम्'[१]। तत्र 'पाक:' इत्यादौ घञा बोध्यते, साध्यत्वं तु सर्वत्रैव धातुप्रतिपाद्यम्। स्पष्टम्। 'उपपदमतिङ्'[२] इति सूत्रे 'कृदभिहितो भावो द्रव्यवद्भवतीति'[३] यथा घटादेर्द्रव्यस्य लिङ्गसंख्यासाधन-सम्बन्धस्तथा कृदभिहितस्य भावस्यापीति।

भावार्थकातिरिक्तकृदन्तप्रत्ययसमभिव्याहारे कारकाद्यर्थोऽप्यनुभूयते। तथा हि 'कर्तरि कृत्'[४] इति सामान्येन कृत्प्रत्ययानां विधानात् समेषां कर्त्र्यर्थोऽनुगम्यते। तत्तत्कारकविशेषार्थे विहितानान्तु धात्वर्थान्विततत्तत्कारकार्थप्रत्ययोऽपि। तद्यथा— 'तयोरेव कृत्यक्तखलर्था:'[५] इति सूत्रेण कृत्यप्रत्ययस्य क्तप्रत्ययस्य खलर्थप्रत्ययस्य च सकर्मकधातुसमभिव्याहारे कर्मार्थावगति:। एवञ्च—'करणाधिकरणयोश्च'[६] इति सूत्रेण विहितप्रत्यया धात्वर्थान्वितकरणाधिकरणार्थप्रत्यायका:। अथ च 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्'[७] इति सूत्रेण विहितस्तुमुन्प्रत्यय: क्रियार्थकक्रियां बोधयति। 'समानकर्तृकयो: पूर्वकाले'[८] इत्यनेन विहित: क्त्वाप्रत्यय: पूर्वव्यापारबोधक:। अत्रेयान् भेदो भावार्थकप्रत्ययस्थले भावातिरिक्तं सत्त्वमवभासते। कारकविशेषार्थे विहितप्रत्ययस्थे कारकाण्यप्यवभासन्ते।

शास्त्राण्यनेकानि विचिन्त्य तत्त्वं धात्वर्थसिद्धान्तविमर्शभूतम्।
प्रख्यापितं लोकहितैकबुद्ध्या कल्याणभाजं भवताद्बुधानाम्।। इति।

---

१. वै.सि.मञ्जू. धात्वर्थनिरूपणे; २. पा.सू. २।२।१९।
३. महाभाष्ये, पा.सू. २।२।१९; ४. पा.सू. ३।४।६७।
५. तदेव-३।४।७०; ६. तदेव-३।३।११७।
७. तदेव-३।३।१०; ८. तदेव-३।४।२१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याकरणस्य महत्ता

डॉ. मङ्गलारामः
सहायकाचार्यः, संस्कृतविभागस्य
जयनारायणव्यासविश्वविद्यालये
जोधपुरम्

❀ ❀ ❀

आदिकालाद् अद्यतनसमयं यावद् भारते ये केऽपि विद्वांसः सञ्जाताः सन्ति वा, तेषां सर्वेषामपि मतमिदं यत् संसारे यावदपि ज्ञानं प्रावर्तत तावतः सर्वस्यापि आदिस्रोतोऽस्ति श्रुतिः। एतेन व्याकरणशास्त्रस्यापि आदिमूलं वेद इति निष्पन्नम्। व्याकरणं हि वेदपुरुषस्याननं स्मृतम्, उक्तञ्च पाणिनीयशिक्षायाम् —

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।।
शिक्षा घ्राणन्तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते[1]।।

किं नाम व्याकरणमित्यपेक्षायामुच्यते— व्याक्रियन्ते शब्दा अनेनेति व्याकरणम्। व्याकरणं नाम प्रकृतिप्रत्ययविभागेन शब्दसाधुत्वविवेचकं शास्त्रम्। भगवान् पतञ्जलिस्तु व्याकरणं शब्दानुशासनशब्देन व्यवहरति[2]। पतञ्जलिना व्याकरणशब्दस्य अर्थः सूत्रं मन्यते[3]। यतः सूत्रत एव शब्दान् प्रतिपद्यन्ते। यो हि उत्सूत्रं कथयेन्नादो गृह्येत।

---

१. पाणिनीयशिक्षा (महालक्ष्मीप्रकाशनम्, आगरा, सन् १९९१), कारिका-४१-४२, पृ.४०।

२. शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यम्। (पतञ्जलिः, व्याकरणमहाभाष्यप्रथमाह्निके, मोतीलालबनारसीदासप्रकाशनम्, दिल्ली, सन् १९८४, पृष्ठे १-२)

३. अथ व्याकरणमित्यस्य शब्दस्य कः पदार्थः? सूत्रम्। (तत्रैव, पृष्ठे ४०)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदा हि कापि भाषा व्यवहारातीततां प्रयाति, तदा तस्या भाषाया ज्ञानं व्याकरणमन्तरेण न प्रतिपत्तुं शक्यं भवति। व्याकरणमेव भाषायाः स्वरूपसङ्घटनं सर्वात्मना कुरुते, तस्माद् व्याकरणमेव भाषाज्ञानलाभाय सर्वेषामप्यष्टानां शक्तिग्राहकाणां[1] मध्ये मूर्धन्यं स्थानमध्यास्ते। व्याकरणस्य नितान्तमेवोपादेयतां श्रेष्ठताञ्च तत्र तत्रावलोक्यैव तन्महिम्नि बुधैरभिहितमिदम्—

यद्यपि बहुनाधीषे तथापि पठ पुत्र व्याकरणम्।
स्वजनः श्वजनो मा भूत् सकलं शकलं सकृच्छकृत्।।

शब्दशास्त्रमनधीत्य यः पुमान् वक्तुमिच्छति वचः सभान्तरे।
बन्धुमिच्छति वने मदोत्कटं हस्तिनं कमलनालतन्तुना।।

सर्वस्रष्टुः प्रणवरूपवेदस्य व्याकरणशिक्षानिरुक्तकल्पज्यौतिषच्छन्दः-शास्त्राण्यङ्गानि सन्ति, पुराणन्यायमीमांसाधर्मशास्त्राणि चोपाङ्गानि सन्ति। इमानि अङ्गोपाङ्गानि सम्यज्ज्ञानरूपसंस्काराणां कारणानि भवन्ति, तस्मादेव व्याकरणादयो विस्तृता भवन्ति। महर्षयो वेदाख्यस्य ब्रह्मणः साक्षादुपकारकमदृष्टफलजनकानां तपसां श्रेष्ठं तपो वेदानां प्रधानमङ्गं व्याकरणं प्राहुः। वाचकत्वाद् अभ्युदयहेतुत्वाच्च सक्रमाया वाचो यः परमः सारः, यच्छ्रुतिप्रसिद्धं पुण्यतमं प्रकाशाप्रकाशयोः प्रकाशकं शब्दाख्यं ज्योतिः, तस्य साधुशब्दसमूहस्य ज्ञाने सामान्यविशेषलक्षणवान् व्याकरणरूपः सरल उपायः। घटाद्यर्थस्य व्यवहारे निमित्ततत्त्वानां शब्दा एव बोधकाः, सर्वव्यवहारशब्दमूलकत्वात्। तेषां शब्दानां साधुत्वनिश्चयो व्याकरणादेव भवति, न तु श्रोत्रादिभ्यः। व्याकरणं मोक्षस्योपायो वाचो दुरुच्चारणरूपमलानाम् आयुर्वेद इव, सर्वविद्यानां पवित्रत्वात् तास्वग्रे स्वीक्रियते। उक्तञ्च वाक्यपदीये—

तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्।
पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते[2]।।

यथा सर्वा घटादिसमवेता घटत्वादिजातयो घटादिशब्दाकृतिबोधकास्तथैव इदं व्याकरणं जगति कोशकाव्यादिसर्वविद्यानां स्वघटकपदशक्तिग्रहायापेक्षणीयम्।

---

१. शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः।।
(विश्वनाथपञ्चाननभट्टाचार्यः, न्यायसिद्धान्तमुक्तावली, शब्दखण्डम्, सुरभारतीप्रकाशनम्, कर्णपुरम्, सन् १९८९, पृ. १७)

२. भर्तृहरिः, वाक्यपदीयम्, चौखम्बासंस्कृतसंस्थानप्रकाशनम्, वाराणसी, सन् १९८४, ब्रह्मकाण्डम्, कारिका-१४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मोक्षप्राप्तौ सोपानरूपपर्वणां मध्ये व्याकरणं प्रथमं पर्वास्ति। मुमुक्षूणामियं व्याकरणविद्या अकुटिलो राजमार्गः। व्याकरणज्ञानाद् अपगतशब्दार्थभ्रमरूपो वेदग्रहणसमर्थ आत्मा वेदानां छन्दोरूपामपभ्रंशविविक्तां शुद्धां प्रणवरूपां सूक्ष्मां योनिं जनः पश्यति। यदेकं शब्दब्रह्म कालापादिव्याकरणभेदैर्वर्णपदवाक्यादि-भिन्नभिन्नभेदेन निरूप्यते तच्छब्दब्रह्म व्याकरणेन प्राप्य तदनन्तरं पुरुषै-रान्तरप्रणवरूपं परं ब्रह्म प्राप्यते। यथोक्तं भर्तृहरिणा—

> यदेकं प्रक्रियाभेदैर्बहुधा प्रविभज्यते।
> तद्व्याकरणमागम्य परं ब्रह्माधिगम्यते[1] ।।

नित्येषु शब्दार्थसम्बन्धेषु[2] साध्वसाधुशब्देषु ये शब्दा धर्मोत्पत्तावर्थावबोधे सहायकास्ते व्याकरणे प्रकृतिप्रत्ययरूपलिङ्गैः स्वशब्दैश्चोपवर्णिताः। अपि च, ये प्रकृतिप्रत्ययरूपाः पदवाक्यरूपाश्च शब्दाः, प्रकृतिप्रत्ययार्थाः पदवाक्यार्थरूपाश्च अर्थाः कार्यकारणभावेन तादात्म्येन स्थिताः सम्बन्धाः लाघवेन स्मृतिप्रणयनार्थं साधुशब्दा एव यथाशास्त्रमस्मिन् व्याकरणशास्त्रे वर्णिताः। साधुशब्दाः शिष्टपाणिनिप्रभृतिवैयाकरणेभ्यो अन्यान्यव्याकरणशास्त्रेभ्यो धर्मसाधनत्वेन बोधिताः’[3] तस्मात् साधव एव व्याकरणविषयाः। इमां साधुशब्दविषयां व्याकरणव्यवस्थां कश्चिद् मन्दोऽपि निष्प्रयोजनां कर्तुं नार्हति’ तस्मात् पाणिनिप्रभृतिभिः साधुत्वविषया अनादिगुरुपूर्वक्रमागता व्याकरणस्मृतिः[4] सामान्य-विशेषवल्लक्षणेन ग्रथिता। शिष्टाः अपौरुषेयशास्त्रं वेदं शिष्टपरम्पराचरणानुगृहीतां च स्मृतिं प्रमाणीकृत्य शब्दानुशासनं कृतवन्तः। उक्तञ्च वाक्यपदीये—

> तस्मादकृतकं शास्त्रं स्मृतिं च सनिबन्धनाम्।
> आश्रित्यारभ्यते शिष्टैः शब्दानामनुशासनम्[5] ।।

---

१. भर्तृहरिः, वाक्यपदीयम्, १।२२।

२. नित्याः शब्दार्थसम्बन्धास्तत्राम्नाता महर्षिभिः।
सूत्राणामनुतन्त्राणां भाष्याणाञ्च प्रणेतृभिः।। (तत्रैव, कारिका-२३)

३. शिष्टेभ्य आगमात्सिद्धाः साधवो धर्मसाधनम्। (तत्रैव, कारिका-२७)

४. साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः।
अविच्छेदेन शिष्टानामिदं स्मृतिनिबन्धनम्।।
वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम्।
अनेकतीर्थभेदायास्त्रय्या वाचः परं पदम्।।
तद्विभागाविभागाभ्यां क्रियमाणमवस्थितम्।
स्वभावज्ञैश्च भावानां दृश्यन्ते शब्दशक्तयः।। (तत्रैव, कारिका-१४२-१४४)

५. तत्रैव, कारिका-४३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याकरणानि बहुभिर्व्याकरणकारमहर्षिभिः प्रणीतानि। तेषु व्याकरणकर्तृषु विद्वत्सत्तमेषु इन्द्रश्चन्द्रः काशकृत्स्न आपिशलिः शाकटायनः पाणिनिरमरो जैनेन्द्र इत्येतेऽष्टौ सन्ति सुप्रथिताः। न केवलमेतेषामष्टानामेव व्याकरणकर्तृणां व्याकरणानि, अपि त्वन्येषामप्याचार्याणां व्याकरणानि श्रूयन्ते, यथा — कौमारं सारस्वतं शाकलञ्च व्याकरणम्। व्याकरणकारान् अथ च व्याकरणान्यधिकृत्य एतच्छ्लोकद्वयं प्रथितमस्ति —

इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः।।
ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।
सारस्वतं चापिशलं शाकलं पाणिनीयकम्[१]।।

साम्प्रतं सर्वत्र प्राधान्येन पाणिनीयं व्याकरणमेव प्रचलितं वर्तते। इदं हि पाणिनीयं व्याकरणं नितरामेव सुसमृद्धं सुसम्पन्नं सुललितं सर्वाङ्गीणं व्यापकञ्च विद्यते। पाणिनेर्महिमानं वर्णयन् पाणिनीयशिक्षायां कथितम् —

शङ्करः शाङ्करीं प्रादाद्दाक्षीपुत्राय धीमते।
वाङ्मयेभ्यः समाहृत्य देवीं वाचमिति स्थितिः।।
येनाक्षरसमाम्नायमधिगम्य महेश्वरात्।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः।।
येन धौता गिरः पुंसां विमलैः शब्दवारिभिः।
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः।।
अज्ञानान्धस्य लोकस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः[२]।।

पाणिनीयस्य व्याकरणस्य परममहत्त्वपूर्णमङ्गं कात्यायनस्य वार्तिकपाठोऽस्ति। इममन्तरेण वस्तुतः पाणिनीयं व्याकरणमपूर्णमेव प्रतिभाति। पतञ्जलिः कात्यायनीयं वार्तिकपाठमवलम्ब्यैव नैजं महाभाष्यमरचत्। भगवतः पतञ्जलेरेषा हि महाभाष्याख्या रचना पाणिनीयं व्याकरणं सरलया सरसया च रीत्या

१. युधिष्ठिरमीमांसकः, व्याकरणशास्त्रस्येतिहासः, प्रथमो भागः, पृ. ६९-७०।
२. पाणिनीयशिक्षा, कारिका-५६-५९, पृ. ५०-५२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याचष्टे। सकलेऽपि संस्कृतवाङ्मये महाभाष्यं वस्तुतोऽद्वितीयो ग्रन्थः। सर्वेऽपि विद्वांसो मुक्तकण्ठतया प्रशंसन्ति ग्रन्थमिमम्। यथोक्तं वाक्यपदीयस्य द्वितीये काण्डे —

कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना।
सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने[1]।।

शब्दानुशासनस्य व्याकरणस्य वा पञ्च मुख्यप्रयोजनानि[2] त्रयोदश च गौणप्रयोजनानि[3] पतञ्जलिकृतमहाभाष्ये निगदितानि। तैर्व्याकरणस्य महनीयता तदीया उपादेयता तन्महत्ता च सम्यग् अवबोद्धुं शक्या भवति।

वेदानां रक्षायै व्याकरणाध्ययनमपेक्ष्यते। लोपागमवर्णविकारज्ञो हि सम्यग् वेदान् परिपालयिष्यति। व्याकरणस्याध्ययनेन विभक्तिविपरिणामस्य बोधो जायते, तस्माद् व्याकरणमवश्यमध्ययनीयमस्ति। न सर्वैर्लिङ्गैः, न च सर्वाभिर्विभक्तिभिर्वेदे मन्त्रा निगदिताः। ते चावश्यं यज्ञगतेन यथायथं विपरिणमयितव्या भवन्ति। नावैयाकरणस्तान्यथायथं विपरिणमयितुं शक्नोति।

'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इत्येतस्माद् आगमादपि व्याकरणस्याध्ययनं परमापेक्षितं भवति, वेदस्य षडङ्गत्वात् षट्स्वङ्गेषु च व्याकरणस्य प्रधानत्वात्। लघ्वर्थं चाध्येयं व्याकरणम्। ब्राह्मणेनावश्यं शब्दा ज्ञेयाः। न चान्तरेण व्याकरणं लघुनोपायेन शब्दाः शक्या ज्ञातुम्। संशयराहित्यनिमित्तेनापि व्याकरणमध्येयमस्ति। याज्ञिकाः पठन्ति— 'स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेत' इति। तस्यां सन्देहोऽयम् 'स्थूला चासौ पृषती च स्थूलपृषती' इति कथनमभिप्रेतम्, किं वा 'स्थूलानि पृषन्ति यस्याः सा स्थूलपृषती, इति कथनमिष्टम्। अवैयाकरणस्तां न स्वरतोऽध्यवस्यति। यदि पूर्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहिः, अथान्तोदात्तत्वं ततस्तत्पुरुष इति।

व्याकरणं हि यो नरो न जानाति, स शुद्धं वक्तुमपि न प्रभवति। शुद्धोच्चारणलाभाय व्याकरणस्य पठनं कर्त्तव्यम्। अशुद्धोच्चारणकर्ता भवति शिक्षितसमाजे निन्दितः। उक्तञ्च—

---

१. वाक्यपदीयम्-२।४८६।
२. कानि पुनः शब्दानुशासनस्य प्रयोजनानि। रक्षोहागमलघ्वसन्देहाः प्रयोजनम्। (व्याकरणमहाभाष्यम्, प्रथमाह्निके, पृ. ४)
३. इमानि च भूयः शब्दानुशासनस्य प्रयोजनानि। (तत्रैव, पृ. ७)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च पीडिताः।
सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते।।
कुतीर्थादागतं दग्धमपवर्णं च भक्षितम्।
न तस्य पाठे मोक्षोऽस्ति पापाहेरिव किल्विषात्।।
सुतीर्थादागतं व्यक्तं स्वाम्नाय्यं सुव्यवस्थितम्।
सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते[१]।।

दुष्टान् शब्दान् मा प्रयुक्ष्महीत्यध्येयं व्याकरणम्। उक्तञ्च—

मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्।।
अनक्षरं हतायुष्यं विस्वरं व्याधिपीडितम्।
अक्षता शस्त्ररूपेण वज्रं पतति मस्तके[२]।।

यत्किमपि जनेन पठनीयं तद्बोधपूर्वकं पठनीयम्। यदध्ययनं विनार्थावबोधं कृतं जायते, तदध्ययनं सदैवाध्येतारं दुनोति, तस्मादनर्थकं माधिगीष्महि इत्यध्येयं व्याकरणम्। यः पुरुषो व्यवहारकाले साधुशब्दान् प्रयुङ्क्ते, स वाग्योगविद् परत्रानन्तं जयं प्राप्नोति। साधुशब्दावबोधो व्याकरणाधीनम्।

अभिवादे स्त्रीवन्मा भूम इत्यध्येयं व्याकरणम्। उक्तञ्च—

अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः।
कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेत्[३]।।

याज्ञिकाः पठन्ति—'प्रयाजाः सविभक्तिकाः कार्याः' इति।

न चान्तरेण व्याकरणं प्रयाजाः सविभक्तिकाः शक्याः कर्तुम्। यो वा इमां पदशः स्वरतोऽक्षरशश्च वाचं विदधाति, स आर्त्विजीनो भवति। आर्त्विजीनाः स्याम इत्यध्येयं व्याकरणम्।

महान् देवः शब्दः। मरणधर्माणो मनुष्यास्तान् आविवेश। महता देवेन नः साम्यं यथा स्याद् इत्यध्येयं व्याकरणम्।

---

१. पाणिनीयशिक्षा, कारिका-३१,५०,५१।
२. तदेव, कारिका-५२,५३।
३. व्याकरणमहाभाष्यम्, प्रथमाह्निके, पृ. १०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाक् त्वस्मै तनुं विवृणुते यस्तत्तत्त्वं विजानाति, अर्थाद् वाग् वाग्विदे स्वात्मानं विवृणुते। वाङ् नो विवृणुयाद् आत्मानमित्यध्येयं व्याकरणम्।

व्याकरणं वस्तुतः तितउरिव वर्तते। यथा तितउना वस्तु शुद्धीक्रियते, तथैव व्याकरणसाधनेन वैयाकरणो विचक्षणोऽपशब्दान् अपसार्य स्वकीयं वाक्यं शुद्धं सुशब्दललितं विधत्ते, गृह्णाति च तस्य साहाय्येन यथार्थमर्थम्।

याज्ञिकाः पठन्ति—'आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेत्'। प्रायश्चित्तीया मा भूम इत्यध्येयं व्याकरणम्।

शिष्टपरम्परा यद् द्व्यक्षरं चतुरक्षरं वा नाम कृतं कुर्याद् न तद्धितमिति। न चान्तरेण व्याकरणं कृतस्तद्धिता वा शक्या विज्ञातुम्। विभक्तिविज्ञानमधिगम्य पुरुषः सुदेवो भवितुमर्हति। विभक्तिज्ञानं व्याकरणाधीनम्। सुदेवाः स्याम इत्यध्येयं व्याकरणमिति।

●

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नञर्थाः षट् प्रकीर्तिताः

डॉ. गायत्रीदेवी
शोधसहायिका, संस्कृतविभागे
इलाहाबादविश्वविद्यालयस्य
इलाहाबादनगरे

❀ ❀ ❀

यथार्थज्ञानस्य साधनरूपेण विश्रुतस्य शब्दप्रमाणस्य विषये नञर्थो विशिष्टां पदवीं लभन्ते। निषेधार्थकमव्ययरूपम्, इदं 'नञ्' विधेरर्थं विशेषयति, पदपदार्थवाक्यार्थानां यथार्थबोधे उपयुक्तां भूमिकां निर्वहति च। यदपि सर्वासु दार्शनिकशाखासु नञो निषेधार्थकता एवाभिमता, तथाप्यस्य स्वरूपमर्थबोधकत्वं चाधिकृत्य मतवैभिन्नयं दरीदृश्यते। निषेधार्थकस्याव्ययस्यास्य स्वरूपस्यार्थबोध-प्रक्रियायाश्च विषये व्याकरणन्यायमीमांसादर्शनानि विशेषेण उल्लिख्यन्ते। एतन्नञ् कदाचित् समासेषु कुत्रचिद् वाक्येषु च प्रयुज्यते। यथा— 'अघटं पश्यति' 'घटो नास्ति' इत्यादिषु स्थलेषु। कस्मिन् स्थले नञः कोऽर्थः, कस्मिन्नर्थे स्वीकृते यथार्थबोधो भविष्यति? अस्य हेतोरेतस्य स्वरूपस्य यथार्थबोधप्रक्रियायाश्च ज्ञानमनिवार्यम्। आचार्यभर्तृहरिणा इदं नञर्थमधिकृत्य वाक्यपदीये कथितम्—

'तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः'।।

एवं वैयाकरणमते तत्सादृश्यम्, अभावरूपम्, तदन्यत्वं तदल्पत्वरूपम्, अप्राशस्त्यम्, विरोधश्च षडर्थका नञः स्वीकृताः। एतेषां सोदाहरणं विवेचनमधोलिखितम्—

१. तत्सादृश्यम्

अव्ययरूपो नञ्, येन सहान्वयरूपेण सम्बध्यते तत्सम्बद्धस्य पदार्थस्य सदृशस्य पदार्थस्य ग्रहणं यत्र वर्तते स तत्सादृश्यमर्थम्। अत्र तु तत्सादृश्यस्य तात्पर्यं नञा सहान्वितस्य पदार्थस्य ग्रहणम्। यथा 'अब्राह्मणमानय' इत्येतस्मिन्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाक्ये प्रयुक्तस्य नञस्तात्पर्यं ब्राह्मणाद्भिन्नम्; किन्तु तत्सदृशस्य मनुजत्वद्विजत्वादिगुणैः संयुक्तस्य क्षत्रियादेर्ग्रहणात्। न त्वत्र ब्राह्मणत्वादिभिन्नस्य पशोर्मृल्लोष्ठादेर्वा ग्रहणे प्रयोजनमस्ति।

२. अभावः

नञा सह सम्बद्धस्य पदार्थस्याभाव एवात्र अभावस्य तात्पर्यमस्ति। यथा—'घटो नास्ति' 'न कलञ्जं भक्षयेत्' इत्यादिषु वाक्येषु घटसत्त्वस्य प्रतियोगिघटासत्त्वं कलञ्जभक्षणाभावश्च नञस्तात्पर्यम्।

३. तदन्यत्वम्

तदन्यत्वस्य तात्पर्यन्तु नञा सह संयुक्तस्य पदार्थादितरपदार्थस्य ग्रहणम्। यथा—'अनश्वः' इत्येतेषु पदेषु अश्वाद्भिन्नस्य गर्दभादेर्ग्रहणत्वबोधनमेव नञः प्रयोजनम्।

४. तदल्पत्वम्

यत्र तु नञस्तात्पर्यं न तत्सदृशपदार्थग्रहणेन सिध्यति, न तु तदन्यग्रहणेन, प्रत्युत स्वसम्बद्धस्य पदार्थस्याल्पत्वबोधनेन सिध्यति, तत्र तदल्पत्वमेव नञर्थः। यथा—'अनुदरा कन्या' इत्यादिषु वाक्येषु। अत्र एतादृशकन्याग्रहणमसम्भवं यस्य उदरमेव न स्यात्। अत एतादृशस्थलेषु अभावार्थोऽपि न सङ्गच्छते। उदराद्भिन्नस्योदरसदृशगुणकस्येतरपदार्थस्य ग्रहणस्यापि असम्भवात्, तत्सादृश्यं तदन्यत्वं वा नात्र वक्तुस्तात्पर्यमस्ति। अतोऽत्र उदरनिषेधस्य तात्पर्यं तदल्पबोधनमर्थाद् अल्पोदरा कृशोदरी वा कन्याया बोधनेन नञः प्रयोजनमस्ति।

५. अप्राशस्त्यम्

स्तुतेः प्रशंसाया वा भिन्नं निन्दार्थबोधकस्य नञस्तात्पर्यप्राशस्त्यमेवास्ति। 'नञ्' इति अव्ययस्य तात्पर्यं स्वसंयुक्तपदार्थनिन्दयाऽपि व्यक्तं भवति। यथा—'अपशवो वाऽन्ये गोऽश्वेभ्यः' इत्येतस्मिन् वाक्ये गोऽश्वाभ्यां भिन्नपशूनामप्रशस्तत्वादत्र "अपशु" इत्येतस्य तात्पर्यं न पशुभिन्नपदार्थग्रहणम्, प्रत्युत गवादेर्भिन्नस्य इतरपशुग्रहणस्य निन्दा एव नञर्थमस्ति। एवम् 'अब्राह्मणोऽयम्' (महाभाष्ये-२।१६) इत्यादिषु स्थलेषु 'अब्राह्मण' इत्येतस्य शब्दस्य तात्पर्यन्तु ब्राह्मणसदृशस्य क्षत्रियादेर्ग्रहणम् प्रत्युत, ब्राह्मणविरुद्धाचरयितुर्ब्राह्मणस्य निन्दा एव नञस्तात्पर्यमस्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

६. विरोधः

कुत्रचिन्नञ् विरोधार्थकमपि भवति। यथा —'अधर्मः' 'असुरः' इत्यादिषु पदेषु नञा सह संयुक्तयोर्धर्मसुरयोर्विरुद्धार्थग्रहणबोधनेनेवात्राभीष्टं सिद्धं भवति।

स्पष्टमेतद् यद् भर्तृहरिप्रभृतिभिः प्राचीनैर्वैयाकरणैर्नञः षड्भेदाः स्वीकृताः, किन्तु नागेशभट्टादीनां नव्यवैयाकरणानां मत एते न नञर्थभेदाः 'प्रयोगोपाधिः' इत्येतत्। नव्यवैयाकरणैः पर्युदासप्रसज्यप्रतिषेधावेतस्य द्वयस्य नञर्थप्रकाररूपेण गृहीतम्। कुमारिलप्रभृतिभिः मीमांसकैरपि नञ एतौ द्वौ भेदावेव स्वीकृतौ। नैयायिकानां मते तु एतद्विपरीतमभावश्च भेदश्च इत्येतौ द्वौ नञर्थौ स्तः। भेदस्य तात्पर्यमन्योन्याभावोऽस्ति। अभावस्य तात्पर्यन्तु तादात्म्येतरतादात्म्याभावरूपम्। अतो नैयायिकैः प्राधान्यतो नञोऽभावार्थकत्वमेव स्वीकृतम्। मीमांसकवैयाकरणसम्मतौ पूर्वोक्तौ पर्युदासप्रतिषेधौ कौ? कस्मिन् स्थलेषु तयोर्व्याप्तिर्भवति? इदमधिकृत्य भर्तृहरिणा वाक्यपदीये उक्तम्—

'द्वौ नञौ हि समाख्यातौ पर्युदासप्रसज्यकौ।,
पर्युदासः सदृग्ग्राही प्रसज्यस्तु निषेधकृत्'।।

क. पर्युदासनिषेधः

परि-उदित्युपसर्गपूर्वकाद् 'अस्'-धातोः 'घञ्' इति कृत्प्रत्ययेन संयुक्ते 'पर्युदासः' इति शब्दस्य निष्पत्तिर्भवति। यस्य तात्पर्यं सदृशपदार्थग्रहणमस्ति, एवं येन सह नञर्थस्यान्वयः स्यात्, तत्सदृशमिव इतरपदार्थग्रहणमिति पर्युदासनञस्तात्पर्यम्। यथा—'नेक्षेतोद्यन्तमादित्यम्', 'अब्राह्मणमानय' इत्यादिषु वाक्येषु ईक्षणब्राह्मणादिभिरन्विता नञ्श्रुतिरादित्यानीक्षणविषयकसङ्कल्पस्य विधानेन चरितार्था भवति। एवञ्च ब्राह्मणेतरपुरुषस्य ग्रहणं विधत्ते। ईक्षणक्रियाया निषेधो नात्र नञ्श्रुतेः प्रयोजनमस्ति। ईक्षणक्रियाया निषेधो तु लक्षणया अर्थतो ज्ञायते। अनेन प्रकारेण पर्युदासनिषेधे नञ्श्रुतर्विधायकत्वमेव, निषेधस्तु आर्थः। अस्माद् हेतोः पर्युदासनिषेधः 'प्रच्छन्नरूपविधिः' इत्यपि उच्यते। पर्युदासस्थलेषु नञ् सदा उत्तरपदार्थेन सहैवान्वेति। स तु उत्तरपदार्थः संज्ञावाचको वा धात्वर्थवाचको वा स्यात्। अतः स्पष्टमेतद् यत् पर्युदासनिषेधे नञ् नामधात्वर्थयोरुभयोः केनचिदपि सह संयोज्यं भवति। वस्तुत एतादृशस्थलेषु प्रयुक्तस्य नञर्थस्य लक्ष्यं मुख्यतः स्वसंयुक्तपदार्थादितरं किन्तु तत्सदृश एव पदार्थस्य ग्रहणबोधनमेव भवति। यथोक्तमाचार्यकुमारिलभट्टेन—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'नामधात्वर्थयोगी च नैव नञ् प्रतिषेधकः।
वदतोऽब्राह्मणधर्मावन्यमात्रविरोधिनौ'।। (तन्त्रवार्तिकः)

धात्वर्थसंयुक्तो नामसंयुक्तो वा नञ् अप्रतिषेधकं भवति। अत्र तु निषेधो गौणत्वात् लक्षणया गृहीतो भवति। यतो हि लक्षणाश्रुत्या अभिधाश्रुतिर्बलवती, अतः श्रुत्यर्थे सति लक्षणया गृहीतोऽर्थोऽयुक्तम्। भर्तृहरेरनेन श्लोकेनापि इदं मतं सिद्धं भवति—

'प्राधान्यं तु विधेर्यत्र प्रतिषेधेऽप्रधानता।
पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्'।।

दर्शपूर्णमासयागस्य प्रकरणे पठितं 'यजतिषु ये यजामहं करोति नानुयाजेषु' इदमापस्तम्बश्रौतसूत्रवचनं नामयोगिनः पर्युदासस्य शीर्षमुदाहरणमस्ति। नामयोगित्वादत्र नञ् अनुयाजयागेषु 'ये यजामहम्' इत्येतस्य मन्त्रपाठस्य निषेधको न प्रत्युत अनुयाजभिन्नेषु यागेष्वस्य मन्त्रस्य पाठं विधीयते। 'अब्राह्मणमानय' 'अनुदरा कन्या' 'समुद्रमासाद्य भवन्त्यपेया', 'पुत्रः शत्रुरपण्डितः', 'असुरः' 'अधर्मः' इत्यादीनि वाक्यानि पर्युदासनिषेधस्यान्यानि लौकिकोदाहरणानि सन्ति।

ख. प्रसज्यप्रतिषेधः

नञर्थेन सहान्वितस्य प्रसक्तस्य क्रियादेर्निषेधः प्रसज्यप्रतिषेधस्य तात्पर्यम्। यस्मिन् नञ्स्थले निषेध एव मुख्यार्थः स्याद् विध्यर्थस्तु गौणो भवति, तत्र प्रसज्यप्रतिषेधनाम्नो नञर्थभेदश्चरितार्थो भवति। प्रसज्यप्रतिषेधे प्राधान्येन क्रियया सह नञर्थोऽन्वितो भवति। क्रियया सह सम्बद्धं नञ् सदैव प्रतिषेधकमेव। एष एव 'शुद्धनिषेध' इति शब्देनोच्यते, यतो हि एवंविधेषु स्थलेषु निषेध एव वाक्यस्य प्रधानप्रयोजनमस्ति। विषयेऽस्मिन् भर्तृहरिणा वाक्यपदीये उक्तम्—

'अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता।।
प्रसज्यस्तु स विज्ञेयः क्रियया सह यत्र नञ्'।।

यथा— 'न कलञ्जं भक्षयेत्', 'ब्राह्मणो न हन्तव्यः', 'सुरां न पिबेत्', 'न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः' इत्यादिषु वाक्येषु नञर्थः क्रियया सह संयुक्तत्वादुक्तस्थलेषु निषेधार्थो मुख्यः। अस्माद्धेतोरेतानि प्रसज्यप्रतिषेधस्योदाहरणानि सन्ति, इति सिद्धं भवति। वस्तुत एतादृशेषु वाक्येषु निषेधार्थस्य प्राधान्यमेवेष्टम्। अत एव नञ् क्रियाविधायकेन प्रत्ययार्थेन सहान्वितो भवति, नाम्ना धात्वर्थेन सार्धं वा न संयुज्यते। पार्थसारथिमिश्रमहोदयस्य मते तु 'न पिबेत्'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्यादिषु स्थलेषु आख्यातयोगित्वान्नञ् न प्रतिषेधार्थस्य वाचकं भवति। अत्र प्रतिषेधमात्रे नञर्थस्य पर्यवसानसम्भवत्वात् तदालम्बनरूपेण तदितरवस्तुग्रहणं न भवति, प्रत्युत क्रियारहितसत्ताबोधनमेव मुख्यम्।[१]

पर्युदासप्रतिषेधप्रसज्यप्रतिषेधयोः प्रधानं वैभिन्नयमिदं यत् स्वसहोच्चरितानां पदानां सामर्थ्येन पर्युदासार्थकं नञ् प्रायः समस्तपदेष्वेव वर्तते,[२] न विभक्त्यादिषु; किन्तु केषुचित् स्थलेष्वसमस्तपदेऽपि पर्युदासो दृश्यते। यथा — 'घटः अपटो भवति' इत्यर्थस्य बोधकः 'घटः पटो ने'त्यादिषु वाक्येषु।

समासस्य वैकल्पिकत्वेन समासवृत्तेः प्रयोगो विवक्षितो भवति। अतो यत्र समासस्य प्रयोगो वक्तुरनीप्सितं तत्र पर्युदासोऽसमस्तपदेष्वपि सम्भाव्यते। अनेन प्रकारेण पर्युदासनञ् उभयप्रकारकमस्ति। नञ् विशेष्यभूता क्रियया सह क्रियाविशेषणत्वेनान्वेति, अतः प्रसज्यप्रतिषेधः क्रियान्वयी भवति[३]।

'असूर्यललाटयोः' इत्यादेर्ज्ञापकत्वात् सुबन्तस्य पदस्यासमर्थे सत्यपि यन्नञ् सुबन्तेन सह समासत्वं प्राप्यते, तस्मिन् विषये वैयाकरणानां मतमिदम्—

'प्रसज्यप्रतिषेधोऽयं क्रियया सह यत्र नञ्' इत्यस्मिन् वाक्ये प्रयुक्तं 'क्रियया' इति पदं गुणस्यापि उपलक्षकमस्ति। नागेशभट्टस्य मतानुसारेण 'नञ्'[४] इत्येतस्य सूत्रस्य भाष्ये पतञ्जलिना महोदयेन गुणस्योपलक्षणार्थं 'प्रसज्यायं क्रियागुणौ ततः पश्चान्निवृत्तिं कुरुत' इत्याचक्षीत। यथा—'नास्माकमेकं प्रियम्' इत्यादिषूदाहरणेषु एकप्रियप्रतिषेधनेन 'बहुप्रियम्' इति प्रतीतिर्भवति, तत् 'क्रियया' इति पदं गुणोपलक्षकं स्वीकृतमेव सङ्गच्छते। एवम् 'असन्देहः' 'अनुपलब्धिः' इत्यादिषु स्थलेषु गुणवाचकाः सन्देहादयः क्रिययोपलक्षितानि सन्ति। 'अनचि च'[५] 'गेहे घटो नास्ति' इत्यादीन्युदाहरणानि नञर्थस्य क्रियया सहान्वितत्वस्य प्रमाणम्। प्रसज्यप्रतिषेधे नञ् सदैव प्राप्तार्थस्य प्रतिषेधकम्। अतो यथा 'अनचि च' इत्यस्मिन् सूत्रवाक्ये अच्परे सति अचः परस्थितस्य यरो द्वित्वस्य निषेधो भवति, तथैव नञ् क्रियागुणाभ्यां प्राप्तस्य कार्यस्य प्रतिषेधकं भवतीति सर्वं सुस्पष्टम्।

---

१. आपस्तम्बश्रौतसूत्रम्-२४।१३।६।

२. द्र. श्लोकवार्तिकस्य न्यायरत्नाकरटीका, पृ. ६५५।

३. पर्युदासस्तु स्वसमभिव्याहृतपदेन समस्त एव। क्वचित्तु 'यजतिषु', 'इत्यादौ घटः अपटो भवतीत्यर्थके घटो न पट इत्यादौ च समासविकल्पादसमासेऽपि। अत्रान्योन्याभावः फलितो भवति। प्रसज्यप्रतिषेधस्तु समस्तोऽसमस्तश्चेति द्विविधः। (परमलघुमञ्जूषा)

४. पाणिनिसूत्रम्-२।२।६।

५. तदेव-८।४।४७।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वस्तुतो येषु स्थलेषु नञर्थो समस्तपदे वर्तते तत्र तस्यार्थोऽत्यन्ताभावरूपः। यत्र च नञ् असमासरूपे पदे वर्तते' एतादृशस्थलेषु नञ् अत्यन्ताभावान्योन्याभावौ उभयप्रकारकं सम्भवतीति, सिद्धम्। 'असूर्यंपश्या राजदाराः' इत्यादिषु वाक्येषु सामासिके पदे स्थितं नञ् अत्यन्ताभावस्य द्योतकम्। एवं 'घटो न पट' इत्यस्मिन् वाक्ये असामासिके पदे स्थितं नञ् अन्योन्याभावस्य "गेहे घटो नास्ति' इति वाक्ये असामासिके पदे स्थितं नञ् अत्यन्ताभावस्य द्योतकमस्ति[१]। यस्तु येन सह स्वरूपेणासम्बद्धः स अन्योन्याभावः। यथा— 'घटो न पटः' इति वाक्ये घटपटयोर्भिन्नोपादानत्वात् तौ न स्वरूपतः सम्बद्धौ शक्येते। एवं येन सह यः स्वरूपेण सम्बद्धः सोऽत्यन्ताभावरूपोऽस्ति। वस्तुतोऽयमत्यन्ताभावो नञा न क्रियते, अपि तु पूर्वस्थितमभावं नञ् उद्घाटयति। अतो मीमांसकैर्भावाभावयोः सत्ता स्वीक्रियते। यथोक्तं श्लोकवार्तिके—

'आख्यातप्रत्ययैर्योगे निवृत्त्यर्थः प्रतीयते।
तत्र चाज्ञातसन्दिग्धविपरीतार्थवारणात्'[२]॥

स्पष्टोऽयं यन्नञ् अतीतानागतवर्तमानानि, किन्तु विद्यमानमेवाभावमाचक्षते। मीमांसादर्शने नञो वर्तमानत्वं त्रिधा मतम्— पर्युदासाभावप्रतिषेधाः। एषु अभाववृत्तिस्तु वस्तुतः पर्युदासप्रसज्यप्रतिषेधयोरेव सङ्ग्रहीता भवति। अभावस्याप्राप्तत्वादत्र प्रसज्यप्रतिषेधरूपो नञर्थोऽप्यसङ्गतः। नैयायिकानां मते अभावमात्रस्य प्रतिषेधार्थकत्वं स्वीकृते सति पूर्वोक्ताभावभेदानामपि नञर्थद्योत्यत्वं स्वीकरणीयम्। यतो हि नैयायिकमते नञोऽभावरूपत्वमन्योन्याभावस्य च भेदरूपत्वमप्यभिमतम्। तेषां मते समासस्य घटकीभूतं नञ् भेदरूपम्। यश्च समासावयवो नास्ति, तच्च नञ् संसर्गाभावस्य बोधकम्। यथा—'अघटं पश्यति' इत्यादिषु वाक्येषु नञः समासघटकत्वाद् भेदरूपं नञ् 'घटभिन्नं पश्यति' इत्यवबोधयति। एतद्विपरीतं 'घटो नास्ति' इत्यादिषु स्थलेषु 'घटत्वावच्छिन्नस्य प्रतियोगिनः संसर्गाभावरहितसत्ताकवान् घटोऽस्ति' एवंप्रकारको बोधो सङ्गच्छते। अन्येषां दार्शनिकानां मते तु एतत् स्वीकृते 'घटः पटो न' इत्यादीनामुदाहरणानां सङ्गतिः कथं भविष्यति, यतो हि एतादृशस्थलेषु असामासिके पदे स्थितं नञ् संसर्गाभावभेदाभ्यां भिन्नमन्योन्याभावरूपमस्ति, अतो नैयायिकानां मतमयुक्तम्। अस्यामवस्थायामियं शङ्का सञ्जाता यत् का आरोपविषयता? तस्येदं समाधानं वर्तते— पर्युदासनञा

१. द्र. नागेशभट्टकृता परमलघुमञ्जूषा, पृ. १३५।
२. श्लोकवार्तिकं वाक्याधिकरणे, श्लो. ३०२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सहोच्चरितपदार्थस्यावच्छेदकधर्मयुतस्य धर्मिण आरोपविषयताप्रकारकस्य ज्ञानस्य सहकारिभूतत्वात् पर्युदासनञ्। अस्यारोपविषयताया बोधकत्वाच्च स्वसहोच्चरित-घटादिपदेष्वारोपितप्रवृत्तिनिमित्तस्य बोधनेन नञ् तात्पर्यग्राहकोऽपि। अब्राह्मणम्, अघटम् इत्यादिषु स्थलेषु घटत्वब्राह्मणत्वादयः पर्युदासनञः प्रवृत्तिनिमित्तानि। अत एव 'अब्राह्मणम्' इत्यादिषु स्थलेषु 'आरोपितब्राह्मणत्ववान् क्षत्रियादि' एवं बोधो सम्भवति। यतो हि प्रवृत्तिनिमित्तत्वस्यारोपः सदैव सदृशपदार्थेष्वेव भवति, अत एव भर्तृहरिणा 'पर्युदासः सदृग्ग्राही' इत्यादीनि वचनान्युक्तानि। अतो नञर्थस्य द्योतकत्वमभिधाश्रुत्यैव सिद्धे सत्यत्र लक्षणया नञो भेदकत्वमिति मतमयुक्तम्, कल्पनागौरवत्वात्। यतो हि निपाताः स्वयमेवानेकार्थवाचिनः सन्ति, अतोऽत्र लक्षणा निरवकाशा। साहित्यशास्त्रकारैरपि एतादृशस्थलेषु अभिधामूला व्यञ्जनैव स्वीकृता, न तु लक्षणावृत्तिः, अतो नञर्थस्य द्योतकता सर्वाभिमता[1]।

इयमपि शङ्का समुत्पन्ना भवति यत् कथं ज्ञायते नञ आरोपविषयता? अर्थात् कथमिदं ज्ञायते यदस्मिन् स्थले नञ् पर्युदासार्थकमस्ति। तस्यायं निरासो यथा— 'सिंहो माणवकः' इत्यादिषु वाक्येषु प्रयुक्ताः सिंहादयः शब्दाः सिंहादिभिर्पदैः सहान्वितत्वाद् 'आरोपितसिंहत्ववान्' इति बोधनात् तात्पर्यग्राहकाः सन्ति, तथैव 'अब्राह्मणमानय' 'अनुदरा कन्या' इत्यादिवाक्यगतानि 'अब्राह्मणोऽनुदरा' इत्यादीनि पदानि तद्भिन्नोदराल्पत्वादीनां संरोप्य नञा सहान्वित-त्वादारोपितोदरबुद्धिद्वारेण तन्मूलकमुदराल्पत्वादिविषयकं तात्पर्यं ग्राहयन्ति। अनेन प्रकारेण 'अद्विजादिषु' पदेषु द्विजभेदमूलकस्य प्रवृत्तिनिमित्तत्वस्यारोपितत्वेन नञ् तद्भिन्नस्य पदार्थस्य तात्पर्यग्राहकं भवति। नञो द्योत्यत्वमारोपविषयत्वं च पर्युदासनञे प्राधान्येन परिलक्षितं भवति।

वस्तुतस्तु पर्युदासनिषेधे तत्सदृशस्य तथापि तद्भिन्नस्य यद्ग्रहणं तदेव नञर्थस्य भेदरूपताऽस्ति। एवं नञः पर्युदासपरकत्वमेव नञर्थस्य भेदकत्वमस्ति, अयमेव चान्योन्याभावस्य व्यञ्जकोऽपि। निष्कर्षोऽयं यन्नैयायिकसम्मतनञर्थप्रकाराद् वैयाकरणादीनां सम्मतो नञर्थप्रकारो न तत्त्वतो भिन्नः। नञोऽभावार्थकत्वं तु केनचिद्रूपेण सर्वैः स्वीकृतम्। यत्र तु नैयायिकाः 'अभावो नञर्थस्यैकः प्रकार' इति

---

१. आरोपितत्वस्य नञ्वाच्यत्वे तु तस्य ब्राह्मणादिपदशक्येऽनारोपितब्राह्मण्यवति सम्बन्धो दुरुपपादः। तत्र प्रसिद्धार्थपरित्यागोऽप्रसिद्धार्थपरिग्रहश्चेत्युभयं द्योतककृत्यमिति नञ्सूत्रभाष्ये स्पष्टम्। इदमेव नञो द्योत्यद्योतकत्वं नाम। (लघुमञ्जूषायां नञर्थप्रकरणम्)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मन्यन्ते, तत्रैव मीमांसाव्याकरणदर्शने तत्सादृश्यम्, अभावः, तदन्यत्वम्, तदल्पत्वमप्राशस्त्यादयोऽर्थाः पर्युदासार्थकस्य निषेधे उपसङ्गृह्यन्ते[1]।

'यजतिषु ये यजामहं करोति नानुयाजेषु' इत्यस्मिन् वाक्ये यत्र तु मीमांसकैर्विकल्पप्रसक्तिभयात् "पर्युदासनञ्" स्वीक्रियते तद्विपरीतं वैयाकरणैरेतादृशेषु स्थलेषु विकल्पप्रसक्तिविषयमस्वीकृतम्। तेषां मतेऽत्र विकल्पप्रसक्तिस्तु तदा भवति, यदाऽनुयाजयागेषु 'ये यजामहम्' इति मन्त्रस्योच्चारणं शास्त्रतो भिन्नवाक्यरूपेण प्रसक्तं भवति। यथा—'नातिरात्रे षोडशिनं गृह्णाति' 'अतिरात्रे षोडशिनं गृह्णाति' इत्यादिषु स्थलेषु विधानप्रतिषेधावुभौ शास्त्रविहितत्वेन एतादृशस्थलेषु विकल्पः प्राप्यते[2]। अतोऽत्र विकल्पप्रसक्ति-भयरहितस्य पर्युदासार्थकस्य नञस्तात्पर्यं तद्भिन्नत्वस्य द्योतनेऽस्ति। वाक्येऽस्मिन् अनुयाजभिन्नयागेषु 'ये यजामहम्' इति मन्त्रस्योच्चारणं विधिवाक्येनैव गृहीतम्। नैयायिकानां मते तु 'यजतिषु' इत्यस्मिन् वाक्ये नञ् भेदवाचकम्। अत्र च लक्षणया भेदवति पदार्थे विद्यमानत्वान्नञर्थो भेदप्रतियोगिरूपेण अनुयाजयागेष्वन्वितो भवति। भेदप्रतियोगिन आधारभूतत्वेन 'अनुयाजेषु' इति पदे सप्तमी प्रयुज्यते। अतोऽत्रानुयाजनिष्ठभेदप्रतियोगिताकभेदवत्सु यागेषु 'ये यजामहम्' इति मन्त्रस्य पाठः कर्तव्यः, वाक्यार्थः सङ्गच्छते।

नेयं शङ्काऽपि युक्ता यत् 'यजतिषु.' इत्यादिषु स्थलेषु नञः प्रतिषेधार्थकत्वं कथं नाभिमतम्, यतो हि उक्तस्थलेषु नञ् अत्यन्तनिषेधरूपेण मतम्। 'यजतिषु.' इत्यादिभिर्वाक्यैर्विधानप्रतिषेधावुभौ शास्त्रविहितत्वादष्टदोषग्रस्तौ, विकल्पोऽपि स्वीकरणीयः, यत्तु यत्त्वयुक्तः। एवं 'नार्षेयं वृणीते न होतारम्' इत्यादिषु वाक्येषु नञर्थो लक्षणया भेदवान् प्रतियोगिभूतेनार्षेयेण सह सम्बद्ध्यते। अतोऽत्र 'आर्षेयवरणभिन्नप्राकृताङ्गसमूहो महापित्र्येष्टौ वरणीयः' इति वाक्यार्थबोधो भवति। वस्तुतोऽत्रार्षेयवरणं न विधिवाक्येन प्राप्तम्, प्रत्युत 'प्रकृतिवद् विकृतिः कर्तव्या' इत्यतिदेशनियमाद् दर्शपूर्णमासयागस्य विकृतित्वेन महापित्र्येष्टावपि अनुष्ठेयकर्तव्यरूपेण प्राप्तं भवति। अतः शास्त्रविहितस्याप्रतिषेधनेनात्र विकल्पप्रसक्तेर्विषयो नास्ति।

---

१. द्रा.नागेशभट्टकृता परमलघुमञ्जूषायाम्, निपातार्थनिरूपणम्, पृ. १४०।

२. "यत्र विकल्पापादकः प्रतिषेधस्तत्र प्रतिषिध्यमानस्य नानर्थहेतुत्वम्। उभयोरपि विधिप्रतिषेधयोः क्रत्वर्थत्वात्"। (मीमांसान्यायप्रकाशः, पृ. ११७) एवं 'यत्रैकमर्थं शिष्ट्वा तद्विषय एव नकारः श्रूयते यथा अतिरात्रे............'। (शास्त्रदीपिका, पृ. ४६३)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्यायमते तु इदं स्वीकृतं यदत्यन्ताभावप्रकारको (विशेषणको) क्रियाविशेष्यको बोधो भवति। अर्थाद् वाक्यार्थबोधेऽत्यन्ताभावरूपं नञ् विशेषणं क्रियासहान्वयिनं च भवति। मतमिमं दूषयतो नागेशभट्टमहोदयस्य मन्तव्यं, यद् 'वायौ रूपं नास्ति' इत्यादिषु स्थलेषु तात्पर्यानुपपत्तित्वेन रूपप्रतियोगि-कात्यन्ताभावे लक्षणया वायौ रूपाभावो ज्ञायते; किन्तु अयमत्यन्ताभावस्तु वायौ समनियतरूपाभावरूपिणोऽर्थ इत्यादिरूपेण अर्थत एव प्रतीयते। अतो नैयायिकानामिदं मतं स्वयमेवापास्तम्। नञ् अ-भावरूपमिति वादिनां सत्कार्यवादिनैयायिकानामयमपि तर्कोऽयुक्तो यद् बुद्धिस्थघटसत्तारूपपदार्थः प्रथमस्तु नञा अनिवारितव्यः, यतो हि सत्पदार्थस्य निषेधोऽसम्भवः। असतो निवृत्तिस्तु तस्यासन्मात्रेणैव भवति। अतो 'नासतो विद्यते भावो नाभावो विद्यते सतः'[1] इत्यनेन न्यायेन अत्यन्ताभावप्रकारकः क्रियाविशेष्यको बोधो भवतीति' अस्वीकृते नञ्कृता निषेधस्याविषयता प्रसक्ता भवति। यथोक्तम्—

'सतां च न निषेधोऽस्ति सोऽसत्सु न विद्यते।
जगत्यनेन न्यायेन नञर्थो प्रलयङ्गतः'[2] ।।

एतन्मतं दूषयन् वैयाकरणैराख्यायते, यतो हि बुद्धिस्थावेव शब्दार्थौ, वाच्यवाचकभावः प्राप्यते, अत एव बुद्धिगतपदार्थस्य बाह्यसत्ता एव नञा निषेध्यते। एवं स्वीकृते 'बुद्धिस्थस्यापि घटस्य बाह्यसत्ता नास्ति' 'इत्याकारको बोधो भवत्येव। अस्मिन् विषये यदा 'घटोऽस्ति' इत्यनेन वाक्येन तद्विषयकं ज्ञानं निवारणीयं च। अतो बुद्धिस्थस्य शब्दार्थस्य स्वीकृतिः व्यर्थेतीदं मतमयुक्तम्। अस्य तु निरासोऽयम्— बुद्धिगतस्य शब्दस्यावाच्यतामते नञा तन्निषेधोप्यसम्भवः, अतो बौद्धार्थस्य स्वीकारं युक्तमिति सिद्धम्'[3] ।

येषु स्थलेषु निषेध्यवस्तूनां रागतः प्राप्तिर्भवति, तत्रापि नञर्थाः क्रियान्वयिनो भवन्ति। यथा—'न कलञ्जं भक्षयेत्' इत्यादिषु वाक्येषु। एवं पुरुषार्थरूपेण विहितानां कर्मणां क्रत्वर्थाय निषेधोऽपि स्वीकार्यत्वादेतादृशस्थलेष्वपि नञ् तिङर्थेन क्रियया सह वा सम्बध्यते। यथा— 'दीक्षितो न ददाति न जुहोति'[4]

---

१. तैत्तिरीयब्राह्मणे-१।६।९।१।

२. नागेशभट्टकृतायाः परमलघुमञ्जूषाया निपातार्थनिर्णयादुद्धृतः।

३. बुद्धेः शब्दावाच्यत्वेन नञा तन्निषेधायोगात्। एतेन बौद्धार्थमस्वीकुर्वन्तो नञर्थबोधाय कष्टकल्पनां कुर्वन्तस्तार्किकाः परास्ताः। (परमलघुमञ्जूषा, पृ. १३९)

४. तैत्तिरीयसंहिता-१।२।३; मैत्रायणीसंहिता-२।६।५।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्यादिभिर्वाक्यैर्ज्योतिष्टोमयागे दीक्षितेन पुरुषेण यागकाले दानहोमपाक इत्यादीनां कर्मणामनुष्ठानं निषिद्धमस्ति। यदपि दानादीनि कर्माणि नानिष्टकराणि, तथापि क्रत्वर्थे वैगुण्योत्पादकत्वात् तानि क्रतुकाले नानुष्ठेयानि भवन्ति। एतेषां कर्मणां निषेधस्तु क्रतुसाद्गुण्याय भवति। उक्ताख्यानेन स्पष्टमेतद् यन्नञर्थस्य क्रियान्वयिनि सति 'अत्यन्तनिषेध' एव नञर्थे द्योत्यं भवति।

निष्कर्षोऽयं यदा नञः पर्युदासार्थकानि भवन्ति, तदा तस्यान्वयो नामधेयपदेन धात्वर्थेन सह वा भवति। एवम्भूते सति तानि तद्भिन्नस्यार्थस्य द्योतकानि भवन्ति। अयन्तु पर्युदासप्रतिषेध इत्याख्यायते, एतदेव नैयायिकसम्मतं नञो 'भेदरूपत्वञ्च'। एष्वेव तत्सम्मतोऽन्योन्याभावरूपोऽर्थोऽपि सङ्गृहीतो भवति, यतो हि पर्युदासनञि तद्भिन्नस्य यद्ग्रहणं तदेव नञर्थस्य भेदकतारूपेणोक्तम्। येषु स्थलेषु नञः क्रियया सहान्वयिनो भवन्ति, तत्र तस्यार्थोऽत्यन्तनिषेधो भवति। एतदेव प्रसज्यप्रतिषेध इति संज्ञया अभिहितम्, यतो हि अस्मिन् नञभेदे 'नान्तरिक्षे न दिवि' इत्यादीनामिव अप्राप्तप्रतिषेधो नास्ति; प्रत्युत प्राप्तार्थस्यैव प्रतिषेधो भवति। एतादृशेषु स्थलेषु घटितस्य निषेधस्य नैयायिकैर्यद् 'अत्यन्ताभाव' इति संज्ञा कृता, साऽप्यग्राह्या नास्ति। निषेधस्तु वस्तुतः सत्पदार्थस्यैव भवति। अतः प्रसज्यप्रतिषेधस्यात्यन्तनिषेधरूपत्वात् क्रियान्वयी नञर्थोऽपि 'अत्यन्ताभावरूप' एवास्ति।

निपातानां द्योतकतायाः सर्वत्र प्रसिद्धत्वान्नञस्तात्पर्यार्थस्य द्योतकता भवति। निपातानां द्योतकत्वे स्वीकृते सत्येव नञ्तत्पुरुषस्य 'उत्तरपदार्थप्राधान्यत्वमपि सङ्गतम्, नञो वाचकत्वे स्वीकृते पूर्वपदस्य प्राधान्यं सिद्धम्। एवम्भूते सति 'असः शिवः' 'अतस्मै ब्राह्मण' इत्यादिवाक्यगतेषु 'असः' 'अतस्मै' इत्यादिषु पदेषु सर्वनामकार्यमसम्भवम्, अतोऽस्मात्कारणादपि नञर्थस्य द्योतकत्वं सिद्धं भवति। नञर्थस्तु वस्तुतः स्वसंयुक्तस्य पदार्थस्य तत्सादृश्यार्थम्, अभावस्तदन्यत्वं तदल्पत्वमप्राशस्त्यम्, विरोधादिरूपाणां तात्पर्यार्थानां द्योतने प्रकाशने वा समर्थः। अत एव वाक्यार्थबोधविषये एषामुपयोगित्वमनिवार्यम्। अतः '**नञर्थाः षट् प्रकीर्तिताः**' इति वचनं सर्वथा युक्तमिति सिद्धम्।

●

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लिङ्गतत्त्वनिर्णयः

डॉ. वृजकिशोरत्रिपाठी

प्रवक्ता, संस्कृतस्य, पं.रा.ल.शु.
राजकीयस्नातकोत्तरमहाविद्यालये, फतेहपुरम्, आलापुरम्
अम्बेडकरनगरम्

❀ ❀ ❀

अलिङ्गो न पुमान्नापि स्त्री न नपुंसकः पुंसा।
श्रुतिलिङ्गस्सदा ध्येयः प्रत्यङ्ङात्मा मुमुक्षुणा।।१।।

लिङ्गं गमयितुं शक्यं न विवद्भिः कृतश्रमैः।
शब्दशास्त्रेऽपि शब्दानां लिङ्गेऽतः क्रियते श्रमः।।२।।

इह नास्त्यविदितं विदुषां यच्छब्दशास्त्रे कृतभूरिपरिश्रमाणामपि शब्दानां सम्यक्तया लिङ्गज्ञानं न सुशक्यमिति। यतो हि दृश्यते वाङ्मये यन्नैके शब्दा अर्थभेदाल्लिङ्गभेदमादधति, अन्ये चार्थेन लिङ्गान्तरकत्वेनानुभूयमाना अपि लिङ्गान्तरमुपश्लिष्यन्ति। अथ च केचित् समानार्थस्वरूपा अपि त्रिलिङ्गत्वं द्विलिङ्गत्वं वा वहन्ति। एवं शब्दानां लिङ्गविषये महद्वैचित्र्यं समुपलभ्यते भाषासु। लौकिकलिङ्गभेदशब्दगतलिङ्गभेदविसंवादश्च प्रायेण सर्वेषु भाषाविज्ञानविषयकेषु ग्रन्थेषु सरसमुपवर्णितो दृश्यते। यतो हि लिङ्गं शब्दनिष्ठमर्थनिष्ठं वेति विचारोऽपि महते विसंवादायोपतिष्ठते। एतादृश्योऽन्याश्च समापत्तय इह नातिदीर्घकायनिबन्धे विचारपदवीमारोक्ष्यन्ति संस्कृतसुरभारत्याः पाणिनीयव्याकरणानुसारेण, तदनुयायि-भर्तृहरिकौण्डभट्टप्रभृतिवैयाकरणमूर्धन्यानां सिद्धान्तालोचनपुरःसरेण। विशेषतोऽत्राहं भर्तृहरेर्वाक्यपदीये समुपलभ्यमानलिङ्गसमुद्देश्यप्रकरणमाश्रित्य प्रवर्ते लिङ्गतत्त्व-निर्णये।

लिङ्गलक्षणम्

भारतीयैः शाब्दिकैस्तादृशस्य लिङ्गलक्षणस्य व्यवस्थापने प्रयत्नः कृतो यदुपरि निर्दिष्टानां सर्वेषामपि लिङ्गोपादानविकल्पानां व्यापकत्वं स्यात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तैरैतिहासिकीं दृष्टिमवलम्ब्य पदार्थानामुत्पत्तिविकासविलयक्रमावबोधने न तथा रुचिः प्रकटिता, यथा तेषामपरिणामिनित्यस्वरूपपरिज्ञाने। तेन प्राकृतभाषासु केषाञ्चिच्छब्दानां लिङ्गव्यत्ययं दृष्ट्वाऽपि तद्धेत्वन्वेषणे प्रयत्नप्रकृत्या लिङ्गस्वरूप-परिज्ञान एव तैः सुसूक्ष्मं विचारः कृत इति तद्ग्रन्थपरिशीलनेन सम्यगवन्तुं शक्यते। एवं लिङ्गतत्त्वनिर्णये प्रवृत्तास्ते विद्वांसः शब्दार्थगतयोर्लिङ्गभेदयोरापाततः प्रतिभासमानं विसंवादमादावेवोपलक्षयाम्बभूवुः। आङ्ग्लादिभाषासु शब्दगतस्यार्थ-गतस्य च लिङ्गस्य पृथक् पृथग् व्यवहारः समुपलभ्यते। संस्कृते तु शब्द-गतस्यार्थगतस्य च लिङ्गस्यैकेनैव लिङ्गशब्देन व्यवहार इति शब्दैक्याल्लिङ्गैक्यं भवितुमर्हतीति नैसर्गिकोऽयं लौकिकानामभिमानः। सर्वेषु विषयेषु विमर्शशीलानां व्यपदेशैक्येऽपि लिङ्गयोरुभयोर्लक्ष्यैक्येऽपि विसंवादं दृष्टवतां परीक्षकाणां तु मनसि समुत्पन्नेयमाकाङ्क्षा यत् किमिदं लिङ्गं नाम। किमयं शब्दगतो लिङ्गभेदो वस्तुगतं कञ्चित् स्वरूपभेदं वा धर्मभेदं वाऽऽश्रित्य स्थितः, आहोस्वित् केवलं शब्दधर्मोऽयमिति।

तत्र 'पुंस्त्रीनपुंसकान्यतमत्वमेव लिङ्गमि'ति लिङ्गसामान्यलक्षणं वक्तुं शक्यते। भवति हि शाब्दज्ञाने शब्दजन्यशब्दार्थोपस्थितिः कारणम्। तत्रापि सम्बद्धादेव शब्दात् सम्बन्धिनोऽर्थस्योपस्थितिर्जायते नासम्बन्धिनः। वेदेभ्य आरभ्यार्वाचीनशास्त्रग्रन्थपर्यन्तं शब्दार्थौ तयोः सम्बन्धं चाधिकृत्य गभीरो विचारः कृतः। समुपलभ्यते चात्र मतानां बाहुल्यं वैचित्र्यञ्च। केचिच्छब्दार्थसम्बन्धस्य नित्यत्वं मन्यन्ते, अपरे तस्य कृतकत्वं स्वीकुर्वन्ति। केचिच्छब्दार्थयोरध्यासरूपं तादात्म्यं सम्बन्धमभिप्रयन्ति, अपरे तं कार्यकारणभावमुद्घोषयन्ति। सर्वथा नास्ति कोऽपि दार्शनिको यस्तयोः सम्बन्धं घनिष्ठं नाभिमन्येत। तस्य च घनिष्ठत्वेऽ-भिमन्यमाने शब्दधर्मैरवश्यमर्थधर्मानुवर्तिभिरेव भवितव्यम्। लिङ्गञ्च शब्द-धर्मेष्वन्यतमः। तस्याप्यर्थधर्मानुवर्तिभिरेव भवितव्यम्, इदमेवातः सर्वै-र्वैयाकरणैरभ्युपगम्यत इति स्वाभाविकमेतत्।

लिङ्गस्य वस्तुधर्मत्वं स्वीकुर्वतामपि पक्षभेदाः सम्भवन्ति। लौकिकाः कांश्चित् पुंल्लिङ्गान् शब्दान् लोमादिपुंधर्मविशिष्टार्थाभिधायिनः कांश्चित् स्त्रीलिङ्गान् शब्दान् स्तनकेशादिस्त्रीधर्मविशिष्टार्थाभिधायिनः कांश्चिच्च नपुंसकलिङ्गान् शब्दानुभय-विधव्यञ्जनरहितार्थवाचकान् दृष्ट्वा स्तनकेशादिकमेव लिङ्गशब्दवाच्यं मन्यन्ते। इदं लौकिकलिङ्गलक्षणमेव भाष्यकारैरुक्तम्। तथा हि—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः।
उभयोरन्तरं यच्च तदभावे नपुंसकः।। (महाभाष्यम्-४।१।३)

भर्तृहरिणा चाप्युक्तम्—

स्तनकेशादिसम्बन्धो विशिष्टा वा स्तनादयः।
तदुपव्यञ्जना जातिर्गुणावस्था गुणास्तथा।।१।।
शब्दोपजनितोऽर्थात्मा शब्दसंस्कार इत्यपि।
लिङ्गानां लिङ्गतत्त्वज्ञैर्विकल्पाः सप्त कल्पिताः।।२।।
(लिङ्गसमुद्देश्यम्, वाक्यपदीये)

अनयोरयमर्थः— लोके यल्लिङ्गं स्त्रीपुंसादिव्यञ्जनं दृष्ट्वा 'अयं पुमान्', 'इयं स्त्री', 'इदं नपुंसकम्' इति प्रतीयते तदिह पक्षद्वयेनोक्तं स्तनकेशादिसम्बन्धो विशिष्टा वा स्तनादय इत्यादिना। प्रसवसंस्त्यानयोग्यस्तनकेशकलापप्रजननादिभिरुपव्यञ्जनैरवयविनः सम्बन्धः संयोगसमवायलक्षणो लिङ्गम्, तेन वा सम्बन्धेन विशिष्टाः स्तनादयो लिङ्गमिति पक्षद्वयम्। तदेवोक्तम्— 'स्तनकेशवती'इत्यादिना भाष्यकारेण। नपुंसके स्त्रीपुंसोभयव्यञ्जनाभावात् तदभावे व्यञ्जनवत्त्वसाम्याच्च नपुंसकत्वमपि लक्षितं भवति। तिङन्तानामव्ययानाञ्च तदभावात् तत्रातिव्याप्तिवारणाय नपुंसकत्वलक्षणे उभयोरन्तरमिति पदं दत्तम्। तथा च तदेवोक्तौ कुक्कुटमयूरावित्यत्रातिव्याप्तिरुभयलक्षणाक्रान्तत्वादतस्तदभाव इति पदमुपात्तम्। तथा च यत्र लिङ्गान्तराभावे सति लिङ्गत्वेन तुल्यजातीयं स्त्रीपुंसलिङ्गव्यतिरिक्तं लिङ्गान्तरं वर्तते, सोऽर्थो नपुंसकलिङ्गयुक्त इत्यर्थः। अत्र स्तनकेशसम्बन्धश्च व्यञ्जनान्तरसम्बन्धोपलक्षणम्। तेन प्रसवविशेषादिरूपो यथास्वं दृष्टो व्यञ्जनविशेषो विशिष्टा वा स्तनादय एवात्र गृह्यन्ते। एवं लोमसम्बन्धोऽपि पुरुषनिष्ठो मेढ्रादेः पुंव्यञ्जनस्योपलक्षणमिति। मेढ्रप्रसवादय एव पुंव्यञ्जनानि गृह्यन्ते। तेन —

लिङ्गात् स्त्रीपुंसयोर्ज्ञाने भ्रूकुंसे टाप् प्रसज्यते।
नत्वं खरकुटी पश्य खट्वावृक्षौ न सिध्यतः।।

इत्यस्मिन् चोद्ये पूर्वोक्तं चोद्यद्वयं नावतरति। लोके हि यो लिङ्गज्ञापकत्वेन दृष्टः स्तनकेशादिसम्बन्धस्तमनूद्यैव लिङ्गलक्षणस्य क्रियमाणत्वात्; किन्तूभयेऽस्मिन् दर्शनेऽचेतनानां स्तनादिरहितत्वाल्लक्षणस्याव्यापकत्वम्। तथा च खट्वावृक्षौ न सिध्यतः। अतस्तीर्थिकमतभेदेन पक्षान्तराणां पञ्चानामाश्रयणम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैशेषिकाः सर्वत्राभिन्नाभिधानप्रत्ययोन्नीतसद्भावाज्जातिं मन्यन्त इति स्तनाद्युपव्यञ्जनाभिव्यक्तविशेषस्त्रीत्वपुंस्त्वनपुंसकत्वरूपा लिङ्गजातिरित्याहुः। सा चाचेतनेष्वपि यथायथं सत्त्वरजस्तमसां गुणानामुपचयापचयसाम्यावस्था-रूपोपव्यञ्जनाभिव्यक्ता विद्यत एव। ननु स्तनाद्युपव्यञ्जनाऽपि जातिः कथमचेतनेषु विद्यते, तत्र स्तनाद्यभावात्। अथ विलक्षणमेवोपव्यञ्जनं चेतनोपव्यञ्जनादचेतनेषु विद्यत इति ब्रूषे। तदा पूर्वोक्तं पक्षद्वयं स्तनकेशादिसम्बन्धो विशिष्टा वा स्तनादय इत्येवं रूपं नाचेतनेष्वव्यापकम्। तन्मतेऽपि विलक्षणोपव्यञ्जनस्य विद्यमानत्वाद् इति चेदत्रोच्यते — अयमर्थः, इयं व्यक्तिः, इदं वस्तु इति शब्दानां त्रिलिङ्गानां सर्वभावेष्वव्याहतप्रयोगात् सर्वत्र लिङ्गत्रययोगो लिङ्गत्रयाकारकप्रत्ययान्यथा-नुपपत्त्याऽनुमीयते। तत्र पूर्वोक्तपक्षद्वयमते परस्परविरोधिस्तनकेशमेढ्रादिरूपनियत-व्यञ्जनसम्बन्धरूपलिङ्गत्रययोगोऽशक्यः, अतस्तन्मतद्वयमनादृत्य जातिपक्षा-वलम्बनम्, स्त्रीत्वादिजातीनां हि सर्वगतत्वादेकाश्रयसमवायित्वं बह्वीनामपि उपपद्यते। इत्येवं जातिर्लिङ्गमिति तृतीयः पक्षः।

सांख्याः सत्त्वरजस्तमसां गुणानां सततपरिणामिनामुपचयापचयमध्य-स्थलक्षणा अवस्थाविशेषा यथायोगं पुंस्त्वादिलिङ्गमातिष्ठन्ते। इति चतुर्थः पक्षः।

अवस्थाविशिष्टा वा गुणा एव लिङ्गमिति सांख्यदर्शन एव पक्षान्तरम्। ते हि कार्यान्तरवत् स्त्रीत्वादिलिङ्गावभासकमपि प्रत्ययमुपजनयन्तो भवन्ति लिङ्गपदव्यपदेश्या इति पक्षोऽयं पञ्चमः।

एकस्यापि वस्तुनो घटादेः शब्दभेदेनार्थः। व्यक्तिः, वस्तु इति लिङ्गभेदस्य दर्शनाद् बहिरसन्नेव शशविषाणादिवद् विकल्पप्रत्ययगोचरो लिङ्गयोगः शब्दैरु-त्पादित इव बाह्यवस्तुनि अध्यास्त इति शब्दाभिधेयस्वभावं लिङ्गमिति षष्ठः पक्षः।

तटस्तटी तटमिति अभिन्नेनापि शब्देनाभिन्नं वस्तु त्रिलिङ्गं प्रत्यायत इति शब्दसंस्कारमात्रं लिङ्गम्। ननु अर्थधर्मतयावसायात्कथं लिङ्गं शब्दधर्मत्वेन शब्दसंस्कारनिमित्तत्वेनाश्रीयत इति चेत्, न, स्त्रियां पुंसि नपुंसक इत्येवं शब्दान्वाख्याने लिङ्गस्य निमित्तभावदर्शनात् कार्यकारणयोरभेदोपचारदर्शनात् शब्दधर्मत्वेन शब्दसंस्कारत्वेन व्यवहाराल्लिङ्गस्य। तदुक्तं भाष्ये—'तयोस्तु तत्कृतं दृष्ट्वा यथाऽऽकाशेन ज्योतिषः' इति। अस्या भाष्यपङ्क्तेराशयोऽयं यत्— तयोः स्त्रीत्वपुंस्त्वरूपयोर्लिङ्गयोर्निमित्तभूतयोः सतोस्तत्कृतं स्त्रीत्वपुंस्त्वरूपलिङ्गकार्यं टाबादिकं नत्वादिकञ्च दृष्ट्वा तेन कार्येण ते स्त्रीत्वपुंस्त्वरूपे लिङ्गे उपलक्ष्येते,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथा आकाशेन ज्योतिष उपलक्षणं भवति। इहाकाशे रोहिणी इति। यद्वा, यथाऽऽकाशे प्रकाशेन ज्योतिषोऽनुमानं भवतीति।

अस्माद् भाष्याद् अर्थधर्मस्य, जात्यादिरूपस्य, गुणावस्थारूपस्य वा लिङ्गस्य शब्दान्वाख्याने **शब्दसंस्काररूपे निमित्तत्वं** लिङ्गकार्यस्य टाबादेर्**लिङ्गोपलक्षकत्वं** प्रतीयत इति **सप्तपक्षाः प्रतिपादिताः**।

इदानीं स्त्रीत्वादिजाति**र्लिङ्गमिति पक्षो**ऽत्र विचार्यते। लौकिकस्य लिङ्गलक्षणस्य **स्तनकेशादिसम्बन्धो विशिष्टा** वा स्तनादय इत्युक्तस्याचेतनेष्वव्यापकत्वात्, **गुणावस्था गुणास्तथा** इत्युक्तस्य च लिङ्गलक्षणस्य सांख्यशास्त्रप्रसिद्धत्वेऽपि ततोऽन्यत्राप्रसिद्धत्वात्, शब्दोपजनितोऽर्थात्मा इत्यस्य शशविषाणादिवद् बहिरसत्त्वेन, शब्दसंस्कार इत्यस्यापि च लिङ्गस्य शब्दसंस्कारनिमित्तत्वेऽपि शब्दसंस्काररूपत्वाभावात्।

तत्र जातिर्लिङ्गमिति पक्षं विवृण्वता भर्तृहरिणोक्तम्—

'तिस्रो जातय एवैताः केषाञ्चित्समवस्थिताः।
अविरुद्धा विरुद्धाभिर्गोमहिष्यादिजातिभिः,।। (वा.प., लि.समु. ४)

जातिर्नाम सर्वत्राभिन्नाभिधानप्रत्ययोन्नेया। भवति च शब्देभ्य स्त्रीत्वाद्यनुरक्ता प्रतीतिरिति स्त्रीत्वादिजातिरुन्नीयते। इयं स्त्रीत्वादिजातिर्गोत्वादिभिरेकस्मिन्नर्थेऽवस्थातुं शक्यते। हस्तिन्यां वडवायाञ्च स्त्रीत्वबुद्धिः समानेति लिङ्गजातेरन्याभिः सहानवस्थानलक्षणविरोधवतीभिर्गोत्वाश्वत्वादिभिर्जातिभिः सहैकार्थसमवायोऽभ्युपेयते। जातीनाञ्च सर्वगतत्वात् तिसृणामपि लिङ्गजातीनामेकाश्रयसमवायित्वं नानुपपन्नं येनैकस्मिन्नेव वस्तुन्यर्थव्यक्तिवस्तूनां भिन्नलिङ्गकानां शब्दानां तटस्तटी तटमिति लिङ्गभेदेनैकस्यैव शब्दस्य वा प्रयोगः सूपपादो भवति।

ननु जातिलिङ्गमित्यस्यान्यस्य वा कस्यचिल्लौकिकस्य लिङ्गस्य व्यक्तेषु चेतनेषु स्फुटानां स्तनाद्यवयवानां भवतु लिङ्गसत्त्वावगतिः; परन्त्वन्येष्वव्यक्तेष्वचेतनेषु तादृशानामवयवानामभावात् कथं लिङ्गावगतिः, न च मृगतृष्णासु सलिलवन्निर्भासो लिङ्गस्य यथोक्तं भाष्यकारेण भर्तृहरिकारिकात्रय-(लिङ्गसमु. ८ तः १० यावत्)गोचरीभूतया कारिकया—

'असत्तु मृगतृष्णावद् गन्धर्वनगरं यथा।
आदित्यगतिवत् सन्न वस्त्रान्तर्हितवन्न तत्'।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति वाच्यम्, सदा दृष्टस्य लिङ्गस्यैवं सत्त्वाभ्युपगतौ शशविषाणादीनामपि क्वचित् सत्त्वाभ्युपगमादिति चेत्, न, टाबादिरूपकार्यं दृष्ट्वा सर्वत्राचेतनेष्वपि खट्वादिषु लिङ्गसत्त्वाभ्युपगमात् सिद्धेः। ननु लिङ्गे सिद्धे टाबादिकम्, टाबादौ च सति लिङ्गसत्त्वसिद्धिरित्यन्योन्याश्रय इति चेत्, न, सिद्धस्यैवार्थस्य शब्देनानुवादात्। तथा हि खट्वादौ सिद्धस्यैव स्त्रीत्वादिलिङ्गस्य टाबादिभिरनुवाद इति साध्यसिद्धेरनुमानप्रतिबन्धात्। अनुमानन्तु अतत्त्वज्ञानामल्पमेधसामिति ध्येयम्।

भाष्यकारमतम्

लिङ्गं शब्दधर्म इति पक्षे एवमेव लौकिकलक्षणमिव जातिपक्षोऽपि न सूपपाद्यः। अतो लिङ्गविषये वैयाकरणैः कश्चित् स्वकृतान्तः आस्थेयः। तत्र वैयाकरणशिरोमणिभिः कात्यायनमुनिभिश्च प्रतिपादित एष सिद्धान्तः—

'संस्त्यानप्रसवौ लिङ्गमास्थेयौ स्वकृतान्ततः।
संस्त्याने स्त्यातेर्ड्रट् स्त्री सूते सप्रसवे पुमान्'।।

सर्वाश्च पुनर्मूर्त्तय एवमात्मिकाः संस्त्यानप्रसवगुणा इति 'स्त्रियाम्' (४।१।३) सूत्रे भाष्यकारैश्चेदमल्पकायं लक्षणं स्वकीयैरनुपमैर्नृत्यत्पदैर्वाक्यैश्चोपबृंहितम्। एवं व्यवस्थापितस्यैव लक्षणस्य गूढतत्त्वावबोधने आनागेशं सर्वैरपि भर्तृहरिहेलाराजकैयटप्रभृतिभिर्महावैयाकरणैः प्रयत्नः कृतः। दृश्यते च तेषां प्रयत्नस्य फलं तद्रचितेषु ग्रन्थेषु। लक्षणस्यायमर्थः— संस्त्यानमपचयः। प्रसव उपचयः। एतौ संस्त्यानप्रसवौ स्त्रीत्वरूपं पुंस्त्वरूपञ्च यथाक्रमं लिङ्गमास्थेयौ। अथ च संस्त्यानं संहननं प्रतिलयस्तिरोभावो रूपरसादीनां सत्त्वादिमयानां गुणानां सत्त्वरजस्तमोविकाराणामपचयः स्त्रीत्वरूपः, स्त्रीलिङ्गं शास्त्रे प्रसिद्धम्। यतः संस्त्याने अपचयरूपेऽर्थे संस्त्यायतेर्धातोर्भावे ड्रट्प्रत्यये 'स्त्री' इति भवति। प्रसव उपचयरूपेऽर्थे सूतेर्धातोर्भावे डुम्सुन्प्रत्यये सकारस्य पकारादेशे सति 'पुमान्' इति भवति। सर्वाश्च पुनर्मूर्त्तयः = पदार्था एवमात्मिकाः = आविर्भावतिरोभावात्मिकाः शब्दस्पर्शरूपरसगन्धवत्यः। तथा चाचेतनेष्वपि खट्वावृक्षादिषु लिङ्गसिद्धिः। संस्त्यानप्रसवरूपयोर्लिङ्गयोः सर्वत्र व्याप्तेरुपादानात्। तदेवाह भाष्यकारः— 'न शक्यं वैयाकरणैर्लौकिकं लिङ्गमास्थातुम्। अवश्यं कश्चित्स्वकृतान्त आस्थेयः' इति। उपचयापचयात्मकोभयधर्मसाम्यावस्थारूपा स्थितिस्तु नपुंसकलिङ्गमर्थादुक्तं भवति। तथा हि भाष्यकारैः 'उभयोरविवक्षायां नपुंसकम्' इति वदद्भिरत्यल्पमुक्तमित्यर्वाचीनैस्तद्रहस्योद्घाटने प्रयत्नः कृतः। 'अविवक्षातः साम्यं स्थितिरौत्सुक्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निवृत्तिरपरार्थत्वमङ्गाङ्गिभावनिवृत्तिः कैवल्यमिति नपुंसकत्वम्' इति बहुभिः शब्दैः सङ्ग्रहकारेण भाष्यकाराशयाभिप्रायो वर्णितः। तन्मध्यादितरवैलक्षण्येन नपुंसकस्वरूपावेदकत्वात् स्थितिशब्दं गृहीत्वा तस्य चतुर्धा व्याख्याऽकारि तत्रभवता भर्तृहरिणा—

'प्रवृत्तेरेकरूपत्वं साम्यं वा स्थितिरुच्यते।
आविर्भावतिरोभावप्रवृत्त्या वावतिष्ठते।।
गुणा इत्येव बुद्धेर्वा निमित्तत्त्वं स्थितिर्मता।
स्थितेश्च सर्वलिङ्गानां सर्वनामत्वमुच्यते'।। इति वदता।

(वा.प., लिङ्गस. १७-१८)

उपचयापचयप्रवाहयोर्ये वृद्ध्यपायाख्ये प्रवृत्तौ तयोरभेदाध्यवसायः स्थितिरेकः प्रकृतः। आविर्भावतिरोभावयोः परिणामत्वं साम्यं तदेव च स्थितिरिति द्वितीयः प्रकारः। कस्याश्चित् कलायास्तिरोधानानन्तरं यदा कलान्तराविर्भावस्तदा तिरोधानस्यापर्यवसितत्वात् स्थितिरेवावसीयत इति तृतीयः प्रकारः। वैश्वरूपमापद्यमाना गुणाः सर्वास्ववस्थासु 'इमे गुणाः' इत्यन्वयिप्रत्ययस्य हेतवो भवन्ति। एवञ्च स्थितिलिङ्गतामापादयन्ति। अयमेव चतुर्थः प्रकारः। एवं प्रकारचतुष्टयेनावगता स्थितिरेव नपुंसकलिङ्गं वस्तुधर्मस्तद्वाचकं च शब्दगतं नपुंसकलिङ्गमिति। ननु भवतु रूपादिसमुदायात्मनो वस्तुन उपचयापचय-स्थितिरूपधर्मत्रययोगः, रूपम्, रसः, शब्द इत्यादिव्यपदेशस्तु कथम्, रूपाद्यन्तराभावात् केवलानां तेषामुपरि न हि कस्यचिदाविर्भावोऽस्ति येन लिङ्गयोगः स्यादिति चेत्, न, सत्त्वरजस्तमोमयेषु रूपादिष्वपि पुरुषार्थं प्रतिक्षणं परिणामिनां सत्त्वादीनां गुणानां भिद्यमानत्वादुपचयापचयसाम्यावस्थाया अक्षतत्वात्। एवं लिङ्गत्रययोगः सम्पादनीयः। यथोक्तं शिष्टैः —

'कलानां पृथगर्थानां प्रतिभेदः क्षणे क्षणे।
भिद्यते सर्वभावेषु सौक्ष्म्यात्तु न विभाव्यते'।। इति।

भाष्येऽपि चोक्तम्— 'नेह कश्चित् स्वस्मिन्नात्मनि मुहूर्त्तमप्यवतिष्ठते, वर्धते यावदनेन वर्धितव्यम्, अपायेन वा युज्यते' इति।

तथा चानेनेदमायाति यदस्मिन् लक्षणविषये वैयाकरणाः सांख्यमतानुसारिणः। सांख्या निखिलमिदं जगत् सत्त्वरजस्तमोरूपत्रिगुणात्मिकायाः प्रकृतेः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिणामं मन्यन्ते। एते गुणा यावदनारब्धकार्यास्तावदप्रत्यक्षाः सन्तो न शब्दव्यवहारगोचराः। तत्परिणामभूता एव शब्दस्पर्शरूपरसगन्धाः। त्रिगुणात्मकाः शब्दादयः पृथिव्याद्यात्मना परिणमन्ते। सत्त्वादय इव शब्दादयोऽपि सततपरिणामिनो भवन्ति। अत एवाविर्भावतिरोभावौ तेषां नित्यधर्मौ। सर्वेषां भावानां शब्दादिमयत्वात्तेऽप्याविर्भावतिरोभावधर्माणो भवन्ति। आविर्भाव-तिरोभाववेव प्रसवसंस्त्यानशब्दाभ्यां व्यवह्रियेते वार्तिके भाष्ये च। 'वर्द्धते यावदनेन वर्धितव्यम्' इति वदता भगवता भाष्यकारेण वृद्धिरेव प्रसवापचयापरपर्यायोऽपाय एव संस्त्यानमिति च सूचितम्। प्रकृतिश्च पुमान् इति घोषयता च वृद्धिप्रवृत्तिशब्दयोः पर्यायत्वमपि प्रदर्शितम्। एवं पदार्थानां वृद्धिरूपो धर्म एव पुंल्लिङ्गमपचयरूपश्च धर्मः स्त्रीलिङ्गमिति लक्षणं पर्यवसितम्।

ननु आविर्भावतिरोभावस्थितिरूपाणां लिङ्गधर्माणां सर्वेषु वस्तुषु सम्भवे सति तद्वाचकशब्दानां कथं लिङ्गव्यवस्थेति चेत्, न, विवक्षाततत्सिद्धेः। विवक्षा चात्र न प्रयोक्तृस्वेच्छारूपाऽवगन्तव्या, प्रयोक्तृभेदेन लिङ्गभेदापत्तेः; किन्तु लोक-व्यवहारानुवादिनी विवक्षाऽत्र ग्राह्या। निरावरणख्यातयः शिष्टा एव च लोकः। तैर्यल्लिङ्गस्य शब्दस्य धर्मसाधनत्वमवगतं तस्यैव साधुत्वमभ्युपगतम्। अत एवोक्तं 'लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य' इति शिष्टैः। शब्दस्यायं स्वभावो यद् वस्तुनि बहुषु धर्मेषु सत्स्वपि कञ्चिदेवाश्रित्य प्रवर्तते। यथा शरावादिकरणेऽपि कुम्भकरणनिमित्तः कुम्भकारशब्दः। एवं सर्वेषु लिङ्गधर्मेषु वस्तुनि सत्स्वपि कञ्चिदेवाश्रित्य शब्दस्तत्र प्रवर्तते। शब्दशक्तेरेवेदं वैचित्र्यम्। शिष्टव्यवहारोऽस्य व्यवहारस्य ज्ञापको न प्रवर्तयिता। तथैव शिष्टैर्लिङ्गत्रययुक्तानां शब्दानामन्यथापि विभागो कृतो बुभुत्सुसुखबोधनाय। तथा ह्युक्तं वाक्यपदीये—

'उपादानविकल्पाश्च लिङ्गानां सप्त वर्णिताः।
विकल्पसन्नियोगाभ्यां ये शब्देषु व्यवस्थिता'।। (वा.प., लिङ्गस.३)

अस्यायमर्थः— तत्तद्विलक्षणशक्तिभिः शब्दैर्लिङ्गानामर्थविशेषणत्वेन यद् ग्रहणमुपादानं तस्य विकल्पाः = भेदा अपि सप्त। सर्वेषु पदार्थेषु सम्भवतामपि गुणावस्थादिरूपाणां लिङ्गानां लिङ्गाभिव्यञ्जकशब्दशक्तिप्रतिनियमाद्धि असाङ्कर्यम्। ते च विकल्पनियमाभ्यां लिङ्गानुशासनेषु कोशेषु च वर्णिताः। तथा हि— लिङ्गानां पुंस्त्रीनपुंसकरूपाणां शब्दैर्विकल्पेन प्रत्यायने चत्वारो भेदाः। केचित् पुंनपुंसकलिङ्ग-मात्रविषयाः, यथा—ध्वजः, ध्वजम्; पद्मः, पद्ममित्यादयः। केचित् स्त्रीनपुंसक-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मात्रविषयाः, यथा—औचित्यम्, औचिती; चातुर्यम्, चातुरी इत्यादयः। अन्ये स्त्रीपुंससाधारणाः, यथा—सूनुः, इषुः, तनयः, तनया, घटः, घटी, कुम्भः, कुम्भी इत्यादयः। अपरे त्रिलिङ्गाः, यथा— दरः, दरी, दरमित्यादयः। सन्नियोगो नियमस्तेन त्रयो लिङ्गोपादानविकल्पाः। यथा—वृक्षादयः पुंस्येव नियताः। अब्ज्वालादयः स्त्रियामेव। शिरो वासः कनकादयो नपुंसक एवेति सर्वयोगे विकल्पनियमाभ्यां सप्तलिङ्गोपादानविकल्पाः सम्भवन्ति।

निष्कर्षः

अथास्मिन्विषये लिङ्गस्य किं लक्षणं भर्तृहर्यभिप्रेतमिति विचारपदमधिरूढे प्रश्ने कथितुं शक्यते यद् वाक्यपदीये लिङ्गसमुद्देश्ये सिंहावलोकनन्यायेन 'शब्दसंस्कारो लिङ्गम्' इति लक्षणं भूयः परिष्कुर्वतो भर्तृहरेरिदमेव लक्षणमभिप्रेतमिति। तथा ह्युक्तं तेन—

'इदं वेयमयं वेति शब्दसंस्कारमानकम्।
निमित्तदर्शनादर्थे कैश्चित्सर्वत्र वर्ण्यते'।। इति। (वा.प., लि.स.३०)

अस्यायं भावः—'इदं वस्तु', 'इयं व्यक्तिः', 'अयमर्थः' इति सर्वत्र वस्तुमात्रे लिङ्गत्रयव्यवहारदर्शनेन त्रिलिङ्गानां तटादिशब्दानां बहिर्विद्यमानलिङ्गरूप-निमित्तानपेक्षया कल्पितेनापि आन्तरेण लिङ्गेन शब्दप्रवृत्तौ निमित्तीकृतेन तत्तदर्थे प्रवृत्तिर्न व्याहन्यत इति। अस्माद्धेतोः शब्दान्वाख्याने शब्दप्रवृत्तौ च लिङ्गरूपनिमित्तदर्शनात् शब्दान्वाख्यानमात्रं लिङ्गमभ्युपगन्तव्यम्। वस्तुतस्तु शब्दान्वाख्यान-निमित्तेऽङ्गीक्रियमाणे 'राहोः शिरः' इत्यादौ भेदे जायमाना षष्ठी-विभक्तिः कथं स्यात्, राहुशिरसोर्वास्तवस्य व्यतिरेकाभावात्। तस्माद्बहिरसतोऽपि लिङ्गस्य बाह्यत्वेनावसितस्य शब्दान्वाख्याननिमित्तत्वम्। अत एव 'टाबृचि' (पा.सू. ४।१।९) इति सूत्रे ऋचोऽभिधेयत्वेनोपादानं युक्तम्। स्वीयरूपस्य लिङ्गस्य त्वन्वाख्याननिमित्तत्वेन।

'शब्दसंस्कारो लिङ्गमि'ति दर्शने 'शब्दोपजनितोऽर्थात्मा' इत्यस्माद् दर्शनात् 'सर्वत्रैवार्थे शब्दादवधृतस्य लिङ्गस्य शब्दसाधुत्वनिमित्तभावः' इत्ययं विशेषः। तत्र दर्शने तु चेतने भूयसा दृष्टस्य लिङ्गस्यान्यत्राचेतने समारोपोऽभिमत इति दर्शनयोरनयोर्भेदः।

ननु बहिरगृह्यमाणस्य तत्त्वादेवासतो लिङ्गस्य कथं शब्दसंस्कार-निमित्तत्वमिति चेत्, न, अवच्छेदकस्य ग्राह्यत्वनियमाभावात्। यथाऽदृष्टमेवेन्द्रियं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

घटाद्यवच्छेदनिमित्तं दृष्टम्, तथा लिङ्गमपि अर्थावच्छेदत्वेन बहिरगृहीतमपि शब्दसंस्कारे निमित्तभावं भजत इति युज्यते। तथा चायं प्रयोगः— लिङ्गमग्राह्यत्वेऽपि शब्दसंस्काररूपस्वकार्यनिमित्तम्, अवच्छेदनिमित्तत्वाद् इन्द्रियादिवदिति। हेलाराजास्तु यथाभाष्यं गुणावस्थारूपं लिङ्गमिति सिद्धान्तयन्ति। यथा ह्युक्तं तैः— गुणधर्मरूपे हि लिङ्गे धर्मशून्यस्य सर्वथैवान्यव्यवहार्यत्वादवस्तुष्वपि वस्तुत्वाभिमानाल्लौकिकानां लोकसम्प्रत्ययसमारूढस्यैव शब्दार्थत्वादात्मादीनां रूपादीनां तमश्छायाप्रभृतीनाञ्च सर्वेषां लिङ्गयोगः समुपपन्नः। अभावशशविषाणादीनामपि वस्तुभूतोत्तरपदार्थाश्रयं लिङ्गं न चान्यथाभावोपाश्रयत्वादभावो व्यवह्रियत इति व्यापकमिदं संस्त्यानप्रसवौ स्थितिश्चेति लिङ्गत्रयं सिद्धान्तितमवगन्तव्यमिति।

लिङ्गं शब्दनिष्ठमर्थनिष्ठं वा

अथेदं लिङ्गं शब्दनिष्ठमर्थनिष्ठं वेति समीक्ष्यते। तत्र लिङ्गं शब्दनिष्ठो धर्मविशेषः, तमेव भिन्नं धर्ममादाय तटादिशब्दा भिद्यन्ते। केषाञ्चिच्छब्दानामनेकलिङ्गत्वव्यवहारस्तु समानानुपूर्वीकत्वेन शब्दानामभेदारोपादिति वैयाकरणमूर्धन्याः श्रीकौण्डभट्टप्रभृतयः[1]।

अत्र च 'एकार्थे शब्दान्यत्वाद् दृष्टं लिङ्गान्यत्वम्' इति भाष्यमपि[2] मूलम्। तथा हि— एकार्थे शब्दान्यत्वादिति हेतुना लिङ्गान्यत्वं लिङ्गभेदः साध्यतेऽनेन भाष्यवचनेन। तत्रोद्देश्यबोधकं पदं नास्तीति कृत्वा योगस्य तस्याध्याहारः कार्यः। तत्र च शब्दपदमेवाध्याहर्त्तव्यम्। तादृशस्य हेतोस्तत्र स्वरूपेण वर्तमानात्, शब्दशास्त्रे तस्यैव प्राधान्याच्च।

शाब्दिकशिरोमणयो नागोजिभट्टास्तु लिङ्गस्यार्थनिष्ठत्वं केवलान्वयित्वञ्च प्रस्तावयन्ति[3]। तेषामयमाशयः—उक्तभाष्ये एकार्थ इति पक्षनिर्देशः, तत्रैव लिङ्गान्यत्वमिति साध्यम्, शब्दान्यत्वमेव हेतुः। अतश्चैकार्थे लिङ्गान्यत्वं दृष्टम्, शब्दान्यत्वादिति योजना कर्त्तव्या। पुष्यः, तारकाः, नक्षत्रम् इति च दृष्टान्तः। अत्र पक्षे शब्दान्यत्वादित्यस्य विभिन्नशब्दादित्यर्थः। शक्तिरूपः सम्बन्धो हेतुतानियामको बोद्धव्यः। 'इदं वस्तु', 'अयमर्थः', 'इयं व्यक्तिः' इति त्रिविधव्यवहारस्य पदार्थमात्रे

---

१. वै.भू.सा., नामार्थनिर्णयः।

२. महाभाष्यम्-४।१।९२-वा.६।

३. ल.श.शे. स्त्रीप्र., स्त्रियामिति सूत्रम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्त्तुं शक्यत्वेनास्य केवलान्वयित्वमपि स्फुटमेव प्रतीयते। व्यापकत्वादयमेव पक्षः समुचितः प्रतिभाति।

लिङ्गमपि प्रातिपदिकार्थः। तत्र नपुंसकलिङ्गे वर्तमानं यदजन्तं प्रातिपदिकं तस्यान्त्याचो ह्रस्व इत्यर्थकं 'ह्रस्वो नपुंसके प्रातिपदिकस्य' (पा.सू. १।२।४७) इति सूत्रम्। 'तस्माच्छसो नः पुंसि' (पा.सू. ६।१।१०३) इति सूत्रञ्च लिङ्गस्य तदर्थत्वे प्रमाणम्। न चान्वयव्यतिरेकसहचाराभ्यां विभक्तेरेव तद्वाच्यं स्यादिति शङ्क्यम्, 'लिड्, धुग्, रमा, वारि' इत्यादौ विभक्त्यभावेऽपि तद्बोधात्, प्रातिपदिकेनैव तयोः सहचारयोर्योजनीयत्वादिति शम्।

●

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानवजीवने ग्रहाणां प्रभावः

डॉ. कृष्णचन्द्रद्विवेदी
आचार्योऽध्यक्षचरश्च, ज्योतिषविभागस्य
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये
वाराणसी

विश्वसंरचनायाः सर्वाणि द्रव्याणि, सर्वाणि तत्त्वानि, सर्वे पदार्थाश्च ब्रह्माण्डरूपाकाशे घनीभूता यत्र तत्र सर्वत्र विस्तरिताः सन्ति। परस्परं गुरुत्वाकर्षणेन संहननेन च गतिशीलाः सन्तः शीतगैस इव व्याप्तास्तिष्ठन्ति। प्रकृतेः स्वाभाविकेन क्षोभकारणेन गुरुत्वाकर्षणे तीव्रगतिशीलता भवति। अनया सृष्टिपदार्थानां खण्डानि गतिशीलानि भूत्वा इतस्ततो नीहारिकासु, आकाशगङ्गायाः सर्पिलनाभ्युन्मुखेषु च ह्रस्वाकृतिकखण्डानि स्वकीये केन्द्रे भ्रमन्ति, बृहदाकारकाणि खण्डानि परितो भ्रमन्ति। बृहद्भागात्मकः सृष्टितत्त्वपदार्थः स्वकीये केन्द्रबिन्दौ सततं भ्रमति। स्वकीये केन्द्रे सततं भ्रमणशीलोऽयं 'पदार्थपुञ्जः' तारा इति नाम्ना प्रसिद्धोऽस्ति। अमुं परितो भ्रमणशीलस्य तत्त्वपदार्थस्य खण्डः 'ग्रह'-नाम्ना प्रसिद्ध इति।

ब्रह्माण्डस्य नीहारिकाषु मन्दाकिनीसु (आकाशगङ्गासु) च व्याप्ताः सृष्टिरचनाया घनीभूतशीतगैसनामधारिण एत एव 'पदार्थाः' सन्ति।

रात्रौ निरभ्राकाशे उत्तरत दक्षिणदिशि एका स्वच्छधूमिलपट्टिका सहजरूपेण अस्माकमक्ष्णोर्दृष्टिपथमायाति। इयमेव 'पट्टिका' 'आकाशगङ्गा' इति कथ्यते।

देवयानीनीहारिकाक्षेत्रे सूर्योऽस्माकं सबलतारा अस्ति। अनेन सूर्येणैवायं विस्तृतः सौरपरिवारो भ्रमणशीलोऽस्ति। इयं पृथिवी अपि, यस्योपरि अस्माकमावासः, सौरपरिवारस्य एका प्रमुखसदस्या अस्ति। पृथिवीं परितः भ्रमणशील उपग्रहः 'चन्द्रः' अस्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथा सामान्यरूपेणैकस्य दीपकस्य लवसमीपे दूरे च स्थित्वा उष्णतायाः प्रकाशस्य च प्रभावं प्रत्यक्षरूपेण सर्वे प्राणिनोऽनुभवन्ति, तथैव प्रकाशमहापुञ्जरूपेण सूर्येण प्रत्यक्षतः प्रकाशस्योष्णतायाश्चानुभवं सर्वे प्राणिनः कुर्वन्ति। दिनानि भवन्ति, ताराभिः पूरिताः स्वर्णमयीरात्र्य आयान्ति, ऋतूनामागमनं परिवर्तनञ्च भवति, प्राणिमात्रेष्वस्य प्रभावो दृश्यते। इत्थमेव ग्रहाणाम्, उपग्रहाणाम्, ताराप्रकाशरश्मिणाञ्च प्रभावः प्राणिमात्रेषु दृश्यते। एतेषां ग्रहोपग्रहप्रकाशतरङ्गतत्त्वानां प्रचुरप्रभावो भवति। यथा— कदाचित् सूर्यस्य उष्णता सह्या भवति, कदाचिदसह्या भवति। स्थानभेदेन सुदूरतया च न्यूनाधिकप्रभाव-कारिणो भवन्ति। आकाशीय-गोलीय-ज्यामितीयक्षेत्रानुसारमेषु परिवर्तनमपि भवति। यदा कदा पूर्णसूर्यग्रहणस्य पूर्णचन्द्रग्रहणस्य च चामत्कारिकः प्रभावो दृश्यते। अत एव केनाप्यवरोधकयन्त्रेण विना ग्रहणस्य दर्शनं सर्वेषां कृते हानिकारकं भवति।

आधुनिकखगोलविज्ञानस्य मतमिदमद्यतनवैज्ञानिकानां मतमस्ति। एते दूरवीक्षणयन्त्राणां सततमध्ययनेन तेषां प्रयोगेण चावबोधयन्ति। प्रमुखवैज्ञानिकः फ्रेडहायलनामा अन्ये च वैज्ञानिका अहर्निशमस्मिन्नन्वेषणे संलग्नाः सन्ति। 'अन्येषु ग्रहपिण्डेषु जीवस्य सत्ता अस्ति' इत्येतादृशीं मान्यतां स्वीकर्तुं पुष्टप्रमाणानां सङ्कलनं कुर्वन्ति।

अत एवाधुनिकखगोलविज्ञानमपि 'तारा-भौतिकी' इत्यस्य नवं सिद्धान्तमिदं सहजतया स्वीकरोति यद् मानवजीवनोपरि ग्रहोपग्रहताराणां प्रभावो भवति, अग्रेऽपि भविष्यति।

अयं भारतदेशः ऋषिषु, महर्षिषु, मुनिषु, ईश्वरसत्तायां वेदवाक्येषु च आस्थावानस्ति, इमान् दृढं विश्वसिति च। वेदा अपौरुषेया ईश्वरोक्ता मन्यन्ते। एते 'श्रुति' इति नाम्नाऽपि प्रसिद्धाः। ऋषयो मुनयश्च आध्यात्मिकशक्तिपुञ्जमाश्रित्य सततं ब्रह्माण्डस्यान्वेषणं कुर्वन्तः सामान्यजनस्य कृते इदं घोषितवन्तो यत् तत्कालीनवेधयन्त्रेभ्यः प्राकृतिकसंघटनाभिश्च आकाशीयपिण्डानां प्रभावो मानवजीवनोपरि निखिलचराचरोपरि च दृश्यत इति। स्वकीयान्वेषणबलेन भारतीयाः, प्रमुखानां सप्तग्राहाणाम्, सूर्य-चन्द्र-भौम-बुध-बृहस्पति-शुक्र-शनीत्येतेषाम्, छायाग्रहयो राहु-केतु इत्यनयोः, नक्षत्राणाम्, नीहारिकाणाम्, आकाशगङ्गानाञ्च प्रभावं सहजरूपेणोपस्थापितवन्तः। वेदैः प्रमाणितमस्ति यत् प्राणिमात्रस्य चराचरस्य सृष्टिः सूर्येणैवास्ति। 'सूर्य आत्मा जगतस्तस्थुषश्च' इत्यनेनाधिकं किं प्रमाणं भविष्यति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानवस्य गर्भाधानकालादारभ्यावतारकालं यावत् सर्वेषां ग्रहाणां प्रकृत्यनुसारं तास्ताः शक्तय उद्घोषिताः सन्ति। यथा—

आत्मा रविः शीतकरस्तु चेतः सत्त्वं धराजः शशिजोऽथ वाणी।
गुरुः सितो ज्ञानमुखो मदश्च राहुः शनिः कालनरस्य दुःखम्।।
आत्मादयो गगनगैर्बलिभिर्बलवत्तराः।
दुर्बलैर्दुर्बलास्ते तु विपरीतं शनेर्फलम्।।

इत्थमेव ग्रहाणां प्रबलनिर्बलभावेन मानवस्य कृते किं वा प्राणिमात्रस्य कृते उद्घोषणा क्रियते। यथा —

राजा रविः शशिधरस्तु बुधः कुमारः
सेनापतिः क्षितिसुतः सचिवौ सितेज्यौ।
भृत्यस्तयोश्च रविजः सबला नराणां
कुर्वन्ति जन्मसमये निजमेव रूपम्।।

इति वचनानुसारं तत्तद् ग्रहाणां स्वभावप्रकृत्यनुरूपमेव यस्मिन् कस्मिन्नपि भूभागे समाजे वा समुत्पन्नस्य मानवस्य स्वभावो भविष्यति। मानवो उक्तवचनानुरूपमेव जीवनमापनं करिष्यति। प्राणिमात्रस्यानुभूतिरीदृशी भविष्यति।

जन्मानुसारमेव प्रत्यक्षमनुभवं कर्तुं शक्यते। अथवा अवतरितस्य जातकस्य भविष्यविषये इत्थं वक्तुं शक्यते यदयं जातकः प्रकृत्या मधुरः ...शृङ्खलो वा भविष्यति। अमुकग्रहस्य रूपरङ्गवद् भविष्यतीति। यतो ...ऋषयो मुनयश्च दीर्घायुष्यं प्राप्य सततं गवेषणयाऽनुभवेन च ग्रहाणां ... प्रकृत्या, अणु-परमाणूनाञ्च सबलनिर्बलतया भौतिकसुखसाधनविषये ज्ञापितवन्तः, अस्य ज्ञापनस्यानुभवं स्वयमेव कर्तुं शक्यते। इत्थमाचार्याणां वचनानि सन्ति—

गुरुबुधशुक्राः सौम्याः सौरिकुजार्का निसर्गतः पापाः।
शशिजोऽशुभसंयुक्तः क्षीणश्च निशाकरः पापः।।
ताम्रसितारुणहरितकपीतविचित्रासिता इनादीनाम्।
पावकजलगुहकेशवशक्रशचीवेधसः पतयः।।

इत्थं जन्मसमये सूर्यचन्द्रग्रहयोः प्रबलस्थितौ सत्यां जातकस्य जीवनं स्वरूपं चाधोलिखितानुसारं भविष्यति—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(क) सूर्यस्य स्थितौ —

स्वल्पाकुञ्चितमूर्धजः पटुमतिर्मुख्यस्वरूपस्वनो
नात्युच्चो मधुपिङ्गचारुनयनः शूरः प्रचण्डः स्थिरः।
रक्तश्यामतनुर्निगूढचरणः पित्तास्थिसारो महान्
गम्भीरश्चतुरस्रकः पृथुकरः कौसुम्भवासा रविः।।

(ख) चन्द्रस्य स्थितौ—

सौम्यः कान्तविलोचनो मधुरवामौरः कृशाङ्गो युवा
प्रांशुः सूक्ष्मनिकुञ्चितासितकचः प्राज्ञो मृदुः सात्त्विकः।
चारुर्वातकफात्मकः प्रियसखो रक्तैकसारो घृणी
वृद्धस्त्रीषु रतश्चलोऽतिसुभगः शुभ्राम्बरश्चन्द्रमा।।

इत्थमेव सर्वेषां ग्रहाणां गुणस्वभावयोः सहजप्रभावः प्राणिमात्रेषु दृश्यते। अनेन प्रकारेण चन्द्रस्य नक्षत्राणां च संयोगेन वनौषधीषु पूर्णविकास-रससञ्चार-माधुर्याणाञ्च पुष्टिर्भवति, जीवनदायिनी शक्तिश्च परिलक्ष्यते।

उक्तञ्च— 'औषधीनां पतये नमः'।

अतिप्राचीनकालादेव भारतीयवायुवृष्टिविज्ञानस्य सफलान्वेषणं प्रचलति अद्यापि विज्ञानमिदं कृषकाणां कृते यात्रीजलपोतानां आकाशगामिवायुयानानां च निर्विघ्नयात्रासम्पादनाय, जनसाधारणस्य कृते ऋतुपरिवर्तनज्ञानाय च बहुव्यय-साध्यानामाधुनिकवैज्ञानिकयन्त्राणामन्वेषणापेक्षया सत्यं प्रामाणिकं च भवति।

भूगर्भीयखनिजपदार्थानां निर्माणेषु ग्रहमण्डलस्य सञ्चलनस्य प्रभावो दृश्यते। यथा— प्रायेण प्रतिमासं प्रतिदिनं समुद्रस्य प्राकृतिकगतौ समुत्पन्नो जलान्दोलनः (ज्वार-भाटा) चन्द्रमसः पृथिव्याः सूर्यस्य च प्रभावेण दृश्यते।

आकाशीयप्राकृतिकघटनासु भूकम्पाद्यतिवृष्ट्यनावृष्टि-समुद्रीतूफान-तूफानीहिमपातादिदुर्घटनानां कारणं ग्रहजनितप्रभाव एवास्ति।

अद्य सर्वस्मिन् विश्वे समुपस्थितं राजनैतिकं सामाजिकं परिवर्तनम्, राष्ट्राध्यक्षाणां परिवर्तनम्, पदपरिवर्तन-जनाक्रोश-युद्ध-धन-जनापहरण-हानि-प्रभृतयो घटनाश्च ग्रहोपग्रहनक्षत्रमण्डलस्य संयोगसङ्क्रमणदुर्योगकारणादेव भवन्ति। अनेन कारणेनैव सर्वेषु मानवेषु परस्परमसौहार्दं परिलक्ष्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतस्यास्य राष्ट्रसञ्चालकानामिदं कर्त्तव्यमस्ति यत् ते पृथक् पृथक् छद्मवेशेण, अनधिकृतरूपेण वा फलितज्योतिर्विदां तान्त्रिकाणां च सम्पर्कं परित्यज्य प्रत्यक्षरूपेण देशस्योच्चसंस्थानानां माध्यमेन भारतीयखगोलविद्भिः सम्पर्कं विधाय राष्ट्रस्य प्रदेशस्य समाजस्य च भविष्यज्ञानं पूर्वं कुर्युः। अनेन प्रत्यक्षस्य सत्यस्य च कल्याणं भविष्यति।

ज्यौतिषशास्त्रमिदं विश्वमञ्चोपरि एकं सबलं प्रामाणिकं तर्कयुक्तं वैज्ञानिकं शास्त्रमस्ति। अस्य शास्त्रस्य विकासेन प्रत्यक्ष-सत्यव्यवहारेण सर्वात्मना लाभोन्नतिर्भवतीत्यत्र न सन्देहलेश इति।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दर्शनेषु मुक्तिविमर्शः

श्रीशिवशङ्करमिश्रः
व्याख्याता, संस्कृतस्य
राजकीयस्नातकोत्तरमहाविद्यालये
देहरादूननगरे

❀ ❀ ❀

दृश्यते ज्ञायतेऽनेनेति दर्शनम्, दृश्यते ज्ञायते यत् तद् दर्शनम्, ज्ञान-साधनम्, ज्ञानमेव वा दर्शनम्, सूक्ष्मविशदविचिन्तनं येन तत्त्वविज्ञानं भवति, तद्दर्शनमिति फलितार्थः।

सर्वेषां दर्शनानां प्रयोजनं प्रमाणेन प्रमेयस्य प्रमेयत्वं प्रमाय संशय-श्रमाऽऽहार्यादिनिवृत्तिपूर्वकं यथार्थपदार्थस्वाभिमतसम्पादनमिति। 'प्रमाता प्रमाणेन पदार्थं प्रमाय जिहासति जिघृक्षति'। (न्या.वा.भा. भूमिकायाम्)

'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते' इति शिष्टोक्त्या प्रयोजनमूलकानि निखिलानि दार्शनिकदृष्टानि दर्शनानि, तत्र विपश्चिता सत्सु विपुलगौणप्रयोजनेषु मुख्यं किमिति विजिज्ञासितं भवति। विविधेषु निखिलनिगमागमेषु करतलामलकवत् कृततत्त्वसाक्षात्कारैः सर्वार्थयथार्थदर्शिभिर्मननशीलैर्महर्षिभिर्मानवमात्राभिमतार्थं पुरुषार्थचतुष्टयं मुख्यप्रयोजनरूपेण प्रतिपादितमिति, यथा—

धर्मार्थकाममोक्षेषु यस्यैकोऽपि न विद्यते।
अजागलस्तनस्येव तस्य जन्म निरर्थकम्।।

सर्वेषां मानवमात्रहितसाधकानामार्षनिबन्धानां मुख्यप्रयोजनं पुरुषार्थचतुष्टयम्। तत्र धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टयविशेषविजिज्ञासायां धर्माय मन्वादिस्मृतयः, अर्थाय कौटिल्यादिनीतयः, कामाय गान्धर्वकोकशास्त्रादयः, मोक्षाय च वेदान्तन्यायसांख्ययोगवैशेषिकमीमांसादिवेदानुयायिदर्शननिबन्धाः प्रबलप्रतिभाप्रभाव-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बोधकाः प्रदर्शनीया भवन्ति। धर्मार्थकाममोक्षेष्वपि परमपुरुषार्थो मोक्ष इत्यामनन्ति मनीषिणः, शेषाणां पुरुषार्थत्रयाणां प्रत्यक्षानुमानागमप्रमाणपुञ्जेनाशाश्वतसिद्धत्वाद् दुःखानुषङ्गि-त्वाच्चेति।

तथा हि दर्शनागमानां परमप्रयोजनं मोक्षः शाश्वतस्वरूपत्वाद् दुःखानु-षङ्गित्वशून्यत्वाच्च न स पुनरावर्तते,—

मां हि प्राप्य तु कौन्तेय! दुःखालयमशाश्वतम्।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः।। इति गीतायाम्।

अत्र सर्वदर्शनानां परमपुरुषार्थाख्यपरममुख्यप्रयोजनस्वरूपनिःश्रेयसमोक्ष-मुक्तिकैवल्यनिर्वाणापवर्गपर्याय आत्यतिकदुःखध्वंसः शाश्वतसुखानन्दमहामोद-महानन्दस्वरूपो वेति विचिन्तनीयः।

किन्त्वत्रेदं जिज्ञास्यं यद् दर्शनस्य परमप्रयोजनमपवर्गप्राप्तिरेव; किन्तु स चापवर्गोऽस्ति न वेत्याशङ्कायां यद्यस्ति चेत्तर्हि कीदृशः केनाप्यपवर्गो नावलोकितः कश्चन मुक्तः पुरुषो यदि निवर्त्येत तर्हि मोक्षस्वरूपमवबोधयेत्, परञ्च नेदं सम्भवति, यः खलु मुक्तः, स गमनागमनाद् विमुक्तः सञ्जायते, तर्हि कोऽस्त्यपवर्गः, केन च दृष्टः, कुत्र च विद्यते, किञ्च तत्र प्रमाणमिति जिज्ञासायां श्रुतिस्मृतिपुराणादय एव तत्रापवर्गे प्रमाणीभूताः सन्त्यतः श्रुतिस्मृतिपुराणदृष्ट्या तत्प्रामाण्यते—

१. आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः।
आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विज्ञातं भवति।
(बृ.उ. २।४।८)

२. श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः।
मत्वा तु सततं ध्येयमेते दर्शनहेतवः।।

३. अशेषेन परित्यागो वासनाया उत्तमः।
मोक्ष इत्युच्यते सद्भिः स एव विमलक्रमः।। (महोपनिषद्)

४. मोक्षः स्याद्वासनाक्षयः। (मुक्त्युपनिषद्), ५. बन्धनक्षयो मोक्षः। (निरा.उ.) ६. अनित्यसंसारे सुखदुःखविषयसमस्तक्षेत्रममताबन्धक्षयो मोक्षः। (निरा.उ.) ७. वासनानिवृत्तिः मोक्षः। (महाभारतम्), ८. मूलमेतत्त्रिवर्गस्य निवृत्तिर्मोक्ष उच्यते। (म.भा., शा.प. ०५), ९. भोगवासनात्यागो मुक्तिः। (यो.व.रा.), १०. कर्मणाञ्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लयो मोक्षः सुखदुःखप्रदायिनाम् (पद्मपु. २०४।२२२), ११. सा मुक्तिः ब्रह्मणा चैकम्। (गरुडपु.), १२. मृत्युमुखात्प्रमुच्यते (क.उप. १।३।१५), १३. यदा सर्वे प्रमुच्यन्ते कामा ह्यस्य हृदि स्थिताः (बृ.उप. ४।४।१), १४. सर्वबन्धैः प्रमुच्यते (कै.उप. १।१।१७), १५. मुच्यते बन्धनात् (मै.उप. ४।५, मैत्रेयी-उप. १।७), १६. मुक्तिरन्तरायध्वस्तेर्न परः (सां.भा. ७।२०), १७. तदा विद्वान् पुण्यपापे विधूय भिद्यते हृदयं (मुण्ड.उप.), १८. निपाय तन्मृत्युमुखात्प्रमुच्यते (क.उप. ३।१५), १९. तमेव ज्ञात्वा मृत्युपाशान्छिनत्ति (श्वेता.उप. ४।१५), २०. तरति शोकमात्मवित् (छा.उप. ७।३), २१. अशरीरा वावसन्तं न प्रियाप्रिये स्पृशतः (८।१२।१), २२. तमेव विदित्वातिमृत्युमेति (श्वे.उप. ३।८), २३. एतद्विदुरमृतास्ते भवन्ति (शु.यजु.सं. १।४।५।५९), २४. देहाद्विमुच्यमानस्य (कठ.उप.), २५. गर्भवासाद्विमुक्ता विमुच्यन्ते (अवर्ण-शि.उप. ३), २६. असन्धितानां सन्धाता सन्धितानाञ्च मोक्षः (मनु. ४।३४२), २७. मोक्षाय विश्लेषणार्थमित्यानन्दगिरिः, २८. तोयं श्रुतं मोक्षकभस्मना वा यत्सप्तकृत्व-परिषेचनं तत् (बृह.सं. ५४।१३३)।

२९. यो मामजमनादिं च वेत्ति लोकमहेश्वरम्।
असम्मूढः स मर्त्येषु सर्वपापैः प्रमुच्यते।। (गीता-१०।३)

३०. धर्ममर्थञ्च कामञ्च मोक्षश्च ऋषिसत्तम।
समाप्नोति पुमान्नित्यं नारायणपरायणः।। (वह्निपुराणम्)

एवमन्यत्रापि बहुत्र स्थलेषु मोक्ष-मुक्त्यादिशब्दोल्लेखो विद्यते। इम एव शब्दा अपवर्गे प्रमाणीभूताः सन्ति, एभिर्वाक्यैरपवर्गपदार्थप्रामाण्यं प्राप्यते।

तत्र तावद् भारतीयास्तिकनास्तिकोभयदर्शनेषु आत्यन्तिकदुःखनिवृत्ति-रूपिणोऽस्य मोक्षस्य स्वरूपविषये महती विप्रतिपत्तिर्विद्यते। केनचिदयं मरणमेव मोक्षः, केनचित् सच्चिदानन्दावाप्तिरेव मोक्षः। केनचिच्चायं प्रकृतिपुरुषविवेक-रूपेणाभिधीयते, केनचिच्च प्रपञ्चबन्धविलयं स्वर्गप्राप्तिर्वा मोक्षरूपेणोपस्थाप्यते, केनचिच्चाकृतकत्वाच्छून्यमेव मोक्ष इति मन्यते। संसारनिवृत्तिरेवेति क्वचन, अशेषविशेषगुणोच्छेदैरित्यपरे, आत्यन्तिकदुःखप्राग्भावो मुक्तिरिति प्रभाकरः, शरीरेन्द्रियाभ्यामात्मनो मुक्तत्वं मुक्तिरिति भरतः। मूलचक्रस्थायाः परानामिकाया ब्रह्मरूपाया वाचो दर्शनं मोक्ष इति पाणिनीयाः, भगवच्छरणागतिरेव मोक्ष इति वैष्णवाः, प्रमाणादिषोडशपदार्थानां तत्त्वज्ञानाज्जायमानपरम्परया दुःखात्यन्तिक-निवृत्तिरेवेति मन्यमाना अक्षपादा नैयायिका इत्येवं बहुविधसमुद्भूतसिद्धान्त-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जन्यसमाकुलितो मदीयश्चेतो दार्शनिकानां मुक्तेः सम्यक् स्वरूपमुपस्थापयति, तत्रादौ सर्वतः प्राचीनतमं सांख्यमतमुपस्थाप्यते।

सांख्यमते कैवल्यम्

कपिलानुयायिनां सांख्यानां मते प्रकृतिपुरुषात्मकं मूलतत्त्वद्वयं विद्यते। तत्र पुरुषः शुद्धचैतन्यस्वरूपो देशकालादिबन्धनैर्मुक्तो निर्गुणो निष्क्रियश्च विद्यते। स च पुरुषः पुष्करपलाशवन्निर्लेपो विद्यते। यदुक्तं सांख्यकारिकायाम्—

तस्मान्न बध्यतेऽद्धा न मुच्यते नापि संसरति कश्चित्।
संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः।।

पुरुषस्य बन्धमोक्षौ न वास्तविकौ, तयोर्बुद्धिधर्मत्वात्। तदुक्तं सांख्यसूत्रे (१।५८)—'वाङ्मात्रं न तु तत्त्वं चित्तस्थितेः'। एतस्य भाष्यम्-बन्धादीनां सर्वेषां चित्त एवावस्थानात् तत्पुरुषे वाङ्मात्रं सर्वं स्फटिकलौहित्यवत् प्रतिबिम्बमात्रत्वम्। न तु तत्त्वम्, तस्य भावः, अनारोपितम्, जल्पलौहित्यवदित्यर्थः, अतो न श्रुतिविरोधः। श्रुतिश्च—

न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता।।

प्रकृतिः त्रिगुणात्मिका अस्ति, सा च पुरुषाश्रयणं कृत्वा बध्यते, ज्ञात्वा च मुच्यते, पुरुषस्तु स्वत एव मुक्तः। किन्तु, प्रकृतेः संसर्गात् बुद्धिरहङ्कारादीनाञ्च संसर्गाद् पुरुषोऽपि प्रकृतेर्गुणधर्मादीनां तद्गतसुखदुःखादीनाञ्च स्वीयसुखदुःखादिकं मत्वा प्रकृतेर्भिन्नः सदपि तदभिन्नत्वं स्वस्मिन् गृह्णाति। यथा राज्ञा स्वभिन्नस्य, सेवकस्यानादरेण स्वीयानादरं मन्यते, यथा च पिता स्वभिन्नस्य पुत्रस्यादरणेन सम्मानेन स्वकीयमादरं सम्मानं च बुध्यते, तथैव पुरुषोऽपि स्वभिन्नायाः प्रकृते-र्गुणधर्मादिकं स्वकीयं गुणधर्मादिकं ज्ञात्वा तस्याः सुखित्वात् सुखित्वं दुःखित्वाच्च दुःखित्वमनुभवति। तदुक्तं सारबोधिन्याम्—

दर्पणमुखयोरसंसर्गाग्रहाद् दर्पणनिष्ठमलिनस्य यथा मुखे भ्रमस्तथा बुद्धिपुरुषयोरसंसर्गाग्रहाद् बुद्धिनिष्ठज्ञानपरिणामित्वस्यापि पुरुषे भ्रम इति।

इदमेवाज्ञानं सकलानर्थबन्धदुःखजनकम्, यतोऽज्ञानमेव बन्धस्य कारणमिति सर्वैरभ्युपगतम्। सांख्येनापीदं स्वीकृतम्, तदुक्तं सांख्यकारिकायाम्—

धर्मेण गमनमूर्ध्वमधस्ताद् भवत्यधर्मेण।
ज्ञानेन चापवर्गो विपर्ययादिष्यते बन्धः।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्थाद् ज्ञानविपर्ययेणाज्ञानेन बन्धो जायते। बन्धस्तावत् प्रकृतिपुरुषयोरनादिरविवेककृतः संयोगः, तदुक्तं कारिकायाम्—

पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य।
पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः।।

उक्तञ्च गीतायाम्—

पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान्।
कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु।।

सांख्यसूत्रेऽपि—

तद्योगोऽप्यविवेकान्न समानत्वम्। (१।५५) इति।

अतोऽविद्यया अज्ञानेन च पुरुषस्य बन्धनम्। यदा प्रकृतिपुरुषयोर्भेदज्ञानेन अभेदात्मकोऽविवेक उच्छिद्यते तदोत्पन्नविवेकज्ञानेन मोक्षो जायते। यावद् बाह्यपदार्थैरावृतः पुरुषः, न तावन्मोक्षप्राप्तिः। यदा प्रकृतिः स्वं पुरुषाद् विमुञ्चति यद्वा स्वीयव्यापाराद्विरक्ता भवति, तदा पुरुषः स्वस्वाभाविकीं स्थितिमवाप्य विवेकरूपताञ्च प्राप्य प्रकृतेर्गुणधर्मान् स्वीयगुणधर्मरूपेण भानं व्यर्थमेवेति बुध्यते। अविवेकोच्छेदश्च प्रकृतिपुरुषयोरन्तःसाक्षात्कारादेव, तदुक्तं (सांख्यसूत्रे, ५६) 'नियतकारणात्तदुच्छित्तिर्ध्वान्तवत्'।

अस्य व्याख्या सांख्यप्रवचनभाष्ये— शुक्तिरजतादिस्थले लोकसिद्धं यन्नियतं कारणं विवेकसाक्षात्कारस्तस्मात्तस्याविवेकस्योच्छित्तिर्भवति ध्वान्तवत्। आशयः खल्वयं यथालोकेनैव तिमिरतोमस्य नाशः सम्भवति नोपायान्तरेण, तथैवाऽविवेकस्यापि नाशो विवेकादेव सम्भवति नान्तरेणोपायेन कर्मादिना वा। प्रकृतिपुरुषविवेकज्ञानोत्पन्ने सति कर्मानुत्पत्तिः, कर्माभावाद् बन्धनाभावः, बन्धनाभावाच्च मोक्षसिद्धिः।

सांख्यमतेऽपि कैवल्यं दुःखात्यन्तिकनिवृत्तिरेव यतो विवेकज्ञाने जाते न कर्माण्युत्पद्यन्ते कर्मभिरेव दुःखं कर्माभावान्न बन्धनं न वा दुःखमिति दुःखनिवृत्तेरेव मोक्षत्वं सिद्ध्यति। तदुक्तं सांख्यसूत्रे (१।७२)—

'यः पुरुषस्यापवर्गः स प्रतिबिम्बरूपस्य मिथ्यादुःखस्य विवेकः'

एवं सांख्यकारिकायाम्—'नैकात्यन्ततोऽभावात्'।

निजमुक्तस्य बन्धध्वंसमात्रं परं न समानत्वम् (सां.सू. १।८६)। अत्र परमिति शब्द आत्यन्तिकार्थकः सांख्यप्रवचनभाष्ये व्याख्यातः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सांख्यशास्त्रेऽपि मुक्तिर्जीवन्मुक्ति-विदेहमुक्तिभेदेन द्वैविध्यमावहति। यत्कालावच्छेदेन प्रकृतिपुरुषयोः संयोगो भिद्यते तत्कालावच्छेदेनैव प्रकृतेर्व्यापारो नोपरमते; अपि तु यथा कुम्भकारेण भ्रामितश्चक्रोऽभावेऽपि कुम्भकारस्य किञ्चित् कालं प्रचलति, तथैव भेदज्ञानेऽपि संयोगनाशेऽपि वा प्राक्तनसंस्कारवशात् शरीरेन्द्रियबुद्ध्यादिरूपेण तस्याः प्रकृतेर्व्यापारः प्रचलत्येव; किन्तु सः शरीरेन्द्रियबुद्ध्यात्मको व्यापारो जीवन्मुक्तपुरुषस्य कृते बाधको न भवति। एककालावच्छेदेन जीवन्मुक्तपुरुषस्य शरीरेन्द्रियव्यापारस्य च समवधाने न हि कश्चन विरोधः। मृत्योरनन्तरं जीवन्मुक्तः पूर्णमोक्षमाप्नोति तद्विदेहकैवल्यमित्युच्यते।

योगदर्शने कैवल्यम्

महर्षिणा पतञ्जलिना स्वकीये योगसूत्रे मोक्षस्वरूपमेवं प्रतिपादितम्—पुरुषार्थशून्यानां गुणानां प्रतिप्रसवकैवल्यं स्वरूपप्रतिष्ठा वा चित्तशक्तिरिति (यो.सू. ४।३४) एतस्य भाष्यमेवं कृतम्—कृतभोगापवर्गाणां पुरुषार्थशून्यानां गुणानां यः प्रतिप्रसवः प्रतिसर्गतत्कैवल्यमिति। यं कञ्चित् पुरुषं प्रति प्रधानस्य मोक्षः। स्वरूपप्रतिष्ठा पुनर्बुद्धिसत्त्वानाभिसम्बन्धात्पुरुषस्य चित्तशक्तिरेव केवला। तस्याः सदा तथैवावस्थानं कैवल्यमिति।

अद्वैतवेदान्ते मोक्षः

मोक्षस्तादृक्सत्तायाः साक्षात्कारो यस्या अनन्तकालात् सत्तावत्त्वं वर्तते। यद्यपि सा नास्माकं दृष्टिपथविषयीभूता, तथापि विनष्टे सत्यज्ञानप्रतिबन्धे आत्मा मुच्यते। ब्रह्मण आत्मनो वा स्वस्वरूपानुभूतिरेव मोक्षः। ब्रह्म सच्चिदानन्दस्वरूपो विद्यते, अत एव श्रुतिः— सच्चिदानन्द ब्रह्म इति। आत्मा किल ज्ञानस्वरूपः, मोक्षश्चात्मनः स्वरूपज्ञानमिति सिद्धान्तः। यथा बौद्धमते अद्वैतपरमतत्त्व-निर्वाणयोर्मध्ये नास्ति कश्चन भेदः, तथैव शाङ्करवेदान्तेऽपि ब्रह्ममोक्षयोर्भेदो नास्ति। ब्रह्मज्ञानी ब्रह्मैव जायते, तदुक्तम्—'ब्रह्मविद् ब्रह्मैव भवति'। अनेन श्रुतिवाक्येन ब्रह्मज्ञानब्रह्मभावयोरैक्यं प्रतिपाद्यते। वस्तुतो जीवस्य ब्रह्मरूपेण परिणतिर्निर्मितिर्वा न जायते, अपि तु जीवस्तु स्वतो ब्रह्मैव। यथोक्तम्—'ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः'।

यद्यप्यत्र बन्धमोक्षौ बुद्धेः पुरुषस्य वा न वास्तवौ स्तः, बुद्धेरवस्तुत्वात्, पुरुषस्याप्यसङ्गत्वेन सच्चिदानन्दमात्ररूपत्वाद् बन्धमोक्षयोस्तत्रासम्भवात्। अत एव श्रुतिः —

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः।
न मुमुर्क्षुर्न वै मुक्त इत्येषा परमार्थता'।। इति।

तथापि व्यावहारिकं प्रातीतिकं वा तयोः सत्त्वं पुरुषेऽभ्युपगम्य' किञ्चिद्विचार्यते। अविद्यया जीवो देहेन्द्रियादिभिःसह तादात्म्यं संस्थाप्य स्वस्मिन् कर्तृत्व-भोक्तृत्वादिकं भ्रमादवमन्यते। अविद्यया अज्ञानेन वा पुरुषो बन्धितो भवति, सा चाविद्या अद्वैतवेदान्ते मायापदेनोच्यते। तल्लक्षणं वेदान्तसारनामकग्रन्थे प्रतिपादितम्, सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि यत्किञ्चिद् भावरूपमिति। अविद्यावशादेव यथा मेघेनाच्छन्नः सूर्यो मूढेन निष्प्रभो रुचिहीनो बुध्यते, तथैवाज्ञानेन बद्धो जीवोऽपि शरीरेन्द्रियादिजडपदार्थेषु अहं ज्ञाता, अहं कर्ता, अहं भोक्ता, अहं सुखी, अहं दुःखी इत्यादि व्यवहारं करोति। तदुक्तं वेदान्तसारग्रन्थे—

घनच्छन्नदृष्टिर्घनच्छन्नमर्कं यथा निष्प्रभो मन्यते चातिमूढः।
तथा बद्धवद्भाति यो मूढदृष्टेः स नित्योपलब्धिः स्वरूपोऽहमात्मा।।
घनोपगूढं गगनं न तारा न भास्करो दर्शनमभ्युपैति।
तथा चिदाभासस्वरूपसंस्थं स नित्योपलब्धिः स्वरूपोऽहमात्मा।।

अस्या अविद्याया निवृत्तिर्ब्रह्मैक्यलक्षणया विद्यया भवति। तदुक्तं श्रीगौडपादैः —

अनाद्यविद्यया सुप्तो यदा जीवः प्रबुध्यते।
अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा।।

श्रुतिरपि—

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे।। इति।

मोक्षो नाम नात्मविलोपः, अपि तु चैतन्यविस्तारेण प्रकाशेन च निजानन्तताया निरपेक्षतायाश्च साक्षात्कार एव मोक्षः, अत एव चित्सुखाचार्येण लिखितम्—अनवच्छिन्नानन्दप्राप्तिर्मोक्षः। अप्राप्तवस्तुनः प्राप्तिर्नास्त्यपि तु स्वात्मभाव एव, स च पूर्वमनन्तकालपूर्वतः प्राप्त एव। शङ्कराचार्येण मोक्षस्य लक्षणत्रयं प्रतिपादितम्— १. अविद्यानिवृत्तिरेव मोक्षः, २. ब्रह्मभावश्च मोक्षः, ३. नित्यशरीरत्वं मोक्षाख्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मोक्षो नोत्पाद्यः, न च केनचित् कारणेन जन्यः कार्यभूतः, न च कर्मणः फलं नोपासनाया वा फलम्। यदि मोक्षः कार्यभूतः स्यात्तर्हि तस्यानित्यत्वं प्रसज्येत, न कश्चन मोक्षानित्यत्ववादी किन्तु ये खलु मोक्षमभ्युपगम्यमाना दार्शनिकाः सन्ति, ते मोक्षं नित्यमेवाङ्गीकुर्वन्ति। तदुक्तम्— नित्यश्च मोक्षः सर्ववादिभिरुपगम्यते। मोक्षप्राप्त्या जगतः परिवर्तनं न जायतेऽपि त्वस्मदीया संसारविषयिण्याः प्रवृत्तेः परिवर्तनं जायते। जगतो यदनित्यानि वस्तूनि स्वल्पमतीर्जनान् मोहयन्ति, न तानि मुक्तात्मनां कृते मोहजनकानि। दुःखस्य कारणं मिथ्याज्ञानं भ्रान्तिरेव। तदुक्तं शाङ्करभाष्ये (२।३।४४)—"मिथ्याभिमानभ्रमनिमित्त एव दुःखानुभवः। सुरेश्वरेणापि मानसोल्लासे लिखितम्—यदाऽनन्तप्रकाशस्य साक्षात्कारोऽन्तर्दृष्ट्या प्राप्यते, तदा निखिलप्राणिन आब्रह्मणो वनस्पतिजगद् यावत् स्वप्नवदेकस्यां भ्रान्तौ परिणता भवन्ति। एतादृशभ्रान्तेर्निवारणं तदानीमेव शक्यते यदाऽऽत्मनः स्वस्वरूपावाप्तिर्जायते। तदुक्तं शाङ्करभाष्ये—

गृहीते त्वात्मैकत्वे बन्धमोक्षादिसर्वव्यवहारपरिसमाप्तिरेव स्यात्। अद्वैतवेदान्तिनये मोक्षो न दुःखध्वंसात्मकोऽपि तु आनन्दमयो मोक्षः, 'नित्यं विज्ञानमानन्दं ब्रह्मे'ति श्रुतिनिर्देशात्। अत एव चित्सुखाचार्यैरद्वैतसिद्धौ लिखितम्—दुःखाभावोऽपि मुक्तौ न स्वतः पुरुषार्थः सर्वत्र दुःखाभावस्य स्वरूपसुखाभिव्यक्तिप्रतिबन्धकाभावरूपतया सुखशेषत्वात्। एवमेव मोक्षस्वरूपं प्रतिपादयता भगवता भाष्यकारेण शाङ्करभाष्ये निगदितम्—

इदं तु पारमार्थिकं कूटस्थनित्यं व्योमवत्, सर्वव्यापि, सर्वक्रियारहितं, नित्यतृप्तं, निरवयवं, स्वयंज्योतिस्वभावम्, यत्र धर्माधर्मौ सह कार्येण कालत्रयं च नोपावर्तते तदेतदशरीरत्वं मोक्षाख्यमिति। श्रुतिश्च मोक्षप्रतिबन्धनिवृत्तिमात्रमेवात्मज्ञानस्य फलम्।

आचार्यशङ्करमतेऽपि जीवन्मुक्ति-विदेहमुक्तिभेदेन मुक्तेर्द्वैविध्यम्, न हि तत्र मृतकानां कृते मोक्ष आरक्षितः; अपि तु जीवनेऽपि तत्प्राप्तिर्भवितुं शक्यते। अत्र श्रुतिः—'अत्र ब्रह्म समश्नुते, इहैव तदवाप्नोति' अभयं प्राप्तोऽसि' इत्यनया श्रुत्या ज्ञाप्यते यदात्मदेहादेस्तादात्म्यं भ्रान्तिमूलकमतोऽधिष्ठानभूतात्मसाक्षात्कारेणाविद्यानिवृत्तौ सत्यपि शरीरे जीवन्मुक्तिः सिद्ध्यति। तदुक्तं शाङ्करभाष्ये (१।१।१)।

तस्मान्मिथ्याप्रत्ययनिमित्तत्वात् सशरीरत्वस्य सिद्धं जीवतोऽपि विदुषोऽशरीरत्वमिति। जीवन्मुक्तशरीरे सुखदुःखादिकं नोत्पद्यते, यथा भुजङ्गस्य केचुलधारणे न काप्यासक्तिरतः स तस्य परित्यागेऽपि न खिद्यते' तथैव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जीवन्मुक्तस्यापि पुरुषस्य शरीरे आसक्त्यभावात्तत्त्यागेन कश्चन मोहः, यतः स तु अशरीरी ब्रह्म। तदुक्तं बृहदारण्यकोपनिषदि (४।४।७)—'अथायमशरीरोऽमृतो ब्रह्मैव'—एवमेव यथा मदोन्मत्तजनस्य शरीराच्छेदकवस्त्राणां शरीरे सति असति वा न काचिच्चिन्ता जायते, तथैव जीवन्मुक्तपुरुषस्यापि नेयं चिन्ता जायते यत्तस्य शरीरः स्थितः गमनशीलो वा। यथोक्तं भागवते —

देहं च नश्वरमवस्थितमुत्थितं वा
सिद्धो न पश्यति यतो ह्यगमत् स्वरूपम्।
दैवादपेतमुत दैववशादुपेतं
वासो यथा परिकृतं मदिरामदान्धः।।
(भागवते-११।१०।३६)

मीमांसामते मोक्षः

मीमांसानये वेदविहितकर्मणां विधिना श्रद्धया चानुष्ठानेन नित्यसुखाभिव्यक्तिरूपो मोक्षो जायते। अस्मिन् दर्शने प्रपञ्चसम्बन्धविलोपः स्वर्गप्राप्तिर्वा मोक्षपदार्थः। प्रभाकरमते धर्माधर्मयोः सर्वथा विलोप एव मोक्षः, यतोऽनयोर्व्यापार एव पुनर्जन्महेतुः। स्पष्टोऽयमर्थोः निखिलधर्माधर्माणां विलोपे सति यच्छरीरनाशस्तदेव मोक्षः। तदुक्तम्— आत्यन्तिकस्तु देहच्छेदो निःशेषधर्माधर्मपरिक्षयनिबन्धनो मोक्ष इति सिद्धम्। धर्माधर्मवशीकृतो जीवस्तासु तासु योनिषु संसरति। (प्रकरणपञ्चिकातत्त्वालोके, पृ. १५६)

कुमारिलमते निखिलदुःखरहितस्यात्मनः स्वस्वरूपावाप्तिरेव मोक्षः। तदुक्तं परमात्मप्राप्त्यवस्थामात्रम्—

दुःखात्यन्तसमुच्छेदे सति प्रागात्मवर्तिनः।
सुखस्य मनसा भुक्तिर्मुक्तिस्तत्ता कुमारिलैः।।

भट्टशङ्करयोर्मध्ये मोक्षविषये वैषम्यमल्पं प्रतीयते, यथा शाङ्करमते ज्ञानादेव मोक्षः, भाट्टमते च ज्ञानविशिष्टकर्मणा मोक्षः।

केचन मीमांसका आनन्दानुभूतिरेव मोक्ष इति वदन्ति, तत्र श्रुतिः — 'आनन्दो ब्रह्मणो रूपं तच्च मोक्षेऽभिव्यज्यते'। मानमेयोदयेऽपि मोक्षसाधनान्येवम्—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निषिद्धकाम्यकर्मभ्यः सम्यग् व्यावृत्तचेतसः।
नित्यनैमित्तिकप्रायश्चित्तप्रह्वस्तत्तद्दुष्कृतेः।।
सुखदुःखानुभूतिभ्यां क्षीणप्रारब्धकर्मणः।
युक्तस्य ब्रह्मचर्याद्यैरङ्गैः शमदमादिभिः।।
कुर्वाणस्यात्ममीमांसा वेदान्तोक्तेन वर्त्मना।
मुक्तिः सम्पद्यते सद्यो नित्यानन्दप्रकाशिनी।।

पार्थसारथिमिश्रमतेऽपि दुःखनिवृत्तिरेव मुक्तिः, न तु सुखोपभोगः।

रामानुजमते मोक्षः

वैष्णवदर्शनेष्वन्यतमे श्रीसम्प्रदाये स्ववर्णाश्रमोचितकर्मानुष्ठानेन सह भगवदुपासनया कर्मकर्तृत्वव्यतिरिक्तानां सर्वज्ञत्वादीनां परमात्मगुणानां प्राप्तिरेवापुनरावृत्तिलक्षणो मोक्षः सम्पद्यते। तदुक्तं श्रीभाष्ये—'अनावृत्तिः शब्दात्' (४।४।२२)। अत्र शब्दादिति पदेन ज्ञायते यदहर्निशमनुष्ठीयमानस्ववर्णाश्रमोचित-धर्मानुगृहीततदुपासनरूपतत्समाराधनप्रीत उपासीनान् चिरकालप्रवृत्तानन्त-दुस्तर्ककर्मसञ्चयरूपाविद्यां विनिवर्त्य स्वयाथात्म्यानुभवरूपानवधिकातिशयानन्दं प्राप्य पुनर्नावर्तयतीत्यवगम्यते। शब्दश्च—

स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसम्पद्यते न च पुनरावर्तत इति।

मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम्।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः।।

इति गीतायाम्। विशिष्टाद्वैताद्वैतयोरयमेव भेदो यद्विशिष्टाद्वैतवादिमते ज्ञानाद् भक्तिरुत्पद्यते, भक्त्या भगवत्प्राप्तिः, तदेव मोक्षः; किन्तु अद्वैतमते न हि ज्ञानं शक्तेरुत्पादकम्,अपि तु शक्त्या ज्ञानमुत्पद्यते, ज्ञाते सति जीवब्रह्मणोरैक्ये मोक्षः सम्पद्यते। एतेषां मोक्षसिद्धान्तः प्रतिपादितः पञ्चरात्ररहस्ये —

ततः स्वाभाविकाः पुंसा ते संसारतिरोहिताः।
आविर्भवन्ति कल्याणाः सर्वज्ञत्वादयो गुणाः।।
एवं गुणाः समानाः स्युर्मुक्तानामीश्वरस्य च।
सर्वं कर्तृत्वमेवैकं तेभ्यो देवे विशिष्यते।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निम्बार्कमते मोक्षः

निम्बार्कमते ईश्वरप्रपत्तिः, ईश्वरं प्रति सर्वात्मना आत्मसमर्पणं वा मोक्षप्राप्तेः परमोपायः। प्रपन्नपुरुषानुरूपभावं धारयन्तो जीवा ईश्वरकृपाभाजा भवन्ति, हरिस्तेषां हृदि भक्तिभावानुत्पादयति, भक्त्या च हृदि स्थितस्य भगवतः श्रीमन्नारायणस्य साक्षात्कारो जायते, तदेव मोक्षः। तदुक्तं श्रुतिसिद्धान्तसङ्ग्रहे —

अन्तस्थस्य हरेर्ज्ञानं व्यापकत्वेन मुक्तिदम्।
सद्योऽन्यथा क्रमात्तत्तीदीषद्विलम्बतो नृणाम्।।

स्वान्तस्थाया हरेर्मूर्त्तेरापरोक्ष्यं विमुक्तये।
अपेक्ष्यं तद्विना मुक्तिर्न सर्वेषां सतां क्वचित्।।

वल्लभमते मोक्षः

'हरेरुपासनाभक्तिर्मुक्तिदायिनी' इति वल्लभैः परिकल्पितम्। तदुक्तञ्चाणुभाष्ये—'मुक्तिं प्रति तदुपासनाया भक्तेर्वा तदनुरूपाया एव कारणत्वमभ्युपेयते' इति।

माध्वमते मोक्षः

दुःखानवच्छिन्नपूर्णसुखानुभूतिर्जगद्व्यापारवर्जञ्च सर्वकामाप्तिरेव मुक्तिरिति माध्वसिद्धान्तः। सा च मुक्तिर्विष्णुप्रसादादवाप्यते। तदुक्तं विष्णुपुराणे—

तस्मिन् प्रसन्ने किमिहास्त्यलभ्यं धर्मार्थकामैरलमल्पकास्ते।
समाश्रिताद् ब्रह्मतरोरनन्ताद् निःसंशयं मुक्तिफलं प्रयान्ति।।

एवमेव —

मुक्तिर्नैजसुखानुभूतिरमला भक्तिश्च तत्साधना।।

पाशुपतमते मोक्षः

परमैश्वर्यप्राप्तिरेव मोक्षः, स च पाशुपतशास्त्रादेव लभ्यते, नान्यथा। तदुक्तम्—

ज्ञानमात्रं वृथा शास्त्रं साक्षाद्वृष्टिस्तु दुर्लभा।
पञ्चार्थादन्यतो नास्ति यथावत्तत्त्वनिश्चयः।।

शाक्तमते मोक्षः

प्रत्यभिज्ञामालाजन्यपूर्णात्मालाभ एव मोक्षः। प्रत्यभिज्ञा तावत् परमेश्वरविषयकं प्रति आभिमुख्येन ज्ञानम्। स्वातन्त्र्यशक्तिविशिष्टस्य परमेश्वर-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्याहन्तया परिपूर्णोऽहमित्याकारकं ज्ञानमिति यावत्। अस्मिन् मतेऽपि मुक्तेर्द्वैविध्यं विद्यते।

शैवमते मोक्षः

विज्ञानाकल-प्रलयाकल-सकलेति भेदेन शैवमते बन्धो जीवस्त्रिप्रकारकः। एतेषु त्रिप्रकारकेषु जीवेषु आणवकार्मणमायीयेति त्रिमला भवन्ति। मुक्तये एभ्यस्त्रिमलेभ्यो मुक्तिः परमावश्यकी। सा च मलादिमुक्तिः शिवानुग्रहमन्तरा न सम्भवति। अतः शिवप्राप्तिरेव मोक्षः। शिवत्वप्राप्तिश्च शिवदीक्षादिनोपायेनैव सम्भवति।

रसेश्वरवादिमते मोक्षः

रसेश्वरदर्शने पारदशिवलिङ्गार्चनेन जीवः शिवरूपतां भजते। तदुक्तम् —

पारदं परमेशानि ब्रह्मविष्णुशिवात्मकम्।
यो यजेत्पारदं लिङ्गं स एव शम्भुरव्ययः।।

माहेश्वरः कलितकाञ्चनचारुरूपो रोगाक्षपाक्षरणदीप्तदिनेशरश्मिः।
मोक्षं च जीवति जने तनुतेऽक्षरं यः पायादपायनिचयात्परपारदोऽसौ।।

पूर्णप्रज्ञदर्शने मोक्षः

मोक्षो विष्णुप्रसादमन्तरेण नोपलभ्यते।

मुख्यं च सर्ववेदानां तात्पर्यं श्रीपतौ परे।
उत्कर्षे तु तदन्यत्र तात्पर्यं यादवान्तरम्।।

यस्य प्रसादात्परमार्तिरूपादस्मात्संसारान्मुच्यते नापरेण।
नारायणोऽसौ परमो विचिन्त्यो मुमुक्षुभिः कर्मपाशादमुष्मान्।।
(नारायणश्रुतिः)

तस्मिन् प्रसन्ने किमिहास्त्यलभ्यं धर्मार्थकामैरलमल्पकास्ते।
समाश्रिताद् ब्रह्मतरोरनन्ताद् निःसंशयं मुक्तिफलं प्रयान्ति।।
(वि.पु. १।१७)

शब्ददर्शने मोक्षः

शाब्दिकदर्शने मूलचक्रस्थायाः परानामिकाया ब्रह्मरूपाया वाचो दर्शनमेव मोक्षः। स च सम्यग् ज्ञातशब्दशास्त्रनैपुण्येन जायते। यदुक्तम्—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति।। (वाक्यपदीये)

स्मृतिषु मोक्षः

तपो विद्या च विप्रस्य निःश्रेयसकरं परम्।
तपसो किल्विषं हन्ति विद्ययामृतमश्नुते।। (मनु. ११।१०४)

न्यायागतधनस्तत्त्वज्ञाननिष्णोऽतिथिप्रियः।
श्राद्धकृत्सत्यवादी च गृहस्थोऽपि हि मुच्यते।। (याज्ञवल्क्यस्मृतिः)।

चार्वाकमते मोक्षः

पारतन्त्र्यं बन्धः, स्वातन्त्र्यं च मोक्ष इति चार्वाकसिद्धान्तः। एतन्मते मरणमेव मोक्षः, यतश्चार्वाकः प्रत्यक्षैकप्रमाणवादी, प्रत्यक्षसिद्ध्यैव वस्तुनः सत्ता विद्यते, अप्रत्यक्षवस्तुनि न किमपि प्रामाण्यम्। जन्मान्तरं न प्रत्यक्षमतस्तत्सद्भावे प्रमाणाभावः। जन्मान्तरमेव बन्धनम्, तस्याभावान्न बन्धनमतो देहनाश एव मोक्षः, सैवापवर्ग इति तस्य नास्तिकस्य डिण्डिमघोषः।

बौद्धमते मोक्षः

माध्यमिक-वैभाषिक-योगाचार-सौत्रान्तिकभेदेन बौद्धमतस्य चातुर्विध्यम्। तत्रापि हीनयानमहायानभेदेन भेदद्वयम्। योगाचारमते संसारनिवृत्तिरेव मोक्षः। ज्ञानस्य बाह्याकारेण परिणाम एव संसारः, तत्परिणामहानञ्च मोक्षः। ज्ञानस्य बाह्याभावेऽपि तस्य स्वरूपतः स्थितिर्मोक्षे भवति, किन्तु माध्यमिकमते मोक्षेऽपि न ज्ञानमतो ज्ञानसन्तानस्य विनाश एव मोक्षः। तदुक्तम् —

रागादिज्ञानसन्तानवासनोच्छेदसम्भवा।
चतुर्णामपि बौद्धानां मुक्तिरेषा प्रकीर्तिता।।

हीनयानमते मोक्षो दुःखाभावरूपः। तत्र सुखरूपता नास्ति; किन्तु महायानमतेन तत्र सुखत्वं कल्प्यते।

जैनमते मोक्षः

जैनमते मोक्षस्य कारणद्वयम्— संवरो निर्जरा च। संवरेण कर्माण्युपरुद्ध्यन्ते (अभिनवकर्मणामुत्पत्त्यभावः), निर्जरया च अर्जितकर्मणां विनाशः। एवं कर्मभिरात्यन्तिकनिवृत्तिरेव मोक्षः। उक्तञ्च सर्वदर्शनसङ्ग्रहकारेण-मिथ्यादर्शनादीनां बन्धहेतूनां निरोधेऽभिनवकर्माभावो निर्जराहेतुसन्निधानेनार्जितस्य कर्मणो निरस-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नात्यन्तिककर्ममोक्षणं मोक्षः। तदाह तत्त्वसूत्रे—'बन्धहेत्वभावनिर्जराभ्यां कृत्स्नकर्मविप्रमोक्षणं मोक्षः'। (तत्त्वसू. १०।२)

न्यायमते मोक्षः

न्यायनये प्रमाणादिषोडशपदार्थानां तत्त्वज्ञानान्निःश्रेयसस्य प्राप्तिर्जायते, तदुक्तं भगवता गौतमेन न्यायसूत्रे —

'प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डा-हेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः'। (न्यायसूत्रम्—१।१।१)

अत्रेदं चिन्त्यं यदेतेषां प्रमाणादिषोडशपदार्थानामतत्त्वज्ञानाव्यवहितोत्तरमेव निःश्रेयसस्य प्राप्तिः, किं वा तत्त्वज्ञाननिःश्रेयसोर्मध्येऽपि कश्चन व्यापारः, किं तत्त्वज्ञानं साक्षान्निःश्रेयसोपयोगी परम्परया वेत्याशङ्कायां तत्रैवोक्तमक्षपादैः— 'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः'।(न्या.सू.) अयमाशयो यत् प्रमाणादिषोडशपदार्थतत्त्वज्ञानेन अनात्मन्यात्मेति, अत्राणे त्राणमिति सभये निर्भयमिति जुगुप्सितेऽमिमदिति' एवमात्मन्यनामेति त्राणेऽत्राणमित्यनेक-विधमिथ्याज्ञानानां विनाशो जायते, तन्मिथ्याज्ञानापाये तन्मूलकरागद्वेषा-सत्येर्ष्यासूयमायालोभादिदोषाणामभावो दोषापाये प्रवृत्त्याद्यपायः। अत्र प्रवृत्तिपदेन प्रवृत्तिसाध्यौ धर्माधर्मौ विवक्षितौ। रागद्वेषात्मिका प्रवृत्ती रागद्वेषादिभिर्दोषैरेव जायतेऽतो दोषापाये प्रवृत्त्यपायः, प्रवत्त्यपाये जन्मापायः, यतो यावद् धर्माधर्मात्मिका प्रवृत्तिस्तावज्जन्म अनयैव प्रवृत्त्या कुत्सिताभिपूजिते जन्मनी जायेते। जन्मैव दुःखहेतुः, यावज्जन्म तावद् दुःखमिति नियमादतो विनष्टे सति जन्मनि दुःखापायरूपो मोक्षः सम्पद्यते। तच्च दुःखमेव विंशतिसंख्याकम्— षडिन्द्रियाणि' षड्विषयाः, षड्बुद्धयः, सुखदुःखशरीरञ्चेति दुःखानुसक्तत्वात् सुखमपि दुःखान्तर्भूतम्। तदुक्तं न्यायवार्तिके—सुखमुपभोक्तुकामेन दुःखमपि भोक्तव्यमेव, दुःखं वा जिहासता सुखमपि हातव्यमेव सविषान्नवदिति।

अपवर्गः प्रायशः समेषां दार्शनिकानां मते समानमेवापवर्गबोधकशब्द-मूलकमेव भेदः। सुखस्वरूपापवर्गरूपेणाभिमतानां जनानां कृते दुःखात्यन्तिक-निवृत्तिरूपमोक्षेण न किमपि वैमत्यम्। अत्र श्रुतिः— दुःखेनात्यन्तिकविमुक्तश्चरति।

अत्र तत्त्वज्ञानं न यथार्थज्ञानमात्रम्, तथा सति भूतलं घटवदिति यथार्थ-ज्ञानादपि इदानीं चैत्रादेर्मुक्तिप्रसङ्गात्। अथ मिथ्याज्ञानभिन्नज्ञानमेव तत्त्वज्ञानं तच्च मुक्त्यव्यवहितप्राक्क्षण एव भवति, इदानीन्तनानां भूतलं घटवदित्यादिज्ञानानां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथार्थत्वेन प्रतीयमानानामपि आंशिकमिथ्यात्वस्वीकारात्। त्रिपुटी-प्रत्यक्षवादि-प्रभाकरमते समेषां ज्ञानानां मितिमातृमेयविषयकत्वाद् घटमहं जानामीत्या-काराकारितज्ञानानां कथं भ्रमत्वम्, भ्रमत्वाभावद् मुक्तिरापद्येत; किन्त्विदं न वक्तव्यम्, यतस्तादृशज्ञानसामग्रीकाले सामग्रीसम्भवाद् गौरोऽहं जानामि स्थूलोऽहं जानामीत्याकारकतया गौरादेरपि भानसम्भवादात्मनि च गौरत्वादेर्बाधितत्वाद् भ्रमत्वं सिद्धमेव, न तज्ज्ञानाद् मुक्तिप्रसङ्गः।

वस्तुतोऽहं शरीराद्भिन्नः, नाऽहं गौरः, न वा स्थूलोऽहमित्यादिज्ञानमेव तत्त्वज्ञानम्, सम्प्रति श्रवणादिभिस्तादृशज्ञाने जातेऽपि तस्याप्रामाण्यज्ञानाना-स्कन्दिततत्वाभावान्न तत्र मुक्तिकार्यकारणत्वम्। अत एव कुसुमाञ्जलौ— इदानीं तत्त्वज्ञानमतत्त्वज्ञानमेवेत्युक्तमाचार्यैः। अतत्त्वज्ञानमित्यस्य तत्त्वज्ञानकार्यकारित्वा-भावादित्यर्थः। एवमस्य शरीराद्भिन्नोऽहमिति ज्ञाने जातेऽपि दिवसान्तरे शरीराभेदावगाहि गौरोऽहमित्याकारकं ज्ञानमपि जायते। अत एव प्राथमिकज्ञानादपि न मुक्तिरपि तु स्वसमानाधिकरणं मिथ्याज्ञानप्रागभावासमानकालीनस्यैव तत्त्वज्ञानस्य मुक्तौ हेतुत्वम्। इदानीन्तनपदार्थज्ञानभाविमिथ्याज्ञानप्राग्भावसमान-कालीनत्वान्नै-तज्ज्ञानान्मुक्तिः।

केचनैवं प्रतिपादयन्ति यन्मुक्तिमात्रं प्रति विजातीयतत्त्वज्ञानं कारणं तच्च मुक्त्यवहितप्राक्कालावच्छेदेनैव भवितुं शक्यते। देहादभिन्नोऽहमिति ज्ञाने सत्यपि इदानीं मुक्त्यभावान्न तादृशज्ञाने मुक्तिजनकतावच्छेदकीभूतवैजात्यमिति फलानुरो-धात्कल्पनीयम्।

अत्र यथा विजातीयतत्त्वज्ञानस्य कारणत्वं तथैव विजातीयवायुसंयोगस्यापि विनिगमनाविरहात् कारणत्वं स्यादित्युच्यते चेत्, तन्न वाच्यम्, यतो विजातीय-तत्त्वज्ञानस्य कारणत्वेन श्रुतिः उपस्थाप्यते— 'तत्त्वज्ञानाद् भवेन्मुक्तिर्नान्यथा जन्मकोटिभिः'। एवञ्च—'तमेव' विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय, अतो विजातीयतत्त्वज्ञानस्य मुक्तिकारणत्वे न काप्यनुपपत्तिरतिप्रसक्तिर्वा।

एकस्मिन् तत्त्वज्ञाने जाते न पुनस्तत्त्वज्ञानान्तरमपेक्ष्यते गौरवादित्येवं ये वदन्ति, तन्न सम्यक्, आत्ममनःसंयोगत्वङ्मनःसंयोगयोरवच्छेदकस्य शरीरस्य सत्त्वेन ज्ञानं भवत्येव, न हि तत्र किमपि बाधकं सामग्रीसत्त्वे कार्यमवश्यजननाद् गौरवभिया सामग्र्याः, न हि कार्यानुत्पादः, गौरवस्याकिञ्चित्करत्वात्। न च तत्त्व-ज्ञाने कथं देहस्तिष्ठति तद्धेतुभूतानां कर्मणां तत्त्वज्ञानेन नाशादिति वाच्यम्, प्रारब्धकर्मणां भोगैकनाश्यत्वात्, अत एव शुकनारदादीनामपि तत्त्वज्ञानवतां शरीराणि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुक्तिं प्रति तत्त्वज्ञानस्य कारणत्वं न सामीचीन्यं भजते, काश्यां मरणान्मुक्तिरिति वचनेन तत्र व्यभिचारात्। एवं गीतादिस्मृतिग्रन्थेषु स्ववर्णाश्रमानुकूलकर्मणा मुक्तिर्भवतीत्यादिना कर्मणैव मोक्षस्य प्रतिपादनाद् व्यभिचार इति कथनं न युक्तियुक्तम्, यतो ज्ञानमन्तरा कर्मणा न कुत्रापि मुक्तिः, तत्त्वज्ञानस्यैव मुक्तौ कारणत्वात्। कर्मजन्यमुक्तिस्थलेऽपि मरणात्पूर्वं परतो वा तत्त्वज्ञाने जात एव मुक्तिः, अत एव काश्यां मरणान्मुक्तिरित्यत्र पञ्चम्याः प्रयोजकत्वमर्थ इति न कुत्रापि व्यभिचारः। तत्त्वज्ञानस्यैव मोक्षकारणत्वमिति सुस्थिरः सिद्धान्तः।

किञ्च तत्त्वज्ञाने सति मोक्षाय न कर्माण्यपेक्ष्यन्ते, अत एव पूर्वजन्मकर्मणो जाततत्त्वज्ञानस्य जडभरतस्य विनापि कर्म मुक्तिर्जाता।

ननु मुक्तिं प्रति मिथ्याज्ञानाभाव एव कारणमस्तु, किं तत्त्वज्ञानकल्पनेन? मुक्तेः पूर्वं मिथ्याज्ञानाभावस्य तत्त्वज्ञानकारणतावादिनाप्यवश्यमभ्युपगमात्। न च सुषुप्तिकाले मिथ्याज्ञानस्यासत्त्वात् कथं न मुक्तिरिति वाच्यम्, मिथ्याज्ञानप्रागभावासमानकालीनस्यैव मिथ्याज्ञानाभावस्य मुक्तिकारणत्वात्। किन्तु मिथ्याज्ञानापेक्षया तत्त्वज्ञानस्यैव हेतुत्वकल्पने लाघवम्। शास्त्रेषु प्रमाणमपि यथा—

भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे।।

तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय।।

'आत्यन्तिकदुःखनिवृत्तिर्मोक्षः' इत्यत्र आत्यन्तिकत्वं दुःखप्रागभावासामानाधिकरण्यं बोध्यम्। आशयः खल्वयमापाततो यद्दुःखध्वंसः सदुःखप्रागभावसमानाधिकरणः। यत एकस्मिन्नेवात्मनि केषाञ्चिद्दुःखानां ध्वंसः, केषाञ्चिद्भाविदुःखानाञ्च प्रागभावो विद्यतेऽत एकाधिकरणवृत्तित्वादुभयोर्दुःखध्वंसप्रागभावयोः सामानाधिकरण्यम्, तत्र मुक्तिपदवाच्यम्; अपि तु दुःखप्रागभावासमानाधिकरणदुःखध्वंस एव मोक्षपदवाच्यः, स च तदानीमेव सम्भवति यदा दुःखमात्रस्योच्छेदः स्यात्। दुःखानुत्पादरूपो दुःखप्रागभावस्तु न मोक्षोऽपि तु दुःखप्रागभावासामानाधिकरण्यरूपात्यन्तिकदुःखनिवृत्तिरेव मोक्षत्वं भजते।

न च दुःखात्यन्ताभावस्यैव मोक्षत्वं स्यात्, किं तर्हि दुःखध्वंसनेनेत्याशङ्कनं न समीचीनम्, यतोऽत्यन्ताभावस्य नित्यत्वात् तस्य साध्यत्वाभावाद् कथं पुरुषार्थत्वमतो दुःखध्वंस एव मोक्षः, न तु दुःखात्यन्ताभावः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्रेदमवधेयं यत् चरमदुःखध्वंस एवापवर्ग इत्येवमभ्युपगमे चरमदुःखमपि साधनीयम्, यतोऽभावबुद्धौ प्रतियोगिज्ञानं कारणं भवतीति नियमानुरोधेन दुःखध्वंसात् प्राग् दुःखसिद्धिरपेक्ष्या। किञ्च दुःखं नेष्टं केषाञ्चिदपि तत्र कथं दुःखे प्रवृत्तिर्जनानामित्याक्षेपस्य समाधानमुच्यते—यथा रोगनिवृत्तयेऽतिशयकटुतिक्तौषधिभक्षणे लोके प्रवृत्तिर्दृश्यते, यथा चासह्यवेदनोत्पादिकायां शल्यचिकित्सायां प्रवृत्तिर्जायते, तथैव दुःखात्यन्तिकनिवृत्तये निखिल-दुःखविनाशार्थं वा दुःखविषयिणीप्रवृत्तिः स्वाभाविकी एव।

न चात्यन्तिकदुःखनिवृत्तिरेव मोक्षः, अपि तु मुक्तात्मनि समेषामात्मविशेषगुणानां लयोऽपेक्ष्यते। अविनाशे सति वासनाया न कथमपि दुःखनिवृत्तिः, वासनाविनाशञ्च गगनकुसुमायमानतुल्यम्। जगति नैकोऽप्येतादृशो जीवो यन्मनसि सुखेप्सा न स्यात्, सत्यां सुखेप्सायां दुःखमपरिहार्यम्। सुखेप्सया क्रियमाणस्य कर्मणो वैपरीत्ये वैगुण्ये वा दुःखमुत्पद्यतेऽतो आत्मविशेषगुणानां निर्मूलोच्छेद एव मोक्षः। तदुक्तं जयन्तभट्टेन अपवर्गप्रकरणे —

'बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराणां निर्मूलोच्छेदोऽपवर्गः,। (न्यायमञ्जरी, अपवर्गप्रकरणे)

आत्मनः स्वस्वरूपावस्थानमेव मोक्षः। तदुक्तं न्यायमञ्जर्याम् —

'स्वरूपैकप्रतिष्ठानः परित्यक्तो ह्यखिलैर्गुणैः।
यदात्मगुणाः सर्वे नोच्छिन्ना वासनादयः।।
तावदात्यन्तिकी दुःखव्यावृत्तिर्नावकल्पते'।।

वैशेषिकदर्शनेऽपि महर्षिकणादेन एवमुक्तम् —

'अदृष्टजदेहेन सह सम्बन्धविच्छेद एव मोक्षः'।।

अत्रेदानीं चिन्तनीयं दुःखात्यन्तिकनिवृत्तिरूपमोक्षावस्थायां सुखादिकं जायते, न वेति वेदान्तिनां मते केषाञ्चिन्नैयायिकानां मतेऽपि मुक्तात्मनि सुखादिकं जायते, किञ्च गौतमादिमते न सुखम्, तेषां मते 'नित्यविज्ञानानन्दं ब्रह्म, सच्चिदानन्दं ब्रह्म' इत्यादिस्थलेषु आनन्दपदं दुःखाभावपरम्, न तु सुखादिबोधनपरम्। यथा लौकिकव्यवहारेऽप्यनुभूयते—ज्वरपीडितपुरुषो दुःखमनुभवति, नष्टे सति ज्वरे सुखमनुभवति। यद्यपि नहि तेन ज्वरपीडितेन पुरुषेण ज्वराभावातिरिक्तं किमपि प्राप्तम्, तथापि सुखमनुभूयते, तत्र दुःखाभाव एव हेतुः। एवमेव भाराद्यपगमे सति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारवाहकः सुखमनुभवति, तत्रापि भारवाहकेण पुरुषेण भारापनयनातिरिक्तं सुखजनकं न किमपि वस्तु प्राप्तम्; किन्तु सुखमनुभूयतेऽतो भारापनयनं भारशून्यत्वं वा तस्य सुखमतो न मुक्तात्मनि सुखादिकल्पना। विवेकिनः सुखेऽपि दुःखमेवानुभवन्ति। तदुक्तम्—'सुखमपि हातुमिच्छति..........'।

भासर्वज्ञानुयायिनः केचननैयायिका मुक्तात्मनि सुखानुभूतिं कल्पयन्ति —

'सुखमात्यन्तिकं यत्र बुद्धिग्राह्यमतीन्द्रियम्।
तं वै मोक्षं विजानीयाद् दुष्प्राप्यमकृतात्मभिः'।।

इमां श्रुतिमाधारीकृत्य न्यायसारग्रन्थे अनेन सुखेन विशिष्टा आत्यन्तिकी दुःखनिवृत्तिः पुरुषस्य मोक्ष इति प्रतिपादयन्ति। एवं न्यायसारग्रन्थस्य टीकाकारेण जपतीर्थेनापि—सुखेनेति पदेन कणादमते मोक्षप्रतिक्षेपः।

भूषणमते — नित्यसुखसंवेदनसिद्धिरपवर्गसाधिता।

सर्वमतसङ्ग्रहे— मोक्षस्तु न दुःखनिवृत्तिमात्रं नित्यसुखस्याविर्भावोऽपि; किन्त्वेषां नैयायिकानां मतमविचाररमणीयं यतो यदि सुखमभिलक्ष्य मुक्तौ प्रवृत्तिः, तर्हि प्रवृत्त्या रागवशान्न कदाचिन्मोक्षः। रागिणां कोटिकल्पेऽपि न मुक्तिरिति सिद्धान्त इति।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैशेषिकदर्शने व्याप्तिविमर्शः

डॉ.शशिप्रभा-कुमार

उपाचार्या, दर्शनविभागस्य
दिल्लीविश्वविद्यालये

वैशेषिकदर्शनं मूलतः प्रमेयशास्त्रमिति प्रथितमस्ति, तत्र प्रमाणनिरूपणं तु गौणतयैव प्रतिपादितमत्र नास्ति विदुषां वैमत्यम्। वैशेषिकदर्शनप्रवर्तकेन महर्षिणा कणादेन प्रमाणद्वयमेवाङ्गीकृतम्—प्रत्यक्षमनुमानञ्च। तत्रापि अनुमानप्रमाणस्य विवेचनं तेन लैङ्गिकज्ञानमिति व्यपदेशेन विहितम्—'अस्येदं कार्यं कारणं संयोगि विरोधि समवायि चेति लैङ्गिकम्'[1]।

सूत्रमिदं व्याख्यायता उपस्कारकारेण शङ्करमिश्रेण लैङ्गिकज्ञानस्य अनुमानस्य स्वरूपमित्थं प्रतिपादितम्—'लिङ्गाज्जातं लैङ्गिकं व्याप्तिविशिष्टः पक्षधर्मो लिङ्गमिति'। लैङ्गिकलिङ्गयोरनेन प्रतिपादनेनैव वैशेषिकदर्शने व्याप्तिविवेचनस्य महत्त्वं भृशं सुव्यज्यते, तस्य महत्त्वस्योद्भावनमेवास्य लघुप्रपत्रस्य प्रयोजनम्।

अत्रेदम्प्रथमतया उल्लेखनीयं यत् प्रमाणमीमांसाविषये प्रायशो वैशेषिकाचार्याणां नैयायिकैः सह मतैक्यमेव संलक्ष्यते, परमस्मिन्निबन्धे मुख्यरूपेण केवलं वैशेषिकसूत्र-भाष्य-टीकाग्रन्थानधिकृत्य किञ्चिद् विवेचनं तत्र विधीयते। तथा ह्यनुमीयतेऽनेनेत्यनुमानमिति व्युत्पत्त्या अनुमितिकरणमनुमानम्। किं तदनुमितिकरणम् ? तत्र व्याप्यत्वेन ज्ञायमानं लिङ्गमेवानुमितिकरणमिति प्राचीनवैशेषिकाः[2]। अत्र लिङ्गपदनिर्वचनेन ज्ञायते 'लीनमर्थं गमयतीति लिङ्गम्'[3] अथवा 'लिङ्ग्यते

१. वैशेषिकसूत्रम्-९।२।१।
२. यदनुमेयेन सम्बद्धं प्रसिद्धं च तदन्विते।
तदभावे च नास्त्येव तल्लिङ्गमनुमापकम्।। (प्र.पा.भा., पृ., ४७८ पदार्थधर्मसङ्ग्रहः)
३. सिद्धान्तचन्द्रोदये-२, पृ. २५।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

गम्यतेऽर्थोऽनेनेति लिङ्गम्, लिङ्गञ्च दृष्टमनुमितं श्रुतं वा यदनुभवरूपं ज्ञानं जनयति तल्लैङ्गिकम्, एतेन लिङ्गमेवानुमितिकरणम्, यथाह शङ्करमिश्रः — 'एतेन लिङ्गमेवानुमितिकरणं न तु तस्य परामर्शः, तस्य निर्व्यापारत्वेनाकरणत्वात्, लिङ्गस्य तु स एव व्यापारः'[१]। अनेनेदमपि स्पष्टीभवति यत्प्राचीनवैशेषिकमते व्यापारवतो लिङ्गस्यैव प्रमाणत्वमभिमतमासीन्न तु व्यापारस्य परामर्शस्य। तत्र केचन नव्याचार्या व्याप्तिमेवानुमानस्य करणरूपे स्वीकुर्वन्ति, तेषां मतेऽनुमिति-करणत्वमनुमानस्य लक्षणम्। अनुमानं च व्याप्तिज्ञानम्[२]। यतो हि अनुमितौ व्याप्तिज्ञानं करणं परमर्शो व्यापारोऽनुमितिः फलं कार्यमित्यर्थः। व्याप्तिज्ञानस्य परामर्शरूपव्यापारद्वाराऽनुमितिं प्रत्यसाधारणकारणतयाऽनुमितिकरणत्वमनुपपन्नम्। एवमेवाह कारिकावलीकारः — 'व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत्'[३]। तदत्र उभयवादिनयेऽपि व्याप्तिरेवानुमितौ प्रमुखं स्थानमधिरोहति— व्याप्तिबलेनैव लिङ्गमर्थगमकं भवतीति निःसन्दिग्धमेव। प्रशस्तपादस्य त्रयोऽपि व्याख्यातारो भिन्नतया वर्णयन्त्यनुमानस्वरूपम्, तद्यथा व्योमवतीकारः परामर्शज्ञानमेव साधकतमत्वापेक्षयाऽनुमानं[४] कथयति। श्रीधराचार्यः पक्षधर्मताज्ञानरूपं लिङ्गदर्शनम्'[५] उदयनाचार्यश्च परामृश्यमाणं लिङ्गमेव'[६] परं व्याप्तिविषये तु ते सर्वेऽपि सहमताः। सेतुटीकाकारः पद्मनाभमिश्रस्तु व्याप्तिज्ञानमनुमानमिति मतं समुद्धरति[७]। अत एव वैशेषिकदर्शनेऽनुमाननिरूपणस्थले व्याप्तिज्ञानस्य प्रचुरं वर्णनं प्राप्यते।

वैशेषिकदर्शनग्रन्थानामध्ययनेन विज्ञायते यत्तत्र व्याप्तिविवेचनं विविधै-र्विशेषणैर्विहितमस्ति, तद्यथा—प्रसिद्धिः, समयः, अविनाभावः, साहचर्यम्, सामानाधिकरण्यम्, नियमः, अव्यभिचारः, प्रतिबन्धः, विशिष्टसम्बन्धः, व्याप्तिश्च। तत्र प्रयुक्तैरेभिः पदैरेव व्याप्तिस्वरूपविषये प्रभूततथ्याः प्रकाशिता भवन्तीति मत्वाऽत्र तेषां पृथङ् निर्देशः प्रस्तूयते —

---

१. उपस्कारे, पृ. ४८६-४८७।

२. न्यायबोधिनी (तर्कसङ्ग्रहटीका), पृ. ३५।

३. भाषापरिच्छेदः;

४. व्योमवती, पृ. ५६३।

५. न्यायकन्दली, पृ. ४९२;

६. किरणावली, पृ. ५४६।

७. सेतु., पृ. १००।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क. प्रसिद्धिः

वैशेषिकसूत्रकारेण महर्षिणा कणादेन लैङ्गिकज्ञाननिरूपणावसरे साध्यानुमापकस्य लिङ्गस्य साध्यसम्बन्धो व्याप्तिरूपो न निर्दिष्टः, तेनात्मानुमान-प्रसङ्गे प्रसिद्धिपदेन व्याप्तिनिर्देशः कृतः 'प्रसिद्धिपूर्वकत्वादपदेशस्य'[१] इत्यस्मिन् सूत्रे। अत्रापदेशो हेतुवाचकः, हेतुश्च प्रसिद्धिपूर्वकः (व्याप्तिविशिष्टः) एव साध्यं साधयितुं क्षम इति तस्याभिप्रायः। 'तत्र प्रसिद्धिः स्मर्यमाणा व्याप्तिः' इति स्पष्ट-मुवाच उपस्कारकारः। अनेन पदेन सूच्यते यदनुमितौ लिङ्गलिङ्गिनोः सम्बन्धः प्रसिद्धः परिज्ञातो वा। अत एव साध्यसाधनयोर्व्याप्तिः कणादेन प्रसिद्धिरित्युक्ता[२]।

ख. समयः

अनुमेयप्रतीतिप्रकारं प्रकाशयन् भाष्यकारः प्रशस्तपादो व्याप्तिं समय-पदेनाभिदधे—'विधिस्तु यत्र धूमस्तत्राग्निरग्न्यभावे धूमोऽपि न भवतीत्येवं प्रसिद्धसमयस्य'[३].........। समयः खलु नियमबन्धः सिद्धान्तश्चेति कोशकाराः[४]। अत एव हि भाष्यकारेणापि व्याप्यव्यापकयोर्व्याप्तिसम्बन्धः समय इत्युदाहृतः।

ग. अविनाभावः

प्रशस्तपादप्रयुक्तं प्रसिद्धसमयस्य विशेषणं विस्पष्टीकुर्वन्न्यायकन्दलीकारः श्रीधराचार्यो व्याहरति—

'प्रसिद्धः समयोऽविनाभावो यस्य पुरुषस्य तस्य'[५]......। अनेन व्याप्तिः साधनसाध्ययोरविनाभाव इति सूच्यते। लिङ्गं नागृहीताविनाभावस्य गमकमत एव तत्राविनाभावोऽनिवार्यः। व्योमशिवोदयनाचार्ययोरप्येतन्मतम्[६]। अत्रेदमप्यवधेयं यद् व्याप्यव्यापकयोरविनाभावोऽयं देशकालसन्दर्भे निर्धारणीयः[७]।

---

१. वै.सू. ९।२।१।

२. न्यायमीमांसादर्शनयोः प्रमाणविचारः, एस.बी. रघुनाथाचार्यः, पृ. १२३।

३. पदार्थधर्मसङ्ग्रहः, पृ. ४९१,५१२; ४. न्यायकोशः, पृ. ९५९।

५. न्यायकन्दली, पृ. ५१२-५१३।

६. (क) व्याप्तिरविनाभाव इति। (व्योमवती, पृ. ५७०)
(ख) विधिस्तु अविनाभावग्रहणप्रकारः। (किरणा., पृ. २९५)

७. पदार्थधर्मसङ्ग्रहः, पृ. ५०३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

घ. साहचर्यम्

वैशेषिकसूत्राणां भाष्यकारेण प्रशस्तपादेन व्याप्तिविधिविवेचनावसरे साहचर्यानुस्मरणमप्यभिहितम्, यत्र धूमस्तत्राग्निरिति स्मरणमेव साहचर्यानुस्मरणमिति, तद्विना तु अग्नेरनुमानं नैव सम्भवति, तदनन्तरमेव जायते। अतः खलु हेतुसाध्ययोर्न केवलमविनाभावः, अपि तु साहचर्यं सहभावो वा व्याप्तिरिति[1]। साहचर्यमिदं नियतमेव भवितव्यमत्र तु न कापि विप्रतिपत्तिः।

ङ सामानाधिकरण्यम्

व्याप्यव्यापकयोः साहचर्यं तत्र सामानाधिकरण्यं सूचयति, एकाधिकरणवृत्तित्वं वा। नव्याचार्यैस्तु व्याप्तिलक्षणेऽस्य पदस्य प्रयोगो भूरिशः कृतः, तस्याशयस्त्वयमेव यत्साध्यं व्यापकं वा सदैव हेतुना व्याप्येन सहैकस्मिन्नधिकरणे भवितव्यमिति। एतदेवोक्तं तर्कदीपिकायाम्— 'साहचर्यं सामानाधिकरण्यं तस्य नियमः। हेतुसमानाधिकरणात्यन्ताभावप्रतियोगिसाध्यसामानाधिकरण्यं व्याप्तिः'[2]। अथवा अवश्यम्भावि यत् सामानाधिकरण्यं तदेव व्याप्तिरित्यर्थः[3]।

च. नियमः

अत्रैतदप्युल्लेख्यं भवति यल्लिङ्गलिङ्गिनोर्न केवलं साहचर्यं सामानाधिकरण्यमपि तु नियमेन सहभावोऽनिवार्यः, व्याप्तिहेतोः। अत एव वैशेषिकाचार्यैः प्रतिपादितम्— 'यद्यपि प्रथमदर्शनेऽपि सहभावो गृहीतस्थापि न नियमग्रहणम्। न हि सहभावमात्रान्नियमः, अपि तु निरुपाधिकसहभावात्[4]'। अतः खलु नियमपदोऽपि व्याप्तेर्वाचकः, न्यायमञ्जर्यामपि[5] तथैव प्रयुक्तोऽयम्। अस्य नियमस्य सुदृढस्थापनायैवात्राग्रिमं विशेषणपदं व्यवहृतम्।

छ. अव्यभिचारः

नियमस्य निरपवाद एवाव्यभिचार इति व्याप्तिनियमे व्याभिचाराभावोऽप्यनिवार्यतयाऽङ्गीकृतः। तत्र साध्याभाववद्वृत्तित्वं व्यभिचारः, तस्याभाव एवाव्यभिचारः, सोऽपि व्याप्तिसम्बन्धस्य घटकः। अत एव विश्वनाथेन व्याप्तिलक्षणं साध्याभाववदवृत्तित्वं प्रकीर्तितम्। यद्वा साध्यवदन्यस्मिन्नसम्बन्ध उदाहृतः[6]।

---

१. तर्कसङ्ग्रहः, पृ. ४७-४८; २. त.दी., पृ. ३५।
३. न्यायदर्शनविमर्शः, कालीप्रसादसिंहः, पृ. १५१।
४. न्यायकन्दली, पृ. ५००।
५. अयमेवाविनाभावो नियमः सहचारिता। (न्या.मं. १, पृ. १२१)
६. कारिकावली, ६८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परं कथमयमव्यभिचारो निश्चीयते नाम? तत्र तादात्म्यतदुत्पत्तिभ्यामिति बौद्धमतं निराकुर्वन्नाह कन्दलीकारः — 'किं यत्र तादात्म्यतदुत्पत्ती तत्राव्यभिचारः? किं वा यत्राव्यभिचारस्तत्र तादात्म्यतदुत्पत्ती? न तावदाद्यः कल्पः, सत्यपि तदुत्पादे धूमधर्मस्य पार्थिवत्वादेरग्निव्यभिचारात्। सत्यपि तादात्म्ये वृक्षत्वस्य विशेषाद् व्यभिचारात्। अथ यत्राव्यभिचारस्तत्र तादात्म्यतदुत्पत्ती तर्ह्यव्यभिचारसत्त्वे तयोर्गमकत्वम्। एवं चेत्, अव्यभिचार एवास्तु गमकः, किं तादात्म्य-तदुत्पत्तिभ्याम्[1]? कार्यमपि हि न कार्यमित्येव गमयतीति, नापि स्वभावः स्वभाव इति, किं तर्हि? तदव्यभिचारीति, अव्यभिचार एव गमकत्वे कारणम्, न तादात्म्यतदुत्पत्ती, व्यभिचारात्[2]।

अत्रैतदप्यवधेयं यद्धेतुसाध्ययोः सम्बन्धेऽव्यभिचारस्तु लिङ्गस्यैव भवतीति वैशेषिकाणां मतम्; तदेव हि तस्य लिङ्गं भवति यद्यस्याव्यभिचारि। अस्यार्थो यद् व्यापकस्य व्याप्यव्यभिचारस्तु भवत्येव, परं व्याप्यस्य व्यापकव्यभिचारो न भवितव्य इति। अतः खलु व्याप्यैकनियता व्याप्तिर्न संयोगवदुभयत्र व्यासज्यते, व्यापकस्य व्याप्यव्यभिचारात्। यत्रापि समव्याप्तिके कृतकत्वानित्यत्वादौ व्याप्यस्यापि व्यापकत्वमस्ति, तत्रापि व्याप्यत्वरूपं समाश्रित्यैव व्याप्तिर्न व्यापकरूपाश्रयात्, व्यभिचारिण्यपि तद्रूपस्यापि सम्भवात्[3]। अत एव व्याप्तिर्व्याप्यगतत्वेन दर्शनीया, 'यत् क्रियावत् तद् द्रव्यमि'ति न व्यापकगतत्वेन तत्र तस्या अभावात्।

ज. प्रतिबन्धः

अनुमानस्य प्रामाण्यं प्रतिष्ठापयता न्यायलीलावतीकारेण वल्लभाचार्येण 'तत्प्रतिबन्धसिद्धिसापेक्षम्' इति कथितम्[4]। अत्र तेन प्रतिबन्धपदं व्याप्तिविषये प्रयुक्तमपि च प्रतिपादितं यत् 'स (प्रतिबन्धः) च न सामान्ययोः, यत्र धूमत्वं यद् धूमत्वमिति वा नियमायोगात्,। तत्रैव च— 'व्यक्त्यन्तर्भाविण नियतत्वे कतिपयान्तर्भाविण सर्वोपसंहारवती व्याप्तिः, इत्यभिहितम्। स्पष्टमेवात्र तस्याभिप्रायोऽयं यद् द्वयोः सामान्ययोर्न साक्षात्प्रतिबन्धो भवति, परं व्यक्तिमाध्यमेनैव भवितुमर्हति। यद्यपि न तस्य मतं निर्दुष्टम्[5]; परमिदन्तु सुवचमेव

---

१. न्यायकन्दली, पृ. ४९४; २. तत्रैव।
३. तत्रैव, पृ. ५०७,६०२-६०३; ४. न्यायलीलावती, पृ. ४८९।
५. माथुरी पञ्चलक्षणी, श्रीबदरीनाथशुक्लः, पृ. ८६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्तेनात्र प्रतिबन्धो व्याप्तिवाचकत्वेन प्रयुक्त इति। अपि च तेन 'साधनस्य साध्यसाहित्यं कार्त्स्न्येन'[१] इति वचनेन साधने हेतौ वा साध्यस्य समग्रं साहचर्यमेव व्याप्तिरिति लक्षितम्। 'अत्र साहित्यम्' साहचर्यमेवाभिव्यनक्ति।

झ. विशिष्टः सम्बन्धः

व्यापकस्य व्याप्याधिकरणोपाध्यभावविशिष्टः सम्बन्धो व्याप्तिरिति शिवादित्यः सप्तपदार्थ्यां प्राह[२]। अनेन सुव्यक्तं यत् साधनसाध्ययोर्लिङ्गलिङ्गिनोर्वा विशिष्टः सम्बन्ध एव व्याप्तिः। यथोक्तं न्यायमञ्जरीकारेणापि — 'यद्दर्शनाद् यत्र यस्य प्रतीतिर्भवति, अस्ति कश्चन सम्बन्धस्तयोरर्थयोः। .... साहचर्यमेव स सम्बन्धः। अयमेवाविनाभाव इत्युच्यते'[३]।

ञ. व्याप्तिः

व्याप्तिः खलु 'वि + आप्तिः' विशेषेणाप्तिरिति, तत्र वैशिष्ट्यञ्च द्वयोर्वस्तुनोर्नियतं साहचर्यमेव प्रतिभाति। वैशेषिकदर्शने हेतुसाध्ययोरिदं साहचर्यं सूचयितुं यद्यपि उपरिदर्शितानि नैकानि पदानि प्रयुक्तानि, सूत्रकारेण च 'प्रसिद्धिः'-पदेनास्य निर्देशः कृतः, परं परवर्तिनि काले न्यायदर्शनस्य समानतन्त्रत्वेन व्याप्तिरिति प्रसिद्धपदस्यैव प्रयोगः प्रचलितोऽभूत्। शब्दादीनामनुमानेऽन्तर्भावं प्रदर्शयता श्रीधराचार्येण व्याप्यव्यापकयोः सम्बन्धममुं प्रकाशयितुं 'व्याप्ति'पद एव प्रयुक्तः[४]। अन्यत्रापि पञ्चावयववाक्ये निदर्शननिर्वचनावसरे सः कथयति— 'निदर्श्यते निश्चिता साध्यसाधनयोर्व्याप्तिरस्मिन्निति निदर्शनं दृष्टान्तः''[५]।

तदित्थमुक्तविशेषणानां विवेचनेन विज्ञायते यद् व्याप्तिः खलु व्याप्यव्यापकयोरैकान्तिको नियतो सम्बन्धः प्रतिबन्धो वेति। तस्य प्रकटनाय वैशेषिकग्रन्थेषु प्रयुक्तानि उपर्युक्तानि पदानि न हि समानार्थव्यञ्जकानि परं तस्य विविधस्वरूपस्य निदर्शकान्येव प्रतीयन्ते।

व्याप्तिलक्षणम्

वैशेषिकदर्शनग्रन्थेषु व्याप्तिलक्षणविषयेऽन्वीक्षणे कृते विज्ञायते यद् उपस्कारकारेण शङ्करमिश्रेण नवमाध्यायस्य द्वितीयपादे प्रथमसूत्रस्य व्याख्यायां

---

१. न्यायलीलावती, पृ. ४९६;
२. सप्तपदार्थी, पृ. ७०।
३. न्या.मं. १, पृ. १२१;
४. न्यायकन्दली, पृ. ५१२।
५. तत्रैव, पृ. ६०६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रश्नोऽयमुत्थापितः — ननु केयं व्याप्तिरिति? तस्योत्तरे च तेन पूर्वपक्षिभिः प्रस्तुतानां विभिन्नलक्षणानां खण्डनं विधाय तदनु स्वाभिमतं सिद्धान्तलक्षणं प्रस्तुतम्, तद्यथा—

मीमांसकमतखण्डनम्

मीमांसकाः खलु 'अव्यभिचरितः सम्बन्धः व्याप्तिः' इति मन्यन्ते। परं न तावदव्यभिचरितः सम्बन्धः सुष्ठूपपद्यते, यतो ह्यव्यभिचरितस्यार्थो व्यभिचरिताभिन्नत्वेन व्यभिचारस्य च साध्यशून्यवृत्तित्वेन क्रियते चेत्, तर्हि केवलान्वयिन्यप्रसिद्धिः, यथा— 'घटो वाच्यः, अप्रमेयत्वात्' इत्यस्मिन् दृष्टान्ते।

सिंहव्याघ्रोक्तमतखण्डनम्

साध्यानधिकरणत्वस्यापि केवलान्वयिनि असम्भवाद् धूमादेरपि यत्किञ्चित् साध्यानधिकरणाधिकरणत्वान्न तावदव्यभिचरितः सम्बन्धो व्याप्तिरिति।

बौद्धमतनिराकरणम्

बौद्धास्तु अविनाभावमेव व्याप्तिं प्रतिपादयन्ति, परं न सोऽविनाभावो व्याप्तिरिति। स हि साध्यं विनाऽभावो हेतोः, साध्ये सति भावो वा हेतोः? न हि द्वावपि एतौ स्वीकार्यौ, यतो हि तत्रापि व्यभिचारः स्यात्, धूमस्यापि क्वचिद्रासभाभावेऽभावात्, रासभसत्त्वे सत्त्वाच्च नियतव्यतिरेको नियतश्चान्वयो विवक्षित इति चेत्, न, नियमस्यैव निरूपणीयत्वात्।

न्यायलीलावतीकारमतनिरसनम्

वल्लभाचार्येण कात्स्न्र्येन सम्बन्धो व्याप्तिरिति व्याप्तिलक्षणं विहितं तदपि न निर्दुष्टम्, स यदि कृत्स्नस्य साध्यस्य साधनसम्बन्धः, स विषमव्याप्ते धूमादावपि नास्ति। अथ कृत्स्नस्य साधनस्य साध्यसम्बन्धः, सोऽप्येकस्य साध्यस्य कृत्स्नसाधने सम्बन्धाभावादनुपपन्नः। अथ कृत्स्नस्य साध्यस्य कृत्स्नेन साधनेन सम्बन्धः। एतदप्ययुक्तम्। न हि कृत्स्नेन साधनेन कृत्स्नस्य साध्यस्य क्वचिदपि सम्बन्धः सम्भवति, प्रत्येकमेव साध्यसाधनयोः सम्बन्धाद् विषमव्याप्ते चाव्याप्तेः[१]।

१. उपस्कारे, पृ. २०७-२०८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाचस्पतिमिश्रमतखण्डनम्

स्वाभाविकः सम्बन्धो व्याप्तिरिति हि वाचस्पतिमिश्राः, तदप्ययुक्तम्। स्वभावो हि स्वस्य भावो वा स्वमेव भावो वा, तत्र तज्जन्यत्वाच्चेत्तद्धितार्थः, तदा समवायलक्षणायां व्याप्तावव्याप्तेः। तदाश्रितत्वञ्चेत्तद्धितार्थस्तदाऽपि समवायेऽव्याप्तिः, न हि समवायः क्वचिदाश्रितः, संयोगस्यापि हेतुधर्मधूमत्वादजन्यत्वाच्च।

उदयनाचार्यमतनिराकरणम्

उदयनाचार्यास्तु 'अनौपाधिकः सम्बन्धः' व्याप्तिरिति प्राहुः, तदपि न स्वीकरणीयम्, उपाधेरेव दुर्वचत्वात्, सुवचत्वेऽपि दुर्ग्रहत्वात् सुग्रहत्वेऽपि अन्योन्याश्रयत्वात्। साध्यव्यापकत्वे सति साधनाव्यापकत्वादेर्व्याप्तिग्रहाधीनग्रहत्वात्।

एकदेशिनैयायिकमतखण्डनम्

सम्बन्धमात्रं व्याप्तिरिति केचन नैयायिकाः, तदपि न ग्राह्यम्, व्यभिचारिसम्बन्धस्यापि देशविशेषकालविशेषगर्भतया व्याप्तिरूपत्वेऽपि, तज्ज्ञानस्यानुमितावतन्त्रत्वात्, अनुमितिकारणीभूतज्ञानविषयव्याप्तेरेव निरूपयितुमुचितत्वात्।

अन्यमतखण्डनम्

'साधनवन्निष्ठात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यं व्याप्तिः' इत्यपि न शङ्करमिश्रस्य सम्मतम्, वह्नेरपि धूमवन्निष्ठात्यन्ताभावप्रतियोगित्वात्। न हि धूमवति महानसे पर्वतीयवह्नेर्नात्यन्ताभावः। इदं संयोगी द्रव्यत्वादित्यादौ संयोगात्यन्ताभावस्य साधनसमानाधिकरणत्वादव्यापकताप्रसङ्गादिति।

सिद्धान्तलक्षणम्

उक्तानां सर्वेषां मतानां दोषान् प्रदर्श्य उपस्कारकारः स्वाभिमतं व्याप्तिलक्षणमेवमाह— 'अनौपाधिकः सम्बन्धो व्याप्तिः'। तत्र उदयनमतात्स्वमतवैशिष्ट्यञ्चाभिव्यनक्ति — 'अनौपाधिकत्वन्तु यावत् स्वव्यभिचारिसाध्यसामानाधिकरण्यम्, यावत्स्वसमानाधिकरणात्यन्ताभावप्रतियोगी प्रतियोगिकात्यन्ताभावसमानाधिकरणसाध्यसामानाधिकरण्यं वा'[१]।

१. उपस्कारे, पृ. २०८-२१३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्पष्टमेव यदेतानि लक्षणानि नव्यन्यायशैल्यां निरूपितान्यतीवजटिलानि, अतः सुगमावबोधाय वैशेषिकसिद्धान्तानुसारि एकं लक्षणमिदं निरूपयितुं शक्यते यत्—'शङ्कितनिश्चितोभयविधव्यभिचाराभावपूर्वको हेतोः साध्येन सहचारो व्याप्तिः'[१] इति। यद्यपि व्यभिचारशङ्का तु सर्वत्र स्यात्, अस्ति च, तथापि यदि अनुकूलतर्केण सा शङ्का निवर्त्यते तर्हि व्यभिचारसन्देहाभाव एव कथ्यते। तर्केण व्यभिचारो व्यभिचाराभावश्च द्वावेव निश्चीयेते। अस्य तर्कस्य रूपमित्थं घटितं भविष्यति—'धूमो यदि वह्निव्यभिचारी स्यात् तर्हि वह्निजन्यो न स्यात्'। अत एव व्याप्तिग्रहाय वैशेषिकदर्शने भूयो दर्शनापेक्षा तर्कापेक्षा[२] च उभे एव स्वीक्रियेते। यथा तर्ककौमुदीकारेणोक्तम्— 'व्यभिचारज्ञानविरहसहकृतं हेतुसाध्यसहचारदर्शनं व्याप्तिग्राहकं भवती'ति[३]। सा चेयं व्याप्तिर्भूयोदर्शनग्राह्या अन्वयव्यतिरेकभेदेन शास्त्रेऽस्मिन् द्विधा भिद्यते— अन्वयव्याप्तिः, व्यतिरेकव्याप्तिश्च। तद् भावयोः साधनसाध्ययोः साहचर्यमन्वयव्याप्तिः, साध्याभावसाधनाभावयोरभावश्च व्यतिरेकव्याप्तिः, यथा साध्यं व्यापकं साधनं व्याप्यम्, तथा साध्याभावो व्याप्यः साधनाभावश्च व्यापकः। यथोक्तम् —

'नियम्यत्वनियन्तृत्वे भावयोर्यादृशे मते।
विपरीते प्रतीयेते त एव तदभावयोः'[४]।।

तत्र यद्यपि प्रथमदर्शनेऽपि साधनसाध्ययोः सहभावो गृहीतः, तथापि न नियमग्रहणम्। न हि सहभावमात्रान्नियमः सिद्ध्यति, अपि तु निरुपाधिकसहभावात्। निरुपाधिकत्वं च तस्य भूयोदर्शनाभ्यासावशेषमित्यतो भूयःसहभावग्रहणबलभुवा सविकल्पकप्रत्यक्षेण सोऽध्यवसीयत इति व्याप्तिग्रहप्रकारः। एतेन प्रत्यक्षे उपलब्धविद्यमानविषयत्वादतीतानागतासु व्यक्तिषु कथं व्याप्तिग्रहणमिति च प्रत्युक्तं भवति।

अत्रेदमप्यवधेयं यद् वैशेषिकदर्शने न हि विशेषनिष्ठं व्याप्तिग्रहणं स्वीक्रियते, अपि तु विशेषं विहाय सामान्येनैव व्याप्तिग्रहणं समीचीनं तेषां मते, यतो हि तत् सर्वत्रैवैकरूपमिति। व्यक्तयोऽपि व्याप्तौ गृह्यन्ते परं सामान्यरूपतयैव, न विशेषरूपेण[५]। अत एव धूमसंवित्त्या वह्निमात्रमेवानुमिमानस्तमनुधावति, न

१. वैशेषिक दर्शन : एक अध्ययन, श्रीनारायण मिश्र, पृ. १७५।
२. उपस्कारे, पृ. २१३;
३. तर्ककौमुदी।
४. न्या.क., पृ. ६०५;
५. तत्रैव, पृ. ५००-५०१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विशेषमाद्रियते। यदि च सामान्येन सर्वत्र निश्चितेऽपि नियमे निष्प्रामाणिकैराशङ्का क्रियते, तदा तु प्रत्यक्षेण दृष्टासु वह्निधूमव्यक्तिषु गृहीतेऽपि कार्यकारणभावे देशकालव्यवहितात् तद्भावसन्देहो भविष्यति, का कथाऽनुमानस्य?

तदित्थं वैशेषिकदर्शने व्याप्तिस्वरूपं तद्ग्रहोपायानाञ्च विषये विविच्यमाने ज्ञातं भवति यदत्रानुमानं महत्त्वपूर्णं प्रमाणमिति, तच्च व्याप्तिज्ञानाधीनमेवेति[१]। अत एवात्र व्याप्तिविवेचनं विशदतया कृतम्। यद्यप्यस्मिन् विषये वैशेषिकानां नैयायिकैः सह सम्मतिरेवाभिलक्ष्यते, तथापि यत्र तत्र केचन मौलिका विचारा अपि प्रकटिताः, तेषां प्रकाशनमेवात्र सङ्केतितमित्यलं विस्तरेण।

●

१. सर्वदर्शनसङ्ग्रहे, पृ. ३९४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मोक्षप्राप्तौ मनसः प्राधान्यम्

श्रीमती महेश्वरिपिल्ला एस.

प्राध्यापिका, वेदान्तविभागस्य
श्रीशङ्कराचार्यविश्वविद्यालये, क्षेत्रीयकेन्द्रम्, Panmana
कोल्लम्, केरल-प्रदेशः

❀ ❀ ❀

भारतीयतत्त्वचिन्तका मनसः सुस्थिरं स्थानं नास्तीत्यभिप्रयन्ति। कामसङ्कल्पविचिकित्सादीनां विकाराणां समुच्चयमेव मनः। तदेव आम्नायते बृहदारण्यके — 'कामसङ्कल्पविचिकित्साश्रद्धाऽश्रद्धाधृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव'[1] इति। प्रायः सर्वेऽपि पौरस्त्यचिन्तका मन आत्मनोंऽशमेवेति वदन्ति। मनसः प्रकृतिप्रवर्तनानि अद्वैतवेदान्तानुसारेणावगन्तुं कश्चित् परिश्रमोऽत्र क्रियते। मनोनिरूपणे चिन्तकानां मध्ये मतभेदाः सन्ति। शरीरस्यान्तःसाक्षित्वेन स्थितस्य आत्मन उपाधिरेव चित्तम्। भारतीयचिन्तागतिमनुसृत्य आत्मभिन्नं स्वतन्त्रमस्तित्वं मनसो नैव। मनसः सत्ताऽपि सङ्कल्पेनैवेति योगवासिष्ठकारः[2] परामृशति। इदं मन एकमन्तस्थं परिणामसहितं च। मनो विषयविषयिरूपेण विविधैर्नामरूपैः परिणमति।

नैय्यायिका मनसोऽणुत्वं द्रव्यत्वं चाङ्गीकुर्वन्ति। न्यायकन्दल्यां श्रीधरमहोदयेन उक्तम्—'मनः चैतन्यरहितः चैतन्याधिकरणत्वाद् घटवत्' इति। सुखदुःखज्ञापकः कश्चिदिन्द्रियो भवति मनः। वेदान्ते केचिद् मनसोऽनिन्द्रियत्वं सोदाहरणं विशदयन्ति। तदेव श्रूयते कठोपनिषदि—

'इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः'[3] इति।

---

१. ईशादिदशोपनिषदः, मोतिलालबनारसीदासः, दिल्ली, १९७८, १।५।३।

२. Yogavasistha, Translation-Vihari Lala Mitra, Vol. 1, 4.43. Bhartiya Publishing House, Delhi, 1976. P. 221.

३. ईशादिदशोपनिषदः, मोतीलालबनारसीदासः, दिल्ली, १९७८, १।३।१०, पृ. ८१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मोक्षप्राप्तौ इन्द्रियाणां निग्रहार्थं मनःप्रग्रहमुपयुज्यते[1]। पाश्चात्यचिन्तकाः स्वप्नावस्थाया तथा उपबोधमनसश्च महाप्राधान्यं कल्पयन्ति। फ्रोयिट्-महोदयानुसारं गतकालेऽस्माभिरनुभूतानां विषयाणां तथा इच्छायाश्च स्फुरणमेव स्वप्नः। अद्यतनप्रश्नानां परिहारमार्गं च मनः स्वप्ने अभिव्यञ्जयति[2]। अतोऽभिलषितार्थसाक्षात्कारः स्वप्नरूपेण परिणमतीति तस्याभिप्रायः। भारतीयचिन्तकास्तु स्वप्नस्य अतिप्रामुख्यं न प्रयच्छन्ति। ते जाग्रदादिचतुःष्ववस्थासु अन्यतमत्वेन स्वप्नावस्थां परिगणयन्ति। माण्डूक्योपनिषदि आत्मनश्चातुष्पात्वं श्रूयते— 'सोऽयमात्मा चतुष्पात्' इति। जाग्रत्, स्वप्नः, सुषुप्तिः, तुरीयेति चतुरवस्थाः सन्ति। जाग्रदवस्थाभिमानी आत्मा बाह्यप्रज्ञः, सप्ताङ्गः, स्थूलभुक् च। तमात्मानं वैश्वानर[3] इत्युच्यते। जाग्रदवस्थायां यद् दृश्यते तत्सर्वं मनःसृष्टमेवेति शाङ्करसिद्धान्तः। स्वप्नावस्थाभिमानी आत्मा अन्तःप्रज्ञः सप्ताङ्गः, प्रविविक्तभुक् च। सोऽयं तैजसेति[4] नाम्ना व्यवह्रियते। यस्मिन्नवस्थायां सुप्तो न कञ्चन कामं कामयते, न कञ्चन स्वप्नं पश्यति, तथा सुप्तोत्थितस्य सुखमहमस्वाप्सं न किञ्चिदवेदिषमित्यनुभवश्च, तत् सुषुप्तिः। सुषुप्तौ जीवात्मा परमात्मनि एकीभवति। प्रज्ञानघनः आनन्दभुक् चायं प्राज्ञ[5] इत्युच्यते। अस्मिन्नवस्थायां कारणाविद्याया बन्धाभावाद् बन्धकत्वहेतुर्मन एव; किन्तु 'मनः प्राणमप्येति' इति श्रुतेर्मनः कथं बन्धहेतुर्भवेदिति चेदुच्यते, अज्ञानस्य मनसश्चाभिन्नत्वाद् इति। चतुर्थावस्थस्तुरीयो न अन्तःप्रज्ञः, न बहिष्प्रज्ञः, न प्रज्ञानघनः, अदृश्यः, अव्यवहार्यः, अग्राह्यः, अलक्षणः, अचिन्त्यः, एकात्मप्रत्ययसारः, शान्तः, शिवः, अद्वितीयश्च भवति।

अन्तःकरणं विषयप्रत्यक्षसमये विषयाकारेण परिणमति। परिणामोऽयं वृत्तिरित्युच्यते। वृत्तिश्चतुर्धा— मनः, अहंकारः, बुद्धिः, चित्तमिति। संशयात्मको मनः, निश्चयात्मिका बुद्धिः, अहङ्कारात्मकोऽहङ्कारः, स्मरणात्मकं चित्तं च।

आत्मसाक्षात्कारे मनसो महाप्रामुख्यमस्ति। जीविनो बन्धमोक्षयोर्मुख्यहेतुर्मन एव। विवेकचूडामणौ[6] श्रीशङ्करो मनोमयकोशम् एवं निरूपयति— ज्ञानेन्द्रियाणि

---

१. तेदव-१।३।३।

२. The Practice of mind control, Dr. B. Edwin, P. 34 (Thomson Publishers Ltd. London, 1965).

३. ईशादिदशोपनिषदः, मोतिलालबनारसीदासः, दिल्ली, माण्डूक्योपनिषत्-१.३, पृ. १७१।

४. तदेव-१.४, पृ.६९६;   ५. तदेव-१.५, पृ. ६९६।

६. विवेकचूडामणिः, श्रीशङ्कराचार्यः, श्लो. १६१-१७५; अद्वैताश्रमः, कलकत्ता, १९७८; पृ.६७।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनश्च संयोज्य मनोमयकोशं भवति। नामरूपात्मकप्रपञ्चस्य कल्पने निदानभूतस्य मनसोऽधीनमेव सर्वेऽपि लोकव्यवहाराः। श्रोत्रादिपञ्चेन्द्रियहोतृभिः शब्दाद्याज्यधारया प्रज्वालितैर्वासनाकाष्ठैर्निरन्तरमुद्दीप्यमानो मनोमयाग्निः प्रपञ्चमपि भस्मीकरोति। संसारबीजभूता अविद्या मन एव। मनसो वासनानाशे सर्वं नश्यति, मनसो विजृम्भणे सर्वं विजृम्भति। यथा अनिलो मेघान् वायुं च दूरं नयति, तथा मनो बन्धे मोक्षे च हेतुः। मनः पुरुषमादौ देहगेहादिपाशैर्बध्वा स्वस्वरूपादपनयते, तदेव मनोऽनन्तरं विषयविरक्तिं कृत्वा देहादिबन्धनात् प्रमुच्य ब्रह्मनिष्ठं करोति। कामक्रोधादिरजोगुणधर्मैः कलुषितं मनो बन्धहेतुः रजस्तमोरहितं निर्मलं मनो मोक्षहेतुश्च। विषयरूपे घोरविपिने मनो नाम महान् व्याघ्रो भक्षणार्थी सन् सञ्चरतीत्यतो मुमुक्षुस्तत्पथेन मा गच्छतु। देवतिर्यगादिशरीराणि, ब्राह्मणादिवर्णाः, ब्रह्मचर्याद्याश्रमाः, शब्दादिगुणाः, मृदादिकारणानि, घटादिकार्याणि च जीवस्य जाग्रदवस्थायां स्थूलरूपेण, स्वप्नावस्थायां सूक्ष्मरूपेण च सदा मनसा सृज्यन्ते। एवं मनो निःसङ्गं सर्वज्ञमात्मानं देहेन्द्रियादिषु अहं ममेति अविद्याबन्धैः सम्बद्ध्य लौकिकवैदिकव्यवहारेषु तेषां फलोपभोगेषु च परिभ्रामयति। तदा अविवेकिदेहादिषु आत्मबुद्धिरध्यस्यति। एवं संसारहेतुभूतोऽध्यासो मनःकल्पितमेव। अतो मोक्षप्राप्तये भवबन्धमूलस्य अन्तःकरणस्य नैर्मल्यमवश्यंभावि। मनःशुद्ध्या मुक्तिः करतलामलकवत् सिद्ध्यति।

मनसः शुद्धीकरणं कथं कर्तव्यमित्युच्यते— 'मुमुक्षुर्विषयविरक्तः सन् सर्वकर्माणि मनसा संन्यस्य नित्ये ब्रह्मणि मनः केन्द्रीकृत्य श्रवणमनननिदिध्यासनैरभ्यस्य मनोविक्षेपं धुनोति'[१] इति।

मनोदार्ढ्याय तद्द्वारा मोक्षप्राप्तये च बहव उपाया आर्षचिन्तकैः स्वीक्रियन्ते। तेषु योगमार्गं प्रामुख्यमर्हति। योगशास्त्रोपज्ञाता पतञ्जलिः स्वरूपावस्थितिर्मोक्ष'[२] इति, तदवाप्तिर्मनोवृत्तिनियन्त्रणसाध्येति चाभिप्रैति। मनस एकाग्रतायै यमनियमाद्यष्टयोगाङ्गानामभ्यासः कर्तव्यः। योगेन चित्तस्य शक्तिर्वर्धते। संसारिणो जितेन्द्रियस्य योगिनश्च चित्तभेदः सङ्कल्पातीतो भवति। लौकिकजीवितेऽपि मूढमपेक्ष्य पण्डितस्य मनसो वैशिष्ट्यं सर्वेषां सुविदितमेव। एवं पण्डितस्य सिद्धयोगिनश्च चित्ते विभिन्ने एव।

---

१. विवेकचूडामणिः, श्रीशङ्कराचार्यः, श्लो. १८४, अद्वैताश्रमः कलकत्ता, १९७८, पृ. ६८।
२. योगसूत्रम्, पतञ्जलिः, १।१।११, मोतीलालबनारसीदासः, दिल्ली, १९७१, पृ. ७।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चित्तं सर्वेषां लौकिकव्यवहाराणां केन्द्रबिन्दुरिति योगवासिष्ठकारस्य मतम्। मनसो निष्क्रियत्वे सर्वलोकव्यवहाराणि निश्चलानि भवन्ति[1], तदा मनोनाशः, अद्वितीयस्य आत्मनः स्फुरणं च सम्भवति। मायाऽभिन्नो मनो व्यावहारिकप्रपञ्चे अयथार्थज्ञानमुत्पादयति।

दृश्यप्रपञ्चो मनस्सङ्कल्पजन्यः, तृष्णासाक्षात्कारेति वा वक्तुं शक्यते। अस्मिन्नवसरे प्रसिद्धतत्त्वावेक्षकस्य कसान्टसाकिस्-महोदयस्य प्रस्तावना अतीव-प्रसक्तिमर्जति, 'यदा अहं सर्वं सुसूक्ष्ममपश्यं तदा यदिह दृश्यते, श्रूयते, रस्यते, स्पृश्यते, घ्रायते वा तत्सर्वं ममैव मनसः सृष्टिरित्यवगच्छामि'[2]। तदेव आशयः श्रीनारायणगुरुणा दर्शनमालायां प्रदर्श्यते— 'मनोमयमिदं सर्वं न मनः क्वापि विद्यते'[3] इति। अतो विषयाकारेण सङ्कल्पविकल्परहितात्मरूपेण च मनसः परिवर्तनं कर्तुं शक्यम्।

निग्रहानुग्रहशक्तिभूयिष्ठस्य चञ्चलस्यास्य मनसो उपचयापचये अन्नेन क्रियतेति ज्ञानं कौतुकमावहति। छान्दोग्ये मनसोऽन्नमयत्वं[4] सदृष्टान्तं प्रतिपाद्यते। एवमन्नोपचितत्वाद् मनो भौतिकमेवेति शङ्करस्याभिप्रायः, तथापि सात्त्विकभोजनेन मनसि सत्त्वोद्रेको जायत इति भगवद्गीतायां[5] दृश्यते। तत्र राजसतामसभोजनाभ्यां मनसः परिणामः कथमिति विशदयति। कट्वम्ललवणतीक्ष्णरुक्षादि राजसाहारिणो मनसि दुःखशोकामयप्रदस्य रजोंऽशस्योद्रेको भवति। मत्स्यमांसादीनां यातयामानां च तामसभोजनानामशननेन मदमात्सर्याद्यधमविकाराणि मनसि सञ्जायन्ते। अतस्ते पुरुषं मोक्षमार्गाद् अपनेष्यन्ति च। तस्मात् फलमूलादिसात्त्विकाहारं भुक्त्वा मनसि सात्त्विकांशं विवर्धयन् योगनिष्ठया चित्तशुद्धिमुत्पाद्य श्रवणादिभिर्जीवात्मैक्यज्ञानम्, अथवा मोक्षं सम्पादनीयम्। तदा प्रपञ्चबीजभूतं मनो नश्यति, मायामात्रमिदं द्वैतमद्वैतं परमार्थत इति निश्चयमुत्पद्यत इति।

●

---

१. योगवासिष्ठम्, अध्यायः-२, भागः-२, पद्यम्-४०,५०, पृ. ८९६,९४१।
२. Saviours of God (Spiritual cxercises) Kazantasakis. Translation-Kimor-Frair. Pub. Simon and schuster,
३. दर्शनमाला, श्रीनारायणगुरुः, ३-१, श्रीशङ्करसंस्कृतविद्यापीठम्, कोल्लम्, १९८३, पृ,५१।
४. ईशादिदशोपनिषदः, मोतीलालबनारसीदासः, दिल्ली, १९७८ छान्दोग्योपनिषद् ६.५, पृ.५११।
५. श्रीमद्भगवद्गीता, श्रीरामकृष्णमठम्, पुरनाट्टुकरम्, १९९५, १७.८-९, पृ. १३१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिभायाः प्रमाणत्वविचारः

डॉ. मुरलीमनोहरपाठकः

वरिष्ठप्राध्यापकः,
संस्कृतप्राध्ययनकेन्द्रम्, विक्रमविश्वविद्यालयः
उज्जयिनी (म.प्र.)

❀ ❀ ❀

प्राणिमात्रैकसंवेद्यां प्रमाणत्वेन संस्थिताम्।
काव्यस्य हेतुभूताञ्च प्रतिभां तामुपास्महे।।

प्रतिपूर्वकाद् भा-दीप्ताविति धातोरङ्प्रत्यययोगेन निष्पन्नोऽयं प्रतिभाशब्दः कमपि सर्वप्राणिसुलभं ज्ञानविशेषमभिधत्ते। विविधैराचार्यैर्विविधं व्याख्याताऽपि सा प्रतिभा तत्त्वतो ज्ञानरूपैव। रुद्राचार्यमतेन प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मतेति[१]। शब्दकल्पद्रुमे चैषा प्रत्युत्पन्नमतित्वेन व्याख्याता[२]। अभिनवगुप्तपादेन अपूर्ववस्तुनिर्माणक्षमा प्रज्ञा इत्याकल्पिता[३]। विविधप्रस्थानेषु कीदृशमस्याः स्वरूपमङ्गीकृतमिति विचारविषयः।

सर्वशास्त्रेषु व्याकरणस्य प्रामुख्येन प्राथमिकत्वेन च तदनुसारेणैव प्रथमतः प्रतिभायाः स्वरूपं निरूप्यते। व्याकरणदर्शने प्रतिभा आगमप्रमाणम्, शब्दब्रह्मरूपत्वात्। वाक्यप्रयोगे वाक्यार्थग्रहणे च प्रतिभैव कारणम्। विना प्रतिभया वाक्यार्थो नैवाधिगतः स्यात्। यं कमपि शब्दं श्रुत्वा श्रोतृहृदये यादृशी प्रतिभा उदेष्यति, स तादृशमेवार्थं ग्रहीष्यति। वाक्यमखण्डं वक्ता प्रयुङ्क्ते, श्रोतृप्रतिभा चाखण्डरूपेणैव तस्यार्थं प्रत्याययति। उद्भूतप्रातिभज्ञानानामुपप्लवरहितचेतसां च योगिनामतीतानागतज्ञानं प्रत्यक्षवदेव भवति। ते पुनरार्षचक्षुषा अतीन्द्रियानज्ञेयांश्च पदार्थान् साक्षात्कुर्वते। उक्तञ्च वाक्यपदीये—

---

१. भुवनेशन्यायसाहस्री।
२. शब्दकल्पद्रुमः, तृतीयकाण्डम्, १।
३. ध्वन्यालोकः (लोचनम्) २।६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'अतीतानागतज्ञानं प्रत्यक्षान्न विशिष्यते'[१]।

अपि च,

'अतीन्द्रियानसंवेद्यान् पश्यन्त्यार्षेण चक्षुषा'[२]।

अत्रार्षचक्षुरेव प्रतिभात्वेन निरूपितम्। व्यञ्जनाप्रसङ्गे यत्रार्थादयो व्यञ्जका भवन्ति, तत्र व्यङ्ग्यार्थबोधो वक्तृबोद्धव्यवाच्यादिवैशिष्ट्यज्ञानेनैव भवति। अथ च श्रोतुः प्रतिभाऽपि प्रतीतावस्यां सहकारिणी भवति। उक्तञ्च नागेशेन —

'अनया चार्थबोधे जननीये वक्तृ-बोद्धव्य-वाच्यादिवैशिष्ट्यज्ञानम्, प्रतिभा च सहकारि तद्बीजनकज्ञानजनकमेव वा'[३]। पुनश्च नागेशो वक्त्रादिप्रकरणज्ञानेन यया बुद्ध्या व्यङ्ग्यार्थप्रतीतिर्भवति, तामेव प्रतिभां स्वीकुरुते। वक्त्रादिवैशिष्ट्यसहकारेण तज्जनिका बुद्धिः प्रतिभेति[४]।

केषाञ्चिद् वैयाकरणानां मतेन अभ्यासाच्छब्दोऽपि प्रतिभाहेतुत्वेन स्वीक्रियते। यथोक्तं हरिणा—

अभ्यासात्प्रतिभा हेतुः शब्दः सर्वोऽपरैः स्मृतः।
बालानां च तिरश्चां च यथार्थप्रतिपादने[५]।।

प्रतिभा सर्वप्राणिसंवेद्या सकलव्यवहारमूलभूता अनपह्नवनीयेति तत्रैव पुण्यराजः। संश्लिष्टपदार्थानां विच्छेदग्रहणे काऽप्यन्यैव प्रतिभा जायते, या पदार्थैरन्विता सती वाक्यार्थत्वेन समायातीति। तथा हि —

विच्छेदग्रहणेऽर्थानां प्रतिभाऽन्यैव जायते।
वाक्यार्थ इति तामाहुः पदार्थैरुपपादिताम्[६]।।

प्रतिभयैव सर्वाणि कार्याणि ज्ञानानि च व्यवतिष्ठन्ते। अविचारिताऽपि सा सर्वाणि प्रमेयाणि समालिङ्गयन्तीव विषयमुद्दिङ्गयन्तीव च विराजते। तथा चोक्तम् —

उपश्लेषमिवार्थानां सा करोत्यविचारिता।
सार्वरूप्यमिवापन्ना विषयत्वेन वर्तते[७]।।

---

१. वाक्यपदीयम्-१।३७; २. तदेव-१।३८।
३. वैयाकरणसिद्धान्तमञ्जूषा, पृ. ८७; ४. तदेव पृ. ८७।
५. वाक्यपदीयम्-२।११७; ६. तदेव-२।१४३।
७. तदेव-२।१४५।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वः खलु लोकः प्रतिभां प्रमाणत्वेन स्वीकुरुते, पशुपक्षिणां व्यवहाराणां तद्वशादेव प्रतीतेः। समेषां प्राणिनां स्वाभाविकप्रेरकाणां कारणमागमरूप-प्रातिभज्ञानमेव। तस्य च द्वैधम् — क्वचिद्वर्णात्मकप्रतिपादकरूपेण क्वचिच्च भावनाबलेन। तत्र द्वितीया नैसर्गिकी प्रवृत्तिः। अतस्सा प्रथमां प्रवृत्तिं व्याप्नोति। भावनाबलं विहाय हि नैव शाब्दप्रवृत्तिः स्फुरतीति। यथाऽऽहुः —

प्रमाणत्वेन तां लोकः सर्वः समनुपश्यति।
समारम्भाः प्रतीयन्ते तिरश्चामपि तद्वशात् [१] ।।

यथा द्रव्यविशेषाणां परिपाकैरयत्नजाः।
मन्दादिशक्तयो दृष्टाः प्रतिभास्तद्वतां तथा [२] ।।

भावनानुगतादेतदागमादेव जायते।
आसत्तिविप्रकर्षाभ्यामागमस्तु विशिष्यते [३] ।।

प्रतिभा न केवलमेकरूपा, अपि तु विविधस्थलजन्यत्वात् साऽनेकधा भवितुमर्हति। भर्तृहरिणा एतस्याः षड्भेदा निरूपिताः। तद्यथा —

स्वभाव-चरणाभ्यास-योगादृष्टोपपादिताम्।
विशिष्टोपहितां चेति प्रतिभां षड्विधां विदुः [४] ।।

इत्थं स्वभावजन्या प्रकृतिजन्या वा, आचरणजन्या, अभ्यासजन्या, योगजन्या समाधिजन्या वा, अदृष्टजन्या, विशिष्टपरिस्थितिजन्या चेति प्रतिभा षड्विधा राराज्यते। एवं व्याकरणदर्शने प्रतिभेयमागमप्रमाणरूपेण प्रतिष्ठिता।

मीमांसादर्शने प्रतिभायाः प्रमाणत्वं न स्वीक्रियते। कुमारिलमते लौकिकानां योगिनाञ्चापि प्रत्यक्षाद्यनपेक्षिणी प्रतिभा नैव प्रमाणम् —

लौकिकी प्रतिभा यद्वत्प्रत्यक्षाद्यनपेक्षिणी।
न निश्चयाय पर्याप्ता तथा स्याद् योगिनामपि [५] ।।

पार्थसारथिमिश्रोऽप्येवमाह — वैशेषिकादयस्तु प्रतिभाख्यप्रमाणान्तरगम्यत्वं धर्माधर्मयोर्मन्यन्ते। तच्च लोकेऽपि क्वचिदस्त्येव। बाहुल्येन तदृषीणा-

---

१. वाक्यपदीयम्-२।१४७; २. तदेव-२।१४८।
३. तदेव-२।१५१; ४. तदेव-२।१५२।
५. श्लोकवार्त्तिकम्, प्रत्यक्षाधिकरणम्, ३२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मेवेत्यार्षमित्युच्यते। यथा—'अस्मदादिप्रतिभा तावल्लिङ्गाद्याभासजन्या प्रत्यक्षादिकमनपेक्ष्य स्वातन्त्र्येणार्थमनिश्चाययन्ती नैव प्रमाणमतंस्तद्वदेव योगिनामपी'ति[१]। वैयाकरणानां मते प्रतिभयैवान्येषां प्रमाणानां प्रमाणत्वे सिद्धे, तन्निरासाय मण्डनमिश्रेणैवमाक्षिप्तम्— 'सा खलु प्रतिभाऽऽलम्बनवती न वा? आलम्बनवती चेत्तदेवावबोद्धव्यं न च तदन्यदीहितोपायतायाः। निरालम्बनं तु ज्ञानमयुक्तमेवे'ति[२]। प्रतिभा सालम्बना, ज्ञानरूपत्वात्। अतस्तदुत्पत्तिरालम्बनेनैव भविष्यति, तत्र शिशूनां पक्षिणाञ्च शब्दभावनया प्रतिभोत्पत्तिर्निरर्थिकेत्यभिप्रायः। वस्तुतो मीमांसकाः प्रतिभाया बाह्यविषयत्वं स्वीचक्रुः, तद्यथा— 'तस्याः प्रतिभाया न्यायापरिज्ञानेन बहुधाऽपि जायमानाया बाह्यविषयत्वं शून्यवादे[३] साधितमेवे'ति[४]।

इदमत्र तात्पर्यम्— बहुधा जायमानायाः प्रतिभाया बाह्यविषयोऽवश्यमेवावतिष्ठते, किन्तु शास्त्रीयनयस्याज्ञानेनैषा अप्रमाणमेव, सिद्धान्ततस्तु, यद्यपि अर्थविषयिणी पौरुषेयप्रतिभा अनेकधा जायते, तथापि प्रतिभाया वाक्यस्य चार्थो बाह्य एव भवति। अतो मीमांसकानां मतेन वाक्यार्थरूपे जन्यरूपे वा प्रतिभायाः पदार्थत्वे नास्ति विरोधः, किन्तु प्रतिभया ज्ञाप्यमानस्य बाह्यार्थस्यास्तित्वं नैवोपेक्षणीयमिति।

न्यायदर्शनेऽनुभवसिद्धस्य प्रतीयमानार्थस्य बोधो मनसैव स्वीक्रियते, न तु केनचिद् वृत्तिविशेषेणेति शक्तिवादस्य माधवीटीकायां विशदं व्याख्यातम्— 'मनसैव तादृशबोधस्वीकारादित्यादिना' इति[५]। जयन्तभट्टमतेन तु प्रतिभायाः प्रत्यक्ष एवान्तर्भावो निरूपितः। तद्यथा— न च सिद्धदर्शनं प्रतिभा, अस्मदादेरपि भावात्। तस्मान्न प्रमाणान्तरं प्रातिभमपि तु प्रत्यक्षमेव[६]। यत्तु क्षीणदोषाणामवहितचेतसां च योगिनामतीन्द्रियपदार्थानामपि ज्ञानम्, तद्योगधर्मजं प्रातिभमेव। यदा कदा च यदयोगिनामप्यनागतविषयकं ज्ञानं सम्पद्यते, तदपि प्रातिभप्रमाणम्। यथा— अर्थजं, संशयविपर्ययादिरहितं श्वो मे भ्राताऽऽगन्तेत्याकारकं ज्ञानमुत्पद्यते, तदव्याहतप्रमाणकमेव, बाधा चेदप्रमाणमपि। किन्त्वेतत् काकतालीयत्वेन व्याख्यातुं न शक्यते, प्रमाणसिद्धत्वात्। अथ चैतदनर्थजमपि निगदितुमशक्यम्, वर्तमानस्य भाव्यर्थग्राहकत्वादिति। यथोक्तं जयन्तभट्टेनैव —

क्वचिद् बाधकयोगश्चेदस्तु तस्याप्रमाणता।
यत्रापरेद्युरभ्येति भ्राता तत्र किमुच्यताम्।।

---

१. न्यायरत्नाकरः, पृ. ११२;
२. विधिविवेकः, पृ. ११।
३. श्लोकवार्तिकस्य शून्यवादप्रकरणे इत्यर्थः;
४. न्यायरत्नाकरः, पृ. १२०।
५. शक्तिवादस्य माधवीटीका, पृ. २;
६. न्यायमञ्जरी, प्रथमो भागः, पृ. ९९।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काकतालीयमिति चेन्न प्रमाणप्रदर्शितम्।
वस्तु तत्काकतालीयमिति भवितुमर्हति।।

भावित्वं च तदस्यास्त्येवेति कथमनर्थजं ज्ञानमिति[१]।

न्यायसिद्धान्तमुक्तावल्यां तु प्रतिभायाः प्रमाणत्वाप्रमाणत्वे न विवेचिते, अतः प्रमाणत्वमेव ग्राह्यम्, तस्य खण्डनाभावात्। उक्तञ्च दिनकर्याम्— 'बुद्धिर्ज्ञानम्। प्रतिभा तद्विशेषः स्फूर्त्याख्यः' इति[२]। ये तु केचिन्न्यायैकदेशिनः प्रतिभां न स्वीकुर्वते तद्वार्तम्, प्रतिभायाः प्रमाणाधिकरणत्वादिति।

वैशेषिकदर्शने प्रतिभा विलक्षणप्रमाणरूपेणं निरूपिता। लक्षणं चैतस्या न्यायकन्दल्याम्— 'इन्द्रियलिङ्गाद्यभावे यदर्थप्रतिभानं सा प्रतिभा। प्रतिभैव प्रातिभमि'ति[३]। आर्षज्ञानमेतत् सर्वेषु विषयेषु आत्ममनःसंयोगाद्धर्मविशेषाच्च जायते। लौकिकानामप्येतादृशं ज्ञानं प्रमाणमेव। यथा प्रशस्तपादभाष्यम् — तत्तु प्रस्तारेण देवर्षीणां कदाचिदेव लौकिकानां यथा कन्यका ब्रवीति — श्वो मे भ्राताऽऽगन्तेति हृदयं मे कथयतीति[४]।

प्रतिभा संस्कारविशेषस्तस्मान्निष्पन्नं ज्ञानं प्रातिभमेव, तत्तु नेन्द्रियजं (न प्रत्यक्षं) सन्निकर्षाभावात्। ये खलु बाह्येन्द्रियाणां व्यापाराभावेऽपि अन्तःकरणस्य व्यापाराद् भ्रातृविशिष्टमात्मानं देशं कालं वाऽवलम्ब्य ज्ञानस्यैतस्योत्पत्तिं मन्यमाना भ्रातुर्मनसा सह संयुक्तविशेषणविशेष्यभावसन्निकर्षं स्वीकुर्वन्ति, तन्न, तादृशज्ञानस्य प्रत्यक्षाभावात्। एवमेव व्योमशिवाचार्येण प्रतिभाया अनुमानादिष्वप्यन्तर्भावो निराकृतः। तद्यथा — 'न च बहिर्विषये विशेषणेऽपि मनसः स्वातन्त्र्येण व्यापारः सम्भवतीत्युक्तम्। लिङ्गलिङ्गिसम्बन्धानुस्मरणाभावाच्च नानुमानजम्। शब्दं विनाऽप्युत्पत्तेर्न शाब्दम्। अतः प्रमाणान्तरफलमेतत्। तथा च प्रश्ने कृते सति न प्रत्यक्षादिकं निर्दिशत्यपि तु हृदयं मे कथयतीति ब्रूते इति'[५]।

बौद्धदर्शने चतसृषु प्रतिसंवित्सु तुरीया प्रतिभानप्रतिसंविदस्ति। विसुद्धिमग्गे सा 'पटिभानपटिसंभिदा ति अत्थो'[६] इत्येवं निरूपिता। धर्मार्थनिरुक्तीनां संवित्सु

---

१. न्यायमञ्जरी, प्रथमो भागः, पृ. ९८।

२. न्यायसिद्धान्तमुक्तावली (मङ्गलवादः), १, दिनकरी-टीका।

३. न्यायकन्दली-पृ. ७७;

४. प्रशस्तपादभाष्यम्, पृ. ६२८।

५. व्योमवती, पृ. ६२२;

६. विसुद्धिमग्गो, १४।२५।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किमपि ज्ञानमालम्ब्य यत्पुनरीक्षणं भवति, तदालम्बनरूपज्ञानमेव प्रतिभान-प्रतिसंविदित्युच्यते। बौद्धाः शब्दज्ञानेनैव प्रतिभाया उत्पत्तिं मन्यन्ते। उक्तञ्च धर्मकीर्त्तिना—

यथा चोदनमाख्याश्च सोऽसतिभ्रान्तिकारणे।
प्रतिभाः प्रतिसन्धत्ते स्वानुरूपाः स्वभावतः[१]।।

एवमत्र शब्दः खलु आनुमानिकं लिङ्गम्। स चेत् सद्धेतुस्तर्हि तेन प्रतिभोत्पादकानामर्थानामनुमितिर्भवति। अतो बौद्धमते ज्ञानजन्यं ज्ञानमेव प्रतिभेति प्रतीयते। सा पुनः प्रमाणमपि।

अथ प्रतिभायाः प्रमाणत्वाप्रमाणत्वनिरूपणात्मकदार्शनिकविवेचनानन्तरं साहित्यशास्त्रीयं स्वरूपमुद्घाट्यते प्रवृत्तिमार्गावलम्बिनां सुकुमारमतीनां कान्तासम्मिततयोपदेशेन परमानन्दसन्दोहजनकतया काव्यशास्त्रेणैव चतुर्वर्गफलावाप्तिरिति स्फुटमेव। काव्यस्य प्रणयने तस्यावबोधे च वर्तते महन्महत्त्वं प्रतिभायाः। प्रतिभाविशेष एव महाकवित्वस्य सम्पादक इति प्रतिपादयता भारतीयालङ्कारिकसरणिव्यवस्थापकेन श्रीमदानन्दवर्धनाचार्येण स्वकीये ध्वन्यालोकनाम्नि ग्रन्थे एवमाख्यातम्—

सरस्वतीस्वादुतदर्थवस्तु निःष्यन्दमाना महतां कवीनाम्।
अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम्[२]।।

सा प्रतिभा नानुमीयमानाऽपि तु तदावेशेन भासमानेत्यभिनवगुप्त-पादाचार्यः[३]। तेनैव वर्णनीयवस्तुनिष्ठः प्रज्ञाविशेषः प्रतिभानमित्यप्याकूतम्[४]।

ध्वनियोगेन वर्ण्यवस्तूनां नवनवीभावाद् वर्णने कवीनां प्रतिभा नूनमप्रतिहता भवति। गुणीभूतव्यङ्ग्येन सहितस्य ध्वनेर्मार्गेण कवीनां प्रतिभागुणोऽविच्छिन्नत्वं प्राप्नोतीति ध्वनिकारेण तत्रैव स्पष्टीकृतम्—

ध्वनेर्यः सगुणीभूतव्यङ्ग्यस्याध्वा प्रदर्शितः।
अनेनानन्त्यमायाति कवीनां प्रतिभा गुणः[५]।।

---

१. प्रमाणवार्त्तिकम्, २।१०९;
२. ध्वन्यालोकः, २।६।
३. तदेव, लोचनम्;
४. तदेव, लोचनम्, ४।२।
५. तदेव, ४।३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ प्रतिभा द्विविधा— कारयित्री (उद्भावयित्री), भावयित्री (ग्राहयित्री) च। तत्रापूर्ववस्तुनिर्माणसमर्था कवीनां प्रतिभा कारयित्री, रसिकानावेशयन्ती च भावयित्री। प्रतिभागुणेनैव काव्यार्थो वैविध्यमावहति। वक्तृबोद्धव्यादिवैलक्षण्येन प्रतिभाशालिनां व्यङ्ग्यार्थप्रतीतिर्भवति। जयदेवेन प्रतिभैव केवलं काव्यहेतुत्वेनोपवर्णिता। तद्यथा—

प्रतिभैव श्रुताभ्याससहिता कवितां प्रति।
हेतुर्मृदम्बुसम्बद्धा बीजमाला लतामिव[१]।।

काव्यप्रकाशकारेण मम्मटाचार्येण तु—

शक्तिर्निपुणतालोकशास्त्रकाव्याद्यवेक्षणात्।
काव्यज्ञशिक्षयाऽभ्यास इति हेतुस्तदुद्भवे[२]।।

इत्येतस्यां कारिकायां शक्तिपदवाच्या प्रतिभैव काव्यहेतुरूपेण प्राथम्येन निरूपिता। शक्नोति पुमान् काव्यनिर्माणायाऽऽस्वादानुभवायानयेति शक्तिः कवित्वबीजभूता प्रतिभाऽपरपर्याया संस्काररूपा। नन्वेतस्याः शक्तेः काव्यनिर्माणहेतुत्वे किं प्रमाणमिति चेत्, न, निपुणताऽऽदिसमवधानेऽपि शक्त्यभावात् कथञ्चिदाकृष्टैः पदैर्निर्मितानां पद्यानामुपहसनीयत्वात्। काव्यनिर्माणे तदर्थनिष्पत्तौ च शक्तिरेव बीजम्, न च कारणान्तरमिति वाच्यम्। रसगङ्गाधरकारोऽपि प्रतिभामेव केवलं काव्यहेतुत्वेन स्वीकुरुते। तद्यथा— 'तस्य च कारणं केवला कविगता प्रतिभा। सा च काव्यघटनानुकूलशब्दार्थोपस्थितिः।........तस्याश्च हेतुः क्वचिद् देवतामहापुरुषप्रसादादिजन्यमदृष्टं क्वचिच्च विलक्षणव्युत्पत्तिकाव्यकरणाभ्यासौ। बालादेस्तौ विनाऽपि केवलान्महापुरुषप्रसादादपि प्रतिभोत्पत्तेः।........ प्रतिभात्वं च कवितायाः कारणतावच्छेदकम्, प्रतिभागतवैलक्षण्यमेव वा विलक्षणकाव्यं प्रति हेतुरि'ति[३]।

सेयं प्रतिभा सर्वत्र प्रमाणप्रमेयादिकं विभावयन्ती न तर्केणापह्नवनीया, प्रत्युत प्रतिजीवं सा निरन्तरं विद्यमानाऽवभासते। छायायामारोपितोऽपि वृक्षः प्रतिभाऽधीन एव प्रकाशमभिवर्द्धते छायां च जहदिव नः प्रतिभाति। आ स्थावरेभ्य आ च ब्रह्मणः खल्वियं प्रतिभा परमेश्वरस्य स्वरूपविलास एव नान्यत्। अत एवोक्तं प्रत्यभिज्ञाहृदये उद्धरणरूपेण —

---

१. चन्द्रालोकः, १।६। २. काव्यप्रकाशः, १।३।
३. रसगङ्गाधरः, प्रथमाननम्, पृ. ९-१०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

या चैषा प्रतिभा तत्तत्पदार्थक्रमरूषिता।
अक्रमानन्तचिद्रूपः प्रमाता स महेश्वरः[१]।।

क्रमरहितोऽनन्तचैतन्यस्वरूपलक्षणो महेश्वरः प्रमाता। प्रतिभाऽपि तस्यैव विलास इति तात्पर्यम्। ये खलु तार्किकास्तस्याः प्रामाण्यचिन्तने बद्धपरिकरा दृश्यन्ते, तान् प्रतीदमेव वक्तुं युज्यते— इयं प्रतिभा सर्वप्रमाणसाधारणी बोधमात्रस्याधिष्ठानभूता काचन औत्पत्तिकी (नित्या) स्फूर्त्तिः। तया विना का नाम प्रमाणादेश्चर्चा स्यादित्यलम्।

१. प्रत्यभिज्ञाहृदयम्, २०, वृत्तावुद्धरणम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वातन्त्र्यशौर्यम्

पण्डितश्रीशिवजी-उपाध्यायः

आचार्योऽध्यक्षश्च, साहित्यविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणसी

❀ ❀ ❀

नान्दी

स्वातन्त्र्यक्रतुकुण्डदीप्तदहनज्वालोल्लसद्भूतिभृद्-
विष्वग्विश्वजनीनविश्रुतयशोभास्वद्विवस्वद्विभुम्।
शश्वद् भूरितरप्रभावविकसत् सौहार्दशान्तिप्रियं
भूयाद् भारतराष्ट्रमेतदनिशं विभ्रज्जगद्गौरवम्।।१।।

किञ्च—

स्वाधीनता जनिभृतां ननु जन्मसिद्धः
स्वात्माधिकार इति शाश्वतमन्त्रघोषः।
येन व्यधायि जगतो जनजागराय
सोऽयं चिरञ्जयति भारतभव्यदेशः।।२।।

अपि च—

न खलु खलजनानामुग्रघातप्रघातै-
र्जनितसुजनतार्तिर्जातु दृष्टिं प्रयातु।
न च जगति कुतश्चिद् राष्ट्रतो राष्ट्रमन्यत्
परिभवमनुभूयादीश्वरीयानुभावात्।।३।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किं वा—

क्षेप्यास्त्रकाणविकशस्त्रवितानजन्य-
जन्यातिशङ्कितमनो जगदस्तु सुस्थम्।
नैवायुधोद्धतयुधि प्रधनप्रधानो
भूयो विनाशकृदहो प्रलयोऽभ्युदेतु।।४।।

अन्ते च—

स्वातन्त्र्यशौर्योदितसूर्यरश्मि-
प्रभाप्रभातप्रसरत्प्रकाशात्।
प्रकाशयद् विश्वमनारतं तद्
विभारतं भारतमाविभातु।।५।।

(नान्द्यन्ते प्रविशति सूत्रधारः)

सूत्रधारः— (पृष्ठतः शीघ्रं प्रविश्य) अलमलमतिविस्तरेण,

स्वातन्त्र्यशौर्योदितसूर्यरश्मि-
प्रभाप्रभातप्रसरत्प्रकाशात्।
प्रकाशयद् विश्वमनारतं तद्
विभारतं भारतमाविभातु।।६।।

(इति पद्यं मन्दस्वरेण पठन् यावत् परिक्रामति, तावत् प्रविशति नटी)।

नटी— (सूत्रधारमभिमुखीभूय प्रणम्य च) आर्य! स्वातन्त्र्यशौर्यमित्यादिना किं भवान् पठति?

सूत्रधारः— (सहर्षम्) आर्ये! इदं किल पठामि, शृणु तावत् (सम्पूर्णं पद्यं तारस्वरेण पुनः पठति)।

नटी— (आकर्ण्य सोल्लासम्) आर्य! इदं पद्यं तु सम्प्रति सम्प्रतिपन्नस्वातन्त्र्यशौर्यसमेधमानस्य स्वाभिमानविभारतस्य भारतस्य किमपि पराक्रमप्रभवं गौरवं स्मारयति।

सूत्रधारः— (सोत्साहम्) अथ किम्! अद्य खलु भारतं विश्वस्य बृहत्तमं प्रजातान्त्रिकं राष्ट्रं स्वात्मनः पञ्चाशद्वर्षात्मकं स्वर्णजयन्त्युत्सवं सम्मनुते। तदद्य तत्पराक्रमप्रभवं गौरवं सुतरां स्मरणीयमेव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नटी— (सस्मितोल्लासम्) आर्य! समयोचितं साधूक्तं तत्रभवता, ध्रुवमात्मनः पराक्रमगौरवस्मरणेन न केवलं भारतस्य प्रत्युत भारतीयस्वातन्त्र्यशूराणामपि शौर्यगौरवस्मृतिर्जागर्ति, तेषामेव समर्पितसर्वस्वसम्पदां शूराणां सप्राणार्पणं बलिदानेन साम्प्रतिकीयं स्वातन्त्र्यस्वर्णजयन्ती अस्माभिः सम्भूय सम्भाव्यते।

सूत्रधारः— (समधिकोल्लासेन) आर्ये! आश्चर्यम्..........आश्चर्यम्, स्थाने किल स्मारितं स्वातन्त्र्यशूराणां शौर्यगौरवं तत्रभवत्या, नूनमस्माभिस्तद् गौरवस्मृतिरेव स्वातन्त्र्यस्वर्णजयन्त्यवसरोचितं सम्भावनीयेति वयं कृताभिनयसन्नाहा अत्र मञ्चोपरि वर्तामहे, तत् सत्सु बहुषु स्वातन्त्र्यशूरेषु कतमस्य गौरवस्मृत्या पुनरस्माभिरनुरञ्जनीया एषा वरिष्ठविद्वद्भूयिष्ठा सचेतसां परिषत्? इत्यचिरमुच्यताम्।

नटी— (सकौतुकम्) ननु आर्य! नूनमेषा वरिष्ठविद्वद्भूयिष्ठा परिषद् गीर्वाणवागुपासकानाम्, तदेतादृशस्यैव स्वातन्त्र्यशूरस्य गौरवस्मृत्या सेयं परितोषणीयेति ममोचितं प्रतिभाति।

सूत्रधारः— (सहर्षम्) आर्ये! सत्यमस्मद्हृदयसंवादीदं त्वद्वचनमाकर्ण्य मोमुद्यते नश्चेतः, तदवश्यं तादृशेनाभिनयसंविधानकेनात्रोपस्थातव्यमस्माभिः। तथा हि—

गीर्वाणवागधिगतात्मनवप्रबोधः
स्वातन्त्र्यशौर्यमतनोन्निजबाल्यकाले।
यश्चन्द्रशेखर इति श्रुतनामधाम्ना
लोकं प्रकाशयति सूर इवैकशूरः।।७।।

अतश्च—

तस्योदात्तचरित्रचिन्तनपरं शौर्यप्रकर्षोज्ज्वलं
सङ्घर्षप्रवणं स्वदेशसुयशोविस्तारिहारिस्वरम्।
स्वाधीनोत्तमजीवनं जनिमतामुद्यद्द्युरत्नप्रभं
आजादाह्वयचन्द्रशेखरमहाशूरस्य शौर्यं महत्।।८।।

तेन खलु—

स्वातन्त्र्यशौर्यप्रथिताभिधाने दृश्यात्मनैकाङ्क्षिनि नाटकेऽस्मिन्।
तद् विक्रमात्माहुतिपुण्यपूतं चारित्र्यमुच्चैरभिनेयमस्ति।।९।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथा च—

संवीक्ष्य संस्कृतात्मानस्तदेतद् दृश्यमुत्तमम्।
भारतीमातुरर्चायां जीवनं विनिवेद्यताम्।।१०।।

नटी— यथाऽऽज्ञापयति आर्यः। (उभौ निष्क्रान्तौ)

।। इति प्रस्तावना ।।

।। प्रथमं दृश्यम् ।।

[स्थानम् - वाराणसीस्था संस्कृतपाठशाला]

[एकस्याचार्यस्य अधिपीठासनमासीनस्य पुरतः पञ्च छात्राः किमपि उच्चैः पठन्तस्तिष्ठन्ति। एकोऽपरिचितो बालकः प्रविशति, आचार्यं प्रणमति च]

आचार्यः— (साशीर्दानमापृच्छति) अयि भोः! कस्त्वम्? कुत आगतः? किन्ते नामधेयम्?

बालकः— (सविनयम्) आचार्यवर! अहमस्मि ब्राह्मणबालकः मध्यप्रदेशस्य भाँवराग्रामवास्तव्यः। ततो जीविकोपार्जनाय मुम्बईनगरं गतः। परमध्येतुकामोऽहं ततः परावृत्य वाराणसीमागतोऽस्मि। केनापि सज्जनेन तत्रभवतो भवद्विद्यालयस्य च भूरिशः प्रशंसा कृता। तदाकर्ण्य भवत्सकाशमुपागतोऽस्मि। मम नाम '**चन्द्रशेखरतिवारी**' इत्यस्ति।

आचार्यः— (साश्चर्यम्) अये! यथानुमानं चतुर्दशपञ्चदशवर्षवयास्त्वम् एकाकी एव मुम्बईं गतः! ततश्चात्र प्रत्यागतः!! इति कुतः सम्भाव्यते?

चन्द्रशेखरः— (सोत्साहम्) आचार्यवर! किं न सम्भाव्यते भारतभूमेर्वीर-बालकानाम्, पश्यतु भवान् —

ऊनषोडशवर्षीयोऽभिमन्युर्नाम बालकः।
चक्रव्यूहं विनिर्भिद्य स्वीयं शौर्यमदर्शयत्।।११।।

तदहं तदवस्थापन्नो मुम्बईमुपेत्य ततः पुनरिहागतः, इत्यत्र किमसम्भाव्यम्?

आचार्यः— (सहर्षं वीक्ष्य) वीरबालक! चन्द्रशेखर! सत्यम्, वस्तुतस्त्वं भगवतश्चन्द्रशेखरस्य प्रसादांशसम्भूतो निर्भयो वीर्यवान् बालकोऽसि। अहं त्वत्तः प्रसन्नोऽस्मि। अद्य प्रभृति त्वमत्र विद्यालयस्य छात्रावासे निवसन् वीतचिन्तः संस्कृताध्ययनं कुरुष्व। (एकं छात्रमभिमुखीभूय) वत्स महेश! चन्द्रशेखरं त्वं छात्रावासं नय। अयं त्वयैव सह निवत्स्यति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महेशः— (ज्येष्ठोऽपि तत्प्रभावाविष्टः) वयस्य! एहि, अद्यारभ्य त्वं मया सह छात्रावासे मम कक्ष एव निवत्स्यसि। आगच्छ, नित्यक्रियादिकं सम्पाद्य किञ्चिदल्पाहारं गृहाण, मध्याह्ने सामूहिकं भोजनं सम्पत्स्यते। इदानीं त्वं मम मित्रं संवृतोऽसि। (चन्द्रशेखर आचार्यं प्रणम्य महेशेन सह गच्छति)

चन्द्रशेखरः— (महेशम्) ननु भवान् मदपेक्षया वयोज्यायान्, कस्यां कक्षायां पठति? भवानत्रत्यो बाह्यो वा?

महेशः— अहं शास्त्रिकक्षायां पठामि। अत्रत्य एवास्मि। वाराणसीवास्तव्यः।

चन्द्रशेखरः— (साश्चर्यम्) अये! भवान् शास्त्रिकक्षायां पठति? अहन्तु प्रथमकक्षायां पठितुमागतोऽस्मि। मदपेक्षया भवान् न केवलं वयोज्यायान्, प्रत्युत योग्यतरोऽप्यस्ति।

महेशः— (सव्रीडम्) वयस्य चन्द्रशेखर! मैवं ब्रूहि। आचार्यवराणां समक्षं त्वया आत्मनो योग्यता प्रमाणिता। न कोऽपि छात्रस्त्वादृशो निर्भीकस्त्वद्योग्यताको वा भवितुमर्हति। यथा त्वया आचार्यवरः प्रभावितस्तथा न केनापीति साक्षान्मया दृष्टम्। यतो हि —

न शिक्षया नापि वयःसमीक्षया
न जन्मना नैव कुलप्रतिष्ठया।
सुयोग्यता सा तु समिद्धतेजसा
प्रमाणिता कस्यचन प्रसिद्ध्यति।।१२।।

अतश्च तादृशेन निर्भीकतेजसा नूनमस्मदपेक्षया योग्यतम इति निश्चप्रचम्।

चन्द्रशेखरः— (सविनयम्) मित्रवर महेश! अक्षरवैषम्येऽपि समानार्थकमावयोर्नामधेयम्, तद् योग्यता कुतोऽतिरिच्यते? साऽपि समाना स्यादेव। वस्तुतस्तु ज्येष्ठतया भवान् ममाग्रज इत्यधियोग्यताकत्वं मदपेक्षया भवदीयं सुतरां प्रतितिष्ठति। यतो हि —

समानशीलेषु कुलेषु जातिषु
प्रतिष्ठितोच्चैः पदवीं श्रितेष्वपि।
सदाग्रपूज्यो ध्रुवमग्रजो भवेद्
भवानतस्तादृश एव मत्कृते।।१३।।

अतो भवान् ममाग्रजो मदपेक्षया योग्यतरो मम पूज्यश्चेति निश्चप्रचम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महेशः— (सहासम्) वयस्य चन्द्रशेखर! वस्तुतस्त्वं प्रज्ञया पारदृश्वा कश्चिद् विपश्चिदिव प्रतिभासि। बाल्येऽपि तवेदृशी तीक्ष्णमतिर्मतिमतामप्याश्चर्य-जनिका। (उभौ परस्परं पश्यन्तौ प्रहसन्तौ च निष्क्रान्तौ)।

चन्द्रशेखरः— (परेद्युः सपुस्तकः प्रविश्य) आचार्यवर! चन्द्रशेखरोऽहं भवन्तं प्रणमामि।

आचार्यः— (सस्नेहं वीक्ष्य) चन्द्रशेखर! अपि कुशलं ते? महेशेन त्वदावास-भोजनादिव्यवस्था साधीयसी सम्पादिता? यदि त्वया किमप्यन्यथाऽनुभूतं तन्निःशङ्कमभिधीयताम्।

चन्द्रशेखरः— आचार्यवर! महेशसदृशे सहृदयोदारसुहृदि विद्यमाने सति सर्वथा मे कुशलं समेधते। अनेन मम सर्वा व्यवस्था आत्मनोऽप्यधिकतरा निष्पादिता। न किञ्चिदन्यथाऽनुभूतम्। परमा तुष्टिरधिगता।

आचार्यः— साधु, प्रसन्नोऽस्मि। (तस्य हस्ते पुस्तकं विलोक्य) किमिदं पुस्तकं गृहीतम्? अपि किञ्चित् संस्कृतं जानासि?

चन्द्रशेखरः— आचार्यवर! पुस्तकमिदम् 'अमरकोष' इति मित्रवरेण महेशेन प्रदत्तम्। ब्राह्मणकुलोद्भूततया संस्कृतेन सह अल्पः परिचयोऽस्ति। संस्कारसहकृताऽऽ-त्मज्ञानप्रतिभानजननार्थं संस्कृतमिति तदर्थमवैमि। तत्र भवतः सन्निधाने तत्प्रबोधोऽपि भविष्यतीति विश्वसिमि। (सर्वे छात्राश्चकिताः पश्यन्ति)

आचार्यः— (साश्चर्यं चक्षुःस्फारं तं पश्यन् स्वगतम्) नूनमेषोऽसाधारणः श्लक्ष्ण-लक्षणो विलक्षणो बालः परं वैचक्षण्यं बिभर्ति। (प्रकाशम्) साधूक्तं वत्स! परं संस्कृतशब्दस्यायमर्थस्त्वया कुतो ज्ञातः? कुत्रचिदन्यत्रापि पूर्वमधीतम्?

चन्द्रशेखरः — न हि, न हि आचार्यवर! इतः पूर्वं न कुत्रचित् किमप्यधीतम्। यथाप्रतिभानं तदर्थो निगदितः। भवदनुग्रह एवात्र हेतुरिति मन्यताम्।

आचार्यः— वत्स चन्द्रशेखर! यथा पूर्वं प्रथमदृष्ट्या त्वामवलोक्य मयाऽवगतम्, तथैव सत्यं त्वं भगवतश्चन्द्रशेखरस्य अंशसम्भूतः प्रभूतप्रतिभानवानसि। त्वादृशा बालकाः स्वजातेः कुलस्य देशस्य च गौरवमुन्नेतु-माविर्भवन्ति। अद्यत्वे यद् देशस्य गौरवं पारतन्त्र्यपाशप्रधर्षितं चतुरस्रमधरीकृतं दृश्यते, तद्रक्षणार्थमपेक्ष्यन्ते त्वादृक्षा एव तेजःशौर्यशालिनो बालयुवानः।

चन्द्रशेखरः— आचार्यवर! ननु कृपया स्पष्टार्थमुच्यताम्, पारतन्त्र्यपाशप्रधर्षितं देशस्य गौरवं चतुरस्रमधरीकृतमिति कथम्? किन्नु तत्कारणम्? तद्रक्षणार्थं कुतो नु मादृक्षा बालयुवानोऽपेक्ष्यन्ते?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आचार्यः— (सोच्छ्वासम्) वत्स चन्द्रशेखर! सम्प्रति वैदेशिककुशासनेन देशस्य गौरवं पारतन्त्र्यपाशप्रधर्षितं चतुरस्रमधरीक्रियमाणं वर्तते। तत्र तत्कुशासनमुत्पाट्य राष्ट्रे स्वातन्त्र्यप्रतिष्ठां विधातुं त्वादृशा बालयुवानो नितरामपेक्ष्यन्ते। यतो हि —

यद्राष्ट्रं भारताख्यं त्रिभुवनविदितं चारुचारित्र्यशालि-
श्रौतज्ञानप्रकाशादधिजगति दधौ मानवानां गुरुत्वम्।
यत्र श्रीरामकृष्णप्रभृतिनरवराः पूर्वलब्धावतारा-
स्तन्म्लेच्छैः पारतन्त्र्यप्रशमितविभवं शास्यते निर्विशङ्कम्।।१४।।

अपि च — (परितः परिक्रम्य)

बाला युवानः स्थविराः स्त्रियो वा
वैदेशिकैः क्रूरशठैर्हठेन।
निपीड्यमानाः किल पारवश्याद्
अजस्रमस्रं परिवाहयन्ति।।१५।।

अन्यच्च —

कारागृहेषु ननु केऽपि चिरान्निरुद्धाः
अन्ये प्रपीड्य निहताश्च दिवं प्रयाताः।
केचिन्निलीय निवसन्ति परे तु मौनं
तिष्ठन्ति हन्त! विपदः परतन्त्रतायाः।।१६।।

(भूयो दीर्घं निःश्वस्य)

वत्स चन्द्र! बलिनश्च बालकास्त्वादृशाः परबलप्रमाथिनः।
राष्ट्रगौरवपदाभिरक्षणे साम्प्रतं हि नितरामपेक्षिताः।।१७।।

अतस्त्वं तादृशयोग्यतासंवर्द्धनाय परां शक्तिमासाद्य देशस्य गौरवं पुनरुद्धर्तुं यतस्व।

चन्द्रशेखरः— (सोत्साहधीरभावम्) आचार्यवर! तत्रभवता यादृशः पाठोऽहमद्य पाठितस्तेन निखिलतत्त्वाधिगमो जातः। सोऽहं भवत्समक्षं भवन्तमेव साक्षीकृत्य प्रतिजाने —

यावन्न वैदेशिकशासनोत्थं दुःखानलं प्रज्वलितं प्रशाम्य।
देशोन्नमद्गौरवमभ्युदीयात् तावन्न शान्तिर्मम चेतसः स्यात्।।१८।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किञ्च (क्षणं विचिन्त्य) हा........दैव!

सपदि भारतमातुरुदित्वरं
महिममण्डितविद्युतिभाश्वरम्।
सुचिरवैभवभासि यशः परं
पुनरुदेतुतरामिति चिन्तये।।१९।।

अतश्च (दृढं गाम्भीर्यं दर्शयन्)—

ब्रह्मचर्यं च कौमार्यं ध्रुवमेतद् व्रतद्वयम्।
बिभ्रदाजीवनं देशोद्धारायात्मानमर्पये।।२०।।

(आचार्यस्य पादयोः पतति। सर्वे आश्चर्यचकिताः पश्यन्ति पुष्पवृष्टिर्भवति)।

आचार्यः— (सोल्लासमुत्थाप्य परिष्वजन्) वत्स चन्द्रशेखर! इदं भीष्मप्रतिज्ञाद्वयमुद्घोषयन् त्वं नूनमद्य सत्यव्रतं भीष्ममतिक्रम्य वर्तसे। यतो हि—

भीष्मः पुरा राजपदं प्रहातुं यद् ब्रह्मचर्यव्रतमाचचार।
तदेकमद्य द्वितयोदयेन परास्तमस्ति ध्रुवमित्यवैमि।।२१।।

तदहं तवानेन शौर्यातिशयोचितेन व्रतद्वयेन प्रमुदितान्तरात्मना भीष्मसदृशम् इच्छामृत्युवरप्रदानेन त्वां संवर्द्धयामि।

युद्धमध्यं गतोऽपि त्वं शत्रुभिः परिवारितः।
पराभवमनासाद्य स्वेच्छामृत्युमवाप्स्यसि।।२२।।

[तच्छिरसि पाणिं निदधाति]

चन्द्रशेखरः— (जानुभ्यामुपविश्य सपादस्पर्शं प्रणम्य च हर्षातिशयमभिव्यञ्जयन्) आचार्यवर! तत्रभवता प्रदत्तोऽयं वरः शिरसा धार्यते। यावज्जीवनं स्वव्रतद्वयं पालयता मया वैदेशिकगौराङ्गशत्रुशासकैः पराक्रान्तां भारतमातृभुवमुन्मोचयितुं तद्गौरवं पुनः प्रतिष्ठापयितुं च प्राणार्पणपुरस्सरं प्रयतिष्ये।

आचार्यः— साधु वत्स! साधु।

।। पटाक्षेपः ।।

।। इति प्रथमं दृश्यम् ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। द्वितीयं दृश्यम् ।।

[स्थानम् — काशीस्थो न्यायालयः। न्यायाधीश आसन्दिकामधितिष्ठति। अधिसंख्याकाः स्वातन्त्र्यान्दोलनकारिणो दण्डिताः। अन्ते चन्द्रशेखरस्तस्य पुरः प्रत्यानीतो निर्भीकः शान्तगम्भीराकृतिरुपतिष्ठते।]

न्यायाधीशः— (साश्चर्यम्) अये! त्वमल्पवयस्को बालकः कथमान्दोलनकारिभिः सह सत्याग्रहापराधे गृहीतभागोऽसि?

चन्द्रशेखरः— (शान्तगभीरभावं न्यायाधीशं पश्यन्) श्रीमन्! पारतन्त्र्य-पाशप्रधर्षितस्य स्वदेशस्योद्धाराय समर्पितजीवनस्य मादृशस्य बालकस्याल्पवयो न निर्दिष्टलक्ष्यमवरुणद्धि। सत्याग्रहश्च अपराधशब्देन भवता नैव दूषणीयः। यतो हि—

सत्यमुद्दिश्य सत्यार्थं सर्वस्वत्यागपूर्वकम्।
सत्यमागृह्यते येन स वै सत्याग्रहो मतः।।२३।।

तस्मान्न सत्याग्रहो मिथ्याग्रहेण गर्हणीयः।

न्यायाधीशः— (साश्चर्यम्) हंहो, बालक! त्वं तु वस्तुतो युवकानप्यतिशेषे। मामपि शिक्षयसि। शासनविरुद्धमाचरणं सत्याग्रहसंज्ञयाऽभिधीयमानमपि अपराधकोटौ परिगण्यते,

(झटिति मध्ये आक्षिप्य)

चन्द्रशेखरः— (सावेशम्) महाशय! परशासनमिदं न स्वशासनमिति वक्तुं युज्यते, तस्मात् परकृतं शासनं पारतन्त्र्यम्, तद्विरुद्धमाचरणं सत्याग्रह एव इति मन्तव्यम्।

न्यायाधीशः— (सरोषमुच्चैः स्वरेण) अरे रे धृष्ट बालक! मौनमालम्बस्व। एष हि न्यायालयः। तस्यावमाननां कर्तुं नास्ति कस्याप्यधिकारः। यद्यपि त्वं प्रगल्भः कृतापराधश्च, तथाप्यहं तव तीक्ष्णबुद्ध्या तुष्टोऽस्मि। त्वन्नाम किमस्ति?

चन्द्रशेखरः — (सोत्साहम्)

अजानामिव शत्रूणां व्यूहमाजमदन्नहम्।
'आजाद' इति विख्यातं तन्मे नामेति बुध्यताम्।।२४।।

न्यायाधीशः— (सव्यङ्ग्यं विहस्य) अहो! अस्तु, तव पितुर्नाम किमस्ति?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चन्द्रशेखरः — (सद्विगुणोत्साहम्)

आत्मा वै जायते पुत्रः, पितृत्वं चात्मनिष्ठितम्।
आत्मा स्वाधीनता ख्यातो मत्पिताऽस्तीति मन्यताम्।।२५।।

न्यायाधीशः— (सोपहासम्) साधु, साधु। श्रुतं तवौद्धत्यपूर्णं वचः। अपि त्वद्गृहं कुत्रास्ति?

चन्द्रशेखरः— (सत्रिगुणोत्साहम्) यत्र हि —

स्वीधीनवृत्तिराजादो न्यायव्याजान्निगृह्यते।
निराधारादतः कारागारमेव गृहं मम।।२६।।

न्यायाधीशः— (सोपष्टम्भम्) ननु रे धृष्टबालक! मौनमास्स्व। अलं बहुना तव प्रलापेन। अल्पवयस्कत्वादेव त्वामहं मर्षयामि। यदि स्वस्यापराधस्य कृते क्षमां याचसे, तदा त्वां मोचयिष्यामि। अन्यथा यथार्हं दण्डभाग् भविष्यसि।

चन्द्रशेखरः— (सगर्वम्) महाशय! न्यायाधीश! नूनमपरिचितोऽस्ति भवान् मादृशानां भारतार्यभूमेर्वीरबालकानाम्। श्रूयतां तावत् —

रणे पुरस्तान्मरणं वरेण्यं
विनिघ्नतः शत्रुजनं ममास्तु।
तथापि रक्षार्थमहं कदापि
क्षमां भवादृक्षजनं न याचे।।२७।।

न्यायाधीशः — (सरोषम्) एवम्, तद्भुङ्क्ष्व त्वमात्मनो धृष्टतायाः फलम्। नीयतामयं बालकः, नग्नपृष्ठोपरि पञ्चदशवेत्रप्रहारैर्दण्डविधिं विधाय प्रमुच्यताम्। (न्यायाधीश उत्थाय निष्क्रान्तः। आरक्षिद्वयेन चन्द्रशेखरो निगृहीतहस्तयुगो दण्डदानस्थलं नीयते)।

प्रथम आरक्षी— (काराधीक्षकमभिवाद्य) श्रीमन्! बालकोऽयं सत्याग्रहापराधात् पञ्चदशवेत्रप्रहारैर्दण्डनीय इत्यादिष्टं श्रीमता न्यायाधीशेन तदर्थं भवता दण्डविधिर्विधीयताम्।

काराधीक्षकः— (भटमाह्वयन्) भट! एहि सत्वरम्।

भटः— (सवेत्रदण्डं प्रविश्य काराधीक्षकमभिवाद्य च) श्रीमन्! किमाज्ञापयति भवान्। तत्कृते सज्जीभूतोऽहमस्मि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काराधीक्षकः — एष बालकः सत्याग्रहापराधात् पञ्चदशवेत्रप्रहारैर्दण्डनीय इत्यादिष्टं न्यायाधीशमहाशयेन। तदस्य नग्नपृष्ठोपरि मत्समक्षं त्वं पञ्चदशवेत्रप्रहारान् कुरुष्व।

भटः — यथाज्ञापयति श्रीमान्। [भटः हस्तेनागृह्य निर्दिष्टदण्डस्थलं नीत्वा तत्कञ्चुकमवमोचयति, बालकश्च गभीरमौनं तिष्ठति]।

काराधीक्षकः — (उच्चादेशस्वरेण) भो भट! तैलाक्तं वेत्रदण्डमादाय अविराम-मैकैकः प्रहारस्त्वया कार्यः। घटीमालोक्य संख्यापूर्तौ सत्यां यदाऽहं निर्देक्ष्यामि तदा त्वं विरमिष्यसि।

भटः— (प्रहारोद्यतः) ननु भो बालक! सावधानो भूत्वा इदानीं वेत्रप्रहारान् सहस्व।

चन्द्रशेखरः— (सोत्साहम्) हंहो! भटापसद! सर्वथा सावधानोऽस्मि। त्वं सम्पूर्णबलोद्धतं वेत्रप्रहारान् विधेहि।

[भटो वेत्रप्रहारान् करोति। चन्द्रशेखरश्च प्रतिप्रहारं 'जयतु भारतम् भारतमाता विजयताम्' इति चोच्चैरुद्घोषयति। काराधीक्षको घटीमालोकयन् प्रहारान् गणयति]।

काराधीक्षकः— (दक्षिणहस्तमुत्थाप्य) भो भट! विरम त्वमिदानीम्। नियतसंख्या-पूर्तिर्जाता। (चन्द्रशेखरस्य वैकल्यरहितं स्वरूपं दृष्ट्वा साश्चर्यं स्वगतम्) अहो! नैतादृशोऽद्भुतसाहसोत्साहशौर्यसम्पन्नोऽपूर्वधैर्यवान् वीरबालो मया दृष्टपूर्वः। प्रबलवेत्रप्रहारेऽपि अनेन नैकोऽपि शीत्कारशब्दः कृतः। (प्रकाशम्) भो बालक! गच्छेदानीं यथेच्छम्, सम्प्रति दण्डमुक्तः संवृत्तोऽसि। इमान् चतुःपणकान् गृहाण वेत्रपातसञ्जातप्रघातचिकित्सायै। (इति चतुःपणकान् तस्मै ददाति ।)

चन्द्रशेखरः— (सरोषं पणकान् तन्मुखोपरि प्रक्षिप्य गर्जन्निव) अये क्रूरकाराधीक्षक! रक्षैतान् धातुखण्डान् त्वमात्मनो मुक्त्यर्थम्। अहन्तु समर्पितात्मजीवनोऽस्मि भारतमातृमुक्त्यर्थम्। श्रूयतां सकर्णस्फारं ममोद्देश्यम् —

जयतु भरतभूमिर्मातृरूपाऽभिवन्द्या
जयतु जगति वन्द्यं भारताखण्डराष्ट्रम्।
चिरविलयमुपैतु क्रूरवैदेशिकानां
कुटिलकुनयकूटोद्दामदुःशासनं च।।२८।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किञ्च —

एकैकवेत्रप्रखरप्रहारप्रघातजातव्रणरक्तबिन्दून्।
गौराङ्गशत्रून् शतशो निहत्य प्रतर्पयिष्ये प्रतिकर्तुकामः।।२९।।

[नेपथ्ये जनसमूहस्तारस्वरेण 'चन्द्रशेखर आजादो विजयताम्', 'चन्द्रशेखर आजादः अमरोऽस्तु', 'भारतमातुर्जयोऽस्तु', 'भारतराष्ट्रं स्वतन्त्रमस्तु' इति महान् कलकलः श्रूयते। एतन्मध्ये कारागारपरिसराद् बहिरेकः प्रौढपुरुषः प्रविशति]।

प्रौढः पुरुषः— (हर्षातिरेकं दर्शयन्) चन्द्रशेखर! न त्वादृशो वीरबालकः क्वचिद् दृष्टः श्रुतो वा। ध्रुवमेषा भारतधरित्री त्वज्जनुषा धन्यधन्या जाता। त्वादृशेऽपूर्वशौर्यशालिनि वीरबालके सति भारतमाता नातिचिरं पारतन्त्र्यकदर्थिता स्थास्यति। एहि वीर! एहि, बहिस्तु करगृहीतपुष्पस्रजः सहस्राधिका जनास्ते स्वागताभिनन्दनं कर्तुं प्रतीक्षन्ते।

चन्द्रशेखरः— (श्लथकायोऽपि प्रौढपुरुषमवलोकयन्) महानुभाव! नूनं भवान् निजाकारचेष्टितेन कश्चिन्महापुरुषः प्रतिभाति। ममापरिचितोऽपि चिरपरिचित इव व्यवहरन् मामनुग्रहीतुमत्र सम्प्राप्तः।

प्रौढः पुरुषः— वीरवर चन्द्रशेखर! अहमस्मि नगरस्यास्य प्रधानश्रेष्ठी शिवप्रसाद-गुप्तसंज्ञकः। अद्य किल तवातिशयशौर्येण प्रभावाविष्टोऽहं त्वां प्रतिग्रहीतु-मत्रागतः। नागरिकाभिनन्दनेन त्वदीयं सभाजनं कर्तुमुत्सुका नागरिकाः स्वप्रातिनिध्येन मां त्वामानेतुं न्ययोजयन्। नाद्य ते कश्चिदपरिचितः। सर्वेऽपि पौरास्त्वन्नामयशोविक्रमेण परिचिताः सगर्वमात्मगौरवमामनन्ति।

चन्द्रशेखरः— (पीडां निगूहयन्) महानुभाव! भवदनुग्रहेण कृतार्थोऽस्मि। भारतमातुः पारतन्त्र्यपाशोन्मोचनाय समर्पितात्मनो ममोत्साहसंवर्धनं विधातुं पवित्रलक्ष्याधिगमाय प्रेरणां प्रदातुं च भवादृशा महामानवा मादृशानामादर्शदर्शका भवन्ति।

शिवप्रसादगुप्तः— (प्रहर्षभरेण) वीरचन्द्रशेखर! अद्य न केवलं वाराणस्याः प्रत्युत सम्पूर्णदेशस्य प्रशस्तमस्तकं त्वं स्वस्यापूर्वशौर्यप्रकर्षेण सगर्वगौरवोन्नतमकार्षीः। तेन हि—

वीरप्रसूस्तव शुचिर्जननी प्रणम्या
यस्याः सुतस्त्वमसि निर्मितशौर्यमूर्तिः।
नूनं त्वया विकलभारतमातुरस्या
उन्नेष्यतेऽधिभुवनं धवला सुकीर्तिः।।३०।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपि च —

'आजाद'नाम्ना यदघोषि नव्यं
त्वयाऽभिधानं स्वयमात्मनीनम्।
मया समुद्घोष्य पुनः प्रदत्तं
तदेतदेव प्रथितं तवास्तु।।३१।।

(**वक्षसा तं मेलयति**)

चन्द्रशेखर आजादः— (प्रसन्नमुद्रया) महानुभाव! भवद्दत्तमिदं स्वाभिमानसूचकं पुण्याभिधानं सगर्वं स्वीकरोमि, अनेन '**आजाद**' इति नाम्ना समग्रं राष्ट्रं प्रतिष्ठामधिगच्छेदिति परमेश्वरं प्रार्थये च। (नेपथ्ये 'चन्द्रशेखर आजादो विजयताम्', 'वन्दे मातरम्', 'भारतमातुर्विजयोऽस्तु' इत्यादिः पुनर्जयघोषः।

।। पटाक्षेपः ।।

।। इति द्वितीयं दृश्यम् ।।

।। तृतीयं दृश्यम् ।।

[क्रान्तिकार्यान्दोलने देशस्य चतुष्कोणेषु व्यूहरचनायां दीर्घकालं व्यतीत्य, अष्टवर्षानन्तरं झांसीजनपदस्यौरछाख्योपनगरस्य पार्श्वे हिमरपुरग्रामस्तत्र सोमारनद्याः कूले हनुमन्मन्दिरे कश्चित् साधुवेषो युवा तेजस्वी ब्रह्मचारी गृहीत-कम्बलकमण्डलुर्ग्रामे गृहाद् गृहान्तरं भिक्षमाणः प्रतिवसति। रात्रौ गूढं निभृतकर्मणि व्यापृतः, प्रातः सायञ्च रामायणादिधर्मग्रन्थप्रवचनेन कालं यापयति]। (तत्र तत्रत्यारक्षिस्थानकात् तद्वृत्तमभिज्ञातुं द्वौ आरक्षिणौ प्रविशतः)

प्रथम आरक्षी— (समक्षमुपगत्य दृढस्वरेण) भो साधु-ब्रह्मचारिन्! त्वमत्र कुत आगत्य कियता कालेन प्रवससि? त्वन्नाम किमस्ति किमभिज्ञानम्? किं वा तवाभिजनम्? इत्यादि सर्वं स्पष्टं ब्रूहि। अत्रत्यः स्थानकाध्यक्षस्त्वद्-विषयकं रहस्यमवगन्तुमिच्छति, तेन सन्नियोजितौ आवामत्रागतौ इति।

साधु-ब्रह्मचारी— (सावधानो भूत्वा सस्मिताश्चर्यं प्रदर्श्य) अये! कर्मदक्षौ! आरक्षिणौ, किमस्मादृशानां साधुब्रह्मचारिणामपि किमपि रहस्यं ज्ञातव्यम्? यदवगन्तुमिच्छति युष्मत्स्थानकाध्यक्षः, मम नाम हरिशङ्करब्रह्मचारीति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विश्रुतम्, सर्वत्र पर्यटन् कियन्तं कालं प्रवसितुमत्रागतोऽस्मि, किञ्चिदभिज्ञानमभिजनं वा न साधूनां प्रष्टव्यं भवतीति।

द्वितीय आरक्षी— (सोपहासम्) साधुवर! साधूच्यते, न ते किमपि रहस्यं ज्ञातव्यमस्ति, किन्तु न त्वं कृतकच्छन्नवेशश्चिरं स्थातुं शक्ष्यसि, त्वन्निगूहितं रहस्योन्मीलनं कृत्वा त्वदीयवास्तविकं रूपमावाभ्यां दर्शयिष्यते।

साधु-ब्रह्मचारी— (साट्टहासम्) हन्त! वस्तुतो यथोक्तं मया युवां कर्मदक्षौ आरक्षिणौ तदेतदसत्कर्म साधुजनपीडनं नाम कथं कर्तुमुद्यतौ? कृतकच्छन्नवेशस्य मे कीदृग् रहस्यमुन्मीलयितुमिच्छथः? किं वा मदीयं वास्तविकं रूपं दर्शयिष्यथः? हा, हा, हा, हा........।

प्रथम आरक्षी— (शङ्किताकारेण) साधु-ब्रह्मचारिन्! कृतकच्छन्नवेशस्त्वं किं प्रख्यातः क्रान्तिकारी आजादोऽसि! इत्याशङ्कावहे। सप्रमाणमेतस्या आशङ्काया निवारणं यावन्न स्यात्, तावन्न त्वाम् आवां मोक्तुकामौ स्वः। यदि त्वमाजादस्तदा नूनमस्मत्पञ्चाप्यङ्गुलयो घृतान्तर्गताः। तस्य निर्बन्धनेन तदुपरि घोषितलक्षरूप्यकद्रव्यराशिरावाभ्यां करस्थीकरिष्यते। (उभावुच्चैः प्रहसतः)

साधु-ब्रह्मचारी— (अतिसावधानम्) हा हा हा........अये भोः! सत्यं युवां ब्रूथः। साधवस्तु आजादरूपाः स्वच्छन्दस्वभावाः परितः पर्यटन्ति। ततोऽहमपि तथैव अवगन्तव्यः। यतो हि —

गृहान् निजान् बन्धुजनान् विहाय
मातुः पितुर्मोहमपास्य दूरम्।
उपास्यमीशं परमं शरण्यं
श्रिताः स्वतन्त्रा नु साधवस्ते।।३२।।

तेन हि —

अजो ब्रह्म तदुद्भूतं ज्योतिराजं ददाति यः।
सोऽहमाजादरूपोऽस्मि साधुरित्यवगम्यताम्।।३३।।

इदानीमस्मदीशस्य भगवतो हनूमतः सेवार्चनकालोऽतिक्रामति। अतोऽहं गच्छामि। युवामपि स्वनियोगमनुतिष्ठतम्। (गन्तुमिच्छति)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीय आरक्षी— (सवेगं पुरतः समेत्य) अये भोः साधु-ब्रह्मचारिन्! नैवं त्वामावां मोक्ष्यावः। आवाभ्यां सह स्थानकाध्यक्षस्य समीपं स्थानकं प्रचल। तदादेशादेव ते मुक्तिः सम्भवति। (उभौ तदेकैकहस्तं ग्रहीतुमिच्छतः।)

साधु-ब्रह्मचारी— (सावेगभ्रूभङ्गं रोषमभिनयन्) अरे रे आरक्षिदुर्जनौ! दूरं तिष्ठतम्, नो चेद् भस्मसाद् भविष्यथः। (उभौ सभयं दूरं तिष्ठतः।) ननु सावधानं शृणुतं तावत् —

अस्मदीशो महावीरो हनूमान् रुद्ररूपवान्।
तत्प्रभावाद् युवामत्र करिष्ये भस्मसादहम्।।३४।।

किञ्च —

त्वदीयः स्थानकाध्यक्षो नो महीयान् हनूमतः।
तदर्चार्थमहं यामि युवां यातं तदन्तिकम्।।३५।।

(सवेगं निर्गच्छति। तद्भयकम्पमानगात्रौ आरक्षिणौ साक्षिस्फारं पश्यतः।)

[स्थानम् — साधुब्रह्मचारिणो हनुमन्मन्दिरस्य परिसरः]।

समयः — तमिस्राया द्वितीयः प्रहरः]।

(एका कृतावगुण्ठना युवतिः प्रविश्य साधुब्रह्मचारिणः पार्श्वे समुपविशति।)

साधु-ब्रह्मचारी— (सस्पन्दनस्पर्शमनुभूय युवतिं पुरो विलोकयन् साश्चर्यं) अयि देवि! कासि त्वम्? कुत आगतासि? अपि त्वं केनापि सङ्कटेन ग्रस्ता?

आहोस्वित् केनचिद् दुराचारिणा दुष्टेन आक्रान्तासि? स्पष्टं ब्रूहि। मत्तः किं ते प्रयोजनम्?

युवतिः— (लज्जां नाटयन्ती) ननु सुभग! अहमत्रत्यग्रामप्रमुखस्य कन्यकास्मि। न केनापि सङ्कटेन ग्रस्तास्मि, न वा केनचिद् दुराचारिणा दुष्टेनाऽऽक्रान्तास्मि। प्रत्युत त्वयि प्रेमानुरक्तं मे मनो मां त्वां प्रत्याकर्षयत्, अतोऽहमत्रागतास्मि। ममेयं प्रणययाचना न त्वया विफलीकार्या।

साधु-ब्रह्मचारी — (सानुक्रोशं विहस्य) देवि! अहमाजीवनं गृहीतब्रह्मचर्यव्रतः परित्यक्तजगत्प्रपञ्चो विगतगार्हस्थ्यमोहभ्रमः साधुरस्मि। त्वादृश्यो युवतयो मत्कृते देव्य इव पूज्याः सन्ति। अस्थाने तवेदं प्रेमानुरक्तं मनस्त्वां मां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रत्याकर्षयत्। देवि! शीघ्रं निवर्तस्व। यदि कश्चिद् रहोगतां त्वां मया सह कदाचित् पश्येत्, तदा महदनर्थकं सम्भवेत्। (सानुनयं तां प्रतिनिवर्तयितुमुत्तिष्ठति)

युवतिः — (सावेशम्) उत्थाय कृतकसाधो! कीदृशस्त्वं गृहीतब्रह्मचर्यव्रतः साधुरसि इत्यहं सम्यग् वेद्मि। त्वद्गतं रहस्यं विजानामि। गतमध्यरात्रे त्वत्पार्श्वे त्वां मन्त्रयितुमागतस्य त्वद्गूढमित्रस्य मुखादत्र प्रच्छन्नाहं तव नाम अश्रौषम्। त्वं हि प्रख्यातक्रान्तिकारी चन्द्रशेखर आजादोऽसि। अतो मैवं मां प्रतारयस्व। अहं हि —

त्वयि निबद्धरतिस्तरुणोत्तम! प्रतिपदं तव कार्यसहायिका।
विपदि सम्पदि चानुपलं सदाऽप्यनुगता तव जीवनसङ्गिनी।।३६।।

अपि च —

राष्ट्रस्वातन्त्र्यसङ्ग्रामे प्रसरत्क्रान्तिकर्मणि।
त्वदीयस्कन्धतः स्कन्धमामेल्य स्थास्यते मया।।३७।।

ततस्त्वं तरुणशिरोमणे! न मां वञ्चयितुमर्हसि।

साधु-ब्रह्मचारी — (सदीर्घोच्छ्वासं क्षणं विचिन्त्य स्वगतम्) मम रहस्यवेदिनीयं मया उपायान्तरेण तोषणीया। (प्रकाशम्) देवि! सत्यं ब्रवीषि। अहं तव पवित्रप्रणयावेदनं तिरस्कुर्वन् आत्मानमपि तिरस्करोमि, किन्तु या काचिदन्यादृशी प्रतिज्ञा मया कृता, सा त्वया सावहितं श्रूयताम् —

यावन्न राष्ट्रमखिलं परतन्त्रतायाः
पाशं छिनत्ति निजशत्रुजनान् निहत्य।
तावन्न जातु रमणीप्रणयानुबन्धाद्
आजीवनं परिणयं स्वमहं करिष्ये।।३८।।

किञ्च —

यदि त्वं स्वातन्त्र्यं कलयसि हृदा भारतभुव-
स्तदा देवि! स्वस्थं सुदृढमथ चित्तं कुरु निजम्।
यथाहं कौमार्यव्रतमनुचरन् कर्मनिरत-
स्तथा स्वीयं रम्यं शुचि नववयो यापय चिरम्।।३९।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ च —

स्वाधीनशासने जाते स्वदेशे ध्रुवमावयोः।
सङ्गमो भविता भूयस्त्वमन्तस्तोषमाप्नुयाः।।४०।।

ततो देवि! मद्वचनात् स्वानुकूलक्षणं प्रतीक्षमाणा गृहं गच्छ (इति तां निवर्तयति)। (स्वगतम्) मयापि इदं स्थानं साधुरूपं च परित्यज्य त्वरितं स्थानान्तरं गन्तव्यम्। (उभौ निष्क्रान्तौ)।

।। पटाक्षेपः ।।

।। इति तृतीयं दृश्यम् ।।

।। चतुर्थं दृश्यम् ।।

[स्थानम्—प्रयागस्थम् अल्फ्रेडनामकोद्यानम्। समयः—प्रातः सार्धनववादनम्]

चन्द्रशेखर आजादः— (सदीर्घोच्छ्वासम्) मित्र चन्द्रकेतो! मन्ये मम स्वेच्छामृत्युवरणस्य स कालः सम्प्राप्तः। यतो हि —

दृष्टं मृत्युनिमन्त्रणं मम पुरो द्वारं ददद्धस्तकं
क्रूराचारकुशासनं प्रति पराक्रान्तिं चिरात्कुर्वतः।
रुद्धं दैवहतेन भाग्यपटलं किं वा विनाऽऽत्माहुतिं
स्वातन्त्र्यश्रियमुज्ज्वलां न वृणुते कश्चिन्नरो मादृशः।।४१।।

(परितः परिक्रम्य) किञ्च —

केचित् क्रान्तिप्रलयहुतभुक्भ्राष्ट्रभस्माङ्गभूताः
केऽप्याक्रान्ता रिपुखलदलैर्लब्धकाराधिवासाः।
यूथभ्रष्टाः करिकलभवद् दिक्षु चान्ये विलीना
हा! दैव! त्वं किमु नु कुरुषे निर्दयं निर्दहन् माम्।।४२।।

(क्षणं विरम्य साश्वासम्) अथवा —

यदि परीक्षितुमिच्छसि साम्प्रतं त्वमसहायमिव प्रविहाय माम्।
तहमात्मपराजयमामृतेः परिवृणे न रणे परिपन्थिभिः।।४३।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतश्च —

अद्यारभ्य महाक्रान्तियुद्धारम्भक्रतूत्सवे।
रिपूणामाहुतीर्यच्छन् जुहोम्यात्मानमप्यहम्।।४४।।

(एकत्र चत्वरे सावेशवीरासनमुपविशति)।

चन्द्रकेतुः— (सानुनयमाश्वासयन्) वयस्यवर! अलं परितापेन। प्रतिकूलायामस्यां स्थितौ सधैर्यमार्यवीरा विघ्नान् विधूय महाविपद्वारिधिमुत्तरन्ति। महत्यपि सङ्कटे न कदापि भवता धृतिरुज्झिता। कोऽयमस्ति स्वेच्छामृत्यु-वरणस्य कालो यो भवन्तमनुबध्नाति?

चन्द्रशेखर आजादः— (सस्मितं दृढगाम्भीर्येण) चन्द्रकेतो! न खलु परितापप्रभावोज्झितधैर्योऽहमस्मि, प्रत्युत प्रतिकूलामिमां स्थितिं विक्रमार्जितपौरुषे निराकर्तुमुद्यतिष्ये। विघ्नैः सह क्रीडनं त्वस्मद्व्यसनम्, परं सहायकानां भगतसिंह-रामप्रसादबिस्मिल-राजगुरुप्रभृतीनां क्रान्तिकारि-सुहृदां कारागृहान्तर्दुर्दशां स्मारं स्मारं दुःखमनुभवामि। (क्षणं दीर्घमुष्णं निःश्वस्य किञ्चिद् विहस्य च) ननु मित्र! यत्त्वया जिज्ञासितं स्वेच्छामृत्युवरणं नाम तन्ममायत्तम्। तस्य कालः सम्प्राप्त इत्यनुमिनोमि।

चन्द्रकेतुः— (सोत्कण्ठम्) वयस्यवर! कथमिदं भवदायत्तमिति भिन्नार्थमभिधातव्यम्। अपि च सहायकानां क्रान्तिकारिसुहृदां कारागृहान्तर्दुर्दशाविषयिका चिन्ता भवदुद्देश्यपथं विषमीकरिष्यतीति तन्मुक्तेन भवता स्थातव्यम्।

चन्द्रशेखर आजादः— (कक्षान्तर्निगूढां द्विनालिकां भुशुण्डिकां दक्षिणकरेणाकृष्य दर्शयन्) ननु मित्र पश्येमां सदैव मदेकान्तसहचारिणीम्। अनयैव मदायत्तं स्वेच्छामृत्युवरणम्। (अधिकर्णपटि भुशुण्डिकां संश्लेषयन्) ननु पश्य। एवमियं क्षणेन स्वेच्छामृत्युवरणं कर्तुं मां सफलीकरिष्यति। अहं हि —

युध्यमानो यथाशक्ति म्लेच्छैर्गौराङ्गशत्रुभिः।
स्वीकरिष्यामि तान् निघ्नन् स्वेच्छामृत्युमथान्ततः।।४५।।

चन्द्रकेतुः — (सखेदं दीर्घमुच्छ्वस्य भयमभिनयन्) वयस्यवर! मा मैवं भवानात्मविषयेऽमङ्गलं ब्रवीतु! नवीनाः सहायका भवत्साहाय्यं संविधातुमेकत्रीभविष्यन्ति।

चन्द्रशेखर आजादः— (नैराश्यमभिनयन्) मित्र चन्द्रकेतो! क्व नु पुनस्ते सहायकाः सङ्कटकाले प्रतिपदं जागरूका मम साहाय्यं संविधातु-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मायास्यन्ति, क्व नु वा ते नवीना एकत्रीकृता निगूढतरक्रान्तिकर्मणि विश्वासस्थानमाप्स्यन्ति।

चन्द्रकेतुः— (सोत्साहम्) वयस्यवर! अहमितः किञ्चिद्दूरस्थितमधिगङ्गा-सरित्तटमेकमाश्रमपदमधिवसतः परमज्ञानतपस्तेजोमयस्य मत्पूर्वपरिचितस्य स्वामिस्वाधीनजीवनानन्दाख्यस्य महात्मवरस्य समीपं गत्वा भवतो निभृतावासव्यवस्थां विधास्यामि। स हि क्रान्तिकारिणां शरणप्रेरणाप्रदः। गौराङ्गास्तत्प्रभावातिशयात्तत्र न गन्तुमुत्सहन्ते। तत्र भवन्मनोऽनुकूलं सर्वं सेत्स्यति।

चन्द्रशेखर आजादः— (साश्वासोत्कण्ठम्) मित्र चन्द्रकेतो! नूनमहं तस्य महात्मनो महापुरुषस्य दर्शनार्थं त्वया सह जिगमिषामि। सति सौविध्ये तत्प्रेरणाप्रदोपदेशेन क्रान्तिकारिणां सङ्घटनं पुनरुद्दिधीर्षामि। उत्साहाति-रेकेण शीघ्रतया निर्विमर्शकृताभियानेन सर्वेऽपि क्रान्तिकारिसहायकाः छिन्नभिन्नाः समभूवन्।

चन्द्रकेतुः— (समाश्वासयन्) वयस्यवर! त्वादृशा वीरपुरुषा विपरीतदशायामपि विक्रमोत्साहशालिनो न पराभूतिमुपगच्छन्ति। यतो हि—

पराक्रमप्रसूतपुण्यपूतधैर्यशालिनो
भवादृशा दधत्समिद्धतेजसाऽवभासिनः।
असंख्यशत्रुहस्तिसङ्घभङ्गदक्षकेसरि-
प्रतापभास्वदुग्रविग्रहा विभान्ति सङ्गरे।।४६।।

ततश्च —

लक्ष्यमालक्ष्य गौराङ्गरक्षोभिः क्षोभितामिमाम्।
भारताम्बां परित्रातुं भवानेकोऽप्यनेकवत्।।४७।।

अतो वयस्यवर! स्वनियोगमनुष्ठातुमद्य बद्धपरिकरो भवानुत्तिष्ठतु। (चन्द्रशेखरो यावत् किञ्चिद् विवक्षति तावद् नेपथ्ये महान् कोलाहलः, आग्नेयास्त्रध्वनिश्च श्रूयते।)

चन्द्रशेखर आजादः— (करगृहीतभुशुण्डिः सावधानमुत्थाय) ननु मित्र! चन्द्रकेतो! बहिर्गत्वा पश्य, कीदृशोऽयं कोलाहलः, आग्नेयास्त्रसङ्घट्टध्वनिश्च श्रूयते? मन्ये, यथोक्तसङ्कटकालः प्रत्यासन्नः। (चन्द्रकेतुर्बहिर्गत्वा शताधिकान् गौराङ्गसैनिकान् दृष्ट्वा च सोद्वेगं प्रत्यागच्छति।)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चन्द्रकेतुः— (स्खलद्गतिः सत्वरं प्रविश्य) हा हन्त! महत् सङ्कटं प्रत्यासन्नम्। गृहीताग्नेयास्त्राः शताधिका गौराङ्गसैनिका उद्यानं परितो निरुध्य तिष्ठन्ति। तदिदानीं न कश्चिदात्मरक्षणोपायः प्रतीयते, ऋते पौरुषप्रदर्शनात्।

चन्द्रशेखर आजादः— (सुदीर्घमुच्छ्वसन् आकाशं चतुर्दिशो भुवञ्चावलोक्य) मित्र चन्द्रकेतो! ममान्तकालः स्वेच्छामृत्युवरणस्य पुरस्तादासन्नः; किन्तु भूयसो दुष्टारातीन् गौराङ्गसैनिकान् निहत्य तथा कर्तुमाकाङ्क्षे। त्वं हि तेषामनभिज्ञातोऽसि। अतो झटिति निर्गच्छ।

चन्द्रकेतुः— (सखेदमार्तभावं दर्शयन्) वयस्यवर! आपद्गतस्य भवादृशः श्रेष्ठसुहृदः परित्यागलक्षणेन कलङ्केन न मां दूषयितुमर्हति भवान्। अहमप्यत्र भवत्सङ्गतो मृत्युमङ्गीकरिष्ये।

चन्द्रशेखर आजादः— (सस्नेहरोषम्) चन्द्रकेतो! नायं प्रतिवादकालः, न वा केनापि कलङ्केन त्वं दूषितो भविष्यसि, प्रत्युत जीवन् नः शेषकार्यं साधयिष्यसि। एष ममादेशः 'शीघ्रं निर्गच्छ' इति। (करधृतभुशुण्डीको वृक्षान्तरितकायः सावधानं तिष्ठति) (खिन्नमनस्कश्चन्द्रकेतुश्चन्द्रशेखरं वीक्षमाणो निर्गच्छति)।

गौराङ्गसेनानायकः— (नेपथ्ये) आजाद चन्द्रशेखर! त्वं परितो निरुद्धोऽसि। यद्यात्मानं क्षणद्वयेन शीघ्रं न समर्पयसि, तदा सैनिकानामाग्नेयास्त्रप्रहारैर्मृत्युमुखं प्रवेक्ष्यसि। (दीर्घकालं गोलिकाध्वनिः श्रूयते। चन्द्रशेखरो बहुशः सैनिकान् निपात्य अन्त्यगोलिकयाऽऽत्मानं निर्भिद्य स्वेच्छामृत्युं वृणोति।)

चन्द्रकेतुः— (प्रद्रवन् स्वामिस्वाधीनजीवनानन्दाश्रमं प्रविश्य सदीर्घोच्छ्वासम्) स्वामिवर! महदनर्थकं संवृत्तम्। आजादश्चन्द्रशेखरो गौराङ्गसैनिकैः अल्फ्रेडोद्याने परितो निरुद्धस्तैः सह सुचिरं युध्यमानोऽन्त्यगोलिकया स्वकर्णपटीं निर्भिद्य स्वेच्छामृत्युं गतः। (इति वदन् तत्पादयोः पतति)।

स्वामिस्वाधीनजीवनानन्दः— (चन्द्रकेतुमुत्थाप्य समाश्वासयन्) वत्स! धैर्यमाधत्स्व। इदं महदनर्थकं खलु नासम्भावितं संवृत्तम्। चन्द्रशेखर आजादो नूनं स्वराज्यबीजमारोप्य वीरगतिं गतो भगवतश्चन्द्रशेखरस्य शिवस्य सायुज्यमगच्छत्। यतो हि—

श्रीचन्द्रशेखरशिवस्य सदंशभूतोऽभूच्चन्द्रशेखरनराकृतिभव्यभूतिः।
येनात्मजीवनमहो निजदेशमुक्त्यै सानन्दमर्पितमपूर्वमदर्शि शौर्यम्।।४८।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपि च —

(परिक्रम्य मध्ये मञ्चमास्थाय)

चन्द्रशेखरमणी रमणीयस्वर्गराज्यमधिरुह्य राजताम्।
यत्स्वराज्यमधिगन्तुमुप्तवान् बीजमत्र सफलं तदेधताम्।।४९।।

तथापीदमस्तु— (दक्षिणहस्तमुद्यम्य)

भरतवाक्यम्

स्वातन्त्र्यश्रियमाश्रयत्पुनरिदं राष्ट्रं समुद्योततां
वैदेश्यप्रसरत्प्रशासनपदं विध्वंसमापद्यताम्।
विश्वं शश्वदनन्तशान्तिविकसत्सौहार्दमुज्जृम्भतां
सम्पुष्यत्सुरभारतीसुमनसामन्तः समुद्भासताम्।।५०।।

(सर्वे निष्क्रान्ताः)

।। पटाक्षेपः ।।

।। इति पण्डितेन्द्रमहाकविसम्पूर्णानन्दसंस्कृतविश्वविद्यालयीयसाहित्यविभागाचार्य-श्रीशिवजी-उपाध्यायप्रणीतस्य स्वातन्त्र्यशौर्यस्य चतुर्थं दृश्यं सम्पूर्णम् ।।

।। समाप्तञ्चेदं नाट्यम् ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाकविभवभूतिनाट्यसाहित्यादर्शे भारतदर्शनम्

डॉ. बालकृष्णशर्मा
सहायकप्राध्यापकः साहित्यविभागाध्यक्षश्च
शासकीयसंस्कृतमहाविद्यालये
ग्वालियरनगरम् (म.प्र.)

❀ ❀ ❀

अनुरसितललितपदावलीकं काव्यं गभीरार्थावलीभरितमुदात्तकथावस्तुविन्यासव्याजेन समकालीनसमाजसंस्कृतिसभ्यतानां कमनीयचित्रं प्रस्तौति, येनास्य समाजादर्शत्वेन ख्यातिः प्रथिताऽस्ति। कविप्रतिभाभासमानेऽस्मिन् काव्यसाहित्यादर्शे देशकालपरिस्थितीनां धर्मदर्शनकलासंस्कृतीनां राजनैतिकसामाजिकसांस्कृतिकसमुन्नतीनाञ्च प्रतिबिम्बा भासन्ते। अतस्समसामयिकभारतीयसंस्कृतिकलाधर्मदर्शनसमाजराजनीतिप्रभृतीनां दर्शनाय तत्कालीनकाव्यसाहित्यानुशीलनमपेक्षितमिति सुविदिततरं सर्वेषां विदुषां चिन्तकानाम्। प्रातिभचक्षुष्मन्तः कवयोऽतीतानागतवर्तमानविषयाणामनुभूतीः सरसभावाभिव्यञ्जनासमाश्रयेण चित्रयन्ति काव्यफलके, येन सहृदयहृदयाह्लादहेतुभूतचित्रगीतमूर्तिस्थापत्येति ख्यातानां ललितकलानां जनमानसास्तीर्णधर्मदर्शनसंस्कृतिमान्यतानां जीवनाङ्गभूतविविधकर्तव्याचरणानाञ्च यथावसरं ललितविन्यासहेतोः प्रतिकाव्यमेकं भारतं भासमानमाभाति। अनेनैव सह प्रकृतिनटीनिरीक्षणपटिष्ठः कविरभिनिवेशपूर्वकं स्वकाव्येषु यथाप्रसङ्गमनेकप्रदेशनगरग्रामजनपदमार्गनदीसङ्गमगिरिकान्तारवनभूमिलोकानां वर्णनं प्रस्तौति। अतस्तस्य काव्येषु ललितभारतमनारतं लीलायमानमनुभूयते। काव्ये चित्रितानामेतेषां विषयाणामनुशीलनेन तदानीन्तनभारतस्य विग्रहः सहजतया दृश्यो भवति। विना भारतदर्शनप्रस्तुत्या न कोऽपि कविः स्वकाव्यं पूरयितुं शक्नोति। तथ्यमिदं मनसि निधाय काव्यशास्त्रिभिर्नाटकमहाकाव्यादिषु नगरार्णवशैलर्तुमन्त्रदूतमृगयावनसागरादीनां निबन्धनायानुशासितम्[1]। मेघदूतस्थमेघमार्गवर्णनेन रघुवंशमहाकाव्यस्थ-

१. दण्डिनः काव्यादर्शे, १।१४-१७, विश्वनाथस्य साहित्यदर्पणे च-६।३२२-३२४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रघुदिग्विजयविन्यासव्याजेन तत्रत्यत्रयोदशसर्गस्थभारतदर्शनेन उत्तररामचरितस्थ-चित्रदर्शनाङ्कनिबन्धनेन च भारतस्य सजीवं दर्शनं भवति। एवमेव मुरारिकवेः अनर्घराघवस्य सप्तमाङ्के राजशेखरप्रणीतबालरामायणनाटकस्य च दशमाङ्के लङ्कातः अयोध्यापर्यन्तविस्तीर्णानां भारतभूभागानां जीवन्तवर्णनं प्राप्यते। एभिर्वर्णनैः कः सहृदयो न परिचितः? एतेषु स्थलेषु तत्कालीनभारतमेव मूर्तिमदिव चित्रितं प्रतिभाति। एतद्भवभूतेर्मालतीमाधवप्रकरणमेवास्ति यत्रेसवीयाष्टमशताब्द्या भारतस्य वैभवशालिनी नगरी पद्मावती मूर्तिमतीव चित्रिता विभाति। यथा मालतीमाधवप्रकरणस्थवर्णनैः प्रमाणितं भवति—

पद्मावती विमलवारिविशालसिन्धु-
पारासरित्परिकरच्छलतो बिभर्ति।
उत्तुङ्गसौधसुरमन्दिरगोपुराट्ट-
सङ्घट्टपाटितविमुक्तमिवान्तरिक्षम्[१]।।

[एवं सुविचारितसुस्थकाव्यशास्त्रेण अविचारितरमणीयकाव्यैश्च विषयोऽयं प्रमाणितो भवति यत् काव्येषु भारतदर्शनमतिरमणीयत्वादुपादेयत्वाच्चावश्यं निबन्धनीयम्। सिद्धान्तस्यास्य प्रकाशे महाकविभवभूतिनाट्यसाहित्यपरिशीलनानन्तरं तथ्यमिदं विशदीभवति यदसौ कविरवहितचेतसा स्वरूपकेषु स्थाने स्थाने भारतीयसंस्कृति-कलाधर्मदर्शनानि सामाजिकराजनैतिकदशाश्च निपुणतया चित्रितवान्। प्रथमन्तावद् भवभूतेर्भारतस्य कालपरिवेशौ ज्ञातव्यौ स्तः। तत्र यथा विज्ञैर्निर्णीत-मीसवीयाष्टमशताब्द्या भारतमेव भवभूतेर्भारतमस्ति। कालेऽस्मिन् भारतवर्षस्य विदर्भराज्ये राष्ट्रकूटशासनं कान्यकुब्जराज्ये च यशोवर्मणः शासनमासीत्। एतत् शासनकालीनमेव भारतं भवभूतेर्भारतमस्ति। भवभूतिवर्णिता पद्मावती-नगरी कान्यकुब्जराज्यक्षेत्रे अवस्थिता आसीत्, भवभूतिश्च कान्यकुब्जेश्वरयशोवर्मणा सभाजितस्य राजसभायां प्रतिष्ठितश्चासीत्।

महाकविभवभूतिः स्वमालतीमाधवप्रकरणे भारतस्य दक्षिणापथक्षेत्रपद्मपुर-नगरकालप्रियानाथपद्मावतीनगरीसुवर्णबिन्दुमहादेवविदर्भदेशकुण्डिनपुरनगरप्रभृतिभिः परिचितः प्रतिभाति। विशेषतः पद्मावतीनगर्याः सूक्ष्मनिरीक्षणसापेक्षवर्णनैः कवेः पद्मावतीनगर्यभिज्ञता तत्सम्बद्धता च प्रमाणिते भवतः। अस्या नगर्याः समीपस्थै-र्बृहद्द्रोणीशैलकान्तारगिरिनगरग्रामसरिदरण्यवरदासिन्धुपारालवणामधुमतीनदी-

१. मालतीमाधवप्रकरणे, ९।१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुवर्णबिन्दुमहादेवविविधवृक्षवनस्पतिश्मशानभूमिभगवतीकरालायतनप्रभृतिस्थानैः कविरसौ सुपरिचितो विभाति। एवमेव विन्ध्यपर्वतश्रीशैलादिभिरपि कविः परिचितः। प्रकरणेऽस्मिन् कवितदानीन्तनभारतस्य क्षेत्रेऽस्मिन् प्रचलितान् कांश्चित् लोकप्रयोगान् गृह्णाति। तद्यथा लडह-मैरेय-उलपजन्ययात्रा-गल्ल-गल्लूरण-रल्लिप्रभृतिप्रयोगा भवभूतेर्देशकालौ सूचयन्ति, तदानीन्तनभारतस्य स्वरूपञ्च ख्यापयन्ति।

महावीरचरितमिति नाटके भवभूतिः कालप्रियानाथविश्वामित्राश्रममिथिलाञ्चलायोध्यामहेन्द्रद्वीपचित्रकूटशरभङ्गाश्रमागस्त्याश्रमपञ्चवटीप्रस्रवणगिरिदण्डकारण्यकुञ्जरवानञ्चलपम्पासरोवरमतङ्गाश्रमादिस्थानान्युल्लिखति। अस्य नाटकस्य सप्तमाङ्के कविस्तथैव भारतदर्शनं प्रस्तौति यथा कालिदासेन रघुवंशस्य त्रयोदशसर्गे प्रस्तुतमस्ति। अत्र भारतीयसागरतटतमालवनकावेरीनद्यगस्त्याश्रमपम्पासरोवरसह्याद्र्यार्यावर्तकैलासाञ्जनकाञ्चनगन्धमादनहिमालयपर्वतविश्वामित्राश्रम-प्रभृतिभूभागा हृदयावर्जकरूपेण जीवन्ततया च वर्णिताः। भवभूतिप्रतिभापरिपाकप्रणीतोत्तररामचरितनाटकस्य प्रथमाङ्के कविश्चित्रदर्शनव्याजेन पुनरनेकभूभागनदीपर्वतवनाश्रमसरोवरप्रभृतीनां चित्रणं करोति। भारताभिज्ञानभूतभागीरथीचित्रणमिदं कस्य सहृदयस्य चित्तं नावर्जयति—

तुरगविचयव्यग्रानुर्वीभिदः सगराध्वरे
कपिलमहसामर्षात् प्लुष्टान् पुरा प्रपितामहान्।
अगणिततनूतापं तप्त्वा तपांसि भगीरथो
भगवति तव स्पृष्टानद्भिश्चिरादुददीधरत्[1]॥

इत्थं प्रतीयते यदस्माकं महाकविः सम्पूर्णभारतवर्षेण सुपरिचितः। स्वसमये देशस्यास्य विभिन्नभागेषु प्रचलितानां विविधलोकाचाराणां शास्त्राचाराणाञ्च निबन्धनं कृतवानसौ त्रिष्वेव रूपकेषु। एवमेवानेकधार्मिकवादानामैतिहासिकतथ्यानां राजनैतिकपरिस्थितीनां सांस्कृतिकपरम्पराणां सामाजिकप्रथानामपि च विन्यासः कविना यथावसरं स्वकृतिषु कृतः। क्वचिन्महाकविः सीतारामयोरादर्शदाम्पत्यजीवनचित्रणव्याजेनोदात्तभारतं प्रस्तौति, क्वचिन्मालतीमाधवप्रणयोद्वाहनिबन्धनव्याजेन प्रेमप्रवणं भारतं निरूपयति। एकत्र स सीताचरितव्याजेन भारतीयनारीमनोविज्ञानं विज्ञापयति, अन्यत्र जानकीनिर्वासनव्यथितरामस्य करुणविलापविन्यासव्याजेन धृतैकपत्नीव्रतपुरुषप्रत्यभिज्ञातभारतीयचरित्रं चित्रयति। क्वचित् कविस्तान्त्रिकवामाचारचर्चितं भारतं निबध्नाति, क्वचिच्च कापालिकसंस्कृतिसम्पृक्तं

१. उत्तररामचरिते-१।२३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतं प्रदर्शयति। एतेषां सर्वेषां विषयाणामत्र समासेन निरूपणं विधीयते भवभूति-नाट्यसाहित्यप्रकाशे येन भवभूतिकालिकभारतदर्शनं याथातथ्येन सम्भवेत्।

भवभूतिकालिकभारतवर्षे लोकाचारः

भवभूतिकालिकभारतवर्षे प्रचलिता अनेकलोकाचाराः कवे रूपकेषु विन्यस्ताः। यतो हि नाटके नानावस्थान्तरात्मकं लोकचरितमेवाभिनेयरूपे निबद्धं भवति। तद्यथा नाट्यशास्त्रकारेणोक्तम्— 'लोकस्य चरितं नाट्यम्'[1]।

अपि च—

'नानाभावोपसम्पन्नं नानावस्थान्तरात्मकम्।
लोकवृत्तानुकरणं नाट्यमेतन्मया कृतम्'[2]।।

महाकविर्महावीरचरितमिति नाटके रामसीताविवाहावसरे 'कङ्कणमोचन'-रूपलोकाचारस्योल्लेखं करोति। यथा प्रतिभाति—

'देव्यः कङ्कणमोचनाय मिलिता राजन् वरः प्रेष्यताम्'[3]।।

अग्रे भवभूतिः कङ्कणमोचनरूपकृत्यमिदं लोकाचारनाम्ना व्यवहरति। तद्यथा— 'जामदग्न्यः— क्रियतां लोकधर्मः'[4]।

उत्तररामचरितनाटकस्य चित्रदर्शनाङ्केन तदानीन्तने काले जीवनस्य विविधघटनानां चित्राङ्कनस्य परम्परा प्रमाणिता भवति, याऽधुना यावत्तथैव प्रचलति। कवेस्त्रयाणां रूपकाणां प्रस्तावनाभिस्तदानीन्तने भारते यात्रामहोत्सवाद्यवसरेषु नाट्याभिनयस्य लोकपरम्परा प्रमाणिता भवति। इयं परम्पराऽप्यधुना यावत् प्रचलति। भवभूतिः कालप्रियानाथस्य यात्रामहोत्सवे स्वरूपकाणां प्रयोगस्य सूचनां ददाति। तद्यथा —

'सूत्रधारः— मारिष सुविहितानि रङ्गमङ्गलानि। सन्निपतितश्च भगवतः कालप्रियानाथस्य यात्राप्रसङ्गेन नानादिगन्तवास्तव्यो जनः। तत् किमित्युदासते भरताः। आदिष्टोऽस्मि विद्वत्परिषदा यथा— अद्य त्वयाऽपूर्ववस्तुप्रयोगेण वयं विनोदयितव्या इति'[5]।

---

१. नाट्यशास्त्रे-३६।११; २. तत्रैव-१।११२।
३. महावीरचरिते-२।५०; ४. तत्रैव-२।५० अनन्तरम्।
५. मालतीमाधवप्रथमाङ्कारम्भे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मालतीमाधवप्रकरणानुशीलनेन तदानीन्तने भारते मांसविक्रयणनरबलि-प्रभृतिपरम्पराणामस्तित्वं प्रमाणितं भवति। तद्यथा प्रतिभाति —

'अशस्त्रपूतमव्याजं पुरुषाङ्गोपकल्पितम्।
विक्रीयते महामांसं गृह्यतां गृह्यतामिति'[1]।।

अपि च— 'वत्से कपालकुण्डले भगवत्या करालया यन्मया प्रागुपयाचितं स्त्रीरत्नमुपहर्तव्यम्, तदत्रैव नगरे विदितमास्ते' इति'[2]।।

एवमेवाध्ययनाय दूरदेशगमनं मनोकामनापूर्त्यर्थं देवीदेवाराधनं व्याघ्रादि-वन्यजीवपालनञ्चेति लोकाचाराणां सङ्केतो मालतीमाधवप्रकरणे प्राप्यते, येन तदानीन्तने भारते एतेषां लोकाचाराणां प्रचलनमनुमीयते। अस्मिन्नेव प्रकरणे कन्याविवाहावसरे जन्ययात्राया उल्लेखं करोति भवभूतिः, येन तदानीन्तने भारते वरयात्रिकागमनरूपलोकपरम्परायाः सूचना मिलति। तद्यथा —

'भो राजानश्चरमवयसामाज्ञया सञ्चरध्वं
कर्तव्येषु श्रवणसुभगं भूमिदेवाः पठन्तु।
चित्रं नानावचननिवहैश्लेष्यतां मङ्गलेभ्यः
प्रत्यासन्नस्त्वरयतितरां जन्ययात्राप्रवेशः'[3]।।

भवभूतेर्भारते लोके व्याकरणमीमांसावेदान्तादिशास्त्राणामध्ययनस्य प्रतिष्ठितपरम्परा आसीत्। एतस्मादेव कारणाद् भवभूतिरात्मानं पदवाक्यप्रमाणज्ञ-रूपेण प्रस्तौति, आत्रेयी च वाल्मीकिपार्श्वादगस्त्याश्रममायाति निगमान्तविद्याध्यय-नायोत्तररामचरितनाटके। तदानीन्तनभारतीयलोकस्य महती श्रद्धा आसीत् कल्पसूत्रेषु विविधशास्त्रेषु च। आसन्नप्रसवायाः स्त्रिया दोहदपूर्तिरूपलोक-परम्परोल्लेखोऽप्युत्तररामचरिते उपलभ्यते। तद्यथा— 'अष्टावक्रः— इदञ्च भगवत्यारुन्धत्या देवीभिः शान्तया च भूयो भूयः सन्दिष्टम्। यः कश्चिद् गर्भदोहदोऽस्या भवति, सोऽवश्यमचिरात् सम्पादयितव्यः' इति[4]।

एवमेव लोके बालकस्य जन्मसंवत्सरसङ्ख्यामङ्गलग्रन्थिसमायोजनस्य परम्पराऽपि सूच्यते भवभूतिना। यथा वचनेनाधोलिखितेन प्रतिभाति — 'तमसा—

---

१. मालतीमाधवे-५।१२;
२. तत्रैव-५।४ अनन्तरम्।
३. तत्रैव-६।२;
४. उत्तररामचरिते प्रथमाङ्के।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उक्तमत्र भगवत्या भागीरथ्या—वत्से देवयजनसम्भवे सीते, अद्य खल्वायुष्मतोः कुशलवयोर्द्वादशस्य जन्मसंवत्सरस्य सङ्ख्यामङ्गलग्रन्थिरभिवर्तते'[१]।

भ्रातृजायया देवरं प्रति क्रियमाणहासपरिहासपरम्पराया गुरुजनानां सम्मुखे पत्नीवृत्तान्तोल्लेखजनितलज्जानुभूतिरूपलोकाचारस्य च सङ्केतोऽप्युत्तररामचरिते प्राप्यते। तदित्थम् —

'सीता— वत्स, इयमप्यपरा का?

लक्ष्मणः— (सलज्जस्मितम्। आत्मगतम्) अये! उर्मिलां पृच्छत्यार्या। भवतु, अन्यतः सञ्चारयामि'[२]।

अनेनैव प्रकारेण मदनमहोत्सवायोजनस्य परम्पराऽपि भारतवर्षे प्राचीनकालादेव प्रचलिताऽस्ति। अस्याः परम्पराया उल्लेखं करोति भवभूतिर्मालतीमाधवप्रकरणे। यथा प्रमाणितं भवति वचनेनाधोलिखितेन—

'अवलोकिता— माधवोऽपि कौतूहलमुत्पाद्य मया प्रवृत्तमदनमहोत्सवं मदनोद्यानं प्रभातेऽनुप्रेषितः'[३]।

इत्थमनेकलोकाचाराणां तदानीन्तनभारतीयसमाजे प्रचलितानामुल्लेखं यथावसरं कुर्वन्नसौ महाकविः प्रकारान्तरेण समकालीनभारतवर्षस्य जीवन्तचित्रं प्रस्तौति। एकत्र मालतीमाधवे कविर्लोकव्याप्तां कन्याजन्मजनितजुगुप्सां चित्रयति, स्वसमयेऽपि च कन्याजन्मनिन्दाप्रचलनं प्रमाणयति। तद्यथा—

'लवङ्गिका— गृहे गृहे पुरुषाः कुलकन्यका उद्वहन्ति। न च कोऽपि लज्जाप्रसाधनमनपराधमुग्धस्वभावं कुलकुमारीजनं प्रभवामीति वागनलेन प्रज्वलयति। एते खलु ते आमरणसम्भ्रियमाणदुःसहपरगृहनिवासवैराग्यकारिणो हृदयशल्यनिक्षेपा महापरिभवाः। येषां कृते स्त्रीजन्मलाभं जगुप्सन्ते बान्धवाः'[४]।

वस्तुतो महाकविभवभूते रूपकाणि समकालीनभारतवर्षे प्रचलितानामनेकलोकाचाराणां याथातथ्येन विन्यासं कुर्वन्ति येषां परिशीलनेन विना तदानीन्तनभारतस्वरूपं सम्यक्तयावगन्तुं न शक्यते। अतस्तदानीन्तनभारतीयलोकाचारदर्शनाय भवभूतिरूपकाणामस्त्युल्लेखनीयमवदानम्।

---

१. उत्तररामचरिते तृतीयाङ्के; २. तत्रैव प्रथमाङ्के।
३. मालतीमाधवे प्रथमाङ्के; ४. तत्रैव सप्तमाङ्के।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवभूतिकालिकभारतवर्षे शास्त्राचारः

महाकविभवभूतिर्यथा स्वरूपकेषु विविधलोकाचाराणां विन्यासं कृतवान्, तथैव स स्थाने स्थाने लोकस्वीकृतरूपेणानेकशास्त्राचाराणामप्युल्लेखं विदधाति। येन तदानीन्तने भारते तेषां प्रचलनमनुमीयते। उत्तररामचरितनाटकस्य प्रथमाङ्के केशान्तापरनामगोदानाचारस्य चित्रं चित्रवीथिकायामङ्कितं वर्ण्यते। अतस्तदानीन्तने समये आचारस्यास्य प्रचलनं प्रमाणितं भवति। तद्यथा—

'एते खलु तत्कालकृतगोदानमङ्गलाश्चत्वारो भ्रातरो विवाहदीक्षिता यूयम्'[१]।

इत्थमेव महावीरचरितस्य प्रथमाङ्केऽपि गोदानाचारस्य वर्णनं निबध्नाति कविः। तदीदृग्वर्तते— 'राज्ञो यज्ञपरिसमाप्तौ विततगोदानमङ्गलाः कुमाराः परिणेष्यन्तीति'[२]।

उत्तररामचरितस्य द्वितीयाङ्के कविना चौलकर्मविद्याध्ययनवेदाध्ययनरूपानेक-शास्त्रीयाचारः सङ्केतिताः। यथाऽऽत्रेयीवचनेन प्रतिभाति—

'आत्रेयी—......निवृत्तचौलकर्मणोश्च तयोस्त्रयीवर्जमितरास्तिस्रो विद्याः सावधानेन परिनिष्ठापिताः। समनन्तरञ्च गर्भैकादशे वर्षे क्षात्रेण कल्पेनोपनीय गुरुणा त्रयीविद्यामध्यापितौ'[३]।

अस्मिन्नेव नाटके कविरश्वमेधयज्ञाचारस्य तस्मिन् च सहधर्मचारिणी-प्रतिकृतिस्थापनाया अप्युल्लेखं विदधाति। यथाऽऽत्रेयीवासन्ती-वचनाभ्यां प्रमाणितं भवति—

'आत्रेयी— तेन राज्ञा क्रतुरश्वमेधः प्रक्रान्तः।

वासन्ती— का तर्हि यज्ञे सहधर्मचारिणी?

आत्रेयी— हिरण्यमयी सीताप्रतिकृतिः'[४]।

भवभूतिकालीनभारतवर्षेऽपि दम्पत्योराकर्षणकेन्द्रः पुत्रसन्ततिरेवासीदिति प्रमाणयति पद्यमिदम्—

---

१. उत्तररामचरिते-१।१७ अनन्तरम्।
२. महावीरचरिते-१।५८ अनन्तरम्।
३. उत्तररामचरिते द्वितीयाङ्कविष्कम्भके।
४. तत्रैव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'अन्तःकरणतत्त्वस्य दम्पत्योः स्नेहसंश्रयात्।
आनन्दग्रन्थिरेकोऽयमपत्यमिति बध्यते'[१] ।।

एतेन तदा—

'पुन्नाम्नो नरकाद्यस्मात्त्रायते पितरं सुतः।
तस्मात् पुत्र इति प्रोक्तः स्वयमेव स्वयम्भुवा'[२] ।।

इत्यादिधर्मशास्त्रीयवचनानां प्रचुरप्रचार आसीदित्यनुमातुं शक्यते। स्वकाले मधुपर्काचारस्य प्रचलनमपि सङ्केतितं महाकविनोत्तररामचरिते। श्रोत्रियाभ्यागताय समांसमधुपर्कप्रस्तुतेराम्नायोदितां परम्परामुल्लिखन् महाकविः स्वसमये अस्याः सद्भावं प्रमाणयति। अतस्स उत्तररामचरितस्य चतुर्थाङ्के सौधातिक-दाण्डायन-संवादव्याजेन'— 'समांसो मधुपर्क इत्याम्नायं बहुमन्यमानाः श्रोत्रियाभ्यागताय वत्सतरीं महोक्षं वा महाजं वा निर्वपन्ति गृहमेधिनः। तं हि धर्मं धर्मसूत्रकाराः समामनन्ति'[३] इति कथनं प्रस्तौति। यथा शास्त्रेषु अतिथेर्दैवीमहत्ता प्रतिपादिताऽस्ति, तथैव भवभूतेर्भारतवर्षेऽपि अतिथिसत्काररूपाचारः प्रचलित आसीदिति साधु प्रमाणयत्युत्तररामचरितस्थपद्यमिदम्—

'वनदेवता (अर्घ्यं विकीर्य)

यथेच्छं भोग्यं वो वनमिदमयं मे सुदिवसः
सतां सद्भिः सङ्गः कथमपि हि पुण्येन भवति।
तरुच्छायातोयं यदपि तपसो योग्यमशनं
फलं वा मूलं वा तदपि न पराधीनमिह वः'[४] ।।

मालतीमाधवप्रकरणे चित्रितस्य समाजस्य सम्पूर्णपरिवेशस्तान्त्रिक-वामाचारप्रभावितः प्रतिभाति। अत्र कपालकुण्डलकापालिकाघोरघण्टकराला-यतनमांसविक्रयणश्मशानचित्रणकटपूतनावर्णनप्रभृतिविन्यासैः कविस्तदानीन्तने भारते कापालिकसंस्कृतेस्तत्सम्बद्धाचाराणाञ्च सद्भावं निरूपयति, कौलतन्त्रप्रचारञ्च प्रमाणयति। प्रकरणेऽस्मिन् तन्त्रमन्त्रयोगाभियोगसम्बद्धाकर्षिणीसिद्धिप्रभृतिवर्णनै-र्विविधशास्त्राचाराणां द्भावो‌ऽनुमीयते। तद्यथा—

१. उत्तररामचरिते-३।१७; २. मनुस्मृतौ-९।१३८।
३. उत्तररामचरितचतुर्थाङ्कविष्कम्भके; ४. तत्रैव-२।१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'गुरुचर्यातपस्तन्त्रमन्त्रयोगाभियोगजाम् ।
इमामाकर्षिणीं सिद्धिमातनोमि शिवाय वः'[1] ।।

एकस्मिन् पद्ये कविर्भूतकतर्पणाचारमुल्लिंखति, येन तदानीन्तनभारतेऽस्य प्रचुरप्रचार उपलक्ष्यते। तद्यथा—

'आजन्मनः सहनिवासितया मयैव
मातुः पयोधरपयोऽपि समं निपीय।
त्वं पुण्डरीकमुखबन्धुतया निरस्त-
मेको निवापसलिलं पिबसीत्ययुक्तम्'[2] ।।

एवं प्रकारेण सिद्ध्यति यद् भवभूतेर्भारतवर्षे विविधकल्पसूत्रीयाचाराणां धर्मशास्त्रीयकृत्यानां निगमागमविचाराणां वाममार्गीयानुष्ठानानां विविधस्मृति-विधानानाञ्च प्राचुर्येण प्रचार आसीत्। अतो भवभूतिकालिकभारतवर्षीय-विविधशास्त्रीयाचाराणां लोकप्रचारावबोधाय कवे रूपकाणां परिशीलन-मतिमहत्त्वपूर्णमस्ति।

भवभूतिकालिका भारतीयधार्मिकस्थितिः

भवभूतिकालिकभारतवर्षे वैदिकधर्म-बौद्धधर्म-जैनधर्म-शैवागम-शाक्ततन्त्राणां समाजे प्राचुर्येण मान्यताऽऽसीत्। कविः स्वयं शिवभक्तिभावितमना प्रतिभाति। यतो हि स स्वोत्तररामचरिते वाक्स्तुतिं प्रस्तौति सामान्यतया महावीरचरिते च चैतन्यज्योतिर्नमति तथैव; परन्तु मालतीमाधवप्रकरणे कविः सुसङ्घटितशब्दावल्यां विशेषेण सपरिकरञ्च शिवं स्तौति, येन तस्य भक्तिः प्रमाणिता भवति। पुनः प्रकरणस्यास्य नवमाङ्कविष्कम्भके भगवन्तं भवानीपतिमपौरुषेयप्रतिष्ठं सुवर्ण-बिन्दुरिति ख्यातं शङ्करं नमति कविः। तद्यथा—

'जय देव भुवनभावन जय भगवन्नखिलवरद निगमनिधे।
जय रुचिरचन्द्रशेखर जय मदनान्तक जयाऽऽदिगुरो'[3] ।।

महावीरचरितनाटकस्य सप्तमाङ्के समुद्रवर्णनव्याजेन कविः शङ्करं स्मरति। तद्यथा—

१. मालतीमाधवे-९।५३; २. तत्रैव-९।४०; ३. तत्रैव-९।४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'साक्षत्किलाष्टमूर्तेस्तस्यैषा मूर्तिरप्मयी प्रथमा।
गीतः सागर इति नृभिरपरिच्छेद्यात्मगाम्भीर्यः'[१] ।।

इत्थं कवेः शिवविषयिका निष्ठा भूयो भूयः प्रमाणिता भवति। विशेषरूपेण मालतीमाधवप्रकरणे भवभूतेः शङ्करनिष्ठता बहुत्र चित्रिता वर्तते[२]।

महाकविभवभूतिसमकालीनभारतवर्षे भगवतो भास्करस्य पूजाऽपि प्रचलिता आसीत्। भवभूतिः 'कालप्रियानाथ'शब्देन कालपीस्थभगवन्तं भास्करमेवोपादत्ते, न तु शङ्करम्। यतो हि 'कालप्रिया' 'कालप्रियः' वा स्थानवाचकपदमस्ति, न तु शिवस्य पार्वत्या वा वाचकम्। यथा 'काशीनाथः' शङ्करस्य वाचकं पदमस्ति तस्य काशीस्थितत्वात्, तथैव 'कालप्रिये'ति स्थाने स्थितत्वात् तत्रत्यसूर्यस्य 'कालप्रियनाथ' इत्यभिधानं समुचितमेव प्रतिभाति। भवभूतिः स्वयमपि मालतीमाधवे सूत्रधारव्याजेनाशेषभुवनद्वीपदीपं सूर्यं नमति। तद्यथा —

'कल्याणानां त्वमसि महसां भाजनं विश्वमूर्ते!
धुर्यां लक्ष्मीमिह मयि भृशं धेहि देव! प्रसीद ।
यद्यत् पापं प्रतिजहि जगन्नाथ! नम्रस्य तन्मे
भद्रं भद्रं वितर भगवन् भूयसे मङ्गलाय'[३] ।।

उत्तररामचरितनाटकेऽपि कवेः सूर्यविषयिका निष्ठा स्थाने स्थाने प्रकटीभवति। निदर्शनमेकमत्र प्रस्तूयते—

'तमसा—.........। तदात्मनः पुराणश्वसुरमेतावतो मानवस्य राजर्षिवंशस्य प्रसवितारं सवितारमपहतपाप्मानं देवं स्वहस्तावचितैः पुष्पैरुपतिष्ठस्व'[४]।

एतावता भवभूतेर्भारतवर्षे सूर्यपूजायाः प्रचारः प्रमाणितो भवति। शिवसूर्याभ्यां तुल्यं तदानीन्तने भारतवर्षे शक्तिपूजनमपि प्रचलितमासीत्। मालतीमाधवप्रकरणे 'करालायतनस्य' शक्तिपूजायाश्च स्पष्टमेव चित्रणं कृतमस्ति कविना। मालमतीमाधवमहावीरचरितयोः स्वपरिचयोपन्यासमाध्यमेन कविना तदानीन्तने भारते वैदिकधर्माचाराणां प्रचारस्य चित्रणं कृतमस्ति। तद्यथा—

'अस्ति दक्षिणा पद्मपुरं नाम नगरम्। तत्र केचित्तैत्तिरीयाः काश्यापाश्चरणगुरवः पङ्क्तिपावनाः पञ्चाग्नयो धृतव्रताः सोमपीथिन उदुम्बरनामानो

---

१. महावीरचरिते-७।९; २. मालतीमाधवपञ्चमाङ्के।
३. तत्रैव-१।३; ४. उत्तररामचरिते तृतीयाङ्कस्य विष्कम्भके तमसोक्तौ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्रह्मवादिनः प्रतिवसन्ति। तदामुष्यायणस्य तत्रभवतो वाजपेययाजिनो महाकवेः पञ्चमः...........'[१]। मालतीमाधवेऽपि इत्थमेवोल्लिखन् कविस्तत्राग्रे इष्टापूर्तकर्मणोरपि समुल्लेखं करोति। तद्यथा—

'ते श्रोत्रियास्तत्त्वविनिश्चयाय भूरिश्रुतं शाश्वतमाद्रियन्ते।
इष्टाय पूर्ताय च कर्मणोऽर्थान् दारानपत्याय तपोऽर्थमायुः'[२]।।

मालतीमाधवप्रकरणस्थपद्येनैकेन बौद्धधर्मस्य प्रचारं प्रभावञ्चानुमातुं शक्यते भवभूतिकालिकभारतवर्षे। तद्यथा—

'वन्ध्या त्वमेव जगतः स्पृहणीयसिद्धि-
रेवंविधैर्विलसितैरतिबोधिसत्त्वैः।
यस्याः पुरा परिचयप्रतिबद्धबीज-
मुद्भूतभूरिफलशालिविजृम्भितेन'[३]।।

एवं प्रकारेण प्रतीयते यद् भवभूतेर्भारतवर्षे वैदिकाचाराणां बहुमान्यता आसीत्। कर्मकाण्डस्य प्रचलनेन सह तान्त्रिकवामाचाराणामपि लोके मान्यता आसीत्। समाजे बहुदेववादानुसारेणानेकदेवीदेवानामुपासनायाः प्रचलनमासीत्। बौद्धजैनधर्मयोः प्रभावो ह्रासमानो दृश्यते। कल्पसूत्रीयाचाराणां श्रौतस्मार्तधर्माणाञ्च समाजे प्रचुरप्रचारः प्राप्यते। पशुबलि-नरबलि-मांसभक्षणप्रभृतिकृत्यानां सद्भावो दृश्यते। इष्टापूर्तकर्मणां लोके महनीयताऽऽसीत्। एतासां सर्वासां प्रवृत्तीनां विवेचनाय तदानीन्तनभारतदर्शनाय च भवभूतिरूपकाणामस्ति महदवदानम्। तस्य रूपकाणि न केवलं रूपकाण्यपि तु समकालीनभारतवर्षस्यादर्शभूतानि प्रतिभान्ति। एतस्मादेव कारणाद् भवभूतिरूपकाणामध्ययनं प्राचीनभारतावबोधाय परमावश्यकमस्ति।

भवभूतिकालिकभारतीयसांस्कृतिकस्थितिः

शिक्षासंस्कृतिकलादीनां परिज्ञानाय सांस्कृतिकाध्ययनं विधीयते। अतो भवभूतिकालिकभारतीयसांस्कृतिकस्थितिविवेचनाय तदानीन्तनशिक्षाकलाजीवनचर्या-दैनिकाचारातिथिसत्कारसंस्कारप्रभृतिविषयाणां विवेचनमपेक्षितमस्ति। महाकवि-भवभूतिः स्वरूपकेषु विषयाणामेतेषां विन्यासं यथावसरं समुचितरूपेण विदधाति, येन तदानीन्तनसांस्कृतिकस्थितिमवगन्तुं शक्यते। शिक्षाया अतिमहत्त्वपूर्णं

१. महावीरचरितस्य प्रथमाङ्कारम्भे; २. मालतीमाधवे-१।५।
३. तत्रैव-१०।२१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थानमासीत्तदा समाजे। अध्ययनाय दूरातिदूरदेशगमनमपि दृश्यते। उत्तररामचरिते आत्रेयी निगमान्तविद्याध्ययनाय वाल्मीकिपार्श्वादगस्त्याश्रममायाति। तद्यथा—

अस्मिन्नगस्त्यप्रमुखाः प्रदेशे भूयांस उद्गीथविदो वसन्ति।
तेभ्योऽधिगन्तुं निगमान्तविद्यां वाल्मीकिपार्श्वादिह पर्यटामि[1]।।

एवमेव मालतीमाधवप्रकरणे माधवः कुण्डिनपुरात् पद्मावतीनगरीमायात्यान्वीक्षिकीश्रवणाय। यथा स्पष्टं भवति—

'तदिदानीं विदर्भराजस्य मन्त्रिणा सता देवरातेन माधवं पुत्रमान्वीक्षिकीश्रवणाय कुण्डिनपुरादिमां पद्मावतीं प्रहिण्वता सुविहितम्'[2]।

समये तस्मिन्नष्टादशविद्याप्रमुखाणां सर्वेषां विषयाणामध्ययनाध्यापने प्राचलताम्। ऋषीणामाश्रमा विश्वविद्यालयाश्च विद्याध्ययनकेन्द्रा आसन्। सहाध्ययनस्य प्रचलनमासीद् बालिकाबालकयोः। यथाऽऽत्रेयीवचनेन प्रमाणितं भवत्युत्तररामचरिते—

'आत्रेयी—......। न ह्येताभ्यामतिप्रदीप्तप्रज्ञामेधाभ्यामस्मदादेः सहाध्ययनयोगोऽस्ति'[3]।

भवभूतेः सुपरिचिता नगरी पद्मावती प्रसिद्धविद्याकेन्द्र आसीत्। यतो हि विदर्भदेशाद् माधवोऽत्राध्ययनाय आयाति। एवं भवभूतिकालिके भारते शिक्षायाः स्थितिरत्युन्नताऽऽसीत्।

शिक्षया तुल्यं चित्रगीतनाट्यस्थापत्यप्रभृतिकलानां लोके विशिष्टमान्यता आसीत्। उत्तररामचरितस्य चित्रदर्शनाङ्केन तदानीन्तनी चित्रकलायाः समुन्नतरूपं दृष्टिगोचरं भवति। एवमेव नाट्यगीतादीनामपि प्रचुरप्रचलनमासीत्। भवभूतिरूपकाणामभिनयस्य स्पष्टसङ्केतः प्राप्यते। स गीतनृत्यवाद्यनाट्यानां सूचकं तौर्यत्रिकेति पदं प्रयुङ्क्ते स्वोत्तररामचरिते[4]। मालतीमाधवे पद्मावतीवर्णनप्रसङ्गे कविः स्थापत्यकलाया उत्कर्षं प्रतिपादयति, तत्रत्योन्नतोत्कृष्टसौधादीनां वर्णनव्याजेन। तद्यथा—

'पद्मावती विमलवारिविशालसिन्धुपारासरित्परिकरच्छलतो बिभर्ति।
उत्तुङ्गसौधसुरमन्दिरगोपुराट्टसङ्घट्टपाटितविमुक्तमिवान्तरिक्षम्'[5]।।

---

१. उत्तररामचरिते-२।३;
२. मालतीमाधवे-१।११ प्राक्।
३. उत्तररामचरिते-२।४ प्राक्;
४. तत्रैव, चतुर्थाङ्के जनक-लवसंवादे।
५. मालतीमाधवे-९।१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवमेव संस्कारातिथिसत्काराश्रमव्यवस्थापुरुषार्थचतुष्टयवर्णव्यवस्थादीनामपि यथाप्रसङ्गं सङ्केतः प्राप्यते महाकवे रूपकेषु। अतो वक्तुं शक्यते यद् भवभूतेर्भारते शिक्षासंस्कृतिकलादीनामुत्कर्षस्तदानीन्तनभारतवर्षस्यापि सौभाग्यं सूचयति। तत्कालिकशिक्षाप्रभृतिप्रवृत्तीनामवबोधाय भवभूतिरूपकाणामनुशीलनमवश्यमेव करणीयम्।

भवभूतिकालिकभारतीयसामाजिकस्थितिः

भवभूतिकालिकभारतीयसमाजे आर्यसंस्कृतिः प्रतिष्ठिताऽऽसीत्। एतस्मादेव कारणादुत्तररामचरितनाटके लवणासुरत्रासं श्रुत्वा रामव्याजेन कविराश्चर्यमभिव्यञ्जयति। तद्यथा— 'आः कथमद्यापि राक्षसत्रासः'[१]।

कवेः समाजो वर्णव्यवस्थां प्रति प्रगतिशीलः प्रतिभाति। एतस्मादेव कारणाद् भवभूतिः शूद्रमुने रामकृतवधवृत्तमनिच्छया निबध्नाति, तत्प्रतिकूलप्रतिक्रियाञ्च प्रकटीकरोति राममुखात्। तद्यथा—

'हे हस्त दक्षिण मृतस्य शिशोर्द्विजस्य-
जीवातवे विसृज शूद्रमुनौ कृपाणम्।
रामस्य बाहुरसि निर्भरगर्भखिन्न-
सीताविवासनपटोः करुणा कुतस्ते'[२]।।

अपरञ्च समाजे तान्त्रिकवामाचाराणामपि प्रचलनमासीत्। सम्पूर्णमालतीमाधवप्रकरणस्य वातावरणं तान्त्रिकवामाचारप्रभावितं प्रतिभाति। कविः कुत्रचित् श्मशानस्य बीभत्सचित्रणं प्रस्तौति, कुत्रचिच्च मांसविक्रयदृश्यं निबध्नाति। एकत्र स बलिदानं चित्रयति, अन्यत्र प्रेतपिशाचचित्रणं करोति। अघोरघण्टकपालकुण्डलेति पात्रयोर्विन्यासः कविना तान्त्रिकवामाचारप्रदर्शनायैव कृतः। श्रमणसंस्कृतेरपि प्रकरणेऽस्मिन् दर्शनं भवति। कामन्दकीविन्यासव्याजेन कविस्तत्कालिकभारते प्रसृतां श्रमणसंस्कृतिं सूचयति। समाजे स्त्रीणां स्थितिः समुन्नताऽऽसीत्। स्त्रीशिक्षायाः प्रचलनमासीत्। सर्वेषु कार्येषु तासां सहभागित्वमासीत्। रामस्य सीतानिर्वासनरूपकृत्यं निन्दन्त्या वासन्त्या विन्यासव्याजेन कविः स्त्रीणां जागरूकतामपि सूचयति। तद्यथा—

'अयि कठोर यशः किल ते प्रियं किमयशो ननु घोरमतः परम्।
किमभवद्विपिने हरिणीदृशः कथय नाथ कथं बत मन्यसे'[३]।।

---

१. उत्तररामचरितप्रथमाङ्के; २. तत्रैव-२।१०; ३. उत्तररामचरिते, ३।२७;

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भोज्यपदार्थेषु घृताक्तभक्तादीनां प्रचलनमासीत् तदानीन्तने भारते। यथोत्तररामचरितश्लोकेन प्रमाणितं भवति—

'नीवारौदनमण्डमुष्णमधुरं सद्यःप्रसूता प्रिया
पीतादभ्यधिकं तपोवनमृगः पर्याप्तमाचामति।
गन्धेन स्फुरता मनागनुसृतो भक्तस्य सर्पिष्मतः
कर्कन्धूफलमिश्रशाकपचनामोदः परिस्तीर्यते'[१]।।

एवमेव निम्बतैलरसोनादीनां पदार्थानामपि प्रचलनं तदाऽऽसीदिति सूचयति कविः। तद्यथा— 'इदं च पुराणनिम्बतैलाक्तपरिभृज्यमानरसोनकरसगन्धिभिश्चिता-धूमैरधस्ताद्विभावितस्य श्मशानवाटस्य नेदीयः करालायतनम्'[२]।

समाजे मञ्जीरकिङ्किणीवलयमौक्तिकहारप्रभृत्यलङ्काराणां सिन्दूरकुङ्कुमकर्पूराङ्गरागरागचन्दनप्रभृतिसौन्दर्यप्रसाधनानाञ्च प्रचलनमासीत्। एवमेव तदानीन्तने समाजे मदनमहोत्सवायोजनस्य प्रचलनमासीत्। चौर्यविवाहबलिप्रदानजन्य-यात्राभूतावेशमन्त्रतन्त्रप्रभावचित्रकलादीनां सद्भावो भवभूतिरूपकाणामनुशीलने-नानुमीयते तदानीन्तने भारते। एवं समासेन भवभूतिचित्रितसमाजस्य निरूपणं कृतमत्र। वस्तुतस्तदानीन्तनसमाजस्याध्ययनाय भवभूतिरूपकाणामनुशीलनमति-महत्त्वपूर्णमस्ति।

निष्कर्षरूपेण वक्तुं शक्यते यत् काव्यसाहित्यं समकाकालिकधार्मिक-सांस्कृतिक-सामाजिक-राजनैतिकगतिविधीनामादर्शो भवति। यादृश्यः स्थितयो देशे समाजे वा दृश्यन्ते, तादृश्यो एव काव्ये चित्रिता भवन्ति। अतः समकालिकविविधगतिविधीनां ज्ञानाय विवेचनाय वा तदानीन्तनसाहित्यपरिशीलन-मपेक्षितं भवति। लोकवृत्तमेव काव्ये नाट्ये वा कान्तासम्मितोपदेशरूपेण व्यञ्जनासमाश्रयेण च चित्रितं भवति। जगत्सत्यमेतत् काव्ये शिवसौन्दर्यसम्प्रोतं कामप्यनिर्वचनीयकमनीयतामावहति। तथ्यमिदं मनस्यवधाय भवभूतिनाट्यसाहित्य-परिशीलनमिदं विहितं स्थालीपुलाकन्यायेनेति शम्।

●

---

१. उ.रा. ४।९; २. मालतीमाधवप्रकरणे ५।४ अनन्तरम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

माघकाव्ये राजसंस्कृतिः

डॉ. रामाशीषपाण्डेयः
आचार्योऽध्यक्षश्च, संस्कृतविभागस्य
मारवाड़ीमहाविद्यालये, राँची

❀ ❀ ❀

अलङ्कृतशैल्यां रचितेषु महाकाव्येषु माघकाव्यमन्यतमम्। महाकविमाघस्य शिशुपालवधनामकमेकमेव महाकाव्यं संस्कृतजगति प्रशस्यतरं तथा बृहत्त्रय्यां विश्रुतमिति जानन्त्येव विद्वांसः। माघकवेः शिशुपालवधमहाकाव्यमिदं माघकाव्यमित्यनेन नामधेयेनापि विदितम्। माघकाले भारतं राजतन्त्रात्मकमासीदिति हेतोर्महाकाव्येऽस्मिन् राजसंस्कृतेश्चित्रणं प्रभूतं दृश्यते। महाकाव्यलक्षणे प्रोक्तम्—

'चतुर्वर्गफलोपेतं चतुरोदात्तनायकमि'ति दण्डिनः काव्यादर्शे[1]। तत्र महाकाव्यस्य नायको धीरोदात्तगुणान्वितो भवति[2]। दिव्योऽदिव्यो दिव्यादिव्यो वा नायको देवः, क्षत्रियो वा भवति[3]। ज्ञातव्यमस्ति यन्माघकाव्यस्य नायको भगवान् श्रीकृष्णो वर्तते प्रतिनायकश्च शिशुपालः[4]। वीररसप्रधानेऽस्मिन् महाकाव्ये राज्ञां चरित्रं विशेषेण वर्णितमस्ति। महाकाव्यस्य कथावृत्तं रामायणमहाभारतादिग्रन्थादितिहासपुराणाच्च गृह्यते[5]। अत्र महाभारतीया या कथा माघकाव्ये गुम्फिता, सा

---

१. काव्यादर्शे-१।१४-२२।

२. महासत्त्वोऽतिगम्भीरः क्षमावानविकत्थनः।
स्थिरो निगूढाहङ्कारो धीरोदात्तो दृढव्रतः।। (दशरूपके-२।४-५)

३. सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः।
सद्वंशक्षत्रियो वाऽपि धीरोदात्तगुणान्वितः।।
एकवंशभवा भूपाः कुलजा बहवोऽपि वा
(साहित्यदर्पणे, षष्ठपरिच्छेदे)

४. वंशवीर्यश्रुतादीनि वर्णयित्वा रिपोरपि।
तज्जयन्नायकोत्कर्षः कथनं च धिनोति नः।। (काव्यादर्शे-१।२२)

५. इतिहासकथोद्भूतमितरद्वा सदाश्रयम्। (काव्यादर्शे-१।२)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऐतिहासिकीति। भगवतः कृष्णस्य कथेयं श्रीमद्भागवतपुराणादिष्वपि प्राप्यते। भारतीयमहाकाव्ये सर्वत्र राजतन्त्रात्मकव्यवस्थाया उपस्थितिर्दृश्यते। माघकाव्येऽपि राजसंस्कृतावेव वृत्तस्य नायकस्य प्रतिनायकस्य तेषामङ्गाश्रितानां कार्यसम्पादकानाञ्च वर्णनं विद्यते।

राजते शोभत इति राजा, तेषां राज्ञां संस्कृती राजसंस्कृतिः। संस्कृत-महाकाव्येषु राजसंस्कृतावेव सर्वाणि कार्याणि सम्पाद्यन्ते, यतो हि महाकाव्यस्य पृष्ठभूमी राजसंस्कृतिरेव। माघकाव्येऽपि राजसंस्कृतेरायामितमङ्गं चित्रितमस्ति। राजसंस्कृतौ राज्ञां वर्णनं तेषामावासस्य सांस्कृतिकराजनीतिकधार्मिकार्थिक-प्राशासनिकादिचित्रस्य च प्रदर्शनं भवति। काव्यं समाजस्य दर्पणभूतं समाजस्यैव चित्रं सर्वेषां समक्षं समुपस्थापयति। भारतीयसाहित्ये विशेषतो महाकाव्ये समाजस्य यानि चित्राणि चित्रितानि, तानि प्रायो राजसंस्कृतेश्चित्राण्येव सन्ति। माघकाव्ये तस्याश्चित्रणं कीदृशमिति जिज्ञासायां समाजोपकाराय प्राचीनभारतस्येति-वृत्तज्ञानाय जनजागरणाय च विदुषां मनांसि परितोषायात्र राजसंस्कृतिः प्रस्तूयते।

माघकाव्ये राज्ञां वर्णनम्

शिशुपालवधमहाकाव्यस्य नायको भगवान् कृष्णो दिव्यादिव्यगुणान्वितः क्षत्रियवंशोत्पन्नो द्वारकापुर्य्यां विराजते। ग्रन्थारम्भ एव प्रकाशितमस्ति यदयं जगन्निवासो जगदाधारभूतो जगत् शासितुं श्रीमति श्रीसम्पन्ने लक्ष्मीयुक्ते वसुदेवसद्मनि द्वारकायां तिष्ठति[१]। तत्र श्रियः पतिः लक्ष्म्या रुक्मिणीरूपायाः श्रियः पतिः श्रीकृष्णः जगत् शासितुं दुष्टनिग्रहशिष्टानुग्रहाभ्यां नियन्तुं निरतो वर्तते। श्रीकृष्णो राजा वर्तते। राज्ञो लक्षणं माघकाव्ये यथा—

> 'बुद्धिशस्त्रः प्रकृत्यङ्गो घनसंवृतिकञ्चुकः।
> चारेक्षणो दूतमुखः पुरुषः कोऽपि पार्थिवः'।। (२।८२)

एते सर्वे गुणाः कृष्णे विद्यन्ते। तस्य राजशासनमन्येषां राज्ञां शासनापेक्षयाऽमितमिति कृष्णस्य वैशिष्ट्यमादावेव दर्शितम्। प्रतिनायकोऽत्र चेदिवंशस्य नृपतिः शिशुपालः[२]। रावण एव जन्मान्तरमवाप्य शिशुपालरूपेण प्रादुर्भूत इति नारदोक्तिः[३]। जन्मकाले स वपुषा चतुर्भुजः पूर्णेन्दुनिभस्त्रिलोचन

---

१. शिशु.-१।१ सर्वङ्कषायाम्; २. तत्रैव-१५।१।
३. तत्रैव-१।६९, २।६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आसीत्[१]। भगवतः कृष्णस्य स्पर्शेण तस्य भुजद्वयं निपतितमिति महाभारते प्राप्यते। कृष्णस्य पितृस्वस्रेयः शिशुपालो रावणादप्यधिको जनानां पीडको बभूव। शिशुपालस्य वीरतां प्रभुत्वं पराक्रमञ्च माघो नितरां वर्णितवान्। नायकस्य रिपोः प्रतिनायकस्यापि वर्णनं महाकाव्ये वर्णनीयमिति काव्यशास्त्रीयसिद्धान्तः। परिणामतः शिशुपालस्य बलवीर्यादिकमत्र भृशं वर्णितम्।

अत्रानेके राजानो वर्णिताः सन्ति नायकप्रतिनायकाभ्यामतिरिक्ता दितिपुत्रस्य हिरण्यकशिपोः[२], लङ्काधिपस्य रावणस्य[३], देवाग्रगण्यस्य देवेन्द्रस्य[४], कुबेरस्य[५], वरुणस्य[६], यमस्य[७], युधिष्ठिरस्य[८], तस्य भ्रातृणाम्, बलरामस्य[९], भौमासुरस्य[१०], मगधाधिपस्य जरासन्धस्य[११], बाणासुरस्य[१२], कालयवनस्य[१३], दन्तवक्रस्य[१४], रुक्मि-सात्यकिप्रभृतिराज्ञाञ्च वर्णनमत्र विद्यते।

महाभारतस्य प्रमुखपात्राणां पाण्डवपुत्रादीनां राज्ञां वर्णनमपि विद्यते। युधिष्ठिरस्य राजसूययज्ञे समुपस्थितः ससेनो भगवान् कृष्णस्तैः पूजितः शिशुपालेन भृशं निन्दितस्तत्रैव युद्धे संलग्न आसीत्। कुरुपाण्डवानां पितामहो भीष्मोऽपि तत्रैव विराजते[१५]। भारतवर्षे समुपस्थिताः सर्वे राजानः प्रायो युधिष्ठिरस्य यज्ञे समागता माघकाव्ये वर्णिताः। कृष्णपक्षीयाः शिशुपालपक्षीयास्तदितरे राजानोऽपि तत्रोल्लिखिताः।

राज्ञामलङ्करणम्

राजतन्त्रात्मके युगे राजभवनमैश्वर्यैरुपेतमासीत्। तदा राज्ञां भवनं विविधोपादानैरुपेतं दुर्गप्राकारसमन्वितं सर्वथाऽलङ्कृतं मनोज्ञमाकर्षकञ्च वर्णितम्। प्रशस्ते सुसज्जिते राजभवने राजा प्रोच्चसिंहासने तिष्ठति स्म। राज्ञामासनं सिंहाकारं वीरतायाः प्रतीकभूतं सिंहासननाम्ना प्रसिद्धम्। सिंहासनं हेमनिर्मितत्वाद्

---

१. शिशु.-१।७०;
२. तत्रैव-१।४२,१९।५२।
३. तत्रैव-१।४८;
४. तत्रैव-१।५३।
५. तत्रैव-१।५५;
६. तत्रैव-१।५६।
७. तत्रैव-१।५७, ६३;
८. तत्रैव-२।१,६,६५,१०४।
९. तत्रैव-२।१४;
१०. तत्रैव-२।३९।
११. तत्रैव-२।६०;
१२. तत्रैव-२।९७, ३।६१, १५।४२।
१३. तत्रैव-१५।५६;
१४. तत्रैव-१५।५२।
१५. तत्रैव-१४।५३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हेमवर्णत्वाच्च हैमासनमपि ख्यातम्। कृष्णबलरामोद्धवास्त्रिभिः सिंहैराक्रान्तानि सिंहत्रयाकारयुक्तानि सिंहासनान्यधितस्थुः। प्रतीयते समवेतानां सिंहत्रयाणामाकृतिभिर्युक्तं सिंहासनं तदा निर्मीयते स्म। कालान्तरे सर्वाणि राज्यासनानि सिंहासनशब्देनाख्यातानि[१]। सिंहासनस्य पार्श्वे पादन्यासाय मणिमयनिर्मितं पादपीठमपि वर्णितम्[२]। नृपसदनदर्शनानन्तरं कृष्णो युधिष्ठिरश्च विपुले सिंहासने समुपविष्टौ[३]। राज्ञामलङ्करणे राजमुकुटं प्रशस्तम्[४]। भगवतः कृष्णस्य मुकुटगता माणयो महतीभिरनेकवर्णाभिः प्रभाभिर्गोवर्धनपर्वतस्य शोभामापुः[५]।

राज्ञामलङ्करणे राजछत्रं चामरं[६] कुण्डलं केयूराभूषणं मुक्ताहारो महार्घो मणिः कटकरसनाप्रभृतयोऽलङ्कारा वर्णिताः। राजछत्रं तु राज्ञां प्रतीकमासीत्। युधिष्ठिरस्य यज्ञे प्रस्थितः कृष्णः प्रस्थानकाले छत्रं धारयति[७]। इन्द्रप्रस्थनगर्य्यामायोजिते यज्ञे समागतस्य कृष्णस्य छत्रमर्जुनो दधाति[८]। भगवान् कृष्णः कौस्तुभमणिं[९] मुक्ताहारञ्च धारयति। अन्ये राजानोऽपि मुक्ताहारं दधति[१०]। कृष्णस्य चक्रं सुदर्शनाख्यं गदा कौमोदकीति। तस्य शार्ङ्गं धनुः पाञ्चजन्यः शङ्खश्चेति। यद्यपि कृष्णस्य शङ्खचक्रगदापद्मादिधारणमत्र वर्णितं परं स चतुर्भुजो न वर्णितः।

शिशुपालोऽपि विविधालङ्कारैर्विभूषितोऽस्ति। तस्य सैनिकाः सैनिकानुरूपं वेषं दधति, तदा सामान्यजना अपि विविधालङ्कारैरलङ्कृता भवन्ति स्म। स्त्रियो विशेषेणालङ्कारैर्वस्त्रैश्च विभूषिता आसन्। पादेषु रागादिकै· रञ्जनस्य प्रचलनमासीत्। इन्द्रप्रस्थनगर्य्यामागतं कृष्णं द्रष्टुं तत्रस्थालङ्कृताः श्रृंगारकर्मणि संलग्नाश्च नार्यस्त्वरितं गृहाद्बहिर्निर्गताः। अतः प्रतीयते यत् तदा स्त्रीणां मध्ये प्रसाधनस्य प्रचलनमासीत्।

विशिष्टजनानां वस्त्रमपि सविशेषमासीत्। भगवान् श्रीकृष्णः पीताम्बरधरो बलरामः कृष्णाम्बरधरो विद्येते। राज्ञां परिधानं सामान्यलोकानां परिधानापेक्षया भिन्नमासीत्।

---

१. शिशु. २।५; २. तत्रैव-१।१२।
३. तत्रैव-१३।६४; ४. तत्रैव-१।४६।
५. तत्रैव-३।४; ६. तत्रैव-३।३।
७. तत्रैव-३।२; ८. तत्रैव-१३।२१।
९. तत्रैव-३।९; १०. तत्रैव-३।८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

माघस्य राजसंस्कृतौ वर्णाश्रमव्यवस्था

ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽजायत।। (ऋ. १०।९०।१२)

इत्यनेन ब्राह्मणादयो वर्णा वैदिककालादेव विश्रुताः। ब्राह्मणादिवर्णानां वयसाऽनुरूपा ब्रह्मचर्यगार्हस्थ्यवानप्रस्थसंन्यासाश्रमा भारतीयसंस्कृतेराधारभूता भारतीयसमाजस्यादर्शं स्थापयन्ति। माघस्य राजसंस्कृतावपि ब्राह्मणादयो वर्णा ब्रह्मचर्यादयो आश्रमाश्च वर्णिताः। मानवानामैहिकामुष्मिकाभिवृद्धये वर्णाश्रम-व्यवस्था नितरां प्रभावपूर्णा, जीवनस्य संयमने सदाचाराश्रयणे च समर्थतरा।

ब्राह्मणानां कर्त्तव्यं षट्कर्मनिरतत्वञ्च माघकाव्ये वर्णितम्। यज्ञकर्मणि संलग्नेभ्यो वेदज्ञेभ्यो ब्राह्मणेभ्यो दक्षिणायां प्रभूतं धनं प्रयच्छति राजा युधिष्ठिरः[१]। राजसूययज्ञावसरे दक्षिणार्हेभ्यो ब्राह्मणेभ्यो धनादिकस्य दानस्य वर्णनं नितरामाकर्षकमस्ति। अध्ययनाध्यापनादिनिरता ब्राह्मणास्तदाऽऽसन्निति प्राप्यते[२]।

भगवान् कृष्णस्तस्य पक्षीया वीरा प्रायेण क्षत्रिया आसन्। (युधिष्ठिरा-दयोऽपि युद्धकर्मविशारदाः क्षात्ररक्षाव्रते संलग्ना विद्यन्ते[३]। गोपालका अश्वपालका हस्तिपालकाः पशुपालकाः कृषकाश्चेत्यादयो वैश्याः सन्ति। माघकाव्ये वणिजोऽपि वर्णिताः[४]। सैनिकसेवायां संलग्ना राजसेवायामन्येषां वर्णानां सेवायामपि संलग्नाः शूद्रा विद्यन्ते। यद्यपि स्वयं भगवान् कृष्ण उपदेशकाले ब्राह्मणस्य, युद्धकाले क्षत्रियस्य, पशुपालनकर्मणि निरतो भूत्वा वैश्यस्य, युधिष्ठिरयज्ञेन्यत्रापि सेवायां संलग्नो भूत्वा शूद्रस्य च कार्यं कुर्वन् सर्वेषां वर्णानां स्वात्मनि समाहारं कृतवान्। द्विजेन्द्रकान्तो[५] ब्राह्मणोत्तमप्रियः श्रीकृष्णो विनयादिभिर्गुणैरन्वितः सर्वस्मिन् कर्मणि समासक्तः कर्मसिद्धान्तस्य प्रतिमूर्तिरासीत्।

शिशुपालवधमहाकाव्ये गजचालकाः[६] किराताः[७] सारथिनः[८] कर्षका[९] मागधा[१०] वैतालिकादयो[११] वर्णिताः। राजसंस्कृतौ स्तुतिपाठकानां विशेषेण वर्णनं प्राप्यते। प्रभातकाले सायंकाले यात्रायां प्रस्थानकाले विविधमहोत्सवावसरे च

---

१. शिशु.-१४।३५;
२. तत्रैव-१२।३।
३. तत्रैव-१२।३५;
४. तत्रैव-१२।२६,३५।
५. तत्रैव-१२।३;
६. तत्रैव-१२।५।
७. तत्रैव-१२।५१,५४;
८. तत्रैव-१२।८।
९. तत्रैव-१४।७;
१०. तत्रैव-१२।३५।
११. तत्रैव-११।१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मङ्गलवचनं यशोगानमुत्साहवर्धनार्थं मागधैर्वैतालिकैश्च प्रस्तूयते स्म। प्रभाते मागधाः प्राभातिकं गिरन्ति। तक्षारथकारः शिथिलं रथं भग्नं वा रथाङ्गं शीघ्रमेव संयोजयति यथा वैद्यो रोगिणे ज्वरादिचिकित्सायाः प्रक्रमे निरतो भवति[१]। अनेन कर्मानुसारं जातेरुपलब्धिः प्रतीयते। राज्ञां भवने विविधानि कार्याणि सम्पादनायानेके कर्मकरा आसन्। 'चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः'[२] इति गीताया वचनेन गुणकर्माश्रिताया वर्णव्यवस्थाया समाश्रयणं माघकाव्येऽपि दृश्यते।

यत्र सर्वे वर्णा विश्रामं प्राप्नुवन्ति स्वानि विहितकर्माणि च सम्पादयन्ति, स एवाश्रमः। माघकाव्ये गृहस्थाश्रमस्य प्रभूतं वर्णनं विद्यते। यद्यपि सर्वे आश्रमा यत्र तत्र वर्णिताः सन्ति। एकस्मिन्नेव श्लोके चतुर्णामाश्रमाणां वर्णनमस्ति, यथा—

तत्प्रणीत-तमसामुपेयुषां द्रष्टुमाह वनमग्रजन्मनाम्।
आतिथेयमनिवारितातिथिः कर्त्तुमाश्रमगुरुः स नाश्रमत्[३]।।

राजा युधिष्ठिरो ब्रह्मचर्यादिविविधाश्रमाणां नियन्ताऽऽसीत्। अनेन प्रतीयते यन्माघकाले राजभिराश्रमाणां व्यवस्था सञ्चाल्यते स्म।

माघस्य राजसंस्कृतौ वास्तुकला

माघकाव्ये राज्ञां भवनानि विशेषेण वर्णितानि। द्वारकायां कृष्णस्य भवनं महेन्द्रालयं देवेन्द्रभवनमिव वर्तते[४]। तदा राज्ञां भवनं प्राकारपरिखादिना शत्रुभिर्दुर्लङ्घ्यं भवति स्म[५]। राजभवने सभामण्डपं मन्त्रणागृहादीनि निर्मितान्यासन्[६]। सभाभवने विशेषेण राजमानायां सभावेद्यां विशिष्टजनानां कृते आसनस्य पृथग् व्यवस्था आसीत्। सभाभवने स्थिता रत्नस्तम्भा नितरां शोभाधायका वर्णिताः[७]। सभामण्डपे मण्डपवेद्यामुत्तुङ्गहेमनिर्मितानि सिंहासनानि न्यस्तान्यासन्[८]।

युधिष्ठिरस्य राजधानीन्द्रप्रस्थनगर्यामासीत्। इन्द्रप्रस्थनगरोऽयं हस्तिनापुरनाम्नाऽपि ख्यातः। वर्तमानदिल्लीनगरमेव माघकाले इन्द्रप्रस्थनगरमासीत्। तस्य लोकोत्तरवैभवं वर्णितमस्ति। माघे इन्द्रप्रस्थस्य कृते हरिप्रस्थशब्दोऽपि प्रयुक्तः[९]। तत्र स्वर्णमयानि प्रोच्चभवनान्यासन्, यत्र गवाक्षा अपि सुशोभिताः। भवनानि

---

१. शिशु. १२।२५;
२. श्रीमद्भगवद्गीता-४।१३।
३. शिशु. १४।३८;
४. तत्रैव-१।११।
५. तत्रैव-१।४५;
६. तत्रैव-२।२।
७. तत्रैव-२।४;
८. तत्रैव-२।५।
९. तत्रैव-३।१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुधाद्रव्यैर्लिप्तानि[1] चन्द्रकिरणैः प्रकाशितानि भवन्ति स्म। प्रासादस्योपर्य्यारोहणाय स्वर्णसोपानपङ्क्तयो विनिर्मिताः। कृष्णास्यागमनकाले नार्यः प्रासादमारुह्य गवाक्षजालेन पश्यन्ति स्म। प्रासादेषु पताका अपि विद्यमाना आसन्[2]। तत्र विविधरत्नेभ्यो निर्मिताः सभाभवनस्य भूमयो विशेषेणोल्लेख्याः[3]। तत्रालङ्कृतानि भवनानि महोत्सवस्य दृश्यं स्थापयन्ति स्म।

कृष्णस्य राजधानी द्वारकापुर्य्यां वर्तते। माघकाव्ये द्वारकापुरी विशेषेण वर्णिता। समुद्रमध्ये सुवर्णप्राकारैरुपेता वाडवाग्नेर्ज्वालेव प्रतीयते[4]। द्वारकाया रचना स्वयं ब्रह्मणा एव कृता, यत्र भूमिभृतां राज्ञामधिष्ठाना विद्यन्ते। पुरीयं जलधेर्जलेषु स्वच्छाया इव दृश्यते[5]। अस्या नगर्य्या मध्ये विविधपन्थानो विद्यन्ते। वणिक्पथे पुञ्जीकृतानि रत्नानि समुद्रेऽपि मिलितानि भवन्ति[6]। इत्थं वास्तुकलादृष्ट्या द्वारकानगरी नितरां मनोहराऽऽसीत्।

शिशुपालस्य राजधानी माहिष्मतीनगर्य्यां विद्यते[7]। माघकाव्ये सामान्यजनानां भवनानि नातिदीर्घानि वर्णितानि। तदा राजपथस्य शोभना व्यवस्था आसीत्[8]। ग्रामस्थानां कृषकाणां भवनानि तादृशान्युन्नतानि नासन्।

माघकाव्ये राजनीतिर्धर्ममनीतिरर्थनीतिश्च

राज्ञां नीतिः, राज्यसञ्चालनार्थं प्रतिपादिता वा नीती राजनीतिः। देवानामिन्द्रस्य च सन्देशं गृहीत्वा समुपागतो नारदः कृष्णाय सर्वं जगाद। कस्मिन्नपि कार्ये सहसा निर्णयो न विधेय इति। द्वितीयसर्गे त्रयो कूटनीतिज्ञा राजनीतिज्ञाः कृष्णबलरामोद्धवा मन्त्रणां चक्रुः। तत्र विचारपथमानीतो विषयः प्रथमं शिशुपालस्योपर्य्याक्रमणं युधिष्ठिरस्य यज्ञे प्रस्थानं वा समुचितमिति। बलरामोऽऽत्मोदयः शत्रोर्हानिरिति राजनीतिं स्वीकरोति, कथयति च— समृद्धा अपि वयं सन्तुष्टा न भवेम, यतो हि सन्तुष्टा महीभुजो नष्टा भवन्ति[9]। पौरुष-

---

१. शिशु. १३।३१; २. तत्रैव-१३।३४-३७।
३. तत्रैव-१३।५३-६३। ४. तत्रैव-३।३३।
५. तत्रैव-३।३४। ६. तत्रैव-३।३५।
७. तत्रैव-३।३८;. ८. तत्रैव-२।६४।
९. असन्तुष्टा द्विजा नष्टाः सन्तुष्टाश्च महीभुजः।
सलज्जा गणिका नष्टा निर्लज्जा च कुलाङ्गना।। (शिशु. २।३१ सर्वङ्कषायाम्)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हीनाद्दैवमपि जुगुप्सत इति किरातार्जुनीयस्य भीमेन सदृशो बलरामो वक्ति[१]। पराक्रमादेव सर्वं कार्यं साधनीयमिति कथनं राजनीतिमूलकम्[२]। उद्धवस्य कथने बुद्धेः प्राधान्यं दृश्यते। कृतधियो महोद्योगा भवन्ति[३]। राज्ञो लक्षणे स प्रतिपादयति— 'बुद्धिशस्त्रः' प्रकृत्यङ्गो घना मन्त्रगुप्तिरेव कञ्चुको यस्य, चारेक्षणो दूतमुखः पुरुषः पार्थिवो भवति[४]। राजनीतिज्ञो विद्वान् कीदृश इति प्रतिपादयन् कथयति— 'राजनीतिज्ञो दैष्टिकतां नालम्बते न केवलं पौरुषे निषीदति प्रत्युत सत्कविः शब्दार्थाविव पौरुषं दैवञ्चोभयमपेक्षते'[५]। राजनीतिविषये उद्धवस्योक्तिर्द्रष्टव्या—

'अनुत्स्यूतपदन्यासा सद्वृत्तिः सन्निबन्धना।
शब्दविद्येव नो भाति राजनीतिरपस्पशा'।। (२।११२)

त्रयाणां राजनीतिज्ञानां मध्ये निर्णयो भवति यद् युधिष्ठिरस्य यज्ञ एव गन्तव्यम्। माघकाव्यस्य द्वितीयसर्गस्तु पूर्णतो राजनीतिविषयसम्बद्धो विद्यते। राजनीतेर्विविधान्यङ्गान्यत्र विशेषेणोपस्थितानि, स्थालीपुलाकन्यायेनात्र केवलमुपस्थापितानि।

प्राचीनकाले युद्धोऽपि धर्मनीत्या प्रचलति स्म। पदातिसैनिकैः सह पदातिसैनिका रथसैनिकैः सह रथसैनिकाः, गजसैनिकैः सह गजसैनिकाः, एवमेवाश्वसैनिकैः सहाश्वसैनिका युद्धेऽयुध्यन्त। धर्मनीत्या पूर्वं युद्धस्य घोषणा क्रियते पश्चाद् युद्धं भवति। वाक्यरक्षणं धर्मनीतौ प्रशस्तम्। भगवता कृष्णेन स्वस्वस्रे वचोदत्तं यत् शिशुपालस्य शतसंख्यायां दोषाः क्षन्तव्या भविष्यन्ति। परिणामतः शिशुपालस्य शतसंख्यायां दोषा यदा नापक्रामन्ति, तदा तस्य वधो नैव क्रियते। धर्मेण पृथिवीं जित्वा युधिष्ठिरो राज्यभारं पुनस्तेभ्यो विजितेभ्यो राजभ्यः समर्पयति[६]। ये राजानोऽस्य राजच्छत्रे निवसन्ति तेषां रक्षणं स धर्मनीत्या करोति। अनेन प्रकारेण माघकाव्ये राजसंस्कृतौ धर्मनीतिर्नितरां वर्णिता।

पुरुषार्थेष्वर्थस्यान्यतमत्वात् सर्वथार्थो राज्ञां शासने महत्त्वमादधाति। राज्यशासनमर्थनीतौ समाश्रितमस्ति। प्रजानां रक्षणं राज्ञां कर्त्तव्यमस्ति। विविधमार्गेणागतं धनं कररूपेण गृहीतं वा धनं राजा राजकल्याणाय

---

१. शिशु. २।३२, किरा. द्वितीयसर्गे; २. शिशु. २।३३।
३. तत्रैव-२।७९; ४. तत्रैव-२।८२।
५. तत्रैव-२।८६; ६. तत्रैव-१४।४३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रजाकल्याणाय नियोजयति। राजसूययज्ञावसरे सङ्गृहीतमुपहाररूपेण प्राप्तं धनं राजा युधिष्ठिरः ऋत्विग्भ्यो ब्राह्मणेभ्यो याचकेभ्यः प्रयच्छति[1]। वस्तुतः 'आदानं हि विसर्गाय सतां वारिमुचामिव'[2] इत्यर्थनीतिर्माघकाव्येऽपि प्रचलिता दृश्यते।

माघस्य राजसंस्कृतौ शिक्षा

स्वरवर्णाद्युच्चारणप्रकारो यत्रोपदिश्यते सा शिक्षेति[3]। प्राचीनकाले शिक्षा वेदाङ्गेषु परिगणिता[4]। तदा शिक्षा स्वरवर्णाद्युच्चारणप्रकारोपदेशिका ध्वनिशास्त्र-विशेषस्य बोधिका चासीत्। सम्प्रति शिक्षा ज्ञानस्य विद्याग्रहणस्याध्ययनाध्यापन-प्रक्रियाया बोधिका वर्तते। शिक्षायां शिक्षकाः शिक्षार्थिनः शिक्षाविषयाश्च स्तम्भरूपाः। मानवानां कृते शिक्षाग्रहणं परमावश्यकम्, यतो हि शिक्षा एव मानवे मानवत्वमानयति, स्वात्मविकासे राष्ट्रविकासे च योगं प्रयच्छति।

प्राचीनकाले शिक्षार्थिनो गुरुकुले निवसन्तः पठन्ति स्म। तत्र विविध-विद्यासु नैपुण्यं प्राप्य दीक्षिता भूत्वा गृहस्थाश्रमे विशन्ति स्म। शिक्षार्थिनस्तदा विद्यार्थिनोऽन्तेवासिनो माणवकाश्च भवन्ति स्म। स्वयं भगवान् कृष्णः स्वभ्रात्रा बलरामेण सहोज्जयिन्यां सान्दीपनिगुरोर्गृहे गुरुकुले निवसन् चतुःषष्टिदिवस एव चतुःषष्टिकलामधीतवान्। बलरामोऽपि चतुःषष्टिकलासु निपुणो बभूव[5]। गुरुशिष्ययोश्चर्चा माघकाव्ये प्राप्यते[6]। शिक्षाविषयमधिकृत्य बहुषु स्थलेषु विवरणमुपलभ्यते। शिशुपालसकाशादागतो गुप्तचरस्तस्य सन्देशं कृष्णाय श्रावयति। तस्य भाषा श्लेषमयी वर्तते यस्यां प्रियमप्रियञ्चार्थद्वयं सङ्गच्छते। अनेन प्रतीयते यद् दूतास्तदा ज्ञानसम्पन्ना भाषणकलासु पूर्णतो दक्षा भवन्ति स्म[7]। दूतस्योक्तिर्दर्शनीया—

उभयं युगपन्मयोदितं त्वरयाशान्त्वमथेतरच्च ते।
प्रविभज्य पृथङ्मनीषया स्वगुणं यत्किल तत्करिष्यसि।। (१६।१२)

माघस्य द्वितीयसर्गे राजनीतिविषयाणां गम्भीरचिन्तनमुपन्यस्तम्। बलराम-स्योद्धवस्य च वाक्येषु राजनीतेरङ्गप्रत्यङ्गानि प्रकाशितानि सन्ति। प्रतीयते राजनीतिप्रधानोऽयं सर्गोः राजनीतिशिक्षणायैव समुपसृष्टः।

---

१. शिशु. १४।३६-३८; २. रघु. ४।८७।
३. ऋ.भा.भू. ३९ पृष्ठे सायणः; ४. मुण्डकोपनिषदि-१।१।४।५।
५. शिशु. ३।६०; ६. तत्रैव-१३।२४; ७. तत्रैव-१६।२-४१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

माघकाव्ये विविधविद्यासु कलासु च वेदस्य[१], व्याकरणस्य[२], सृष्टिक्रम-ज्ञानार्थं मन्वादिधर्मशास्त्रस्य[३], सांख्यदर्शनस्य[४], मन्त्रशास्त्रस्य[५], [६]न्यायशास्त्रस्या-युर्वेदशास्त्रस्य[७], पुराणविद्यायाः[८], नाट्यशास्त्रस्य[९] गजशास्त्रस्य[१०], अश्वशास्त्रस्य[११], सङ्गीत-शास्त्रस्य[१२], विविधकलायाश्च प्रभूतं वर्णनं प्राप्यते।

अनेन स्पष्टं भवति यन्माघकाले राजसंस्कृतौ शिक्षायाः स्थितिरुन्नता विकसिता चाऽऽसीत्। राजकीयपुरुषाणां शिक्षा राजनीतिपूर्णा नीतिपूर्णा राज्यकल्याणसमन्विता प्रशासनोपयुक्ता भवति स्म। तदा सामान्यजना अपि शिक्षिता विविधकलासु निपुणा आसन्। शिक्षाया व्यवस्था राज्ञा एव सम्पाद्यते स्म। सर्वेषां विषयाणां वेदोपवेदवेदाङ्गोपनिषदादिग्रन्थानां प्रायोगिकानां ज्योतिषायुर्वेद-प्रभृतिशास्त्राणामपि शिक्षाया व्यवस्थाऽऽसीत्। ज्योतिषायुर्वेदतत्त्वानां भृशं वर्णनमत्र प्राप्यते। युधिष्ठिरस्य यज्ञे समुपस्थिता ऋत्विजो वेदवेदाङ्गेषु धर्मशास्त्रादिषु पारङ्गताः सन्ति[१३]। ललितकलाया विशेषरूपेणोल्लेखो प्राप्यते। माघे विविधवाद्ययन्त्रस्य वर्णनं सङ्गीतकलाया विकासस्य द्योतकमस्ति। वास्तुकलायाः सौन्दर्यं तु पूर्वमेव प्रतिपादितम्।

माघस्य राजसंस्कृतौ युद्धकला

वीररसप्रधानेऽस्मिन् महाकाव्ये युद्धस्य प्रभूतं वर्णनं विद्यते। तदानीं सेनायां चतुरङ्गिण्या हयदल-गजदल-रथदल-पदातिसेनायाश्च समुल्लेखो विद्यते[१४]। श्रीकृष्णस्य शिशुपालस्य चोभयोः सेना चतुरङ्गिण्यासीत्। युद्धस्य सूचना पटहनिनादेन शंखध्वनिना[१५] रणदुन्दुभिना[१६] च दीयते स्म। उभयपक्षीया वीराः

---

१. शिशु. १।२८, १२।११, १४।२१।
२. तत्रैव-२।४७,९५,११२, १४।६६, १९।७५।
३. तत्रैव-९।९।
४. तत्रैव, १।३३,१४।१९।
५. तत्रैव-२।८२।
६. तत्रैव, २।९१।
७. तत्रैव-२।५४,८४,९३,९६,१२।२५।
८. तत्रैव-१।१५,४९,५०,२।३८-४१,६०,३।६१,४।२,५।३१,६६,६।१७,८।६४, ९-१४,८०,११।३।
९. तत्रैव-२।४४, १०।४०;
१०. तत्रैव-५।३६, ४८-४९।
११. तत्रैव-५।१०, ६०;
१२. तत्रैव-१।१०,२।२६,११।१,१३।६६
१३. नत्रैव-१४।२०,२१;
१४. तत्रैव-१६।६९।
१५. तत्रैव-१५।७२;
१६. तत्रैव-१५।७३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कवचेनावृता भूत्वा युद्धे संलग्ना भवन्ति स्म। युद्धपूर्वं तेषां मद्यपानस्य चर्चाऽपि प्राप्यते[1]।

माघकाव्ये चतुर्विधस्यास्त्रस्य वर्णनं लभ्यते। तत्र धनुषादिकमस्त्रं तस्य बहिः सन्धानमपास्त्रं परशुप्रभृति व्यस्त्रम्, आग्नेय-वायव्य-गारुडप्रभृतिमहास्त्रञ्च विद्यन्ते[2]। सामान्येनास्त्रं द्विविधं मुक्तास्त्रममुक्तास्त्रञ्चेति। तत्र मुक्तास्त्रे बाणादिकममुक्तास्त्रे खड्गादिकञ्च। बाणा अपि तदानीं वैशिष्ट्यसम्पन्ना वर्णिताः। बाणेषु स्वर्णपुङ्खयुक्तत्वं विशेषेण वर्णितम्[3]।

कृष्णस्यास्त्रेषु सुदर्शनं चक्रम्, शार्ङ्गं धनुः, कौमोदकी गदा, नन्दकः खड्गश्च विशेषेणोल्लिखिताः[4]। कृष्णस्य पुष्परथो गरुडध्वजश्च वर्णितौ। माघमहाकाव्ये विविधास्त्रस्य समुल्लेखो विद्यते। वत्सदन्तस्य[5], तोमरस्य[6], स्वापनास्त्रस्य[7], यमपाशतुल्यस्य भुजगास्त्रस्य[8], गरुडास्त्रस्य[9] आग्नेयास्त्रस्य,[10] मेघास्त्रस्य[11] च वर्णनं प्राप्यते। युद्धेषु बाहुयुद्धस्य[12], तुमुलयुद्धस्य, द्वन्द्वयुद्धस्य[13],विविधास्त्रसमन्वितस्य युद्धस्य चाकर्षकं वर्णनं लभ्यते।

द्वादशसर्गस्यारम्भ एव रथाश्वगजनिषादिनां नृपाणां गणः प्रस्थानकाले हरिं प्रतीक्षितवानिति रथनिषादिनामश्वनिषादिनां गजनिषादिनाञ्च सेनानां वर्णनमुपलभ्यते। लघुरथेषु वेसराणां वत्सतराणामुष्ट्राणामपि संयोजनं भवति स्म[14]। कृष्णस्यैकच्छत्र-सेनाया बहुच्छत्रसेनायाश्च वर्णनं लभ्यते[15]। कृष्णस्यैकच्छत्रसेनायामनेके तत्पक्षीया राजानः स्वच्छत्रं गृहीत्वा सम्मिलिता आसन्, येनैकच्छत्रेऽपि बहुच्छत्रसेना प्रादुर्भूता। अनेन प्रकारेण सेनायाः प्रस्थानस्य युद्धस्य चाकर्षकं वर्णनं लभ्यते। शिशुपालेन युद्धावसरे विविधानि शस्त्रास्त्राणि प्रयुक्तानि तान्यनेकानि वीर्यमन्त्रोत्साहैः सञ्चालितान्यासन्। शिशुपालस्य स्वापनास्त्रप्रयोगेण यदा श्रीकृष्णस्य सेनायां सैनिकानां लोचनानि निद्रया घूर्णितान्यभूवन्, तदा तस्य पक्षीया बहवो राजानो धनुषि निषण्णा अभवन्, तथाऽन्येषां वीराणां शस्त्रं निद्रया भूमौ पतितम्, तदा

---

१. शिशु. १५।७६,८०,१७।२१;
२. तत्रैव-१८।११।
३. तत्रैव-२०।१३;
४. तत्रैव-१७।२६, ३।१८-२०।
५. तत्रैव-२०।२५;
६. तत्रैव-२०।२९।
७. तत्रैव-२०।३२;
८. तत्रैव-२०।४१।
९. तत्रैव-२०।५२;
१०. तत्रैव-२०।५९।
११. तत्रैव-२०।६५;
१२. तत्रैव-१८।१२।
१३. तत्रैव-१९।१;
१४. तत्रैव-१२।२४।
१५. तत्रैव-१२।३३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृष्णस्य दृष्टि: कौस्तुभमणावपतद् येन समुद्गतेन प्रकाशेन सर्वेषां वीराणां निद्रा भग्ना जाता। अनेन प्रकारेण शिशुपालस्य यमपाशतुल्यस्य भुजगास्त्रस्य प्रयोगे गारुडास्त्रेण, आग्नेयास्त्रप्रयोगे मेघास्त्रेण युद्धं कृत्वा कृष्ण: शिशुपालश्च स्वस्वयुद्धकौशलं प्रदर्शितवन्तौ। चान्ते सुदर्शनचक्रेण कृष्ण: शिशुपालस्य शिरश्चकर्त।

राजसंस्कृतावाचार:

माघस्य प्रथमसर्गे यदा महर्षिर्नारदो द्वारकायामागच्छति, तदा भगवान् कृष्णस्तस्मै स्वागतं करोति। प्रथमं तु समागतं नारदं दृष्ट्वा सिंहासनादुत्तिष्ठति तथा तमर्घ्यादिभि: पूजयति[1]। प्रोच्चसिंहासने तं प्रोषितवान्, तथा तस्मै स्वागतवाक्यं जगाद। अतिथेरागमनानन्तरं प्रसन्नतां प्रकटयितुं कथयति—

'हरत्यघं सम्प्रति हेतुरेष्यत: शुभस्य पूर्वाचरितै: कृतं शुभै:।
शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेऽपि योग्यताम्'।।(१।२६)

सर्वस्यातिथिर्गुरुरिति सिद्धान्तो माघकालेऽपि प्रचलित:। 'अतिथिदेवो भव' इति श्रुतिवाक्येन अतिथे: पूजनं शास्त्रपद्धत्याऽत्र दृश्यते, किं बहुना—

'तृणानि भूमिरुदकं चतुर्थी वाक् च सूनृता।
सर्वदैव सतां गेहे नोच्छिद्यन्ते कदाचन'।।

सूक्तिरियं माघकाले नियमितेति प्रतीयते। अतिथे: सत्कारस्य चर्चाऽन्यत्रापि विद्यते[2]।

प्रस्थानकाले राजा छत्रं चामरं मुकुटं कटककुण्डलादिकमाभूषणं शोभनं वस्त्रञ्च धारयति स्म[3]। मङ्गलार्थे स्त्रियो मार्गे आचारलाजान् विकिरन्ति स्म[4]। आगतेभ्योऽतिथिभ्य: सत्कारायोत्सवस्यायोजनमपि भवति स्म[5]। कृष्णो हस्तिनापुरे युधिष्ठिरस्य गृहे आगत्य बन्धुजनस्यारोग्यादिकं समाचारं पृच्छति[6]। ब्राह्मणोऽतिथिर्देवर्षिर्वा राज्ञां गृहे गत्वा तीर्थजलै: राज्ञामभिषेकं करोति स्म[7]।

---

१. शिशु. १।१२,१४; २. तत्रैव, ३।८१।
३. तत्रैव-३।२-४; ४. तत्रैव, १३।३६।
५. तत्रैव-१३।६७।
६. ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयम्। मनु. २।१२७ (शिशु.; १३।६८)
७. शिशु. १।१८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनेन प्रकारेण माघस्य राजसंस्कृतौ राज्ञामाचारस्य[1], दानस्य[2], अर्घ्यपुरुषस्य[3], युद्धाचारस्य[4] च वर्णनं प्राप्यते। षडर्घ्यभाजोऽत्र वर्णिताः—स्नातका गुरवो बन्धवो ऋत्विजो जामाता राजानश्चार्घ्यास्तदासन्[5]। युधिष्ठिरस्य राजसूययज्ञावसरे विहिताचारस्य प्रभूतं विवरणं लभ्यते।

उपसंहारः

निष्कर्षतः कथनमिदं सङ्गतं भविष्यति यन्माघकाव्ये या राजसंस्कृतिश्चित्रिता तत्र राजसम्बद्धं राजनीतिकं सामाजिकं धार्मिकं दार्शनिकं शैक्षणिकमार्थिकं सांस्कृतिकञ्च तथ्यं नितरां गुम्फितम्।

राजतन्त्रात्मके युगे सामान्यजनानां ग्रामस्थितानां नगरस्थानाञ्चावस्था कीदृशीति विवेचितम्। पुनश्च ग्राम्यजीवने कृषेः कर्म वाणिज्यादिकं पशुपालनादीनि कर्माणि कथं सम्पाद्यन्त इति माघकाव्ये सर्वं प्राप्यते। राजनीतिकचित्रणे राज्ञां नीतिर्विशेषतश्चित्रिता। धर्मशास्त्रानुमोदितं राज्ञां कर्त्तव्यादिकमेव माघकाव्ये विद्यते। भारतीयसंस्कृतेर्गायको महाकविमाघो भारतीयपरिवेशे राजसंस्कृतेर्जीवितं चित्रं माघकाव्ये चित्रितवान्। माघस्य द्वितीयसर्गे बलरामस्योद्धवस्य च वाक्यैः राजनीतिरेव प्रकाशिता। राजतन्त्रात्मिकाऽऽर्थिकी राजनीतिकी शैक्षिकी सामाजिकी व्यवस्था माघेन प्रतिपादिता। युद्धकलाया वास्तुकलाया ललितकलायाः काव्यकलायाश्च सविस्तरं विवरणमत्र लभ्यते। वीररसप्रधानेऽस्मिन् महाकाव्ये वीररसस्य विविधतत्त्वानि शृङ्गारादिरसानाञ्च तत्त्वानि गुम्फितानि। तेषां विभावादिदशा अपि चित्रिताः। राजसंस्कृतेः प्राङ्गणे राजतन्त्रसम्बद्धानां विविधफलपुष्पाणां पादपेभ्योऽलङ्कृतमुद्यानं माघकाव्यमिति।

आधुनिकयुगेऽपि माघवर्णितस्याचारस्य विविधव्यवहारस्य नीतिनिर्धारणस्य युद्धादिप्रकारस्य तत्र गृहीतस्य सैन्यसाहाय्यस्य विविधसंस्कारस्य शिक्षायाः कलायाः संस्कृतेश्चाचरणं दृश्यते। किं बहुना, माघकाव्यमिदं कान्तासम्मिततयोपदेशेन[6] सम्प्रति स्वकीयां प्रासङ्गिकतां स्थापयतीति दिक्।

●

---

१. शिशु. ४।९;
२. तत्रैव-१४।४५, ४६, ४९।
३. तत्रैव-१४।५५;
४. तत्रैव-१८।२।
५. तत्रैव-१४।५५;
६. काव्यप्रकाशे, प्रथमोल्लासे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुहृत्तत्त्वविमर्शः

डॉ. सङ्कठादेवपाण्डेयः

साहित्यविभागाध्यक्षः

श्रीरामाचारिसंस्कृतमहाविद्यालये

अस्सी, वाराणसी

सुहृच्छब्दस्यार्थः-

सुष्ठु यद्वा सुशोभनं हृदयं यस्येति विग्रहे हृदयशब्दस्य हृदादेशे व्युत्पादितोऽयं सुहृच्छब्दो बहुविधेष्वर्थेषु प्रयुक्तो दृश्यते। तत्र प्रथमस्तावन्मित्ररूपोऽर्थः सर्वथा प्रसिद्ध एवास्ति। तद्यथा—

'मित्रे सदैवानुगते, आकरस्वपरभूरिकायानां प्रायशो हि सुहृदोः सहवासः'। (पृष्ठे ८८५) इति चिन्तामणिकोषे श्रीसुखानन्दनाथेन, 'सुष्ठु हृदयं यस्य मित्रार्थे हृदादेशः' (पृ. ५३२३) इति वाचस्पत्ये श्रीतारानाथभट्टाचार्येण किञ्च, 'सुहृन्मित्रं सखा' इत्यमरकोषे, शब्दकल्पद्रुमेऽपि— 'सुशोभनं हृत् हृदयं यस्य, मित्रं सखा इत्यमरः' (पञ्चमकाण्डे, पृ. ३८९) इति रूपेण व्युत्पादितत्वाच्च।

कवयो महाकवयश्चापि मित्रार्थे सुहृच्छब्दं प्रयुञ्जन्तो दृश्यन्ते। यथोक्तं महाकविना कालिदासेन मेघदूते—

'मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः'। (पूर्वमेघः, श्लो. ४२)

एवमेव विक्रमोर्वशीये पुरूरवाश्चित्ररथं प्रियसुहृच्छब्देनाभिनन्दति— 'स्वागतं प्रियसुहृदे' (पृ. १५३ प्रथमोऽङ्कः)। चित्ररथोऽपि दैत्यहस्तादपाच्छिद्येन्द्रहस्ते उर्वश्याः समर्पणे इन्द्रस्य मित्ररूपेण पुरूरवसं प्रतिपादयति—

'पुरा नारायणेनेयमतिसृष्टा मरुत्वते।
दैत्यहस्तादपाच्छिद्य सुहृदा सम्प्रति त्वया'।। (१।१६)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मालविकाग्निमित्रेऽपि यथा—

'नहि बुद्धिगुणेनैव सुहृदामर्थदर्शनम्।
कार्यसिद्धिपथः सूक्ष्मः स्नेहेनाप्युपलभ्यते'।। (४।६)

अभिज्ञानशाकुन्तलेऽपि—

'कृताः शरव्यं हरिणा तवासुराः शरासनं तेषु विकृष्यतामिदम्।
प्रसादसौम्यानि सतां सुहृज्जने पतन्ति चक्षूंषि न दारुणाः शराः'।(६।२९)

चारुदत्ते महाकविना भासेन यथा—

'सत्यं न मे धनविनाशगता विचिन्ता
भाग्यक्रमेण हि धनानि पुनर्भवन्ति।
एतत्तु मां दहति नष्टधनश्रियो मे
यत् सौहृदानि सुजने शिथिलीभवन्ति'।। (२।५)

पुनश्च—

'दारिद्र्यात्पुरुषस्य बान्धवजनो वाक्ये न सन्तिष्ठते
सत्त्वं ह्रासमुपैति शीलशशिनः कान्तिः परिम्लायते।
निर्वैरा विमुखीभवन्ति सुहृदः स्फीता भवन्त्यापदः
पापं कर्म च यत्परैरपि कृतं तत्तस्य सम्भाव्यते'।। (१।६)

दूतवाक्येऽपि मित्रार्थे सुहृच्छब्दो यथा—

'पुण्यसञ्चयसम्प्राप्तामधिगम्य नृपश्रियम्।
वञ्चयेद् यः सुहृद्बन्धून् स भवेद् विफलश्रमः'।। (१।२५)

कविविभूतिना महाकविना भवभूतिना मालतीमाधवस्य प्रस्तावनायां यथा—'अतो यदस्माकमर्पितं प्रियसुहृदाऽत्रभवता भवभूतिनाम्ना प्रकरणं स्वकृतिर्मालतीमाधवं नाम (पृ. १७) मालतीमाधवे बहुषु स्थलेषु मित्रार्थे सुहृच्छब्दो दृश्यते। तेषु कानिचिदुदाहरणानि प्रस्तूयन्ते—

'यन्मां विधेयविषये स भवान्नियुङ्क्ते
स्नेहस्य तत्फलमसौ प्रणयस्य सारः।
प्राणैस्तपोभिरथ वाभिमतं मदीयैः
कृत्यं घटेत सुहृदो यदि तत्कृतं स्यात्।। (पृ. २५)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुनश्च—

'अपत्यसम्बन्धविधिप्रतिज्ञा प्रियस्य नीता सुहृदः स्मृतिं च।
अलोकसामान्यगुणस्तनूजः प्ररोचनार्थं प्रकटीकृतश्च'।। (पृ. २६)

एवञ्च— 'अत्र बालसुहृदा मकरन्देन सह विद्यामान्वीक्षिकीमधिगच्छति' (पृ. ११८) एवमेव बहून्युदाहरणानि सन्ति।

महाकविना विश्वनाथेन चन्द्रकलानाटिकायां यथा—

'सखे सदृशमाचरितं प्रतिज्ञातस्य प्रतिदिनमुपचीयमानस्य च सौहृदस्य' (पृ. ३२, द्वितीयाङ्कः)।

महाकविना भट्टनारायणेन वेणीसंहारनाटके यथा—

'भीष्मे द्रोणे च निहते य आसीदवलम्बनम् ।
वत्सस्य च सुहृच्छूरो राधेयः सोऽप्ययं गतः' ।।(५।१२)

पुनश्च यथा—

'अन्धोऽनुभूतशतपुत्रविपत्तिदुःखः
शोच्यां दशामुपगतः सह भार्ययाऽहम् ।
अस्मिन्नशेषितसुहृद्गुरुबन्धुवर्गे
दुर्योधनेऽपि हि कृतो भवता निराशः' ।।(५।१३)

महाकविना दिङ्नागेन कुन्दमालायां यथा—

'प्रकामभुङ्क्ते स्वगृहाभिमानात्
सुहृज्जनेनाहितयागवह्नौ ।
आर्यस्य रम्ये भवनेऽपि वास-
स्तव प्रवासे वनवास एव'।। (११९)

पुनश्च यथा— 'वयस्य न हि मादृशास्तादृशीं कोपावस्थामवगाहते, यस्यां वर्तमानायां सुहृदामनाश्रवा भवन्ति' (अङ्कः ५, पृ. १७२)।

महाकविना श्रीशूद्रकेण मृच्छकटिके यथा—

'एतत्तु मां दहति नष्टधनाश्रयस्य
यत् सौहृदादपि जनाः शिथिलीभवन्ति'।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किञ्च—

'दारिद्र्यात् पुरुषस्य बान्धवजनो वाक्ये न सन्तिष्ठते
सुस्निग्धा विमुखीभवन्ति सुहृदः स्फारीभवन्त्यापदः'।। (१।३६)

एवञ्च—

'कथं राज्ञा पालकेन प्रियसुहृदार्यको मे बद्धः'। (पृ. २२४)

अपि च—

'द्वयमिदमतीव लोके प्रियं नराणां सुहृच्च वनिता च।
सम्प्रति तु सुन्दरीणां शतादपि सुहृद्विशिष्टतमः'।।(४।२५)

पुनश्च—

'गुणप्रवालं विनयप्रशाखं विस्रम्भमूलं महनीयपुष्पम्।
तं साधुवृक्षं स्वगुणैः फलाढ्यं सुहृद्विहङ्गाः सुखमाश्रयन्ति'।। (४।३१)

एवमेव बहुषु स्थलेषु मृच्छकटिके मित्रार्थे सुहृच्छब्दः प्रयुक्तोऽस्ति।

२. सहायकः

सुहृच्छब्दस्य सहायकरूपेऽप्यर्थे प्रयोगो दरीदृश्यते। तद्यथा— 'शोभनं हृदयमस्य। सुहृद्दुर्हृदाविति साधुः। सहाये। यथाह—

चन्द्रश्चन्दनमिन्दुधामधवला रात्र्यो द्विरेफावली-
झङ्कारोन्मुखरा विलासविपिनोपान्ता वसन्तोदयाः।
मन्द्रध्वानघनोदयाश्च दिवसा मन्दाः कदम्बानिलाः
शृङ्गारप्रमुखाश्च कामसुहृदो नार्या जितायां जिताः।।
कामस्य सुहृदः सहायाः नार्यां जितायां जिताः'।

(शब्दार्थचिन्तामणिकोषः, पृ. ८८५)

३. लग्नाच्चतुर्थं स्थानम्

ज्यौतिषशास्त्रानुसारं सुहृच्छब्दस्य लग्नाच्चतुर्थस्थानमप्येकोऽर्थः, येनेदं ज्ञायते यत् कस्यामवस्थायां कथं ग्रहाः परस्परं मित्राणि भवन्ति। यदा चतुर्थस्थाने शुभग्रहो भवति, तथा चतुर्थाधिपतिः शुभभावस्थश्च भवति, तदा सुहृद्भावत्वं जायते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शब्दकल्पद्रुमे यथा—

'एकस्माल्लग्नात्तच्चतुर्थलग्नम्'।

यथा च—

'पातालं हितकञ्चैव सुहृदम्भश्चतुर्थकम्'।

इति ज्योतिस्तत्त्वम्।

'शशिनः सुहृद्गृहगतः करोति चातुर्य्यहास्यधनवन्तं वत्तसामधिपः' इत्यादि कोष्ठीप्रदीपः। (शब्दकल्पद्रुमः, पञ्चमः काण्डः, पृ. ३८९)

यदुक्तं होरारत्ने—

'केन्द्रेषु सौम्या यदि पापहीनाः सर्वेषु जातस्य मितिर्न वाच्या।
उच्चाश्रिता वा ह्यविसंज्ञा विमिश्रिता वा मनुजस्य तज्ज्ञैः ।।
सुहृद्गृहस्थैः सकलैस्तु तुङ्गमथ प्रयातैर्गृहमंशकं वा।
आयुः परं सूत्रनरस्य वाच्यं सर्वैश्च वै वृद्धिगृहप्रयातैः'।।

(होरारत्ने, १।९-१० आयुर्ज्ञाने)

पुनश्च तत्रैव—

'लग्नेऽष्टमे विस्तृतपीनदेहो निम्नोदरः पिङ्गगभीरनेत्रः।
पित्तान्वितो मध्यविलग्नघोषो विश्वासहो मातुरनिष्टकर्ता ।।
स्थिरः प्रचण्डो विषमस्वभावो ईर्ष्युः सुहृद्द्रोहकरो महाभूः।
परान्नभोक्ता वधभेदकारी शूरोऽन्यनारीनिरतोऽरियुक्तः'।।

(अध्यायः २, लग्नफले, २३-२४)

जातकालङ्कारेऽपि यथा—

'स्वक्षेत्रे तुर्यनाथस्तनुपतिसहितः स्यादकस्माद्गृहाप्तिः
सौहार्दं वा सुहृद्भिस्तदितरगृहगश्चेद्गृहालभ्ययोगः'।
यावन्तः पापखेटा धनदशमगृहप्रान्त्यपैश्चेत्त्रिकस्था
युक्तास्तावत्प्रमाणाः ज्वलनवशगता क्लेशदाः स्युर्ग्रहा न'।। (२।९)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लघुजातकेऽपि—

शत्रू मन्दस्मितौ समश्च शशिजौ मित्राणि शेषा रवे-
स्तीक्ष्णांशुर्हिमरश्मिजश्च सुहृदौ शेषाः समाः शीतयोः ।
जीवेन्दूष्णकराः कुजस्य सुहृदौ ज्ञोऽरिः सितार्कौ समौ
मित्रे सूर्यसितौ बुधस्य हिमगुः शत्रुः समाश्चापरे ।।
सूरेः सौम्यसितावरो रविसुतो मध्योऽपरे त्वन्यथा ।
सौम्यार्कौ सुहृदौ समौ कुजगुरुः शुक्रस्य शेषावरी ।।
शुक्रज्ञौ सुहृदौ समः सुरगुरुः सौरेश्च अन्येऽरय-
स्तत्काले च दशा११ऽयबन्धु४सहज३स्वान्त्येषु मित्रं स्थिताः।।

(पृ. २४,१-३)

४. महादेवः

सुहृच्छब्दस्य महादेवरूपोऽप्यर्थः कोषकारैः प्रतिपादितोऽस्ति। तत्र चिन्तामणौ 'सर्वान्तर्यामिणि' (पृ. ८८५), हिन्दीविश्वकोषेऽपि 'महादेव' इति (पृ. ३८०, चतुर्विंशो भागः) 'महादेव' इति शब्दकल्पद्रुमेऽपि (पञ्चमः काण्डः, पृ. ३८९)।

५. शस्तचित्ते

शस्तं प्रशस्तं कल्याणभावनायुक्तं चित्तं मनो यस्यैवंभूतेऽप्यर्थे सुहृच्छब्दो दृश्यते। यः कश्चित् पूर्वस्नेहं विना प्रत्युपकारमनपेक्ष्य परस्योपकारं करोति, सोऽपि सुहृद् एव। यथोक्तम्—

'शस्तचित्ते प्रत्युपकारनिरपेक्षतयोपकारिणि प्रत्युपकारमनपेक्ष्य पूर्वस्नेहं सम्बन्धञ्च विनैवोपकर्त्तरि'। (शब्दार्थचिन्तामणिकोषः, पृ. ८८५)।

६. कृतोपकारे

यदा केनचित् पूर्वं कस्यापि जनस्योपकारः कृतः। कृते चोपकारे तयोः सम्बन्धो जायते। तयोश्चोभयोः स सम्बन्धः सौहार्द एव। एवं कृतोपकारे सम्बन्धिनि सुहृच्छब्दः प्रयुज्यते। यथोक्तम्—

'कृतोपकारे सम्बन्धिनि' इति (तत्रैव, पृ. ८८५)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

७. नर्मसुहृदि

परिहासशीलस्य जनस्यापि कृते सुहृच्छब्दः प्रयुक्तोऽस्ति। पुरा काले राज्ञामन्तःपुरे प्राय एतादृशानां जनानां नियुक्तिर्भवति स्म, ये स्वकीयैर्वाक्पाटवैः कुपितवधूनां मानभञ्जनं तासां हृदयानां प्रासाद्यं च सम्पादयन्ति स्म। अन्तःपुरवासिनीनां कामिनीनां सकला व्यवस्थाऽपि तेषामेव कर्त्तव्यमासीत्। नृपदाराणां वेशभूषादीनां चयनम्, यद्वा तासामलङ्करणादीनामपि व्यवस्था तैरेव सम्पादनीया भवति स्म। ते च राज्ञां मनोऽनुकूलं नायिकानां सकलां व्यवस्थां व्यवस्थापयन्ति स्मेति ते नर्मसुहृत्पदेन व्यपदिश्यन्ते स्म।

नर्मसुहृत्पदं कविविभूतिना भवभूतिना मालतीमाधवे प्रयुक्तमस्ति। तत्र नन्दनो नृपस्य नर्मसुहृदासीत्, यो राजमुखेन अमात्यस्य भूरिवसोः कन्याम्, सकलकमनीयकामिनीजनशेखरेषु मालतीमालामिव विराजमानां मालतीं याचते स्म। यदर्थं बौद्धभिक्षुण्यपि भगवती कामन्दकी चोरिकाविवाहे प्रवृत्ता जाता—

'तां याचते नरपतेर्नर्मसुहृन्नन्दनो नृपमुखेन।
तत्साक्षात्प्रतिषेधः कोपाय शिवस्त्वयमुपायः' ।।

(मालतीमाधवम्, अ.१, पृ. २७)

पुनश्च—

'राज्ञः प्रियाय सुहृदे सचिवाय कार्याद्
दत्त्वात्मजां भवतु निर्वृतिमानमात्यः।
दुर्दर्शनेन घटतामियमप्यनेन
धूमग्रहेण विमला शशिनः कलेव'।। (तत्रैव, पृ.११२)

एषु सप्तविधेष्वर्थेषु महादेवरूपमर्थं परित्यज्यापरे तु प्रायः समानार्थिन एव सन्ति। यतो हि यः खलु मित्रं भवति, सः शस्तचित्तः सकलेषु कार्येषु, समायां विषमायाञ्च सकलायां परिस्थितौ सहायको भवति, सर्वतोभावेन स्वकीयस्य मित्रस्य कार्यं साधयति, कल्याणं च सम्पादयति। यथोक्तं मित्रलक्षणप्रस्तावे नीतिकारैः—

'पापान्निवारयति योजयते हिताय
गूह्यं निगूहति गुणान् प्रकटीकरोति।
आपद्गतं च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः' ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यस्य हृदयं प्रशस्तं न भवति, स कस्याप्युपकारं न करोति, न चान्येन कृतमुपकारं मनुते, अर्थात् स्वोपकर्तरि कृतज्ञतां च न ख्यापयति, न च सहायक एव भवति कस्यापि, न च किञ्चिच्छुभं करोति। यः सुहृद् भवति, स सर्वथा तस्योपकरोत्येव। यथोक्तं पञ्चतन्त्रे—

'सुहृदामुपकारकारणाद् द्विषतामप्यपकारकारणात् ।
नृपसंश्रय इष्यते बुधैर्जठरं को न बिभर्ति केवलम्'।।

(पञ्चतन्त्रे, मित्रभेदः, श्लोकः २२)

'स सुहृद्व्यसने यः स्यादन्यजात्युद्भवोऽपि सन्।
वृद्धौ सर्वोऽपि मित्रं स्यात्सर्वेषामेव देहिनाम्।।
स सुहृद् व्यसने यः स्यात् स पुत्रो यस्तु भक्तिमान्।
स भृत्यो यो विधेयज्ञः सा भार्या यत्र निर्वृतिः'।।

(तत्रैव-३६७-६८)

अत एव प्रस्तुतेऽस्मिन्निबन्धे सुहृत्पदस्य महादेवरूपोऽर्थो न प्रक्रान्तः, अन्ये तु सर्व एव प्रक्रान्ताः, समानार्थकत्वात्। कस्य सुहृदः सहाया मित्राणि उपकारका इति जिज्ञासायां नायकस्येति ज्ञेयम्। एवञ्च निबन्धेऽस्मिन् सहायकानां चरित्राणि विवेचनीयानि सन्ति।

सुहृदां लक्षणम्

यो हितमेव कामयते, स सुहृत्, यश्च व्यसने साहाय्यं करोति स सुहृदिति—

'सुहृदां हितकामानां न करोतीह यो वचः ।
स कूर्म इव दुर्बुद्धिः काष्ठाद् भ्रष्टो विनश्यति'।।३४४।।

'स सुहृद् यो व्यसने स्यादन्यजात्युद्भवोऽपि सन् ।
वृद्धौ सर्वोऽपि मित्रं स्यात्सर्वेषामेव देहिनाम्'।।३६७।।

(पञ्चतन्त्रम्, मित्रभेदः)

ये खलु स्नेहसम्पन्नाः, लोचनानन्ददायिनश्च भवन्ति, ते सुहृद इति—

'सुहृदः स्नेहसम्पन्ना लोचनानन्ददायिनः ।
गृहे गृहवतां नित्यं नागच्छन्ति महात्मनाम्'।।१६।।

(पञ्चतन्त्रम्, मित्रसम्प्राप्तिः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुनः पञ्चतन्त्रकारः कथयति यस्य चित्तं कदाचनापि वित्ते विकारतां न याति, स मित्रमिति—

'विकारं याति नो वित्ते चित्तं यस्य कदाचन।
मित्रं स्यात्सर्वकाले च कारयेन्मित्रमुत्तमम्'।।११४।।

किञ्च आपत्तिकाले यो मित्रं भवति, स एव वस्तुतो मित्रमिति संज्ञामर्हति—

'आपत्काले तु सम्प्राप्ते यन्मित्रं मित्रमेव तत्।
वृद्धिकाले तु सम्प्राप्ते दुर्जनोऽपि सुहृद्भवेत्'।।११६।।

वस्तुतस्तु स एव सुहृद्भवति यः प्रियमेव वक्तव्यमिति भावनां विहायाप्रियमपि वदति; किन्तु सर्वदा तथ्यं पथ्यं च वदति—

'अप्रियाण्यपि पथ्यानि ये वदन्ति नृणामिह।
त एव सुहृदः प्रोक्ता अन्ये स्युर्नामधारकाः' ।।१६७।।

(पञ्चतन्त्रे, मित्रसम्प्राप्तिः)

सर्वं सङ्कल्य्य नीतिशतककारेण श्रीभर्तृहरिणा मित्रलक्षणमेवमुक्तम्— यः पापाद् निवारयति' अर्थाद् इदं कर्म न कर्त्तव्यम्, अनेन पापो भविष्यतीति तस्मात्कार्यान्निवार्य हितकर्मणि योजयते, गोपनीयं सर्वथा निगूहति, गुणानां विज्ञापनं करोति, आपत्तिकाले न जहाति, साहाय्यं ददाति' तत् सन्मित्रमिति—

'पापान्निवारयति योजयते हिताय
गुह्यं निगूहति गुणान् प्रकटीकरोति।
आपद्गतं च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः'।।

यः खलु उत्सवे व्यसनेऽपि समानरूपेण वर्तते, स एव बान्धवः। यथोक्तम्'—

'उत्सवे व्यसने चैव दुर्भिक्षे शत्रुसङ्कटे।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः'।।

सङ्क्षेपेण यः सर्वदा, सर्वथा, मनसा वाचा कर्मणा च परोक्षापरोक्षतया वा हितं कामयते करोति च स सुहृत् सन्मित्रमिति लक्षणं निष्पन्नम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मित्रताकारणानि

किं कारणमस्ति येन कश्चित् कस्यचिन्मित्रं कस्यचिच्च शत्रुर्भवतीति विचारणायां सामान्यतया सङ्कल्पविकल्पात्मकं मन एव कारणत्वेन प्रतिपादयन्ति विपश्चितः। यथा—

'प्रद्वेषो बहुमानो वा सङ्कल्पादुपजायते'। (स्वप्नवासवदत्तम्)

इति महाकविर्भासः। पञ्चतन्त्रेऽपि तथैवोक्तम्—

'मित्रं कोऽपि न कस्यापि नितान्तं न च वैरकृत्।
दृश्यते मित्रविध्वस्तात्कार्याद् वैरी परीक्षितः'।।

तथा च—

'न कश्चित्कस्यचिन्मित्रं न कश्चित्कस्यचिद्रिपुः।
व्यवहारेण जायन्ते मित्राणि रिपवस्तथा'।।

किन्तु नेदं वस्तुतत्त्वम्। न कदाचित् किञ्चिदपि कार्यं कारणं विना सम्भवतीति लोकप्रसिद्धिरिति मित्रतायां शत्रुत्वेऽपि कारणेनावश्यमेव भाव्यमिति—

'कारणान्मित्रतां याति कारणादेति शत्रुताम्।
तस्मान्मित्रत्वमेवात्र योज्यं वैरं न धीमता'।।३३।।

(पञ्चतन्त्रे मित्रसम्प्राप्तिः)

तत्रैव मित्रताकारणतां प्रतिपादयता पञ्चतन्त्रकारेणोक्तं यत् सामान्यमनुष्याणां मित्रता उपकाराद् भवति, मृगाणां पक्षिणाञ्च मित्रता निमित्तविशेषाद् भवति, मूर्खाणां च जनानां मित्रता भयाल्लोभाच्च भवति, किन्तु सतां जनानां मित्रता केवलं दर्शनादेव भवति—

'उपकाराच्च लोकानां निमित्तान्मृगपक्षिणाम्।
भयाल्लोभाच्च मूर्खाणां मैत्री स्याद्दर्शनात्सताम्'।।

(तत्रैव, श्लो. ३६)

सुहृदां महत्त्वम्

विश्वस्मिन्नस्मिन् सुहृदामतीवमहत्त्वमस्ति। अस्ति मनुष्य एकः सामाजिकः प्राणीति मनुष्यस्य सर्वाणि कार्याणि व्यवहारेणैव जायन्ते। कस्यापि कार्यस्य सुचारुरूपतया सम्पादने सुहृदां साहाय्यमवश्यमेवापेक्षते। मित्राणां साहाय्येन दुष्कराण्यपि कार्याणि सुकराणि भवन्ति—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'मित्रवान्साधयत्यर्थान्दुःसाध्यानपि वै यतः ।
तस्मान्मित्राणि कुर्वीत समानान्येव चात्मनः' ।।२७।

(पञ्चतन्त्रे मित्रसम्प्राप्तिः)

किञ्च—

'अपि सम्पूर्णतायुक्तैः कर्त्तव्या सुहृदो बुधैः ।
नदीशः परिपूर्णोऽपि चन्द्रोदयमपेक्षते'।। (श्लो. २८ तत्रैव)

अर्थाद् यथा जलैः परिपूर्णोऽपि जलनिधिः स्वकीयाभिवृद्ध्यर्थं परिपूर्णस्य पूर्णिमचन्द्रस्योदयमपेक्षत एव, तथैव सर्वतोभावेन परिपूर्णेनापि जनेन भूयो भूयः समधिकामुन्नतिं कर्तुं सुहृदोऽवश्यमेव कर्त्तव्याः। यस्य जनस्य दृढानि मित्राणि भवन्ति, तस्य पार्श्वे लक्ष्मीः स्वयमेव निवासहेतोरागच्छति—

'उत्साहसम्पन्नमदीर्घसूत्रं क्रियाविधिज्ञं व्यसनेष्वसक्तम् ।
शूरं कृतज्ञं दृढसौहृदं च लक्ष्मी स्वयं गच्छति वासहेतोः' ।।

प्राणस्य नाशेऽपि समुपस्थिते यदि सन्मित्रस्य दर्शनं स्यान्नाम तदा प्राणात्ययो वा भवतु प्राणरक्षणं वा, उभयथैव सुखोत्पत्तिर्जायते, यदि प्राणरक्षणं स्यात्तदा मित्रस्य साहाय्यं पुष्टं भवति, यदि च मृत्युरेव भवेत्तदा अन्तिमे क्षणे मित्रस्य दर्शनमपि न जातमिति क्लेशो न जायते मनसीति उभया प्रीतिरेव—

'प्राणात्यये समुत्पन्ने यदि स्यान्मित्रदर्शनम्।
तद्द्वाभ्यां सुखदं पश्चाज्जीवतोऽपि मृतस्य च'।। १७५।।

(पञ्चतन्त्रे, मित्रसम्प्राप्तिः)

आपत्तिरूपसरितस्तरणार्थं मित्ररूपनौकाया आवश्यकता भवति, मित्रविवर्जितो जनो न तरति आपदमिति महन्महत्त्वं मित्रस्य—

'आपन्नाशाय विबुधैः कर्त्तव्याः सुहृदोऽमलाः ।
न तरत्यापदं कश्चिद्योऽत्र मित्रविवर्जितः' ।।१७८। (तत्रैव)

यथा सौहृदयुक्ते स्वामिनि, अनुगामिन्यां भार्यायां गुणवति च भृत्ये निवेदनेन दुःखमपि सुखं सञ्जायते, यद्यपि स्वामी वा भार्या वा भृत्यो वा दुःखस्य निवारणार्थं समर्थो भवतु न वा, किन्तु तत्रानन्यहृदये स्वकीयं दुःखं निवेद्य सुखी भवति—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'सुहृदि निरन्तरचित्ते गुणवति भृत्येऽनुवर्तिनि कलत्रे ।
स्वामिनि सौहृदयुक्ते निवेद्य दुःखं सुखी भवति'।। ११०।

(पञ्चतन्त्रे, मित्रभेदः)

महाकविना कविताविलासेन कालिदासेनापि स्वकीयेऽभिज्ञानशाकुन्तले स्निग्धजनेन संविभक्ते दुःखे दुःखस्य सह्यवेदनत्वं प्रतिपादितमस्ति—

'स्निग्धजनसंविभक्तं हि दुःखं सह्यवेदनं भवति'।

(अभिज्ञानशाकुन्तले, अङ्कः-३, पृ. ४४)

हितकामानां सुहृदां हितकरं वचनं यो न करोति, स जनो मूढो भवति, किञ्च काष्ठाद् भ्रष्टः कूर्म इव स्वल्पेनैव विनश्यति—

'सुहृदां हितकामानां न करोतीह यो वचः।
स कूर्म इव दुर्बुद्धिः काष्ठाद् भ्रष्टो विनश्यति'।।३३४।

(पञ्चतन्त्रे, मित्रभेदः)

यथा बलवान्, महान्, सुप्रतिष्ठितश्चैको वृक्षो वातेन सरलतयोत्पाट्यते; किन्तु संहतान् सुप्रतिष्ठितान् वृक्षान् रौद्रोऽप्यनिल उत्पाटयितुं किं घर्षयितुमपि समर्थो न भवति, तथैव एकाकी पुरुषः कियदपि शौर्यसमन्वितं भवतु, द्विषद्भिः तिरस्कृतिं हिंसां च याति। तेजस्वी समर्थोऽपि सहायकैर्विना किञ्चिदपि कर्तुं समर्थो न भवति, यथा अनिलं विना अनलं नालं भवति ज्वलने—

'महानप्येकजो वृक्षो बलवान्सुप्रतिष्ठितः।
प्रसह्य इव वातेन शक्यो घर्षयितुं यतः।।५३।।

अथ ये संहता वृक्षाः सर्वतः सुप्रतिष्ठिताः।
तेन रौद्रानिलेनापि हन्यन्ते ह्येकसंश्रयात्।।५४।।

एवं मनुष्यमप्येकं शौर्येणापि समन्वितम्।
शक्यं द्विषन्तो मन्यन्ते हिंसन्ति च ततः परम्।।५५।।

असुहृदः समर्थोऽपि तेजस्वी किं करिष्यति।
निर्वाते ज्वलितो वह्निः स्वयमेव प्रशाम्यति'।।५६।।

(पञ्चतन्त्रे, काकोलूकीयम्)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुहृदस्तु दुर्लभा भवन्ति यथा दिनं दिनं दिनकरस्योदयम्, ताम्बूलवीटिका, महाभारतीया कथा, पतिव्रता च भार्या दिने दिने अपूर्वं सुखं ददाति, तथैव सुमित्रमपि ददाति नित्यनवीनं सुखमिति। यस्य गृहे नित्यमेव सुहृदः समागच्छन्ति, तत्सुखस्य तुल्यमपरं सुखं नैव भवति—

'सुहृदः स्नेहसम्पन्ना लोचनानन्ददायिनः।
गृहे गृहवतां नित्यं नागच्छन्ति महात्मनाम्।।१६।।
आदित्यस्योदयं तात! ताम्बूलं भारती कथा।
इष्टा भार्या सुमित्रं च अपूर्वाणि दिने दिने।।१७।।
सुहृदो भवने यस्य समागच्छन्ति नित्यशः।
चित्ते च तस्य सौख्यस्य न किञ्चित्प्रतिमं सुखम्' ।।१८।।

(पञ्चतन्त्रे, मित्रसम्प्राप्तिः)

एवं लोके सुहृदां महन्महत्त्वमस्तीति नास्ति सन्देहः।

सुहृदां योग्यता

सुहृदा कथं भाव्यम्? कस्य केन गुणयुतेन कथं वा सौहार्दं कार्यमित्यपि विषयो विचारणीय एवास्ति। न हि सर्वो जनः सकलस्य जनस्य सौहार्दं याति। कञ्चित्प्रति कस्यचित् स्वत एव आकर्षणं भवति, कृतेऽपि प्रयासे कञ्चित् प्रति न भवति सौहार्दम्, अपि तु द्वेष एव जायते। यथा धूम्रयानयात्री सत्यपि स्थाने कदाचित् कस्मैचित् स्थानं न ददाति, अपि तु स्वयमेव रिक्तमपि स्थानमाच्छादयति, कदाचिच्च स्वयमुत्थाय कमप्युपवेशयति— इति महान् विसंवादो दृश्यते। तथैव कश्चित् कदाचित् स्वत एव कमप्युपकरोति साहाय्यं ददाति' मित्रतां च याति, कदाचिन्नोपकरोतीति द्वयोः सौहार्दे वस्तुतो न कोऽपि गुणविशेषः कारणं भवति। यथोक्तं नलचम्प्वाम्—

'भवति हृदयहारी क्वापि कस्यापि कश्चित्
न खलु गुणविशेषः प्रेमबन्धप्रयोगे।
किसलयति वनान्ते कोकिलालापरम्ये
विकसति न वसन्ते मालती कोऽत्र हेतुः'।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नीतिकारैस्तु प्राय इदं प्रतिपादितमस्ति यत् सुहृद्भिः समगुणयुक्तैर्भाव्यम्। ययोर्वयः, वित्तम्, कुलञ्च किं वा बलादिकमपि समं भवेत्, तयोरेव सौहार्दं भवति, नान्ययोरिति। इदमेव च सौहार्दं दृढं भवति। पुष्टविपुष्टयोः, बलवदबलवतोः, वित्तवद्दरिद्रयोः, बालवृद्धयोः, विद्वन्मूर्खयोश्च सौहार्दमुचितं न भवति, अपि तु विनाशकारि भवति—

'ययोरेव समं वित्तं ययोरेव समं कुलम् ।
तयोर्मैत्री विवाहश्च न तु पुष्टविपुष्टयोः ।।२९।।
यो मित्रं कुरुते मूढ आत्मनोऽसदृशं कुधीः ।
हीनं वाप्यधिकं वापि हास्यतां यात्यसौ जनः' ।।३०।।

मृच्छकटिककारो महाकविः शूद्रकोऽप्येवं समर्थयति यद् वित्तवद्दरिद्रयोः सौहार्दं शिथिलतां याति, दरिद्रतां गते मित्रे सुहृदः सौहृदादपि शिथिलीभवन्ति, किञ्च विमुखीभवन्ति, यथा चारुदत्तमुखेनेमां सामाजिकीं स्थितिं प्रकटयति—

'सत्यं न मे विभवनाशकृताऽस्ति चिन्ता
भाग्यक्रमेण हि धनानि भवन्ति यान्ति।
एतत्तु मां दहति नष्टधनाश्रयस्य
यत् सौहृदादपि जनाः शिथिलीभवन्ति'।।(१।१३)

किञ्च—

'दारिद्र्यात्पुरुषस्य बान्धवजनो वाक्ये न सन्तिष्ठते
सुस्निग्धा विमुखीभवन्ति सुहृदः स्फारीभवन्त्यापदः।
सत्त्वं ह्रासमुपैति शीलशशिनः कान्तिः परिम्लायते
पापं कर्म च यत् परैरपि कृतं तत्तस्य सम्भाव्यते'।।(१।३६)

किन्तु कृतायां विचारणायां नेयं समानता सौहार्दस्य वास्तविकी स्थितिः, न चास्ति कापि प्रामाणिकी योग्यता सौहार्दस्य यत्र मृच्छकटिके शस्तहृदयश्चारुदत्तो दरिद्रतायाः कृतेऽपि समधिकं दुःखं प्रकटयन् दृश्यते, दारिद्र्यं प्रति च सौहार्दं जनयति स्वकीये विनाशे दारिद्र्यस्याश्रयार्थं शोकं प्रकटयति—

'दारिद्र्य! शोचामि भवन्तमेवमस्मच्छरीरे सुहृदित्युषित्वा।
विपन्नदेहे मयि मन्दभाग्ये ममेति चिन्ता क्व गमिष्यसि त्वम्'।।(१।३८)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्र कविहृदये क्वास्ति पणं समानतायाः सौहार्दे? प्रथितैवास्ति सुदामाश्रीकृष्णयोः सौहार्दम्। यदा मनुष्यमृगयोः, मनुष्यवृक्षयोः, मानवदेवयोश्च दृढं सौहार्दं प्रतिपादितमस्ति तर्हि का वार्ता सौहार्दे समानतायाः? मनुष्यमृगयोर्मैत्री यथाऽभिज्ञानशाकुन्तले शकुन्तलायाः पतिगृहगमनावसरे एको मृगपोतः पुनः पुनस्तस्याः पटान्तमाकर्षति, तदा महर्षिः कण्वः कथयति शकुन्तलाम्—

'यस्य त्वया व्रणविरोपणमिङ्गुदीनां
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे।
श्यामाकमुष्टिपरिवर्धितको जहाति
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते'।।४।।

प्रतिमानाटकेऽपि रामवनगमनावसरे गजा वाजिनश्च सर्वे दुःखनिमग्ना दृश्यन्ते। सर्वैश्च स्वस्वव्यापारं परित्यज्य रामादिकं प्रति स्वकीयं सौहार्दं प्रकटितम्, विक्रोशितश्च राजा सर्वथा—

नागेन्द्रा यवसाभिलाषविमुखाः सास्रेक्षणा वाजिनो
ह्रेषाशून्यमुखाः................।।२।२।

कविविभूतिना महाकविना भवभूतिनापि मनुष्यमृगसौहार्दस्यातीवप्रशस्यतरमुदाहरणमुपस्थापितमस्ति। वने वसन्ती सीता स्वकरकलितैः सल्लकीपल्लवाग्रैः करिकलभकान् परिवर्धयति स्म। एकं च करिकलभकं पुत्रमिव मनुते स्म—

'सीतादेव्या स्वकरकलितैः सल्लकीपल्लवाग्रै-
रग्रे लोलः करिकलभको यः पुरा वर्धितोऽभूत्'।।(उ.रा. ३।६)

यदा सीता स्वकरिकलभकमन्येन द्विरदपतिना आक्रान्तं श्रुतवती तदा तत्परित्राणार्थं राममाह्वयति स्म—

'आर्यपुत्र! परित्रायस्व परित्रायस्व मम पुत्रकम्'। (पृ. १५०)

रामोऽपि मृगान् बान्धवरूपेण मनुते स्म—

'यत्र द्रुमा अपि मृगा अपि बान्धवो मे'। (उ.रा. ३।८)

एवमेव बहून्युदाहरणानि प्रस्तोतुं शक्यन्ते मनुष्यमृगयोः सौहार्दस्य। मनुष्यपक्षिणोः सौहार्दमपि बीजरूपेणाभिज्ञानशाकुन्तले द्रष्टुं शक्यते। शकुन्तलायाः पतिगृहगमनावसरे मृगैर्दर्भकवलं परित्यक्तम्, मयूरैश्च नर्तनं परित्यक्तम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'उद्गीर्णदर्भकवला मृगाः परित्यक्तनर्तना मयूराः'।

मनुष्यवृक्षयोरपि सौहार्दस्य निदर्शनं तत्रैवास्ति। शकुन्तलया विरहिताभिर्लताभिरपि अश्रवः प्रवाहिताः—

'अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणीव लताः'।

मनुष्यदेवयोः सौहार्दे इन्द्रेण सह दुष्यन्तपुरूरवसादीनां सौहार्दं नाटकेषु, काव्येषु दिलीपस्य प्रथितमेवास्ति सौहार्दमिन्द्रेण। देवासुरसङ्ग्रामे दुष्यन्तो महत्साहाय्यं सम्पादयति स्म। यथा कथयति कण्वशिष्यः—

'आशंसन्ते समितिषु सुरा बद्धवैरा हि दैत्यै-
रस्याधिज्ये धनुषि विजयं पौरुहूते च वज्रे'।।

मनुष्याणां मनुष्येतरजातिसौहार्दमिदं केवलमत्र सङ्केतितम्।

अनेन सिद्धं यत् समानयोरेव सौहार्दमिति नियमो नाङ्गीक्रियते नाटककारैः। अत एव नास्ति च कापि प्रामाणिकी योग्यता सौहार्दस्य नाटककाराभिमता।

सुहृदां भेदाः

सुहृदां भेदानां परिगणनावसरे प्रथमतस्तु भेदद्वयं दृश्यते— सहजसुहृदः, कार्यकारणवशीभूताश्चेति। तत्र सहजसुहृदस्ते सन्ति येऽकारणमुद्देश्यविशेष-मनालोच्यैव परस्परं मित्रतां यान्ति, परस्परं साहाय्यं च सम्पादयन्ति। एवंविध-सौहार्दे उपकारः सहयोगो वा प्रथमं जायते, पश्चाच्च कृतं साहाय्यं विचार्य आकर्षणम्, ततश्च सौहार्दस्योत्पत्तिः, क्रमशस्तद्घनीभावश्च भवति। सहजसौहार्दमेव विशेषतया रूपकेषु प्रधाननायिकयोर्विवाहस्य कारणत्वेन प्रतिपादितमस्ति। उदाहरणार्थं यथा— अविमारके महाकविना भासेन प्रणीते, उद्यानभूमिं गतायाः कुन्तिभोजपुत्र्याः कुरङ्ग्यास्ततः परावर्तमानायाः पथि मदोन्मत्तेन गजेनाक्रान्तायाः रक्षणमविमारकेन कृतम्। तत्पराक्रमं दृष्ट्वा तम्प्रति तस्या मनसि भावोद्रेको जातः। सहजं सौहार्दमपि प्रथमतो भेदद्वयेन विभक्तं दृश्यते—१. प्रधाननायकनायिकयोः, २. प्रधानाप्रधानयोश्च। तत्र प्रधाननायकनायिकयोः सहजं सौहार्दं पूर्वानुरागोत्पत्तेः कारणं जायते, पश्चाच्च सम्पद्यते तयोर्विवाहोऽपि। प्रधानाप्रधानयोः सहजं सौहार्दं मानविकं मानवेतरजातिकञ्चेति द्विविधम्। तत्र मानविकमपि १. राज्ञो राजानं प्रति, २. राज्ञो लोकम्प्रति, ३. लोकस्य राजानम्प्रति, ४. पुरुषस्य पुरुषं प्रति,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

५. पुरुषस्य नारीम्प्रति ६. नार्या: नारीम्प्रति ७. नार्या: पुरुषम्प्रति ८. कुमारस्य कुमारम्प्रति, (भ्रातु: भ्रातरम्प्रति) ९. भृत्यस्य कुमारम्प्रति १०, गुरुसुहृद: ११. ऋषिसुहृद:, १२. भक्तिसंवलिता: सुहृदश्चेति भेदैर्नानाविधमिति।

मनुष्येतरजातिकं सौहार्दमपि— देवविषयकम्, नदीपर्वतविषयकम्, पशु-पक्षिसर्पादिविषयकम्, वृक्षलतादिविषयकञ्चेति बहुविधं दृश्यते।

कार्यकारणवशीभूता: सुहृदस्ते सन्ति ये किमपि कार्यविशेषमुद्दिश्य सौहार्दं यान्ति सहायकाश्च भवन्ति। कार्यकारणवशीभूतसुहृदां भेदपरिगणनावसरे १. शृङ्गारसुहृद:, २. अर्थसुहृद: ३. अन्त:पुरसुहृद: ४. दण्डसुहृद:, ५. धर्मसुहृदश्चेति नानाविधा: भेदा उपस्थापयितुं शक्यन्ते। यथा साहित्यदर्पणे नायकस्य सहायकानां भेदपरिगणनायां शृङ्गारसहायका:, अर्थसहायका:, अन्त:-पुरसहायका:, दण्डसहायका:, धर्मसहायकाश्चेति भेदा: परिगणिता: सन्ति—

शृङ्गारेऽस्य सहाया: विटरचेटविदुषकाद्या: स्यु:।
भक्ता नर्मसु निपुणा: कुपितवधूमानभञ्जन्मा: शुद्धा:।।
सम्भोगहीनसम्पद्विटस्तु धूर्त: कलैकदेशज्ञ:।
वेशोपचारकुशलो वाग्मी मधुरोऽथ बहुमतो गोष्ठ्याम्।।
कुसुमवसन्ताद्यभिध: कर्मवपुर्वेषभाषाद्यै:।
हास्यकर: कलहरतिर्विदूषक: स्यात्स्वकर्मज्ञ:।।
मन्त्री स्यादर्थचिन्तायां तद्वदवरोधे।
वामनषण्ढकिरातम्लेच्छाभीरा: शकारकुब्जाद्या:।।
मदमूर्खताऽभिमानी दुष्कुलतैश्वर्यसंयुक्त:।
सोऽयमनूढाभ्राता राज्ञ: श्याल: शकार इत्युक्त:।।
दण्डे सुहृत्कुमाराटविका: सामन्तसैनिकाद्याश्च।
ऋत्विक्पुरोधस: स्युर्ब्रह्मविदस्तापसास्तथा धर्मे।।

(साहित्यदर्पण: परि. ३, का.-४०-४५)

एवं सर्वं सङ्कलेन वक्तुं शक्यते यत् समाजे सुहृदामस्ति महती उपयोगितेति सहायान् विना कोऽपि किमपि कार्यं कर्तुं न पारयति, तथा च साहाय्यं प्राप्य क्षोदीयानपि तथैव कार्यान्तं गच्छति, यथा महानद्यां सम्भूय नगापगा अपि अम्भोधिमभ्येति—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बृहत्सहायः कार्यान्तं क्षोदीयानपि गच्छति।
सम्भूयाम्भोधिमभ्येति महानद्या नगापगा।।

(शिशुपालवधमहाकाव्यम्)

रूपकाणि सन्ति समाजस्यादर्शभूतानि। तत्र समाजस्य वास्तविकं चित्रणं द्रष्टुं शक्यते। अतः सुहृदः कथं भवन्ति, का तेषां योग्यता, किम्प्रकारकाश्च भवन्ति, तथा काऽस्त्युपयोगिता सुहृदाम्, के च तेषां गुणाः के चावगुणा इत्यादिविषयाणां सम्यगध्ययनार्थं रूपकाणां पर्यालोचनमावश्यकमस्तीति ध्यायं ध्यायं मया संस्कृतरूपकेषु सुहृदां स्थितेः विवेचनं कृतम्। रूपकाण्याधारीकृत्य कृतं सुहृदां विवेचनं सुहृदां वास्तविकं स्वरूपमुपस्थापनमेवास्ति मदीयास्य निबन्धस्योपयोगिता।

●

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

५२ वर्षे	मार्गशीर्ष-फाल्गुनपूर्णिमे, वि.सं. २०५४	३-४ अङ्कौ

निर्विशेषब्रह्मवादः

प्रो. पारसनाथद्विवेदी

आचार्योऽध्यक्षश्च, वेदान्तविभागे
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी

❀ ❀ ❀

क्रोडस्थितभूतिसितेन शम्भुना
उदीयमानार्क इवारुणच्छविः ।
हिमालयस्य द्युतिमाभिहारयन्
गजाननश्शं तनुतादहर्निशम् ।।

इदमत्र मीमांस्यते—'सर्वकामः सर्वकर्मा सर्वगन्धः' (छा॰ ३।१४।२) इत्याद्याः श्रुतयः सविशेषब्रह्मबोधिकाः। 'अस्थूलमनणु.......' इत्याद्याश्च निर्विशेष-ब्रह्मलिङ्गकाः श्रुतय इति तत् किमत्र प्रतिपत्तव्यम् । अन्यतरदुभयविधमेकं वेति। अत्रोच्यते—निर्विशेषमेव श्रुत्या बोध्यते, एकस्योभयलिङ्गविरोधात्।

उक्तञ्चोभयलिङ्गाधिकरणे—'न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि' (३।२।११) इति सूत्रे भगवत्पादैः। तत्रत्याधिकरणस्यायं भावः—नोभयलिङ्गत्वं ब्रह्मणः स्वाभाविकम्, सविशेषनिर्विशेषत्वयोर्विरोधात् । तथा चैकं स्वतोऽपरं परत इति स्वीकार्यम् । परतश्च सविशेषत्वं स्वतस्तु निर्विशेषत्वमिति। अत एवोक्तम्—न स्थानतोऽपीति। स्थानमुपाधिस्ततोऽपि ब्रह्मण्यन्यादृशता न सम्भवति स्वाभाविकी। न हि स्वच्छस्फटिको जपाकुसुमसंयोगाद् वस्तुतो रक्तो भवति। अत उपाधिनापि न वास्तवो विशेषो भवितुमर्हति। स्थानतोऽपीत्यत्रापिना स्वतोऽ-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पीत्यर्थः। न च स्वतः सविशेषं, न चोपाधितोऽपीति भावः। अतो ब्रह्मणि विशेषः कल्पितोपाधिकल्पित एव न वस्तुत इति स्फटिकलौहित्यवद् आरोपित इति तात्पर्यम्। उपाधितो वास्तवविशेषसत्त्वे परिणामित्वाद् ब्रह्मणोऽनित्यत्वापत्तिः। एवञ्चाज्ञानोपाधितः सर्वकर्मगन्धरसादित्वं ब्रह्मण्यध्यारोपितमेव श्रुतियुक्तिभ्यामास्थेयम्। निर्विशेषत्वप्रतिपादनार्थत्वात् श्रुतीनाम्।

एवञ्च सविशेषप्रतिपादकश्रुतीनामपि निर्विशेषत्वप्रतिपादन एव तात्पर्यम्, न स्वार्थे प्रामाण्यम्। ततश्चान्यतरलिङ्गपरिग्रहेऽपि समस्तविशेषरहितं निर्विकल्पकमेव ब्रह्म प्रतिपत्तव्यम्, न सविशेषम्। सर्वत्र हि ब्रह्मस्वरूपप्रतिपादनपरेषु वाक्येषु 'अशब्दमस्पर्शमरूपमव्ययम्' (कठो॰ ३।१५) इत्यादिष्वपास्तसमस्तविशेषमेव ब्रह्मोपदिश्यते।

न च ब्रह्मणो विभिन्नाकारोपदेशात् सविशेषत्वमप्यङ्गीकर्त्तव्यम्। तथा हि चतुष्पादषोडशकलं ब्रह्म वामनीत्वादिलक्षणं ब्रह्म त्रैलोक्यशरीरवैश्वानरशब्दोदितं ब्रह्म इत्यादिरूपेण भेदनिर्देशादिति वाच्यम्, वास्तविकभेदस्यासत्त्वाद् उपाधिकृतभेदस्य सत्त्वे चेष्टापत्तेः। वास्तविकभेदसत्त्वे च एकमेवाद्वितीयमित्यादिश्रुतिविरोधः। औपाधिके च उपास्योपासकत्वसिद्धये भेदे सति सर्वसामञ्जस्याद् न ह्यौपाधिकेन भेदेन वस्तु भिद्यते।

किञ्च प्रत्युपाधिभेदमभेद एव श्रुत्या बोध्यते। 'यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं शरीरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव योऽयमात्मा' (बृ. २।५।१)। अतो न श्रुतेर्ब्रह्मणो भेदे तात्पर्यं भेदस्योपासनार्थं कल्पनात्।

किञ्च भेदनिन्दाऽपि श्रुत्या क्रियते—'मनसैवेदमाप्तव्यं नेह नानास्ति किञ्चन मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' (बृ. ४।१।१)। भोक्ता भोग्यं प्रेरितारञ्च मत्वा सर्वं प्रोक्तम्, त्रिविधं ब्रह्म एतद् इत्यादिना शास्त्रीयेण वाक्येन अभिन्नमद्वैतं निर्विकल्पं निर्विशेषं ब्रह्मैव बोध्यते, न सविशेषमिति। अत एव अरूपवदेव तत्प्रधानत्वादिति सूत्रेणापि रूपाद्याकाररहितस्यैव ब्रह्मणोऽवधारयितव्यत्वं प्रतिपाद्यते। रूपादिविशेषरहितस्यैव तस्य श्रुतिशतैर्बोधनात्। तथा हि — 'अस्थूलमनण्वह्रस्वमदीर्घम्' (बृ.३।८।८), 'अशब्दमस्पर्शमरूपमव्ययम्' (क॰३।१५), 'आकाशो वै नामक-पयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म' (छा॰ ८।१४।१), 'दिव्यो ह्यमूर्तिः पुरुषः स बाह्याभ्यन्तरो ह्यजः' (मु॰२।१।२) 'तदेतद् ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूः, (बृ. २।५।१९) इत्यादीनि वाक्यानि प्राधान्येन निराकारस्य निर्विशेषस्यैवात्मन उपदिशन्ति। अत इतराणि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आकारवद्विषयाणि वाक्यानि न प्रधानानि स्वरूपबोधकानि, अपि तूपासना-विधिप्रधानानि। तैरुपासनाविधिर्बोध्यते न ब्रह्मस्वरूपम्। निर्विशेषस्य चोपास्यत्वेन विधातुमशक्यत्वाद् विशेषं परिकल्प्योपासना विधीयते। प्रधानवाक्यानामेव बलीयस्त्वात् तदर्थे एव श्रुतेः परमतात्पर्यमवधारयितव्यम्। सर्वविशेष-बोधकश्रुतीनाञ्च 'प्रकाशवच्चावैयर्थ्यम्' इति सूत्रेण पृथिव्याद्युपाधिसम्बन्धात् तदाकारताबोधनद्वारा उपास्यत्वोपदेशकरणाद् अवैयर्थ्यं प्रतिपादितम्।

सर्वथा च निर्विशेषमेकं ब्रह्म बोध्यते श्रुत्या। अत एव 'आह च तन्मात्रम्' इत्यग्रिमसूत्रेण चैतन्यमात्रं निर्विशेषं जगद्विलक्षणं ब्रह्म बोध्यते। तथा हि स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवैवं वा अरेऽयमात्मानन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवेति। तथा चानया श्रुत्या आत्मनश्चैतन्यमात्रत्वं सिद्धं भवति।

एतदेव च पररूपप्रतिषेधेन निर्विशेषं ब्रह्म दर्शयति श्रुतिः 'अथात आदेशो नेति नेति' (बृ. २।३।६), 'अन्यदेव तद् विदितादवितादधि' (के॰३), 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' (तै॰२।४।१) इत्येवमाद्याः।

स्मृतिरप्याह—

ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते ।
अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ।। इति।

श्रुतिस्मृतिभ्यां पररूपप्रतिषेधेन निर्विशेषत्वं बोध्यते। तत्र आदिरस्यास्तीति आदिमत् कार्यं न आदिमद् अनादिमत् कार्यरहितम्। अथवा न आदिर्यस्य अनादिः मत्तः परं =सगुणात् परमुत्कृष्टं निर्विशेषं ब्रह्म। सह इन्द्रियवेद्यमसत् परोक्षञ्च नास्तीत्यर्थः।

अत एव निर्विशेषत्वादेव सूर्यकादिवदुपमास्य युज्यते। तथा हि—

'एक एव तु भूतात्मा भूते भूते व्यवस्थितः।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत्'।।

न च सूर्यादिभ्यो हि मूर्तेभ्यः पृथग्भूतं विप्रकृष्टदेशं मूर्तं जलं गृह्यते। तत्र युक्तः सूर्यप्रतिबिम्बः। न त्वात्मा मूर्तः, न चास्मात् पृथग्भूता विप्रकृष्टदेशाश्चोपाधय इति न युक्तदृष्टान्ततेति वाच्यम्, नीरूपस्याप्यात्मन उपाध्यन्तर्भावेण उपाधिगत-धर्मवत्त्वस्य विवक्षणात्। यथा हि सूर्यप्रतिबिम्बे जलगते जलगतवृद्धिह्रासभाक्त्वं तथैव प्रकृतेऽपीति बोध्यम्। तथा च परब्रह्मण उपाध्यन्तर्भावं श्रुतिरेव दर्शयति—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः पुरः स पक्षीभूत्वा पुरः पुरुष आविशत्' (बृ. २।५।१४)। 'अनेन जीवेनात्मनानुप्रविश्य' (छा०६।३।५) तस्माद् युक्तो दृष्टान्तः।

तस्मात् सर्वासु सविशेषनिर्विशेषलिङ्गासु श्रुतिषु निर्विशेषमेव ब्रह्म प्रतिपाद्यते, न सविशेषं नोभयं न विपरीतमिति सिद्धम्। निरूपितञ्चैतद् भगवत्पादै-रुभयलिङ्गाधिकरणे 'न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि' इत्यादिसूत्रभाष्ये।

अविद्योपाधिमालम्ब्य सविशेषश्रुतिर्मता ।
अद्वैतं निर्गुणं ब्रह्म निर्विशेषश्रुतिर्गतिः ।।

निष्प्रपञ्चमद्वयं चैतन्यैकरसं ब्रह्म जिज्ञासितव्यम्। तदेव चाज्ञानोपाधिना जगत्कारणमिति श्रुतिलक्षणेन श्रुतिप्रमाणेन सूत्रभाष्यादिष्वसकृद् व्याख्यातम्।

तत्र वेदान्तैरध्यारोपापवादन्यायेन निर्विशेषमेव ब्रह्मावबोध्यते। अध्यारोप-न्यायेन च समस्तसृष्टिस्थितिलयाश्रयतया जगत्कारणत्वेन ब्रह्म व्याख्यातम्, तच्च सविशेषमपवादन्यायेन च निष्प्रपञ्चमद्वैतं निषेधमुखेनावबोधितम्।

अनेनापवादन्यायेन ब्रह्मावबोधने सति प्रपञ्चस्य मिथ्यात्वं सिध्यति सविशेषस्याध्यारोपितविशेषकत्वमपारमार्थिकत्वं सिध्यति। तच्च निषेधवाक्यम्— 'अथात आदेशो नेति नेति। नेह नानास्ति किञ्चने'त्यादि। तथा हि बृहदारण्यके— 'द्वे वा ब्रह्मणो रूपे मूर्तञ्चैवामूर्तञ्च, मर्त्यश्चामर्त्यश्च स्थितञ्च यच्च सच्च त्यच्च' (बृ.२।३।१) इत्युक्तम्। तत्र पृथिव्यप्तेजोभूतत्रयं मूर्तं वाय्वाकाशद्वयम्ममूर्तमिति पञ्चमहाभूतानां मूर्तामूर्तरूपेण द्वैराश्यमुक्तम् । एते द्वे रूपे परमार्थतोऽरूपस्य ब्रह्मणोऽध्यारोपिते। ताभ्यां तद् ब्रह्म रूप्यते। मूर्तस्य मूर्च्छितावयवस्य कठिनस्य विशेषणं मर्त्यं स्थितं सच्च। मर्त्यं मरणधर्मकं स्थितमव्यापकं सदन्येभ्यो विशिष्यमाणमसाधारणधर्मकम्। गन्धस्नेहोष्णता च परस्परव्यवच्छेदहेतवोऽ-साधारणधर्माः। तस्यैतस्य मूर्तस्य रसः सारो य एष सविता तपति। अमूर्तञ्च कठिनं वायुरन्तरिक्षञ्च। एतदमृतमरणधर्मकमापेक्षिकम्, यद् व्यापकमित्यर्थः। एति गच्छतीति यत्। त्यद् नित्यपरोक्षमित्यर्थः। एतस्यामूर्तस्यामृतस्य यतस्त्यस्य रसः सारो यः सवितृमण्डले पुरुष इति। अधिदैवतं रूपम्। आध्यात्मिकञ्च शारीरा-रम्भकस्य मूर्तस्य भूतत्रयस्य रसश्चक्षुरमृतस्य प्राणस्यान्तराकाशस्य च तादृशस्य पूर्वोक्तविशेषणविशिष्टस्य रसो दक्षिणाक्षिस्थः पुरुष इति। तदेवं ब्रह्मण औपाधि-कयोर्मूर्तामूर्तयोराध्यात्मिकाधिदैविकयोः कार्यकारणभावेन विभागो व्याख्यातः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तादृशस्य च कारणात्मनः पुरुषस्य रूपं मूर्तामूर्तवासनाविज्ञानमयं विचित्रं दृष्टान्तैरुच्यते। तद्यथा—'महारजनं वासो यथा पाण्ड्वाविकं यथेन्द्रगोपः' (बृ. २।३।६), महारजनं हरिद्रा तया रक्तं वस्त्रं महारजनं पाण्डु आविकं धवलं कम्बलमित्यविना।

एवञ्च ब्रह्मणि द्विराशिप्रविभक्तपञ्चमहाभूताध्यारोपमुक्त्वा श्रुत्यैव निषेध्यते—'अथात आदेशो नेति नेति' इति। निषेधशेषं ब्रह्म सत्यस्य सवासनस्योक्तपुरुषस्य सत्यमिति ज्ञायते। ननु को विषयः प्रतिषेधस्य। अन्यस्य निषेधसमर्पकस्य तदिमादिशब्दस्याभावाद् इतिशब्दस्यैव निषेधसमर्पकत्वम्। इतिशब्दश्च सन्निहितविषय एव शब्दवत्। सन्निहितञ्चात्र प्रकरणात्। मूर्तामूर्तरूपद्वयं सप्रपञ्चं ब्रह्म च। तत्रेयं शङ्का जागर्ति—किं सवासनं पुरुषं हिरण्यगर्भाख्यं रूपद्वयञ्च सर्वं निषेध्यते उत ब्रह्मैव अथवा सवासनं रूपद्वयमेव ब्रह्म त्ववशिष्यत इति।

तत्र नेति नेति श्रुतिप्रयोगात् सवासनं रूपवद् ब्रह्म रूपद्वयञ्चापि निषिध्यते। अथवा रूपवद् ब्रह्मैव निषिध्यते। यद्यपि अस्तीत्येवोपलब्धव्य इति श्रुत्या ब्रह्मणो विभिन्नश्रुतिषु प्रतिपादितचरस्य असद्भावो न युक्तः, तथापि मूर्तामूर्तद्वयविशेष-निषेधात्, निर्विशेषं सामान्यं न भवतीति न्यायात् सामान्यस्य सद्रूपस्य ब्रह्मणोऽसद्भावो भवत्येव।

अस्तीत्येवेत्यादिश्रुतिस्त्वर्थवादत्वे न नेया। एवञ्च सर्वस्यैव निषेधो युक्त इति न निर्विशेषब्रह्मसिद्धिरिति चेत्, अत्रोच्यते—उभयप्रतिषेधे सति शून्य-वादप्रसङ्गात्। न हि भावमनाश्रित्य प्रतिषेध उपपद्यते। किञ्चिद्धि क्वचिन्निषिध्यते। कञ्चित्परमार्थमवलम्ब्यापरमार्थो निषिध्यते। यथा रज्ज्वां सर्पादयः। एवञ्च ब्रह्मणि अविद्योपस्थापितमूर्तामूर्तरूपप्रतिषेधे नैवानारोपिताधिष्ठानस्य प्रतिषेधो युक्तः सर्वप्रतिषेधे प्रतिषेधस्यैवानुपपत्तेः।

न च प्रत्यक्षादिप्रमाणोपपादितस्य मूर्तामूर्तप्रपञ्चस्य प्रतिषेद्धुमशक्यत्वात् सर्वजगद्व्याकोपाच्च ब्रह्मण एव प्रतिषेधयुक्त इति वाच्यम्।

'ब्रह्म ते ब्रह्मणि' (बृ. २।१।१) इत्युपक्रमविरोधाद् न ह्युपदेश-त्वेनापक्रान्तस्य निषेधो युक्तः। 'असन्नेव स भवति असद् ब्रह्मेति वेद चेत्' (तै॰ २।६।१) इत्यादिनिन्दावचनात्। अस्तीत्येवोपलभ्य इति श्रुत्यवधारणात्। न चार्थवादत्वेन सत्यां गतौ सा श्रुतिर्नेया। यस्य च ब्रह्मणो वेदान्तेषु महता परिकरबन्धेन 'ब्रह्मविदाप्नोति परं सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादिना वाक्येन प्रतिपादनं तस्यैव पुनरभावबोधने सर्ववेदान्तव्याकोपः प्रसज्येत। न च ब्रह्मण आत्मत्वाद् निषेधो भवितुमर्हति, निषेधकस्यापि आत्मरूपत्वात्। तस्माद् ब्रह्मणो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रूपं मूर्तामूर्तद्वयं प्रपञ्चं प्रतिषेधति श्रुतिः परिशिनष्टि च ब्रह्मेति निर्णेतव्यम्। एतदेव प्रकृतैतावत्त्वाधिकरणे— 'प्रकृतैवत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः' (ब्र.सू. ३।२।२२), सूत्रे भाष्ये व्याख्यातं भामत्याञ्च।

प्रकृतं यद् एतावद् इयत्तापरिच्छिन्नं मूर्तामूर्तलक्षणं ब्रह्मणो रूपं तदेव शब्दः प्रतिषेधति। तद्धि प्रकृतं प्रपञ्चितञ्च पूर्वस्मिन् ग्रन्थेऽधिदैवतमाध्यात्मिकञ्चेति। एवञ्च सप्रपञ्चं ब्रह्मणो रूपं सन्निहितत्वाद् सन्निहितविषयबोधकेन इतिना सन्निधाप्यते, न वा प्रतिषेध्यत इति ब्रह्मणश्च प्रकृतत्वम्। 'द्वे वाव ब्रह्मणो रूपे' इत्यादौ षष्ठ्यन्तस्य तस्य विशेषणत्वाद् अप्रधानत्वाद् अप्रयुक्तत्वम्। न चार्थतः प्राधान्याद् ब्रह्मणो निषेधः, राज्ञो भृत्यो नास्तीत्यादिना राजनि निषेधप्रसङ्गात्। एवञ्च कल्पितरूपप्रत्याख्यानेन ब्रह्मणो निर्विशेषरूपावेदनं निर्णीयते। यत् प्रतिषिद्धं कार्यं तदास्पदमेव, अन्यत्र चासम्भवाद् मिथ्यात्वं तस्य निर्णीतं भवति। प्रपञ्चरूप-कार्यस्य च वाचारम्भणश्रुत्याप्यसत्त्वं प्रतिपाद्यते। न तु ब्रह्मणो नेति नेति श्रुत्या निर्विशेषं ब्रह्म बोध्यते तद्बोधन एव तात्पर्यम्।

न च स्वयं श्रुतिरूपद्वयं ब्रह्मण उक्त्वा स्वयमेव प्रतिषेधतीति न युक्तम्, प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरमिति न्यायादिति वाच्यम्, मूर्तामूर्तत्वेन रूपद्वयवद् ब्रह्मेति प्रतिपादने श्रुतेस्तात्पर्याभावात्। लोकप्रसिद्धं रूपद्वयं यत् तत्कल्पितं सत्यं तु निर्विशेषं ब्रह्मैवेति प्रतिपादनपरत्वात्। तस्माद्रूपद्वयस्य प्रतिषेध्यसमर्पणार्थमनुवादमात्रं श्रुतिः करोतीति न दोषलेशोऽपि। तत्र नेति नेति द्वयो रूपयोः प्रतिषेधः किम्? अथवा प्रथमो भूतराशिं द्वितीयश्च वासनाराशिं प्रतिषेधति। अथवा वीप्सेयं यदुच्यते ब्रह्मातिरिक्तं तत्सर्वं न भवतीत्यर्थबोधाय। एवञ्च सत्यग्रेऽपि भूयो ब्रवीति श्रुतिः—'अन्यत् परमस्ति' इति सर्वप्रतिषेधे हि किमन्यत् परमस्तीति ब्रूयात्। ब्रह्मावसाने प्रतिषेधे च तत्रत्यः समस्त एव प्रघट्टकः सामञ्जस्यमेति, अनवसाने च सत्यस्य सत्यमित्यादिवाक्यं न सङ्गच्छते। अतो नेति नेत्यादिना प्रपञ्चस्यैव सर्वस्य प्रतिषेधो न ब्रह्मणः। निषेधे च सर्वप्रपञ्चे निर्विशेषं ब्रह्म सिध्यति।

एवमेव 'नेह नानास्ति किञ्चन' इति श्रुत्यापि ब्रह्मणि नानात्वं प्रतिषिध्यते। नानापदस्य ब्रह्मभिन्नमर्थः किञ्चिन्नित्यस्य च वस्तुसामान्यमर्थः। अस्तीत्यस्य अस्तित्वमर्थस्तथा चास्तित्वविशिष्टो ब्रह्मभिन्नवस्तुसामान्याभावो बोध्यते। अत्रापि च यस्मिन् पञ्च पञ्च जना आकाशश्च प्रतिष्ठित इति वाक्येन प्रसक्तं नानात्वं प्रतिषिध्यत इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पारस्करगृह्यसूत्रोक्ताशौचनिरूपणम्

श्रीशिवराज-आचार्यः कौण्डिन्न्यायनः
स्वाद्ध्यायशाला, च. २/४१९, सरस्वतीमार्गः
लाजिम्पाट्, काष्ठमण्डपमहानगरम्
नेपालदेशः

❀ ❀ ❀

विषयोपक्रमः

अद्यत्वेऽपि भारतवर्षीयचातुर्वर्ण्यसमाजे प्रचलितस्य शास्त्रीयधर्मस्य विविधेषु पक्षेषु मध्य एकः पक्ष आशौचव्यवस्था वर्तते। एतस्मिन् विषये जनाः पण्डितान् समये समये प्रश्नान् पृच्छन्ति। पण्डिताश्च प्रायेण षडशीति-त्रिंशच्छ्लोकी-दशश्लोकी-निर्णयसिन्धु-धर्मसिन्धुप्रभृतीन् ग्रन्थान् विलोक्य तेषां प्रश्नानामुत्तराणि ददति। माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशाखाध्यायिकुलजा अपि पण्डिता माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-शाखाध्यायि-कुलजानां जनानामाशौचविषयकाणां प्रश्नानामुत्तरदानेऽपि एतस्मिन् विषये पारस्करगृह्यसूत्रे का व्यवस्था वर्तत इति विचार्य वक्तव्यमित्येतावदपि प्रायेण न जानन्ति। ते प्रायेण पारस्करगृह्यसूत्रप्रतिकूलां व्यवस्थामपि ददति। तस्मात् कारणाद् एतस्मिन् विषये पण्डितानां ध्यानाकर्षणस्य विचारस्य परिष्कारस्य चाऽऽवश्यकताऽनुभूयते। तस्मादत्र सङ्क्षेपेण तस्मिन् विषये सोपोद्घातो विचारः प्रस्तूयते।

वैदिक-सनातन-वर्णाश्रम-धर्मव्यवस्थायां सर्वासु धर्मव्यवस्थासु कर्तुर्गोत्र-प्रवर-वेदशाखा-सूत्राणां विचारो भवति। तस्माद् द्विजातिभिः स्वगोत्रप्रवरवेद-शाखासूत्राणां व्यवस्थां सम्यग् ज्ञात्वा मुख्यरूपेण तदनुसारमेव धर्मकर्म कर्तव्यम्। अत एव वैदिका ब्राह्मणा अनादेरपौरुषेयस्य वेदस्य गुरुशिष्यपरम्परयाऽविच्छेदेन धारणं कृत्वा स्वशाखावेदादिशास्त्रनिचयस्य यथार्थस्य स्वरूपस्य रक्षां कर्तुं स्वशाखावेदादिशास्त्रस्यार्थं बोधयित्वा धर्ममोक्षपुरुषार्थसाधनं कर्तुं मार्गं दर्शयितुं च द्विजातिकुमाराणामुपनयनवेदाध्यापनादिकं कुर्वन्ति। तत्रापि संस्कारसम्पादन-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कारपालन-शिखायज्ञोपवीतधारण-शौच-स्नान-सन्ध्योपासन-स्वाध्यायाध्ययन-तर्पणादिसदाचार-नियमपालन-परायणात्, लशुन-पलाण्डु-गृञ्जन-क्याकु-ग्राम्य-कुक्कुट-ग्राम्यसूकर-हट्टालयदालभक्ताऽशुचिस्पृष्टजललवणयुतपक्वान्नाद्यभक्ष्य-भक्षणपरिहारशीलात्, शीधु-मधु-मैरेयादिकमद्याद्यपेयपानवर्जकात्, निन्द्यसम्पर्क-परिहारशीलात् शास्त्रसम्मताधिकारसम्पन्नात्, शुद्धकुलीनाद् अनपाश्रित्यजीविनः स्वतन्त्रात् शास्त्रीयनियमानुसारविहित-गुरुमुखोच्चारणानूच्चारणरूपाध्ययन-गृहीतस्वशाखावेदमन्त्रादिकाद् गृहस्थाद् ब्राह्मणाद् गुरोः शास्त्रसम्मतेनाऽधिकारिणा यथानियमं 'वेदं समाप्य स्नायात्'[१] इत्यादिकं विधिमनुसृत्य श्रद्धयाऽधीतस्य महताऽऽदरेण पालितस्य स्वशाखावेदादिशास्त्रनिचयस्यैव धर्मे मोक्षे च मुख्यं प्रामाण्यमिति हि वैदिकानां शास्त्रप्रामाण्यसिद्धान्तः। अत एव वैदिके धर्मे स्वशाखाया वेदमन्त्रसंहिता, ब्राह्मणम् (आरण्यकोपनिषत्सहितम्), श्रौतसूत्रम्, गृह्यसूत्रम्, धर्मसूत्रम्, श्रौतगृह्यपरिशिष्टानि च मुख्यानि प्रमाणानि। अन्ये धर्ममीमांसाशास्त्र-ब्रह्ममीमांसाशास्त्राऽनुस्मृति-पुराणोपपुराणादिग्रन्थास्तु स्वशाखावेद-मन्त्रसंहितादीनामनुकूलत्वेऽविरोधित्वे चैव प्रमाणपदवीमारोहन्ति।

उक्तविधायां वैदिकानां शास्त्रप्रामाण्यवस्तुस्थितौ स्वाधीतस्वशाखा-वेदमन्त्रसंहितादिग्रन्था वैदिका विद्वांसो वेदवेदाङ्गोपाङ्गादिमूलग्रन्थेभ्य एव तत्तद्धर्मव्यवस्थाज्ञानं कृत्वा तदनुसारं तत्तद्धर्माचरणं कर्तुं शक्नुवन्ति; किन्तु तथाविधाध्ययनरहिताः साधारणाः पण्डितास्तथा कर्तुं प्रायेणाऽशक्ता भवन्ति। ते विभिन्नानां धर्मशास्त्रग्रन्थानां व्यवस्थासु भेदं विरोधमपूर्णतामस्पष्टतां च पश्यन्ति। ततश्चाऽऽवश्यकतत्तद्धर्माचरणे संशयेनाऽऽक्रान्ता भवन्ति। लोके एतादृशीं स्थितिं दृष्ट्वा प्राचीनाः केचन असहाय-भर्तृयज्ञ-विश्वरूप-भारुचि-श्रीकर-मेधातिथि-धारेश्वर-देवस्वामि-जितेन्द्रिय-बालक-बालरूप-योगिलोक-विज्ञानेश्वर-हलायुध-भवदेवभट्ट-गोविन्दराज-लक्ष्मीधरादयो विद्वांसः प्रायः सर्वेषां धर्मशास्त्रग्रन्थानां यथाशक्ति यथाज्ञानं विचारं कृत्वा अनुसरणीयं धर्ममार्गं स्पष्टं विधाय श्रद्धालूनामल्पज्ञानां जनानां धर्मानुष्ठाने साहाय्यं कर्तुं कस्यापि ग्रन्थविशेषस्य व्याख्यां स्वतन्त्रं धर्मशास्त्रनिबन्धं वाऽप्यररचन् किल। तदुक्तं श्रीधरेण—

श्रीकण्ठश्रीकराचार्यैः श्रुतिस्मृतिपुराणगैः।
स्मृतिशास्त्रेष्वनेकेषु विप्रकीर्णेष्वनेकधा ।।

---

१. पारस्करगृह्यसूत्रे २।६।१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुष्ठातॄनुपकारार्थं स्मृतिच्छिद्रं प्रयत्नतः ।
पुराणन्यायमीमांसासाङ्गवेदैः प्रपूरितम् ।।
कामधेनौ प्रदीपेऽब्धौ कल्पवृक्ष-लतासु च ।
शम्भु-द्रविड-केदार-लोल्लटाद्यैश्च भाषितम् ।।
मन्वाद्यनेकस्मृतिषु व्याख्यातृप्रतिपादितम् ।
स्मृत्यर्थसारं वक्ष्यामि सुखानुष्ठानसिद्धये[1] ।। इति।

यद्यपि धर्मशास्त्रव्याख्याकार-धर्मशास्त्रनिबन्धकाराणामुक्तविधमुद्देश्यं प्रशंसनीयमेव, तथापि इदानीमुपलभ्यमानग्रन्थकानां धर्मशास्त्रनिबन्धकाराणां समये प्रायो वेदानां वैधस्याऽध्ययनस्य वैदिकमुख्यवर्णाश्रमधर्माचरणस्य च शिथिलीभूतत्वेन तेषां ग्रन्थानां प्रणयने जातस्य मुख्यवैदिकपरम्पराया अनुसरणे शैथिल्यस्य तेभ्य एव ग्रन्थेभ्योऽवगम्यमानत्वात् तेषां ग्रन्थास्तादृशमुद्देश्यं प्राप्तुं विशेषेण सहायकास्तु न दृश्यन्ते।

भारतवर्षे खलु इतः पूर्वं प्रायः पञ्चसु सहस्रेषु वर्षेषु यदा कलियुगस्य प्रारम्भोऽभूत्, ततः प्रभृत्येव अर्थकामपराणां चार्वाकाणां चरित्रस्य प्रचारस्य वृद्ध्या बाहुल्याच्च वैदिकेऽध्ययने धर्माचरणे च शिथिलीभवति सति, सूर्यवंशजेक्ष्वाकुराजवंशे कलौ सुमित्रस्य राज्ञोऽन्तेऽस्तं गते[2], चन्द्रवंशज-पौरवराजवंशे च क्षेमकस्य राज्ञोऽन्तेऽस्तं प्राप्ते[3], ब्राह्मणसमाजेऽपि पतनोन्मुखे जाते वैष्णव-शैव-शाक्त-सौर-गाणपत्य-कौमारादिमतानां प्रचारस्य वृद्ध्या बार्हद्रथानां प्रद्योतवंशजानां शिशुनागवंशजनन्दानां च भारतवर्षीयाणां प्रमुखाणां राज्ञां समये वैदिकसनातनवर्णाश्रमधर्माचरणे क्रमेणाऽपचीयमाने सति, वैदिकधर्मस्य व्यापकत्वं गम्भीरत्वं चाऽबुद्ध्वा तस्य विरोधे उत्थितयो राजकुमारयोर्वर्धमानशाक्यसिंहयोरैकान्तिकधर्मयोः प्रचारेण क्षात्रधर्मे प्रशिथिले जाते, कौरुषाणां यवनानां च बाह्यानां भारतवर्षे आक्रमणाच्च वैदिक-धर्माचरणेऽतीवशिथिलीभूते विशेषतः शिशुनागवंशजस्य राज्ञो महानन्दिनः शूद्रायां भार्यायां जातस्य पुत्रस्य शासकस्य

---

१. स्मृत्यर्थसारे १८३४ तमे शकाब्दे पुण्यपत्तनस्थाऽऽनन्दाश्रममुद्रिते, पृ.१।

२. इक्ष्वाकूणामयं वंशः सुमित्रान्तो भविष्यति।
यतस्तं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ।। इति।
(विष्णुपुराणे-४।२२।१३, वायुपुराणे च-२।३७।२८८)।

३. ब्रह्मक्षत्रस्य यो योनिर्वंशो देवर्षिसत्कृतः।
क्षेमकं प्राप्य राजानं संस्थानं प्राप्स्यते कलौ।। इति।
(विष्णुपुराणे-४।२१।१८, वायुपुराणे-२।३७।२७४-२७५;
द्र. ब्रह्माण्डपुराणे च- ३।७४।२४४)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महापद्मस्य[१] समये वैदिक-सनातनधर्माचरणे महति सङ्कटे समापतिते अलक्ष्यान्ध्रादीनां यवनानां भारतवर्षे आक्रमणे च जाते विष्णुगुप्तेन कौटल्येनाऽमर्षपूरितेन—

"येन शस्त्रं च शास्त्रं च नन्दराजगता च भूः।
अमर्षेणोद्धृतान्याशु तेन शास्त्रमिदं कृतम्"[२]।।

इति वदता शस्त्रशास्त्रविद्यापारदृश्वना द्विजोत्तमेन स्वशिष्यं मौर्यवंशजं चन्द्रगुप्तं युक्त्या राजानं कृत्वा वैदिकराष्ट्रे रक्षिते वैदिक-सनातन-वर्णाश्रमधर्मोद्धारे च कृतेऽपि[३] सति कालक्रमेण मौर्येष्वपि प्रमत्तेषु जैनेषु बौद्धेषु च समाजं प्रभावयत्सु सत्सु क्षत्रबन्धुषु च युद्धपराङ्मुखेषु जातेषु, आक्रामकेषु वाह्लीकयवनेषु देयमित्रमिलिन्दादिषु भारतवर्षं प्रविष्टेषु पतञ्जलिमुन्यादिसमर्थितेन शुङ्गवंशजेन द्विजोत्तमेन पुष्यमित्रेण सेनान्या मौर्यवंशजं बृहद्रथं स्वधर्मशिथिलं राजानं हत्त्वा स्वयं राज्यं प्रशास्य[४] बाह्यान् आक्रामकान् राष्ट्रान् निष्कास्य द्विरश्वमेधेनेष्ट्वा[५] वैदिकधर्मस्योत्थाने कृतेऽपि कालेनोत्थापितानां पातितानां च शुङ्गवंशजानां काण्ववंशजानाम् आन्ध्रवंशजानां गर्दभिलमालवगणमुख्यानां गुप्तवंशजानां च राज्ञां समयेषु पर्यायेषु वैदिक-सनातन-वर्णाश्रमधर्मस्योत्थानेषु पतनेषु च जातेषु, पह्लव-शक-कुषणडकुजलकफ्सपुत्र-वेमकफ्स-कनिष्क-तुरुष्कापराभिधश्वेतहूणतोरमाण-मिहिरकुलादिभिश्च क्रमेण भारतवर्षे आक्रान्ते सति कालिदास-शबरस्वामि-कुमारिलभट्ट-प्रभाकरमिश्रादिभिः, विक्रमादित्य-चन्द्रगुप्त-समुद्रगुप्त-कुमारगुप्त-

---

१. महानन्दिसुतश्चाऽपि शूद्रायां कलिकांशजः।
उत्पत्स्यते महापद्मः सर्वक्षत्रान्तको नृपः।। इति।
(मत्स्यपुराणे-२७१।१७, द्र.भागवते १२।१।८-९, वायुपुराणे च-२।३७।३२०)

२. कौटलीयेऽर्थशास्त्रे १९६० तमे क्रैस्ताब्दे मैसूरुविश्वविद्यालयेन प्रकाशिते, १५।१, पृ. ४६२।

३. कौटल्यश्चन्द्रगुप्तं तु ततो राज्येऽभिषेक्ष्यति।
षट्त्रिंशत्तु समा राजा भविताऽशोक एव च।। इति।
(मत्स्यपुराणे,आनन्दाश्रमसंस्करणे-२७२।२३)

४. पुष्यमित्रस्तु सेनानीरुद्धृत्य स बृहद्रथान्।
कारयिष्यति वै राज्यं षट्त्रिंशतिसमा नृपः।। इति।
(मत्स्यपुराणे-२७२।२६, द्र.वायुपुराणे-२।३७।३३१, भागवते च-१२।१।१६-१७)

५. (क) औद्भिज्जो भविता कश्चित् सेनानीः कश्यपो द्विजः।
अश्वमेधं कलियुगे पुनः प्रत्याहरिष्यति।। इति।
(हरिवंशे-३।२।४०)

(ख) कोसलाधिपेन द्विरश्वमेधयाजिनः सेनापतेः पुष्यमित्रस्य षष्ठेन कौशिकीपुत्रेण धनदेवेन धर्मराज्ञा पितुः फल्गुदेवस्य केतनं कारितम्,। इत्ययोध्याशिलालेखे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्कन्दगुप्तादिभिश्च स्वे स्वे काले वैदिकधर्मोत्थानाय राष्ट्ररक्षणाय च क्रमेण विविधे प्रभूते प्रयासे कृतेऽपि हर्षवर्धनसमये पुना राजाश्रयस्य लाभेन जाताद् बौद्धानामुत्थानाद् वैदिक-सनातन-वर्णाश्रमधर्मे म्लानतां गते, दक्षिणापथजात-शङ्करप्रचारितेऽध्यात्मवादे सबल एव स्थितेऽपि वर्णाश्रमधर्मानुसरणे प्रशिथिलीभूते, भारतवर्षस्योत्तरभागे स्थितेषु राजसु दुर्बलेषु जातेषु, तत्र सुदृढे सम्राजि चाऽसति कलियुगाब्दानामष्टात्रिंशत्तमे शतके सिन्धुप्रदेशो कासिमपुत्रेमामुद्दीनमोहमदादीनाम् अरबमुसलबाणानां प्रवेशे जाते, एकचत्वारिंशत्तमे शतके तुरुष्कमुसलबाणेन गजनिनिवासिना सुबुक्तगीनदायादेन महामुत्केन भारतवर्षस्य पाश्चात्त्ये भागे बहुशो लुण्ठिते, त्रिचत्वारिंशत्तमे शतके गोरदेशाभिजनेन गजनिनिवासिना पारसीक-मुसलबाणेन अलाउद्दीनदायादेन सामपुत्रेण शहाबुद्दीनमोहमदेन भारतवर्षप्रमुख-शक्तिस्थाने दिल्लीप्रदेशे च स्वाधीने कृते सति विजितदेशशासने नियुक्तेन तद्दासेन सेनापतिना कुतुबुद्दीनेन ऐबकेन दिल्लीप्रदेशे स्वतन्त्रे मुसलबाणशासने प्रवर्तिते मुसलबाणेषु भारतवर्षे स्वराज्यविस्तारे स्वधर्मप्रचारे च सन्नद्धेषु वैदिकचातुर्वर्ण्यसमाजे प्रायेण विशृङ्खलतां गते कोलाहलपूर्णे च जाते भारतवर्षे वैदिकेऽध्ययने धर्माचरणे च शिथिलशिथिलतरे भवति सति प्रायेण श्रौतधर्मानधि-कारिणं शासकं सामन्तं धनिनं बलिनं वाऽपि समाश्रिताः विज्ञानेश्वर-गोविन्दराज-लक्ष्मीधर-श्रीधर-हलायुध-हरिहर-देवण्णभट्ट-हेमाद्रि-कुल्लूकभट्ट-श्रीदत्त-चण्डेश्वर-माधव-शूलपाणि-रुद्रधर-तरुणवाचस्पतिमिश्र-गोविन्दानन्द-रघुनन्दनाऽऽदित्या-चार्य-नन्दपण्डित-त्रिंशच्छ्लोकीकार-दशश्लोकीकार-नीलकण्ठभट्ट-कमलाकरभट्ट-गदाधरदीक्षित-विश्वनाथनागर-मित्रमिश्र-रामकृष्ण-नागोजिभट्ट-काशीनाथोपाध्याया-दयो धर्मशास्त्र-व्याख्याकार-धर्मशास्त्रनिबन्धकारा अपि तत्तद्वेदशाखासूत्र-विहितानामपि स्नान-सन्ध्योपासन-तर्पण-पञ्चमहायज्ञ-गर्भाधानादिसंस्काराऽन्त्येष्ट्या-शौचपालन-श्राद्धादिकर्मणामपि प्रतिपादने वैदिकधर्मप्रमुखस्थानभूतान् मन्त्रसंहिता-ब्राह्मण-श्रौतसूत्र-गृह्यसूत्र-धर्मसूत्र-श्रौतगृह्यपरिशिष्टादिग्रन्थानुपेक्ष्य अनुस्मृति-पुराणोपपुराणादिग्रन्थानेव विशेषतोऽनुगम्य प्रवृत्ताः सन्तोऽपि स्वस्य व्याख्याग्रन्थस्य निबन्धग्रन्थस्य वाऽपि सर्वेषामेव वेदशाखाविशेषाध्यायिकुलजत्वेन ज्ञायमानानां जनानां समादरणीयत्वं साधयितुमिच्छन्तश्च अनेकवेदशाखोक्त-स्मार्त-पौराण-विधि-मिश्रप्रयोगपरतया तेषां कर्मणां प्रतिपादने ग्रन्थविस्तरमुपयोजयन्तः स्वकीयान् महाकायान् ग्रन्थान् प्रदर्शयन्तः समाजे प्रभविष्णवो लब्धप्रचाराश्चाऽभूवन्निति तेषां ग्रन्थेषु मध्ये कमपि सुप्रापं स्वप्राप्तं ग्रन्थं विलोक्याऽऽधुनिकाः पण्डिता आशौचव्यवस्थाविषयकाणां प्रश्नानामुत्तराणि ददति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लोके उक्तविधायां स्थितौ सत्यां वैदिकानां द्विजानां कृते तु वस्तुतः स्वगृह्योक्तस्यैव पक्षस्याऽनुसरणीयता: सकलस्मृति-पुराण-शिष्टसम्मतत्वाद् आशौचविषयेऽपि माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशाखाध्यायिकुलजैर्द्विजैः पारस्करगृह्यसूत्रोक्तस्यैव पक्षस्य विशेषतोऽनुसरणीयत्वाद् एतस्मिन् विषये पण्डितानां ध्यानमाक्रष्टुं पारस्करगृह्यसूत्रविहितस्याऽऽशौचस्यात्र विशेषतो निरूपणं कर्तुं प्रयासः क्रियते।

एतस्मिन् विषये च प्रथमं विविधे विषये विविधशास्त्रोक्तेषु विविधेषु पक्षेषु सत्सु स्वगृह्योक्ते विषये स्वगृह्योक्तस्यैव पक्षस्याऽनुसरणीयतायाः प्रतिपादकानि स्मृतिपुराणस्थानि ऋषिमुन्यादिवचनानि परिशीलनीयानि। तानि यथा—

(क) न जातु परशाखोक्तं बुधः कर्म समाचरेत् ।
आचरन् परशाखोक्तं शाखारण्डः स उच्यते ।।
यः स्वशाखोक्तमुत्सृज्य परशाखोक्तमाचरेत् ।
अप्रमाणमृषिं कृत्वा सोऽन्धे तमसि मज्जति[1] ।। इति।

(ख) यः स्वसूत्रमतिक्रम्य परसूत्रेण वर्तते ।
अप्रमाणमृषिं कृत्वा सोऽप्यधर्मेण युज्यते[2] ।। इति।

(ग) बह्वल्पं वा स्वगृह्योक्तं यस्य यावत्प्रकीर्तितम् ।
तस्य तावति शास्त्रार्थे कृते सर्वः कृतो भवेत्[3] ।। इति।

(घ) स्वशाखाश्रयमुत्सृज्य परशाखाश्रयं तु यः।
कर्तुमिच्छति दुर्मेधा मोघं तत्तस्य चेष्टितम्[4] ।। इति।

(ङ) स्वशास्त्रे वर्तमाने यः परशास्त्रेण वर्तते ।
भ्रूणहत्यासमं तस्य स्वशास्त्रमवमन्यतः[5] ।। इति।

---

१. वसिष्ठवचनम्, संस्कारगणपतौ, १९३८ तमे क्रैस्ताब्दे वाराणस्यां मुद्रिते, पृ. १०।

२. विष्णुधर्मोत्तरपुराणे, १९८५ तमे क्रैस्ताब्दे देहल्यां पुनर्मुद्रिते-२।१२७।४८-४९।

३. हस्तलिखिते प्रथमयज्ञपार्श्वग्रन्थे श्लो. ८२; लौगाक्षिस्मृतौ च १९५७ तमे क्रैस्ताब्दे कालीघट्टनगरे मनसुखरायमोरेण प्रकाशितायाम्, स्मृतिसन्दर्भे षष्ठे भागे, पृ. २५७।

४. कात्यायनस्मृतौ (छन्दोगपरिशिष्टे) १।३।२, स्मृतिसन्दर्भे १९५२ तमे क्रैस्ताब्दे मुद्रिते, तृतीये भागे, पृ. १३३९।

५. बौधायनश्रौतसूत्रे, १९८२ तमै क्रैस्ताब्दे देहल्यां पुनर्मुद्रिते, २९।८, तृतीयखण्डे, पृ. ३८०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(च) छन्दोवदेव सूत्राणि भवन्ति खलु सूरिणाम् ।
वेदोक्तमपि सूत्रोक्ततुलितं वैदिकोत्तमाः ।।
नाङ्गीकुर्वन्ति बाढं वै सूत्रकारास्तु तेऽखिलाः ।
सर्ववेदैकविज्ञानशालिनः किल वै यतः[१] ।। इति।

(छ) स्वगृह्योक्तमनल्पं वाऽप्यल्पं यस्य प्रचोदितम् ।
तावदेव तु कर्तव्यं तेन सर्वं कृतं भवेत् ।।
यावदुक्तं स्वस्वगृह्ये न कृतं तावदेव तत् ।
परोक्तं वा विमिश्रं वा कृतमप्यकृतं भवेत्[२] ।। इति।

(ज) स्वगृह्यचोदितं कर्म द्विजः कुर्वन् कृती भवेत् ।
अन्यथा पतितो भूयात् सर्वधर्मबहिष्कृतः[३] ।। इति।

(झ) सर्वेषामेव पक्षाणां स्वगृह्योक्तं विधीयते ।
स्वगृह्योक्तस्य चाऽभावे ग्रहणं स्वेच्छया भवेत्[४] ।। इति च ।

एवञ्च धर्मकर्मसु स्वशाखाग्रन्थेषूक्तानां विषयाणां स्वशाखाग्रन्थोक्तरूपेणैवाऽऽचरणीयतायाः,स्वशाखाग्रन्थेष्वनुक्तानां विषयाणां च स्वशाखाग्रन्थैः सूचितत्वे वा आकाङ्क्षितत्वे वा स्वशाखाग्रन्थानामनुकूलत्वे वा अविरोधित्वे वाऽप्येवाऽऽचरणीयतायाश्च सकल-स्मृति-पुराण-शिष्ट-सम्मतत्वादत्र विशेषत आर्यावर्तनिवासिनां बहुसंख्यकानां माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशाखाध्यायिनां द्विजातीनां कृते पारस्करगृह्यसूत्रविहितस्य आशौचस्य विवरणं यथामति प्रस्तूयते।

यद्यपि पारस्करगृह्यसूत्रस्य भर्तृयज्ञ-कर्क-जयराम-वासुदेव-हरिहर-रेणुदीक्षिताऽनन्त-देवयाज्ञिक-गर्गोपाध्याय-गदाधर-विश्वनाथ-परशुराम-गङ्गाधर-मुरारिमिश्र-ढौण्ढुमिश्र-बैजनाथ-रामकृष्ण-विद्याधरगौडादिभिरनेकैर्विद्वद्भिर्व्याख्याः

---

१. लौगाक्षिस्मृतौ, स्मृतिसन्दर्भे, षष्ठे भागे, पृ. २७५।

२. शुक्लयजुर्वेदविधानसूत्रे, १९४३ क्रैस्ताब्दे मुम्बय्यां जदुराम-रविशङ्कर-त्रिवेदप्रकाशिते, मन्त्रभ्रान्तिहरसूत्रे, श्लो. ९२-९३; पृ. ६६१।

३. नारदीयपुराणे, १९८४ तमे क्रैस्ताब्दे देहल्यां पुनर्मुद्रिते, १।२४।१०।

४. स्मृतिसङ्ग्रहकारवचनम्, पारस्करगृह्यसूत्रे भाष्यपञ्चकोपेते १९७३ तमे वैक्रमाब्दे मुम्बयीस्थगुजरातीमुद्रणालये मुद्रिते, श्राद्धकाशिकाभागे, पृ. ४८३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृता अवगम्यन्ते, तत्र कर्कोपाध्याय-जयराम-हरिहर-रेणुदीक्षित-गदाधर-विश्वनाथ-रामकृष्ण-विद्याधरगौडानां व्याख्यास्तु मुद्रिता अप्युपलभ्यन्ते, तथापि मिताक्षराकार-विज्ञानेश्वर-कृत्यकल्पतरुकारलक्ष्मीधरादिभ्यः पश्चाज्जातानां हरिहरादीनां व्याख्यासु विज्ञानेश्वरादिग्रन्थानामनुचितेन प्रभावेण कर्मणां स्वशाखासूत्राऽना-काङ्क्षिताऽनेकवेदशाखोक्त-स्मार्त-पौराणादिविधिमिश्ररूपेण प्रतिपादनस्य दृश्यमानत्वात् परग्रन्थप्रत्ययेन स्वशास्त्रार्थस्याऽन्यथयितुमनुचितत्वाच्चोक्तानां व्याख्यानामेवाऽवलम्बनमकृत्वाऽत्र पारस्करगृह्यसूत्रग्रन्थस्थ-मूलसूत्रपदवाक्य-प्रकरणानामेव विशेषतोऽनुशीलनं कृत्वा पारस्करगृह्यसूत्रविहितस्य आशौचस्य निरूपणं क्रियते।

तत्र प्रथमं विचारसौकर्याय पारस्करगृह्यसूत्रतृतीयकाण्डस्था दशमी कण्डिका उदककर्मविषया अविकलाऽत्रोपस्थाप्यते—

अथोदककर्म ।।१ ।। अद्विवर्षे प्रेते मातापित्रोराशौचम् ।।२।। शौचमेवे-तरेषाम् ।।३।। एकरात्रं त्रिरात्रं वा ।।४।। शरीरमदग्ध्वा निखनन्ति ।।५।। अन्तःसूतके चेदोत्थानादाशौचं सूतकवत् ।।६।। नात्रोदककर्म ।।७।। द्विवर्षप्रभृति प्रेतमाश्मशानात् सर्वेऽनुगच्छेयुः ।।८।। यमगाथां गायन्तो यमसूक्तं च जपन्त इत्येके ।।९।। यद्युपेतो भूमिजोषणादिसमानमाहिताग्नेरोदकान्तस्य गमनात् ।।१०।। शालाग्निना दहन्त्येनमाहितश्चेत् ।।११।। तूष्णीं ग्रामाग्निनेतरम् ।।१२।। संयुक्तं मैथुनं वोदकं याचेरन्नुदकं करिष्यामह इति ।।१३।। कुरुध्वं मा चैवं पुनरित्यशतवर्षे प्रेते ।।१४।।कुरुध्वमित्येवेतरस्मिन् ।।१५।। सर्वे ज्ञातयोऽपोऽभ्य-वयन्त्या सप्तमात्पुरुषाद् दशमाद्वा ।।१६।। समानग्रामवासे यावत्सम्बन्ध-मनुस्मरेयुः ।।१७।। एकवस्त्राः प्राचीनावीतिनः ।।१८।। सव्यस्याऽनामिक-याऽपनोद्याऽपनः शोशुचदघमिति ।।१९।। दक्षिणामुखा निमज्जन्ति ।।२०।। प्रेतायोदकं सकृत्प्रसिञ्चन्त्यञ्जलिनाऽसावेतत्त उदकमिति ।।२१।। उत्तीर्णाञ्छुचौ देशे शाड्वलवत्युपविष्टाँस्तत्रैतानपवदेयुः ।।२२।। अनवेक्षमाणा ग्राममायान्ति रीतिभूताः कनिष्ठपूर्वाः।।२३।। निवेशनद्वारे पिचुमन्दपत्राणि विदश्याचम्योदकमग्निं गोमयं गौरसर्षपाँस्तैलमालभ्याश्मानमाक्रम्य प्रविशन्ति ।।२४।। त्रिरात्रं ब्रह्मचारिणोऽधः-शायिनो न किञ्चन कर्म कुर्युर्न प्रकुर्वीरन् ।।२५।। क्रीत्वा लब्ध्वा वा दिवैवान्नमश्नीयुरमांसम् ।।२६।। प्रेताय पिण्डं दत्त्वाऽवनेजनदानप्रत्यवनेजनेषु नामग्राहम् ।।२७।। मृन्मये तां रात्रीं क्षीरोदके विहायसि निदध्युः प्रेतात्र स्नाहीति।।२८।। त्रिरात्रं शावमाशौचम् ।।२९।। दशरात्रमित्येके ।।३०।। न

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वाध्यायमधीयीरन् ।।३१।। नित्यानि निवर्तेरन् वैतानवर्जम् ।।३२।। शालाग्नौ चैके ।।३३।। अन्य एतानि कुर्युः ।।३४।। प्रेतस्पर्शिनो ग्रामं न प्रविशेयुरानक्षत्र-दर्शनात् ।।३५।। रात्रौ चेदादित्यस्य ।।३६।। प्रवेशनादि समानमितरैः ।।३७।। पक्षं द्वौ वाऽऽशौचम् ।।३८।। आचार्ये चैवम् ।।३९।। मातामहयोश्च ।।४०।। स्त्रीणां चाप्रत्तानाम् ।।४१।। प्रत्तानामितरे कुर्वीरन् ।।४२।। ताश्च तेषाम् ।।४३।। प्रोषितश्चेत्प्रेयाच्छ्रवणप्रभृति कृतोदकाः कालशेषमासीरन् ।।४४।। अतीतश्चेदेकरात्रं त्रिरात्रं वा ।।४५।। अथ कामोदकान्यृत्विक्श्वसुरसखिसम्बन्धिमातुलभागिनेयानाम् ।।४६।। प्रत्तानाञ्च ।।४७।। एकादश्यामयुग्मान् ब्राह्मणान् भोजयित्वा मांसवत् ।।४८।। प्रेतायोद्दिश्य गामप्येके घ्नन्ति ।।४९।। पिण्डकरणे प्रथमः पितृणां प्रेतः स्यात् पुत्रवाँश्चेत् ।।५०।। निवर्तेत चतुर्थः ।।५१।। संवत्सरं पृथगेके ।।५२।। न्यायस्तु न चतुर्थः पिण्डो भवतीति श्रुतेः।।५३।। अहरहरन्नमस्मै ब्राह्मणायोदकुम्भं च दद्यात् ।।५४।। पिण्डमप्येके निपृणन्ति ।।५५।। इति।

जननाशौचनिरूपणम्

पारस्करगृह्यसूत्रे मरणाशौचस्य विषये यथा विस्तृतं प्रतिपादनं प्राप्यते जननाशौचस्य विषये तादृशं प्रतिपादनं न दृश्यते। जननाशौचसम्बद्धानि अधोलिखितानि सूत्राणि पारस्करगृह्यसूत्रे पठ्यन्ते—

(क) अन्तःसूतके चेदोत्थानादाशौचं सूतकवत् ।।(३।१०।६)

(ख) द्वारदेशे सूतिकाग्निमुपसमाधायोत्थानात् सन्धिवेलयोः फलीकरणमिश्रान्-सर्षपानावपति ।। (१।१६।२३)

(ग) दशम्यामुत्थाप्य ब्राह्मणान् भोजयित्वा पिता नाम करोति।।(१।१७।१) इति।

एतेभ्यः सूत्रेभ्यः पारस्करगृह्यसूत्रेऽपि केनापि रूपेण जननाशौचं स्वीक्रियत इति स्फुटतयाऽवगम्यते। ऋग्वेदिनामैतरेयिणां ब्राह्मणे "तदाहुर्य आहिताग्निर्यदि सूतकान्नं प्राश्नीयात् का तत्र प्रायश्चित्तिरिति सोऽग्नये तन्तुमतेऽष्टाकपालं पुरोडाशं निर्वपेत्"[१] इत्युक्तेरुपलम्भाद् वैदिकपरम्परायां केनापि रूपेण जननाशौचं स्वीक्रियत एवेति तु निश्चितमेवास्ति। तत्र पारस्करगृह्यसूत्रे "अन्तःसूतके चेदोत्थानादाशौचं सूतकवत्" इति सूत्रे "अद्विवर्षे प्रेते मातापित्रोराशौचम्" इति

१. ऐतरेयिब्राह्मणे द्वितीये भागे पुण्यपत्तनस्थाऽऽनन्दाश्रमे १९३१ तमे क्रैस्ताब्दे मुद्रिते-३२।८, पृ. ८२३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वसूत्राद् "मातापित्रोः" इति पदस्यानुवृत्तेः, अद्विवर्षबालमरणस्यैव प्राकरणिकत्वाच्चास्य सूत्रस्य कर्कोपाध्याय-जयराम-हरिहरादीनां व्याख्याः सूत्रपदवाक्यप्रकरणाऽननुकूलत्वादुपेक्ष्या दृश्यन्ते। एतस्य सूत्रस्य पदवाक्यप्रकरणानामनुकूलोऽर्थस्तु 'सूतकावधिमध्ये जातके प्रेते सति आ सूतिकोत्थापनात् सूतक इवैव मातापित्रोराशौचं भवति' इत्यवगन्तव्योऽवसीयते "अद्विवर्षे प्रेते मातापित्रोराशौचम्, शौचमेवेतरेषाम्, एकरात्रं त्रिरात्रं वा, शरीरमदग्ध्वा निखनन्ति, अन्तःसूतके चेदोत्थानादाशौचं सूतकवत्"[1] इति प्रकरणात्। हरिहरप्रदर्शितमेतस्य सूत्रस्यान्यदीयम् "अन्तःसूतके चेद् यदि बालस्य मरणमापद्यते, तदा आ उत्थानादाशौचमशुद्धिः सूतकवद् भवति, नत्वाशौचनिवृत्तिः, बालमरणनिमित्ताशौचस्याल्पकालीनत्वेन बहुकालीनजननिमित्ताशौचशोधनाऽसमर्थत्वात्' इति व्याख्यानमप्यस्मदुक्तेऽर्थ एवानुकूलम्। एतदन्यदीयं व्याख्यानं भर्तृयज्ञादिप्राचीनतरव्याख्यातृपरम्परागतं प्रामाणिकं च प्रतीयते। एतस्मात् सूत्राज्जननाशौचं मातापित्रोरेव न सपिण्डानामित्यप्यवगम्यते "मातापित्रोराशौचम्, शौचमेवेतरेषाम्" इति प्रकरणात्। एष पक्षः खलु वैदिकपरम्परायां प्रमुखरूपेणैव वर्तमानोऽभूदिति, अत्र बहूनां ग्रन्थानां वचनानां संवादस्य दर्शनादवगम्यते। तथा हि ग्रन्थान्तराणां वचनानि—

(क) जननेऽप्येवम्, मातापित्रोस्तन्मातुर्वा[2]। इति।

(ख) सूतकं तु सपिण्डानां पित्रोर्वा मातुरेव वा[3]। इति।

(ग) नाऽऽशौचं सूतके प्रोक्तं सपिण्डानां कथञ्चन।
मातापित्रोरशौचं स्यात् सूतकं मातुरेव च[4]॥ इति।

(घ) जननेऽप्येवम्, तत्र मातापितरावशुची इति, मातेत्येके[5]। इति।

(ङ) जनने सपिण्डाः शुचयो मातापित्रोस्तु सूतकम्।
सूतकं मातुरेव स्यादुपस्पृश्य पिता शुचिः[6]॥ इति।

---

१. पारस्करगृह्यसूत्रे-३।१०।२-६।

२. गौतमप्रणीतधर्मसूत्रे १९३१ तमे क्रैस्ताब्दे पुण्यपत्तनस्थाऽऽनन्दाश्रममुद्रिते-२।५।१३-१४।

३. १९३१ तमे क्रैस्ताब्दे आनन्दाश्रममुद्रितायां हरदत्तकृतायां मिताक्षरायां गौतमप्रणीतधर्मसूत्रवृत्तौ (२।५।१४, पृ. ११३) व्याघ्रवचनम्।

४. तत्रैव अङ्गिरोवचनम्।

५. तत्रैव (पृ. ११४) शङ्खलिखितवचनम्।

६. तत्रैव पैठीनसिवचनम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(च) त्रिरात्रं दशरात्रं वा शावमाशौचमिष्यते ।
ऊनद्विवर्ष उभयोः सूतकं मातुरेव हि[१] ।। इति।

(छ) मातापित्रोर्वा, तन्निमित्तत्वात् मातुरित्येके[२] । इति।

(ज) सर्वेषां शावमाशौचं मातापित्रोस्तु सूतकम् ।
सूतकं मातुरेव स्यादुपस्पृश्य पिता शुचिः[३] ।। इति।

(झ) सर्वेषां शावमाशौचं मातापित्रोस्तु सूतकम् ।
सूतकं मातुरेव स्यादुपस्पृश्य पिता शुचिः ।।
यदि पत्न्यां प्रसूतायां सम्पर्कं कुरुते द्विजः ।
सूतकं तु भवेत् तस्य यदि विप्रः षडङ्गवित् ।।
सम्पर्काज्जायते दोषो नान्यो दोषोऽस्ति वै द्विजे ।
तस्मात् सर्वप्रयत्नेन सम्पर्कं वर्जयेद् बुधः[४] ।। इति।

(ञ) पुत्रे जाते दशाहेन कर्मयोग्यो भवेत् पिता ।
मासेन शुध्येज्जननी दम्पती तत्र कारणम्[५] ।। इति च।

एवञ्च 'जनने मातापित्रोरेवाऽऽशौचम्' इति पारस्करपक्षो बहुमुनिवचनसम्मतत्वात् प्रबलोऽवगम्यते। अत्र याज्ञवल्क्यादिवचनानामङ्गस्पर्शाऽस्पर्शविषयकत्वं यद् व्याख्यातृभिरुक्तं तदनुपपन्नं त्रिरात्रं दशरात्रं वा यादृशं शावमाशौचं तेषु वचनेषु प्रतिपादितं तादृशमेव जननाऽऽशौचं तेषु वचनेषु प्रतिपादितं न त्वङ्गस्पर्शास्पर्शविषयकमाशौचमिति प्रकरणादवगम्यमानत्वात्, शब्दप्रमाणकेऽर्थे पदवाक्यप्रकरणेभ्योऽवगम्यमानस्यैवार्थस्य मुख्यतया स्वीकार्यत्वात्, विविधानां मुनिवचनव्यवस्थानां तत्तच्छाखाध्यायिविशेषविषयतया नियतत्वस्य शाखाभेदभिन्नेषु बहुषु कर्मसु गत्यन्तराभावेन स्वीकार्यत्वाच्च। अङ्गस्पर्शास्पर्शविषयकत्वेनैतादृशानां वचनानां व्याख्याने गौतमप्रणीतधर्मसूत्रस्य व्याख्यातुर्हरदत्तस्यापि स्वरसस्याभावस्तेन "अन्ये भणन्ति"[६] इत्यादिना तादृशस्य व्याख्यानस्य प्रदर्शितत्वादवगम्यते।

---

१. याज्ञवल्क्यस्मृतौ-३।१८।
२. वासिष्ठधर्मशास्त्रे १९३० क्रैस्ताब्दे पुण्यपत्तनस्थ-भाण्डारकरप्राच्यविद्याशोधनमन्दिरेण प्रकाशिते, तृतीये संस्करणे-४।२१-२२।
३. मनुस्मृतौ-५।६२;
४. पराशरस्मृतौ-३।२४-२७।
५. देवीभागवते, वाराणसीस्थ-ठाकुरप्रसाद एण्ड बुकसेलर-नामकेन निकायेन प्रकाशिते-७।१५।९।
६. गौतमप्रणीतधर्मसूत्रव्याख्यायां हरदत्तकृतायां मिताक्षरायाम्-२।५।१४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथा पराशरस्मृतौ—

'एकपिण्डास्तु दायादाः पृथग्दारनिकेतनाः।
जन्मन्यपि विपत्तौ च तेषां तत् सूतकं भवेत् ।।
तावत् तत् सूतकं गोत्रे चतुर्थपुरुषेण तु।
दायाद् विच्छेदमाप्नोति पञ्चमो वाऽऽत्मवंशजः''[१] ।।

इत्युक्त्वा दायविभागस्य आशौचव्यवस्थायां केनापि रूपेण हेतुत्वं प्रदर्शितम्, यथा च ''अविभक्तधनास्त्वेते सपिण्डाः परिकीर्तिताः'' इति ब्रह्मपुराण-वचनेऽपि[२] तथा कृतम्, तथैव बौधायनेनापि आशौचप्रकरणे सपिण्डत्वमविभक्तदायेष्वेव विभक्तदायेषु सकुल्यत्वमेवेति प्रतिपाद्य[३] दायविभागस्याऽऽशौच-व्यवस्थायां हेतुत्वं स्वीकृतं प्रतीयते। जननाशौचविषये च बौधायनेन ''जनने तावन् मातापित्रोराशौचम्, मातुरित्येके तत्परिहरणात्, पितुरित्यपरे शुक्रप्राधान्यात्, अयोनिजा ह्यपि पुत्राः श्रूयन्ते, मातापित्रोरेव तु संसर्गसामान्यात्''[४] इत्युक्त्वा ऊहापोहपूर्वकं जननाशौचं मातापित्रोरेवेति प्रतिपादितमस्ति। तत्राऽङ्गस्पर्शास्पर्श-विषयक उल्लेखः कृतो नास्ति।

धर्मनैपुण्यकामा ये स्वाध्यायाध्ययनमपि वन एव कुर्वते, ग्रामे तु स्वाध्यायाध्ययनं वर्जयन्ति[५], तादृशानां निपुणं शुद्धिमिच्छतां तेषां विशिष्टानां सपिण्डानामेव जननेऽपि दशरात्रमाशौचमिति पक्षो हि मनुस्मृतावुक्तो दृश्यते। तथा हि—

यथेदं शावमाशौचं सपिण्डेषु विधीयते ।
जननेऽप्येवमेव स्यान्निपुणं शुद्धिमिच्छताम्[६] ।। इति।

वसिष्ठधर्मशास्त्रेऽपि तादृशमेव वचनं दृश्यते। तथा हि—

जननेऽप्येवमेव स्यान्निपुणं शुद्धिमिच्छताम्[७] ।। इति।

---

१. पराशरस्मृतौ, १९५८ तमे क्रैस्ताब्दे श्रीवेङ्कटेश्वरयन्त्रालये मुद्रितायाम्, ३।८-९।
२. कृत्यकल्पतरौ, दशमे भागे, शुद्धिकाण्डे, आशौचनिरूपणे, १९५० तमे क्रैस्ताब्दे वटोदरनगरे मुद्रिते, पृ. ६७।
३. बौधायनधर्मसूत्रे-२०२९ तमे वैक्रमेऽब्दे वाराणस्यां मुद्रिते १।११।७-८।
४. तत्रैव-१।११।१७-२१।
५. नित्यानध्याय एव स्याद् ग्रामेषु नगरेषु च।
धर्मनैपुण्यकामानां पूतिगन्धे च सर्वशः।। इति मनुस्मृतौ-(४।१०७)।
६. मनुस्मृतौ-५।६१।
७. वासिष्ठधर्मशास्त्रे, १९३० तमे क्रैस्ताब्दे पुण्यपत्तने मुद्रिते-४।२०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत एव शावाशौचवज्जननाशौचस्य सपिण्डानां कृते प्रबलत्वस्याभावाद् मुहूर्तमार्तण्डकारेण जननाशौचावधिमध्येऽपि आवश्यकतानुसारं कूष्माण्डीहोमं कृत्वा विवाहकर्मापि कर्तुं शास्त्रानुमतिरस्तीत्युल्लिखितम्। तथा हि—

चेत् स्यात् सूतकमुक्तपूर्वसमयेऽनारब्धकार्ये बुधः।
कूष्माण्डीघृतहोमतोऽपि जननाऽऽशौचे क्वचित् कारयेत्[1]।। इति।

तत्र मार्तण्डवल्लभायां स्मृतिवचने च दर्शिते। तथा हि—

(क) सङ्कटे समनुप्राप्ते सूतके समुपागते।
कूष्माण्डीभिर्घृतं हुत्वा गां दत्त्वा च पयस्विनीम्।।
चूडोपनयनोद्वाहौ प्रतिष्ठादिकमाचरेत्[2]।। इति।

(ख) अनारब्धविशुद्ध्यर्थं कूष्माण्डैर्जुहुयाद् घृतम्।
गां दद्यात् पञ्चगव्याशी ततः शुध्यति सूतकी[3]।। इति च।

जननाशौचे वर्तमानेऽपि शारदनवरात्रे देवीपूजा प्रारब्धव्या कर्तव्या चेति प्रतिपादकं वचनं विश्वरूपनिबन्धादिधृतं निर्णयसिन्धावपि दृश्यते। तथा हि—

आश्विने शुक्लपक्षे तु प्रारब्धे नवरात्रके।
शावाशौचे समुत्पन्ने क्रिया कार्या कथं बुधैः।।
सूतके वर्तमाने च तत्रोत्पन्ने सदा बुधैः।
देवीपूजा प्रकर्तव्या पशुयज्ञविधानतः।।
सूतके पूजनं प्रोक्तं दानं चैव विशेषतः।
देवीमुद्दिश्य कर्तव्यं तत्र दोषो न विद्यते[4]।। इति।

तत्र यद्यपि शावाशौचविषयक एव प्रश्नः प्रतीयते, तथाप्युत्तरे सूतकस्यैवोल्लेखात्, सूतके वर्तमानेऽपि देवीपूजाया आरम्भणीयत्वस्य प्रतिपादितत्वात्, 'तत्र दोषो न विद्यते' इति विशेषेणोक्तत्वाच्च जननाशौचस्य सपिण्डान् प्रति देवीपूजाद्यप्रतिबन्धकत्वमास्थितं प्रतीयते।

---

१. मुहूर्तमार्तण्डे, १८२६ तमे शकाब्दे वाराणसीस्थचन्द्रप्रभाख्यमुद्रणालये मुद्रिते, विवाहप्रकरणे, श्लो. ५३ (पृ. ७४)।

२. तत्रैव मार्तण्डवल्लभायाम्, पृ. ७५; ३. तत्रैव।

४. निर्णयसिन्धौ, २०४२ तमे वैक्रमेऽब्दे वाराणसीस्थकृष्णदासाकादमीतः पुनर्मुद्रिते, पृ. १२७।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतीतस्य जननाशौचस्य विषये पारस्करगृह्यसूत्रे कोऽप्युल्लेखो नास्ति। याज्ञवल्क्यस्मृतावपि तद्विषयकं वचनं न दृश्यते। मनुस्मृतौ—

'निर्दशं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च।
सवासा जलमाप्लुत्य शुद्धो भवति मानवः''[१] ।।

इत्युक्तत्वात्, देवलेनाऽपि ''नाऽशुद्धिः प्रसवाशौचे व्यतीतेषु दिनेष्वपि''[२] इत्युक्तत्वाच्च अतीतस्य जननाशौचस्य सपिण्डं प्रति सुतरामकिञ्चित्करत्वम्, पितरं प्रत्येव शुद्ध्यर्थकस्नानप्रयोजकत्वं चावगम्यते। वस्तुतस्तु पारस्करगृह्यसूत्रानुयायिनां याज्ञवल्क्यस्मृत्यनुयायिनां च कृतेऽतीतस्य जननाशौचस्य पितरं प्रति शुद्ध्यर्थकस्नानप्रयोजकत्वमपि नास्त्येवेत्यवसीयते, तत्र वचनाभावात् ।

गर्भस्रावे गर्भपाते जातमृते मृतजाते चाऽऽशौचस्य विधायकानि विविधानि स्मृतिवचनानि दृश्यन्ते। तथा हि—

(क) गर्भस्रावे मासतुल्या निशाः शुद्धेस्तु कारणम्[३] । इति।

(ख) रात्रिभिर्मासतुल्याभिर्गर्भस्रावे विशुध्यति ।
रजस्युपरते साध्वी स्नानेन स्त्री रजस्वला[४] ।। इति।

(ग) ऊनद्विवर्षे प्रेते गर्भपतने वा सपिण्डानां त्रिरात्रमाशौचम्, सद्यः शौचमिति गौतमः[५] ।। इति।

(घ) गर्भस्रावे मासतुल्या रात्रयः स्त्रीणाम्, स्नानमात्रमेव पुरुषस्य[६] ।। इति।

(ङ) गर्भस्रावे गर्भमाससम्मिता रात्रयः स्त्रीणाम्[७] ।। इति।

(च) गर्भमाससमा रात्रीः स्रंसने गर्भस्य त्र्यहं वा[८] ।। इति।

(छ) मासतुल्यैरहोरात्रैर्गर्भस्रावे[९] ।। इति।

---

१. मनुस्मृतौ-५।७७।
२. पराशरस्मृतौ, माधवाचार्यकृतव्याख्यासहितायाम्, १९७४ तमे क्रैस्ताब्दे कालीघट्टनगरस्थेन एसियाटिकसोसाइटिनामकेन निकायेन पुनर्मुद्रिते, प्रथमे भागे, पृ. ६००।
३. याज्ञवल्क्यस्मृतौ-३।२०।
४. मनुस्मृतौ-५।६६।
५. वासिष्ठधर्मशास्त्रे, १९३० तमे क्रैस्ताब्दे पुण्यपत्तने मुद्रिते-४।३४-३५।
६. वृद्धवसिष्ठवचनम्, याज्ञवल्क्यस्मृतिव्याख्यायां मिताक्षरायाम्-३।२०।
७. बौधायनधर्मसूत्रे, २०२९ तमे वैक्रमेऽब्दे वाराणस्यां मुद्रिते-१।११।२९।
८. गौतमप्रणीतधर्मसूत्रे, १९३१ तमे क्रैस्ताब्दे आनन्दाश्रममुद्रिते-२।५।१५-१६।
९. विष्णुस्मृतौ, १९६४ तमे क्रैस्ताब्दे अड्यारपुस्तकालयप्रकाशिते-२२।२५।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(ज) षड्मासाभ्यन्तरे यावद् गर्भस्रावो भवेद् यदा ।
तदा माससमैस्तासां दिवसैः शुद्धिरिष्यते ।।
अत ऊर्ध्वं स्वजात्युक्तं तासामाशौचमिष्यते ।
सद्यःशौचं सपिण्डानां गर्भस्य पतने सति[१] ।। इति।

(झ) आ चतुर्थाद् भवेत् स्रावः पातः पञ्चमषष्ठयोः ।
अत ऊर्ध्वं प्रसूतिः स्याद् दशाहं सूतकं भवेत् ।।
स्रावे मातुस्त्रिरात्रं स्यात् सपिण्डाशौचवर्जनम् ।
पाते मातुर्यथामासं पित्रादीनां दिनत्रयम्[२] ।। इति।

(ञ) दशाहाभ्यन्तरे बाले प्रमीते तस्य बान्धवैः ।
शावाशौचं न कर्तव्यं सूत्याशौचं विधीयते[३] ।। इति।

(ट) जातमृते मृतजाते वा सपिण्डानां दशाहम्[४] । इति।

(ठ) जातमृते मृतजाते वा कुलस्य सद्यःशौचम्[५] । इति।

(ड) अन्तर्दशाहोपरतस्य सूतिकाहोभिरेवाशौचम्[६] । इति।

(ढ) मुहूर्तं जीवितो बालः पञ्चत्वं यदि गच्छति ।
मातुः शुद्धिर्दशाहेन सद्यःशुद्धास्तु गोत्रिणः[७] ।। इति।

(ण) जीवञ्जातो यदि मृतो मृतः सूतक एव तु ।
सूतकं सकलं मातुः पित्रादीनां त्रिरात्रकम्[८] ।। इति।

(त) अनिवृत्ते दशाहे तु पञ्चत्वं यदि गच्छति ।
सद्य एव विशुद्धिः स्यान्न प्रेतं नैव सूतकम्[९] ।। इति।

---

१. स्मृतिवचनम्, याज्ञवल्क्यस्मृतिव्याख्यायां मिताक्षरायाम्-३।२०।
२. मरीचिवचनं तत्रैव, पराशरस्मृतौ च (३।१७) प्रथमः श्लोकः पठ्यते।
३. बृहन्मनुवचनम्, याज्ञवल्क्यस्मृतिव्याख्यायां मिताक्षरायाम्-३।२०।
४. हारीतवचनम्, तत्रैव; ५. विष्णुस्मृतौ-२२।२६, मिताक्षरायां च-३।२०।
६. स्मृत्यन्तरवचनम्, याज्ञवल्क्यस्मृतिव्याख्यायां मिताक्षरायाम्-३।२०।
७. बृहत्प्रचेतोवचनम्, तत्रैव।
८. बृहन्मनुवचनम्, तत्रैव।
९. कात्यायनवचनम्, याज्ञवल्क्यस्मृतिव्याख्यायां मिताक्षरायाम्-३।२०, शङ्खवचनं हारलतायां च, पृ. ४१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(थ) अदन्तजाते तनये शिशौ गर्भच्युते सति ।
सपिण्डानां तु सर्वेषामहोरात्रमशौचकम्[१] ।। इति।

(द) यावन्न च्छिद्यते नालं तावन्नाऽऽप्नोति सूतकम् ।
छिन्ने नाले ततः पश्चात् सूतकं तु विधीयते[२] ।। इति।

(ध) जाते पुत्रे पितुः स्नानं सचैलं तु विधीयते ।
माता शुध्येद् दशाहेन स्नानात्तु स्पर्शनं पितुः[३] ।। इति च।

उपरि दर्शितानि विविधानि वचनानि दृष्ट्वा मूलग्रन्थपदवाक्य-प्रकरणान्यविचार्यैव मिताक्षराकारादयः सपिण्डान् प्रति विविधरूपेण जननाशौचव्यवस्था दर्शयन्ति; किन्तु ता व्यवस्थाः "अद्विवर्षे प्रेते मातापित्रोराशौचम्, शौचमेवेतरेषाम्, एकरात्रं त्रिरात्रं वा, शरीरमदग्ध्वा निखनन्ति, अन्तःसूतके चेदोत्थानादाशौचं सूतकवत्"[४] इति पारस्करगृह्यसूत्रविधानस्य प्रतिकूलत्वात् पारस्करगृह्यसूत्रानुयायिभिरुपेक्ष्या अवगम्यन्ते। सपिण्डे जाते मातापितृव्यतिरिक्तानां पारस्करगृह्यसूत्रानुयायिनां सपिण्डानाम्, अद्विवर्षे सपिण्डे प्रेते च मातापितृभ्यां निर्हारकेभ्यश्च व्यतिरिक्तानां पारस्करगृह्यसूत्रानुयायिनां सपिण्डानां किमप्याशौचं न भवत्येव, आशौचविधानस्यापि प्रायेण प्रतिशाखं भिन्नत्वेन शाखान्तरविधानमूलकस्मृतिपुराणवचनानां च शाखान्तरानुयायिभि-रननुसरणीयत्वात्। गर्भस्राविण्याः शुद्धिश्च रजस्वलायाः शुद्ध्या तुल्या, सा च श्रुतावेव स्फुटेति गृह्यसूत्रकारेणोपेक्षिताऽवगम्यते, तथापि गर्भस्रावे गर्भमासतुल्याभी रात्रिभिर्गर्भस्राविण्याः शुद्धिः स्वचरणगुरुयाज्ञवल्क्यनामाङ्कितस्मृतिवचनात् पारस्करगृह्यसूत्रानुसारिभिरपि स्वीकर्तुं शक्या।

मरणाशौचे बालमरणाशौचनिरूपणम्

अद्विवर्षे बाले प्रेते मातापित्रोरेवाऽऽशौचं भवति, पारस्करगृह्यसूत्रानुयायिनां माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशाखाध्यायिनामन्येषां सपिण्डानां द्विजातीनामाशौचं नैव भवति, शौचमेव भवति, तत्रापि बालेऽकृतचूडे प्रेते मातापित्रोरेकरात्रमाशौचं भवति, कृतचूडे बाले प्रेते तु त्रिरात्रमाशौचं भवति, अथवा

१. यमवचनम्, निर्णयसिन्धौ, २०४२ तमे वैक्रमेऽब्दे वाराणसीस्थकृष्णदासाकादमीमुद्रिते, पृ. ३६५।

२. जैमिनिवचनम्, याज्ञवल्क्यस्मृतिव्याख्यायां मिताक्षरायाम्-३।२०।

३. संवर्तवचनम्, तत्रैव-३।१९;

४. पारस्करगृह्यसूत्रे-३।१०।२-६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

येषां गुणवतामुपनीते सपिण्डे प्रेते त्रिरात्रमाशौचं भवति तादृशयोर्गुणवतोर्मातापित्रोरकृतचूडे कृतचूडे चाऽद्विवर्षे बाले प्रेते एकरात्रमाशौचं भवति, येषां गुणोत्कर्षहीनानामुपनीते सपिण्डे प्रेते दशरात्रमाशौचं भवति तादृशयोर्गुणोत्कर्षहीनयोर्मातापित्रोस्त्वकृतचूडे कृतचूडे चाऽद्विवर्षे बाले प्रेते त्रिरात्रमाशौचं भवतीत्यवगम्यते। तथा हि पारस्करगृह्यसूत्रे—

अद्विवर्षे प्रेते मातापित्रोराशौचम्। (३।१०।२)

शौचमेवेरेषाम्। (३।१०।३)

एकरात्रं त्रिरात्रं वा। (३।१०।४) इति।

अत्र एकरात्रं वाऽऽशौचमित्यत्र व्यवस्थापकं चूडाकरणमिति पक्षः,

'गुणामकृतचूडानां विशुद्धिर्नैशिकी स्मृता।
निर्वृत्तचूडकानां तु त्रिरात्राच्छुद्धिरिष्यते''[1]।।

इत्यादीनां वचनानां दर्शनात् प्रदर्शितो बोध्यः। द्वितीयस्तु पक्षः पारस्करस्यैव ''त्रिरात्रं शावमाशौचम्, दशरात्रमित्येके''[2] इति वचनं विचार्य दर्शितोऽवगन्तव्यः।

यद्यप्यपरिवत्सर एव बाले प्रेते मातापित्रोर्निर्हर्तॄणां चैवाऽऽशौचम्, परिवत्सरे बाले तु अद्विवर्षेऽपि प्रेते सपिण्डानामप्याशौचं भवतीति व्यवस्थाऽऽपस्तम्बकृष्णयजुर्वेदशाखाध्यायिनां दृश्यते[3], तथापि अद्विवर्षे बाले प्रेते पारस्करगृह्यसूत्रानुयायिनां मातापितृभिन्नानां सपिण्डानां त्वाशौचं नैव भवतीत्यवगन्तव्यम्। एतेनाऽऽशौचव्यवस्थाऽपि शाखाभेदेन अधिकारिभेदाद् भिन्नाऽपि भवतीति च स्फुटं भवति। एवं चार्वाचीनानां धर्मशास्त्रनिबन्धकाराणां सर्वेषामाशौचविषयकाणां स्मृतिवचनानामेकवाक्यतायाः, विषयविभागेन समन्वितताया:, सर्वथा परस्पराऽविरोधिताया वा प्रतिपादने य आग्रहः, स तु मौलिकवैदिकपरम्परायां तत्तच्छाखागृह्यसूत्रधर्मसूत्रादिषु दृश्यमानाया अनुरूपो नेति च स्पष्टं भवति। एवं चाऽऽशौचविषयेऽपि स्वशाखाग्रन्थव्यवस्थैवाऽनुसरणीयेति विद्वद्भिरवगन्तव्यम्। अत एव—

''आ दन्ताज्जन्मतः सद्य आ चूडान् नैशिकी स्मृता[4]''।।

---

१. मनुस्मृतौ-५।६७; २. पारस्करगृह्यसूत्रे-३।१०।२९-३०।

३. प्रेतेषूदकोपस्पर्शनं गर्भान् परिहाप्याऽपरिवत्सरान् मातापितरावेव तेषु, हर्तारश्च। इति (आपस्तम्बधर्मसूत्रे, २०२६ तमे वैक्रमेऽब्दे वाराणस्यां मुद्रिते-२।६।३।२-४ पृ. २०७)

४. पराशरस्मृतौ-३।१९।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'ऊनद्विवार्षिकं प्रेतं निदध्युर्बान्धवा बहिः।
अलङ्कृत्य शुचौ भूमावस्थिसञ्चयनादृते।।
नास्य कार्योऽग्निसंस्कारो न च कार्योदकक्रिया।
अरण्ये काष्ठवत् त्यक्त्वा क्षपेत त्र्यहमेव च।।
नाऽत्रिवर्षस्य कर्तव्या बान्धवैरुदकक्रिया।
जातदन्तस्य वा कुर्युर्नाम्नि वाऽपि कृते सति[१]'।।
'अदन्तजाते तनये शिशौ गर्भच्युते तथा।
सपिण्डानां तु सर्वेषामहोरात्रमशौचकम्[२]'।।
'यद्यप्यकृतचूडो वै जातदन्तस्तु संस्थितः।
तथाऽपि दाहयित्वैनमाशौचं त्र्यहमाचरेत्''[३]।।

(उदकक्रियाऽऽशौचं च) आ दन्तजननादित्येके''[४], ''ऊनद्विवर्षे प्रेते गर्भपतने वा सपिण्डानां त्रिरात्रम्''[५], ''उदकदानं सपिण्डैः कृतचूडस्य, तत्स्त्रीणां च''[६], ''दन्तजाते त्वकृतचूडे त्वहोरात्रेण (कुलस्य शौचम्)''[७] इत्यादिकानि स्वशाखागृह्यसूत्रप्रतिकूलानि वचनानि माध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेद-शाखाध्यायिभिरुपेक्ष्याणि। यद्यपि ''आ दन्तजन्मनः सद्य आ चूडान् नैशिकी स्मृता''[८] इति वचनं याज्ञवल्क्यस्मृतेर्विज्ञानेश्वरपाठे दृश्यते, तथापि विश्वरूपपाठे तस्याऽभावात्, तस्य वचनस्य पारस्करगृह्यसूत्रविहिताशौचव्यवस्थायाः प्रतिकूलत्वाच्च पारस्करगृह्यसूत्रानुयायिभिस्तदपि वचनमुपेक्ष्यमेव, स्वशाखासूत्रस्य श्रुतितुल्यत्वात्। अद्विवर्षे बाले प्रेते मातापितृभ्यामपि उदकदानं तु नैव कार्यम्, वचनान्तरेषु क्वचिद् दृश्यमानस्यापि तस्य ''नात्रोदककर्म''[९] इति पारस्करेण निषिद्धत्वात्।

---

१. मनुस्मृतौ-५।६८-७०।
२. यमवचनम्, याज्ञवल्क्यस्मृतिव्याख्यायां मिताक्षरायाम्-३।२३।
३. अङ्गिरोवचनम्, तत्रैव।
४. वासिष्ठधर्मशास्त्रे, १९३० तमे क्रैस्ताब्दे पुण्यपत्तने मुद्रिते-४।९-१०।
५. तत्रैव-४।३४।
६. गौतमप्रणीतधर्मसूत्रे, १९३१ तमे क्रैस्ताब्दे आनन्दाश्रममुद्रिते-२।५।३२-३३।
७. विष्णुस्मृतौ, १९६४ तमे क्रैस्ताब्दे अड्यारपुस्तकालयप्रकाशितायाम्-२२।२६-२९।
८. याज्ञवल्क्यस्मृतौ विज्ञानेश्वरव्याख्यायाम्-३।२३।
९. पारस्करगृह्यसूत्रे-३।१०।७।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुमारमरणाशौचविचारः

पूर्णद्विवर्षादीनामनुपनीतानां कुमाराणां मरणे "अद्विवर्षे प्रेते मातापित्रो-राशौचम्, शौचमेवेतरेषाम्"[१] इति, "द्विवर्षप्रभृति प्रेतमाश्मशानात् सर्वेऽनु-गच्छेयुः"[२] इति, "यद्युपेतो भूमिजोषणादिसमानमाहिताग्नेरोदकान्तस्य गमनात्"[३] इति, "सर्वे ज्ञातयोऽपोऽभ्यवयन्त्या सप्तमात् पुरुषाद् दशमाद् वा, समानग्रामवासे यावत् सम्बन्धमनुस्मरेयुः"[४] इति च पारस्करवचनानां दर्शनात् सप्तमपुरुषपर्यन्तानां दशमपुरुषपर्यन्तानां वा समानग्रामनिवासिनां तु समानं मूलं पुरुषं स्मरतां सर्वेषामेव ज्ञातीनां किमपि आशौचं भवतीति ज्ञायते। तेषां कियत्कालाशौचं भवतीति पारस्करगृह्यसूत्रे स्पष्टं नास्ति, तथापि, अद्विवर्षे प्रेते दहनस्य "शरीरमदग्ध्वा निखनन्ति"[५] इति वचनेन उदककर्मणश्च "नाऽत्रोदककर्म"[६] इति वचनेन पारस्करेण निषिद्धत्वाद् द्विवर्षे त्वनुपनीतेऽपि प्रेते पारस्करमते मातापितृ-व्यतिरिक्ताः सपिण्डादयो दाहोत्तरं स्नात्वोदकं दत्त्वा शुध्यन्तीति, प्रेतस्पर्शिनस्तु सपिण्डादयः सज्योतिराशौचमपि पालयित्वाऽनन्तरं शुध्यन्तीति, अन्ये तु प्रेतस्पर्शिनः स्नात्वा सज्योतिराशौचं पालयित्वा शुध्यन्तीति चाऽवगम्यते "सर्वे ज्ञातयोऽपोऽभ्यवयन्त्या सप्तमात् पुरुषाद् दशमाद् वा, समानग्रामवासे यावत् सम्बन्धमनुस्मरेयुः"[७] इति, "प्रेतायोदकं सकृत् प्रसिञ्चन्त्यञ्जलिनाऽसावेतत् त उदकमिति"[८] इति, "प्रेतस्पर्शिनो ग्रामं न प्रविशेयुरानक्षत्रदर्शनात्, रात्रौ चेदादित्यस्य, प्रवेशनादि समानमितरैः"[९] इति च पारस्करवचनेभ्यः। एवञ्च "स्त्रीणामसंस्कृतानां तु त्र्यहाच्छुध्यन्ति बान्धवाः। यथोक्तेनैव कल्पेन शुध्यन्ति तु सनाभयः"[१०], "नृणामकृतचूडानां विशुद्धिर्नैशिकी स्मृता। निर्वृत्तचूडकानां तु त्रिरात्राच्छुद्धिरिष्यते"[११], "यद्यप्यकृतचूडो वै जातदन्तश्च संस्थितः। तथापि दाहयित्वैनमाशौचं त्र्यहमाचरेत्"[१२], "अविशेषेण वर्णानामर्वाक् संस्कारकर्मणः।

---

१. पारस्करगृह्यसूत्रे-३।१०।२-३। २. तत्रैव-३।१०।८;
३. तत्रैव-३।१०।१० ४. तत्रैव-३।१०।१६-१७;
५. तत्रैव-३।१०।५; ६. तत्रैव-३।१०।७।
७. तत्रैव-३।१०।१६-१७; ८. तत्रैव ३।१०।२१।
९. तत्रैव-३।१०।३५-३७।
१०. मनुस्मृतौ-५।७२, अग्निपुराणे-१५७।८, कूर्मपुराणे-२।२३।२८-३०; विष्णुधर्मोत्तरपुराणे च-२।७५।१०-११। ११. मनुस्मृतौ-५।६७।
१२. अङ्गिरोवचनम्, याज्ञवल्क्यस्मृतिव्याख्यायां मिताक्षरायाम्-३।२३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रिरात्रात्तु भवेच्छुद्धिः कन्यास्वह्ना विधीयते''[१], ''ऊनद्विवर्षे प्रेते गर्भपतने वा सपिण्डानां त्रिरात्रम्''[२], ''दन्तजाते त्वकृतचूडे त्वहोरात्रेण, कृतचूडे त्वसंस्कृते त्रिरात्रेण''[३] इत्यादीनि वचनानि तु पारस्करगृह्यसूत्रानुयायिभिरुपेक्ष्याण्येव। यच्च ''आ दन्तजन्मनः सद्य आ चूडान् नैशिकी स्मृता। त्रिरात्रमा व्रतादेशाद् दशरात्रमतः परम्''[४] इति याज्ञवल्क्यस्मृतेर्विज्ञानेश्वरपाठे वचनम् तदपि विश्वरूपपाठेऽभावात् पारस्करगृह्यसूत्रप्रतिकूलत्वाच्चोपेक्ष्यमेव। विज्ञानेश्वरभक्तैरपि पारस्करगृह्यसूत्रानुयायिभिस्तद्वचनं स्वसूत्रानुकूल्याय मातापितृविषयकत्वादिना नेयम्। एतादृशान्येव पराशरस्मृत्यग्निपुराणादिवचनानि च[५] पारस्करगृह्यसूत्रानुयायिभिरुपेक्ष्याण्येव। पूर्णद्विवर्षादीनामकृतचूडानां कुमाराणां कुमारीणां च मरणे मातापित्रोरेकरात्रमाशौचं कृतचूडानामनुपनीतानां मरणे तु त्रिरात्रमाशौचमित्यादिकं तु ''एकरात्रं त्रिरात्रं वा'' इति पारस्करवचनादेवाऽवगन्तव्यम्।

उपनीतसपिण्डमरणाशौचनिरूपणम्

उपनीतस्य निरग्नेः साग्नेराहिताग्नेर्वाऽपि सपिण्डस्य ब्राह्मणस्य मरणे पुत्रदारभिन्नस्य सपिण्डस्य ब्राह्मणस्य त्रिरात्रमाशौचं भवतीति पारस्करगृह्यसूत्रे प्रथमः कल्पो दृश्यते। तथा हि—

यद्युपेतो भूमिजोषणादि समानमाहिताग्नेरोदकान्तस्य गमनात्। (३।१०।१०)

शालाग्निना दहन्त्येनमाहितश्चेत्, तूष्णीं ग्रामाग्निनेतरम्। (३।१०।११-१२)

त्रिरात्रं शावमाशौचम्, दशरात्रमित्येके। (३।१०।२९-३०) इति।

यद्यपि याज्ञवल्क्यस्मृतौ विज्ञानेश्वरपाठे ''आ दन्तजन्मनः सद्य आ चूडान् नैशिकी स्मृता। त्रिरात्रमा व्रतादेशाद् दशरात्रमतः परम्''[६] इति वचनमपि दृश्यते, तथापि तस्य विश्वरूपपाठेऽभावात्, विश्वरूपविज्ञानेश्वरोभयसम्मतेन ''त्रिरात्रं दशरात्रं वा शावमाशौचमिष्यते''[७] इत्यनेन, ''पिण्डयज्ञावृता देयं प्रेतायाऽन्नं

---

१. अङ्गिरसो वचनम्, याज्ञवल्क्यस्मृतिव्याख्यायां मिताक्षरायाम्-३।२३।

२. वासिष्ठधर्मशास्त्रे-४।३४; ३. विष्णुस्मृतौ-२२।२९-३०।

४. याज्ञवल्क्यस्मृतौ मिताक्षरासहितायाम्-३।२३।

५. पराशरस्मृतौ-३।१९, अग्निपुराणे-१५७।५-६, कूर्मपुराणे-२।२३।१३, गरुडपुराणे १।१०६।१३, १।१०७।१७, विष्णुधर्मोत्तरपुराणे च-२।७५।८, ३।२३२।७।

६. याज्ञवल्क्यस्मृतौ मिताक्षरासहितायाम्-३।२३।

७. याज्ञवल्क्यस्मृतौ बालक्रीडासहितायां मिताक्षरासहितायां च-३।१८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिनत्रयम्''[१] इत्यनेन च याज्ञवल्क्यवचनेनैव चाप्यस्य सुसमन्वयस्याऽभावाच्च आ दन्तजन्मनः सद्य इत्यादिकमेतद् वचनं पारस्करगृह्यसूत्रानुयायिनां कृतेऽनादरणीयमेवाऽवगम्यते। ''त्रिरात्रं दशरात्रं वा शावमाशौचमिष्यते''[२] इति याज्ञवल्क्यवचनमेव पारस्करगृह्यसूत्रस्याऽनुकूलं दृश्यते।

त्रिरात्रं सपिण्डानां शावमाशौचं भवतीति पक्षोऽपि अन्येष्वपि बहुष्वेव ग्रन्थेषूल्लिखितो दृश्यते। तथा हि—

(क) दशाहं शावमाशौचं सपिण्डेषु विधीयते।
अर्वाक् सञ्चयनादस्थ्नां त्र्यहमेकाहमेव वा[३] ।। इति।

(ख) अधश्शय्यां हविष्यभक्षता प्रत्यूहनं च कर्मणामेकरात्रं त्रिरात्रं नवरात्रं वा, नाऽथाहानि वर्धयेयुरिति ह स्माऽऽह कौषीतकिः[४] । इति।

(ग) अनशनाऽनध्ययनाऽधश्शय्योदकोपस्पर्शनानि आ कालमनूचानेषु, द्व्यहं त्र्यहं षडहं द्वादशाहं वा गुरुषु[५] । इति।

(घ) अनशनाऽनध्ययनाऽधश्शय्योदकोपस्पर्शनानि आ कालम्, अनूचानेषु द्व्यहं त्र्यहं षडहं द्वादशाहं वा गुरुष्वनशनवर्जं संवत्सरम्[६] । इति।

(ङ) मातरि पितर्याचार्य इति त्रिरात्रमक्षारलवणभोजनमधश्शयनं ब्रह्मचर्यम्, द्व्यहं त्र्यहं षडहं द्वादशाहं संवत्सरं वा, यावद्ग्रहणं द्वादशाहावरार्ध्यं परमगुरुषु, एवमघोदकम्, इतरेषु त्रिरात्रम्, यावज्जीवं प्रेतपत्नी[७] । इति।

(च) अतः शुद्धिं प्रवक्ष्यामि जनने मरणे तथा।
दिनत्रयेण शुध्यन्ति ब्राह्मणाः प्रेतसूतके[८] ।। इति।

---

१. याज्ञवल्क्यस्मृतौ बालक्रीडासहितायाम्-३।१४, मिताक्षरासहितायाम्-३।१६।
२. याज्ञवल्क्यस्मृतौ-३।१८; ३. मनुस्मृतौ-५।५९।
४. कौषीतकिगृह्यसूत्रे, १९८२ तमे क्रैस्ताब्दे देहल्यां पुनर्मुद्रिते-५।४।९-१०।
५. सत्याषाढपितृमेधसूत्रे सत्याषाढश्रौतसूत्रे १९३२ तमे क्रैस्ताब्दे आनन्दाश्रममुद्रिते, २८।२।७३।
६. भारद्वाजपैतृमेधिकसूत्रे, १९६४ तमे क्रैस्ताब्दे पुण्यपत्तने मुद्रिते भारद्वाजश्रौतसूत्रे संलग्ने-१।८।९-११।
७. बौधायनपितृमेधसूत्रे, १९८२ तमे क्रैस्ताब्दे देहल्यां पुनर्मुद्रिते बौधायनगृह्यसूत्रे संलग्ने-१।१२।१०। आग्निवेश्यगृह्यसूत्रे च, १९४० तमे क्रैस्ताब्दे ट्रावन्कोरविश्वविद्यालयेन प्रकाशिते-३।६।२।
८. पराशरस्मृतौ-३।१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(छ) त्रिरात्रं दशरात्रं वा शावमाशौचमुच्यते[१] । इति।

(ज) दिनत्रयेण शुध्येत ब्राह्मणः प्रेतसूतके[२] । इति च।

पारस्करगृह्यसूत्रे द्वितीयकल्पत्वेनाऽऽगतः 'उपनीतस्य सपिण्डस्य मरणे सपिण्डस्य ब्राह्मणस्य दशरात्रमाशौचं भवति' इति पक्षोऽपि बहुष्वेव ग्रन्थेष्वागतोऽस्ति। तत्र चोक्तेभ्यो वचनेभ्योऽतिरिक्तानि वचनानि, यथा—

(क) दशाहं शावमाशौचं सपिण्डेषु विधीयते[३] । इति।

(ख) अक्षारलवणाशिनो दशाहं कटमासीरन्[४] । इति।

(ग) शावमाशौचं दशरात्रमनृत्विग्दीक्षितब्रह्मचारिणां सपिण्डानाम्[५] । इति।

(घ) ब्राह्मणस्य सपिण्डानां जननमरणयोर्दशाहमाशौचम्[६] । इति।

(ङ) दशाहं शावमाशौचं सपिण्डेषु विधीयते ।
जनने च तथाऽशुद्धिर्ब्राह्मणानां भृगूत्तम[७] ।। इति।

(च) दशाहं प्राहुराशौचं सपिण्डेषु विपश्चितः ।
मृतेषु वाऽथ जातेषु ब्राह्मणानां द्विजोत्तमाः[८] ।। इति च।

एवञ्च सपिण्डानां कृते "त्रिरात्रं शावमाशौचम्, दशरात्रमित्येके"[९] इति पारस्करवचनं गुण्यगुणभेदेन व्यवस्थितमिव प्रतीयते। पुरातनकाले प्रायेण सर्वेषां ब्राह्मणानां वेदवत्त्वस्याऽवगम्यमानत्वात्, केषाञ्चित्तु वेदवत्त्वस्याऽग्निमत्त्वस्य चाऽवगम्यमानत्वात्, प्रायः सर्वेषामेव ब्राह्मणानां संस्कारसम्पादन-संस्कारपालन-शिखासूत्रधारण-स्नानसन्ध्योपासन-गायत्रीजप-भक्ष्याऽभक्ष्यकार्याकार्यादिविषयक-शास्त्रशिष्टोक्तनियमपालनयुक्तत्वस्य चाऽवगम्यमानत्वात् पुराकाले ब्राह्मणानां कृते सपिण्डानां शावाऽऽशौचं त्रिरात्रं भवतीति औत्सर्गिकरूपेण पारस्करगृह्यसूत्रादिषु

---

१. गरुडपुराणे, १९८४ तमे क्रैस्ताब्दे देहल्यां पुनर्मुद्रिते-१।१०६।१४; याज्ञवल्क्यस्मृतौ च-३।१८।

२. गरुडपुराणे-१।१०७।१०;

३. वासिष्ठधर्मशास्त्रे-४।१६।

४. बौधायनधर्मसूत्रे-१।११।२२;

५. गौतमप्रणीतधर्मसूत्रे-२।५।१।

६. विष्णुस्मृतौ (विष्णुधर्मसूत्रे)-२२।१।

७. अग्निपुराणे, नागप्रकाशकपुनर्मुद्रिते-१५९।१-२।

८. कूर्मपुराणे, काशिराजन्याससंस्करणे, २।२३।१।

९. पारस्करगृह्यसूत्रे-३।१०।२९-३०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विहितमवगम्यते। अग्निवेदहीनानां ब्राह्मणानां कृत एव तत्र दशरात्रमाशौचं भवतीत्युक्तं प्रतीयते। प्राक् प्रदर्शितानि मनुस्मृत्यादिवचनान्यप्येतस्यैव पक्षस्योपोद्बलकानि प्रतीयन्ते। एतस्य पक्षस्योपोद्बलकानि अन्यान्यपि नानास्मृतिपुराणवचनानि च दृश्यन्ते। तथा हि—

(क) एकाहाच्छुध्यते विप्रो योऽग्निवेदसमन्वितः ।
त्र्यहात् केवलवेदस्तु द्विहीनो दशभिर्दिनैः[१] ।। इति।

(ख) त्रिरात्रेण विशुध्येत विप्रो वेदाग्निसंयुतः ।
पञ्चाहेनाऽग्निहीनस्तु दशाहाद् ब्राह्मणब्रुवः[२] ।। इति।

(ग) दशाहं निर्गुणे प्रोक्तमाशौचं वाऽतिनिर्गुणे ।
एकद्वित्रिगुणैर्युक्तश्चतुस्त्र्येकदिनैः शुचिः[३] ।। इति।

(घ) एकाहाच्छुध्यते विप्रो योऽग्निवेदसमन्वितः।
हीने हीनतरे चैव त्र्यहश्चतुरहस्तथा[४] ।। इति।

(ङ) गुणोत्कर्षे दशाहाप्तौ त्र्यहमेकाहकं त्र्यहे ।
एकाहाप्तौ सद्यः शौचं सर्वत्रैवं समूहयेत्[५] ।। इति।

(च) सम्पर्काद् दुष्यते विप्रो जनने मरणे तथा ।
सम्पर्काच्च निवृत्तस्य न प्रेतं नैव सूतकम्[६] ।। इति।

(छ) एकाहाद् यज्ञयाजीनां शुद्धिरुक्ता स्वयम्भुवा ।
ततस्त्वधीतशाखानां चतुर्भिः सर्वदेहिनाम्[७] ।। इति च।

तत्र कात्यायननिगमपरिशिष्टस्य एकविंश्यां कण्डिकायां स्थितस्य ''आहिताऽग्निमरणेऽशौचं त्रिरात्रं सञ्चयनदर्शनात्, सकुल्यमरणे दशाहम्, गुरौ च'' इति वचनस्य, ''सञ्चयनं चतुर्थ्यामयुग्मान् ब्राह्मणान् भोजयित्वा पलाशवृन्ते-

---

१. पराशरस्मृतौ-३।५, दक्षस्मृतौ-६।६, दाल्भ्यस्मृतौ च, श्लो. १२०।
२. बृहस्पतिवचनम्, हरदत्तकृतायां गौतमप्रणीतधर्मसूत्रव्याख्यायां मिताक्षरायाम्-२।५।१।
३. कूर्मपुराणे काशिराजन्याससंस्करणे-२।२३।७।
४. अग्निपुराणे, नागप्रकाशकपुनर्मुद्रिते-१५८।१०-११।
५. तत्रैव-१५८।१४;
६. पराशरस्मृतौ-३।१९-२०।
७. लिङ्गपुराणे, १९८१ तमे क्रैस्ताब्दे मोतीलालबनारसीदासेन मुद्रापिते-१।८९।१८०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाऽस्थीनि परिवर्त्याऽङ्गुष्ठकनिष्ठिकाभ्यामादाय पलाशपुटे प्रास्यति''[१] इति कात्यायनवचनस्य च दृश्यमानत्वात्, लक्ष्मीधरेणापि अस्थिसञ्चयनान्तस्यैव मरणाशौचाद्याशौचनिरूपणस्य कृतत्वाच्च[२] पारस्करमुनिना ''त्रिरात्रं शावमाशौचम्, दशरात्रमित्येके''[३] इत्यत्र प्रथमपक्षतयोक्तः 'त्रिरात्रं सपिण्डानां शावमाशौचम्' इति पक्षो मुख्यतया श्रौताग्निमति सपिण्डे प्रेते ब्राह्मणानां सपिण्डानां कृतेऽस्तीति प्रतीयते। तथापि नानामुनिवचनसंवादात् श्रौताग्निरहिते उपनीते ब्राह्मणे सपिण्डे प्रेतेऽपि गुणवतां ब्राह्मणानां त्रिरात्रमाशौचं गुणहीनानां ब्राह्मणानां च दशरात्रमाशौचमिति व्यवस्थाऽपि पारस्करवचनानुकूलैवेति च वक्तुं शक्यं दृश्यते।

श्रीधर[४]-देवण्णभट्ट[५]-हेमाद्रि[६]-माधव[७]-नीलकण्ठभट्ट[८]-कमलाकरभट्ट[९]-मित्रमिश्र[१०]-काशीनाथोपाध्याय[११]-प्रभृतिभिरर्वाचीनैर्धर्मशास्त्रनिबन्धकारैः कानिचन लघुस्मृति-पुराणवचनानि प्रदर्श्य वृत्तस्वाध्यायसापेक्षस्याऽघसङ्कोचस्य कलिवर्ज्यत्वे प्रतिपादिते दृश्यमानेऽपि प्राचीनतरैश्चतुर्विंशतिमतसङ्ग्रहकार-षट्त्रिंशन्मतसङ्ग्रहकार-स्मृतिसङ्ग्रहकार-विश्वरूप-शम्भु-श्रीकर-मेधातिथि-धारेश्वरभोजदेव-देवस्वामि-विज्ञानेश्वरादिभिर्धर्मशास्त्रसमुच्चय-धर्मशास्त्रव्याख्या-धर्मशास्त्रनिबन्धकारै-

---

१. कात्यायनश्रौतसूत्रे, १९८७ तमे क्रैस्ताब्दे वाराणसीस्थेन अच्युतग्रन्थमालाकार्यालयेन मुद्रापिते-२५।८।१।

२. कृत्यकल्पतरौ, दशमे भागे, शुद्धिकाण्डे १९५० तमे क्रैस्ताब्दे वटोदरनगरे प्रकाशिते, पृ. १-११३।

३. पारस्करगृह्यसूत्रे-३।१०।२९-३०।

४. स्मृत्यर्थसारे-१९१२ तमे क्रैस्ताब्दे आनन्दाश्रमे मुद्रिते, पृ. २।

५. स्मृतिचन्द्रिकायाम्, १९८८ तमे क्रैस्ताब्दे नागप्रकाशकपुनर्मुद्रितायाम्, संस्कारकाण्डे, पृ. ३०।

६. चतुर्वर्गचिन्तामणौ परिशेषखण्डे, कालनिर्णये १९८५ तमे क्रैस्ताब्दे वाराणस्यां पुनर्मुद्रिते, पृ. ६६७।

७. पराशरस्मृतौ माधवाचार्यव्याख्यासहितायाम्, १९७४ तमे क्रैस्ताब्दे कालीघट्टनगरे पुनर्मुद्रितायाम्-१।२४, पृ. १२४; ३।२, पृ. ५७८।

८. भगवन्तभास्करे समयमयूखे, १९८६ तमे क्रैस्ताब्दे वाराणस्यां पुनर्मुद्रिते, पृ.१८१।

९. निर्णयसिन्धौ-१९४९ तमे क्रैस्ताब्दे निर्णयसागरमुद्रायन्त्रालयमुद्रिते, पञ्चमे संस्करणे, पृ. २६३।

१०. वीरमित्रोदये समयप्रकाशे, १९३५ तमे क्रैस्ताब्दे वाराणस्यां प्रकाशिते, पृ. २६१-२६२।

११. धर्मसिन्धुसारे (धर्मसिन्धौ), १९०४ तमे क्रैस्ताब्दे निर्णयसागरमुद्रायन्त्रालयमुद्रिते, द्वितीयावृत्तिके, पृ. २७३-२७५।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रर्वाचीनधर्मशास्त्रनिबन्धोल्लिखितलघुस्मृतिपुराणाद्युक्तकलिवर्ज्यप्रकरणस्याऽनुल्लिखितत्वस्याऽनाद्रियमाणत्वस्य वाऽपि स्मृतिचन्द्रिकादिलेखादिभ्य एवाऽप्यवगम्यमानत्वात्, "मानुषाणां हितं धर्मं वर्तमाने कलौ युगे। शौचाचारं यथावच्च वद सत्यवतीसुत"[१] इति, "कृते तु मानवा धर्मास्त्रेतायां गौतमाः स्मृताः। द्वापरे शङ्खलिखिताः कलौ पाराशराः स्मृताः"[२] इति च पराशरस्मृतावेवोल्लिखितत्वात् कलावेवानुसरणीयायां पराशरस्मृतौ "एकाहाच्छुध्यते विप्रो योऽग्निवेदसमन्वितः। त्र्यहात् केवलवेदस्तु द्विहीनो दशभिर्दिनैः"[३] इत्युक्त्वा वृत्तस्वाध्यायसापेक्षस्याऽघसङ्कोचस्योपदिष्टत्वात्, स्मृति-पुराणयोर्विरोधे च स्मृतेरेव बलीयस्त्वस्य "श्रुतिस्मृतिपुराणानां विरोधो यत्र दृश्यते। तत्र श्रौतं प्रमाणं स्यात् तयोर्द्वैधे स्मृतिर्वरा"[४] इति, "श्रुतिस्मृती उभे नेत्रे पुराणं हृदयं स्मृतम्। एतत्त्रयोक्त एव स्याद् धर्मो नाऽन्यत्र कुत्रचित्।। विरोधो यत्र तु भवेत्त्रयाणां तु परस्परम्। श्रुतिस्तत्र प्रमाणं स्याद् द्वयोर्द्वैधे स्मृतिर्वरा"[५] इति चोक्तत्वादपि सर्वयुगसाधारणतया प्रवृत्ते पारस्करगृह्यसूत्रे कलियुगारम्भसमय एवोपदिष्टतयाऽवगम्यमानायां याज्ञवल्क्यस्मृतौ च ब्राह्मणानां कृते विहितः सपिण्डस्य ब्राह्मणस्य मरणे त्रिरात्रमाशौचमिति पक्षः कल्यर्थकपराशरस्मृत्याऽप्यनुमोदित इति गुणवता ब्राह्मणेन कलावप्यनुसरणीय एवेत्यवगन्तव्यम्।

साधारणानां ब्राह्मणानामग्निवेदरहितानां निकृष्टानां ब्राह्मणानां चाऽपि कृते चतुर्थपुरुषपर्यन्तं दशरात्रम्, पञ्चमपुरुषे षड्रात्रम्, षष्ठे पुरुषे चतूरात्रम्, सप्तमे पुरुषे एकरात्रं सपिण्डब्राह्मणाशौचं भवतीत्यादिकस्यार्थस्य प्रतिपादकानि वचनानि च नानास्मृतिपुराणेषु दृश्यन्ते। तथा हि—

(क) चतुर्थे दशरात्रं स्यात् षण्निशाः पुंसि पञ्चमे।
षष्ठे चतुरहाच्छुद्धिः सप्तमे तु दिनत्रयात्[६]।। इति।

(ख) षष्ठे तु शुध्येतैकाहं पञ्चमे त्र्यहमेव तु।
चतुर्थे सप्तरात्रं स्यात् त्रिपुरुषं दशमेऽहनि[७]।। इति।

---

१. पराशरस्मृतौ-१।२।
२. तत्रैव-१।२४-२५; ३. तत्रैव-३।५।
४. वेदव्यासस्मृतौ, १९२९ तमे क्रैस्ताब्दे आनन्दाश्रमेण स्मृतीनां समुच्चये सङ्गृह्य प्रकाशितायाम्-१।४।
५. देवीभागवते-१।१।२०-२१।
६. पराशरस्मृतौ-३।१०, दाल्भ्यस्मृतौ च, श्लो. ११९; ७. लिखितस्मृतौ, श्लो.-९१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(ग) आ चतुर्थात्तु सम्पूर्णः पञ्चाहः पञ्चशाखिनाम् ।
त्रिदिनं षष्ठशाखीनां सप्तशाखी दिनत्रयम् ।।
अष्टमी तु अहोरात्रमेकाहं नवमी तथा।
दशमी स्नानमात्रेण शाखया सूतकं भवेत्[1] ।। इति।

(घ) चतुर्थे दशरात्रं स्यात् षडहः पञ्चमे तथा।
षष्ठे चैव त्रिरात्रं स्यात् सप्तमे त्र्यहमेव च ।।
अष्टमे दिनमेकं तु नवमे प्रहरद्वयम् ।
दशमे स्नानमात्रेण सूतके तु शुचिर्भवेत्[2] ।। इति।

(ङ) एकपिण्डास्तु दायादाः पृथग्द्वारनिकेतनाः।
जन्मना च विपत्तौ च भवेत्तेषां तु सूतकम् ।।
चतुर्थे दशरात्रं स्यात् षण्निशाः पुंसि पञ्चमे ।
षष्ठे चतुरहाच्छुद्धिः सप्तमे च दिनत्रयम्[3] ।। इति च ।

एतानि वचनानि च केनापि रूपेण गृह्यसूत्र-पितृमेधसूत्र-धर्मसूत्र-मनुस्मृत्यादिप्रमुखस्मृत्यादिवचनानामनुकूलानीति सम्पर्काऽसम्पर्कसमानग्रामवासाऽसमानग्रामवास-स्नेहसद्भावाऽसद्भावसमानधर्मित्वाऽसमानधर्मित्वाऽऽचारविचार-साम्याऽसाम्यादीनां विचारेण स्वस्वशाखाग्रन्थानुकूलांशे मान्यान्यनुसर्तव्यान्येव च प्रतीयन्ते। तत्र "यत् पुनः स्मृत्यन्तरवचनं 'चतुर्थे दशरात्रं स्यात् षण्निशाः पुंसि पञ्चमे। षष्ठे चतुरहाच्छुद्धिः सप्तमे त्वहरेव तु' इति तद्विगीतत्वाऽऽदरणीयम्"[4] इति वदता विज्ञानेश्वरेण विभिन्नेषु गृह्यसूत्र-धर्मसूत्र-स्मृतिपुराणेषु दृश्यमानानामाशौचव्यवस्थानां परस्परविगीतत्वात् ताः सर्वा अपि नाऽऽदरणीया इति किन्नु नोक्तमित्याश्चर्यं भवति। तत्र विगीतत्वे-नैवाऽनादरणीयत्वं न वक्तुं शक्यमिति मत्वैव नूनं विज्ञानेश्वरेण "यद्यप्यविगीतं तथापि मधुपर्काङ्गपश्वालम्भनवल्लोकविद्विष्टत्वान्नाऽनुष्ठेयम्, 'अस्वर्ग्यं लोकविद्विष्टं

१. ब्रह्मप्रोक्तयाज्ञवल्क्यसंहितायाम्, २०१० तमे वैक्रमेऽब्दे मोरप्रकाशिते स्मृतिसन्दर्भे चतुर्थे भागे संलग्नायाम्-१३।२३-२४।
२. अत्रिसंहितायां स्मृतीनां समुच्चये सङ्गृहीतायाम्, श्लो. ८७-८८।
३. गरुडपुराणे, १९८४ तमे क्रैस्ताब्दे नागप्रकाशकेन पुनर्मुद्रिते-१।१०७।१२-१४।
४. याज्ञवल्क्यस्मृतिव्याख्यायां मिताक्षरायाम्-३।१८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धर्म्यमप्याचरेन्न तु'[१] इति मनुस्मरणात्''[२] इत्युक्तम्। यदि सामान्यतया लोकविद्विष्टत्वादेव शास्त्रीयो धर्मः परित्याज्य इति विज्ञानेश्वर-सिद्धान्तः सर्वथा स्वीकार्यः स्यात्, तदा ब्राह्मणानां शिखाधारण-नित्यस्नान-सन्ध्योपासन-लशुन-पलाण्डु-कुक्कुटाण्ड-शीधु-मधु-मैरेयादिमद्य-हट्टालयदाल-भक्ताऽशुचिस्पृष्टसजल-लवणपक्वान्नादिपरिहारोऽस्पृश्यस्पर्शनिमित्तकस्नानादिक आचारश्चेति सर्वमपि शास्त्रोक्तधर्मानुष्ठानमिदानीं साधारणलोकविद्विष्टत्वात् परित्याज्यं मन्तव्यं स्यात्। किं बहुना, सर्वोऽपि वेदस्मृतिपुराणमूलकोऽदृष्टार्थको धर्म इदानीमन्धविश्वा-समूलकत्वव्यपदेशेन लोके द्विष्टत्वादननुष्ठेयः स्यात्। अत एव लोकद्विष्टत्वादिक-मनादृत्य विश्वरूपस्तु तत्र ''(दशरात्रं त्रिरात्रं वा शावमाशौचमुच्यते' इति याज्ञवल्क्यस्मृतिवचने) वाशब्दश्चोभयत्र स्मृत्यन्तरोक्तचतुरहपक्षिण्यादि-कल्पानुसारेण यथायोगं विकल्पार्थः''[३] इति वदन् स्मृत्यन्तरोक्तचतुरह-पक्षिण्याद्याशौचपक्षाणामपि याज्ञवल्क्यस्मृतिकारसम्मतत्वं प्रदर्शयति।

सोदक-सकुल्य-सगोत्राऽसगोत्रबन्ध्वाशौचविचारः

अष्टमपुरुषप्रभृतिचतुर्दशपुरुषपर्यन्तानां सोदकानां[४] ज्ञातीनाम्, पञ्चदश-पुरुषप्रभृत्येकविंशपुरुषपर्यन्तानां सकुल्यानां ततः परेषां च ज्ञातीनां कृते शावाशौचव्यवस्था पारस्करगृह्यसूत्रे विशेषेण प्रतिपादिता न दृश्यते। अन्येषु ग्रन्थेषु क्वचित् सोदकानां कृते त्रिरात्रमाशौचं सकुल्यानां कृते एकरात्रमाशौचं स्नानमात्रं वाऽपि च विहितं दृश्यते[५]। तत्र वचनेषु चतुर्दशपुरुषात् परे सकुल्या एव सगोत्रा

---

१. याज्ञवल्क्यस्मृतौ-१।१५६।

२. याज्ञवल्क्यस्मृतिव्याख्यायां मिताक्षरायाम् ३।१८।

३. याज्ञवल्क्यस्मृतिव्याख्यायां १९८२ तमे क्रैस्ताब्दे देहल्यां पुनर्मुद्रितायां बालक्रीडायाम्-३।१८।

४. सपिण्डता तु पुरुषे सप्तमे विनिवर्तते।
समानोदकभावस्तु निवर्तेताऽऽचतुर्दशात्।। इति।
(अग्निपुराणे-१५८।३०, द्र.मनु. ५।६०, कूर्म. २।२३।६२)

५. (क) दशाहेन सपिण्डास्तु शुध्यन्ति प्रेतसूतके।
त्रिरात्रेण सकुल्यास्तु स्नात्वा शुध्यन्ति गोत्रजाः।। इति बृहस्पतिवचनं स्मृतिचन्द्रिकायाम्।
(आशौचकाण्डे, पृ. ३५-३६; अग्निपुराणे च-१५८।२९)

(ख) 'त्र्यहं समानोदकानां गोत्रजानामहः स्मृतम्'। इति जाबालवचनम्।
(वीरमित्रोदये शुद्धिप्रकाशे, वाराणसीसंस्करणे, पृ. ३३)

(ग) असपिण्डे योनिसम्बन्धे सहाध्यायिनि च (पक्षिणीमाशौचं कृत्वा शुध्येरन्) इति।
(गौतमधर्मसूत्रे-२।५।१८)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गोत्रका गोत्रजा इति वोक्ता बोद्धव्याः। मनुस्मृत्यादौ क्वचित्तु सपिण्डभिन्नाः सर्वे सोदका उक्ता दृश्यन्ते। तत्र सोदक-सकुल्य-सगोत्रभेदः स्पष्टीकृतो नोपलभ्यते। पारस्करमते तु अष्टमपुरुषप्रभृतिचतुर्दशपर्यन्तानां सोदकानां पञ्चदशपुरुष-प्रभृत्येकविंशपुरुषपर्यन्तानां सकुल्यानां द्वाविंशपुरुषादिकानां सगोत्राणां च समानग्रामवासिनां सर्वेषां ज्ञातीनां मूलपुरुषस्य निश्चितरूपेण स्मर्यमाणत्वात् प्रेतमनुगच्छतां समानरूपेणैवापस्नानं कृत्वोदके दत्ते शुद्धिर्भवतीति गम्यते। प्रेतस्पर्शिनां तु भिन्नगोत्राणामपि सर्वेषां सज्योतिराशौचं तु भवत्येवेति त्वन्यत्।

अतोऽस्मिन् विषये च माध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदशाखाध्यायिभि-र्द्विजातिभिः पारस्करोक्तैव व्यवस्थाऽऽदर्तव्या नाऽन्या।

सावित्र्या ऋचो दातुर्गुरोः, विधिपूर्वकं वेदस्य वेदाङ्गानां चाऽध्यापयितुर्गुरोः, मातामहस्य, मातामह्याः, उपनीतानामप्रत्तानां सपिण्डकन्यानां च मरणे अन्येषां सपिण्डनां मरण इवैवाऽऽशौचं भवतीति विधानं पारस्करगृह्यसूत्रेऽस्ति। तथा हि—

आचार्ये चैवम्। (३।१०।३९)

मातामहयोश्च। (३।१०।४०)

स्त्रीणां चाऽप्रत्तानाम्। (३।१०।४१) इति।

एतादृश्येव व्यवस्था याज्ञवल्क्यस्मृतेर्विश्वरूपसम्मते "एवं मातामहाऽऽ-चार्याऽप्रत्तानां चोदकक्रिया" इति वचने च दृश्यते। तत्र "एवं मातामहाचार्यप्रत्तानां चोदकक्रिया" इति पाठो लेखकप्रमादजो विश्वरूपं विज्ञानेश्वरं च मोहयामास किल। तस्मात् पारस्करगृह्यसूत्रसंवादात् पूर्वापरग्रन्थसमन्वयाच्चाऽस्मदुक्त एव पाठः साधुः। तस्मादप्येतस्मिन् विषये पारस्करगृह्यसूत्रानुयायिभिर्माध्यन्दिनीय-वाजसनेयि-

---

(घ) असपिण्डे, स्ववेश्मनि मृते च (एकरात्रेण शुध्येत्)। इति (विष्णुस्मृतौ-२२।४६)

(ङ) मातामहानां मरणे त्रिरात्रं स्यादशौचकम्।
एकोदकानां मरणे सूतके चैतदेव हि।। इति।
(कूर्मपुराणे, काशिराजन्याससंस्करणे-२।२३।३१)

(च) सोदकैस्तु क्रियाः कार्याः सर्वाः सञ्चयनात् परम्। इति।
(मार्कण्डेयपुराणे जीवानन्दसंस्करणे ३५।४४।

(छ) गोत्रजैस्तु क्रियाः सर्वाः कार्याः सञ्चयनात् परम्। इति।
(ब्रह्मपुराणे, नागप्रकाशकेन पुनर्मुद्रिते-११३।१५१)

(ज) सद्यःशौचं समुद्दिष्टं सगोत्रे संस्थिते सति। इति।
(कूर्मपुराणे, काशिराजन्याससंस्करणे-२।२३।३७)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शुक्लयजुर्वेदाध्यायिभिर्द्विजातिभिः पारस्करोक्तैव व्यवस्था स्वीकर्तव्या न तु षडशीति-त्रिंशच्छ्लोकी-दशश्लोकी-निर्णयसिन्धु-धर्मसिन्धुप्रभृतिषु ग्रन्थान्तरेषु प्रतिपादिता व्यवस्थेत्यवसीयते।

सपिण्डे, आचार्ये, मातामहे च देशान्तरे मृते, मातामह्यामुपनीतायामप्रत्तायां सपिण्डकन्यायां च देशान्तरे मृतायां चाऽपि श्रवणप्रभृति-कालशेषमाशौचं पालनीयमिति व्यवस्था च पारस्करगृह्यसूत्रेऽस्ति। तथा हि—

प्रोषितश्चेत् प्रेयाच्छ्रवणप्रभृति-कालशेषमासीरन्। (३।१०।४४) इति।

ऋत्विगाद्यसगोत्राशौचनिरूपणम्

ऋत्विजः, श्वशुरस्य, श्वश्र्वाः, सख्युः, सख्याः, पितुः, पितृष्वसुः, पुत्रस्य, पितुर्मातृष्वसु पुत्रस्य, पितुर्मातुलस्य पुत्रस्य, मातुः पितृष्वसुः पुत्रस्य, मातुर्मातृष्वसुः पुत्रस्य, मातुर्मातुलस्य पुत्रस्य, आत्मनः पितृष्वसुः पुत्रस्य, आत्मनो मातृष्वसुः पुत्रस्य, आत्मनो मातुलस्य पुत्रस्य, (पितुर्मातुलस्य, मातुर्मातुलस्य,) मातुलस्य, भागिनेयस्य, प्रत्तायाः पितृष्वसुः स्वसुः दुहितुश्च मरणे इच्छायां सत्यामुदकदानं कर्तव्यमसत्यां न कर्तव्यमिति व्यवस्था पारस्करेण विहिताऽस्ति। तथा हि—

अथ कामोदकान्यृत्विक्श्वशुरसखिसम्बन्धिमातुलभागिनेयानाम्, प्रत्तानां च। (३।१०।४६-४७) इति।

प्रायेणैतादृश्येव व्यवस्था याज्ञवल्क्यस्मृतावपि दृश्यते। तथा हि—

कामोदकं सखिप्रत्तास्वस्रीयश्वशुरर्त्विजाम्। (३।४) इति।

एवञ्च ऋत्विगादीनां समानग्रामवासे स्नेहविशेष उपकारकत्वविशेषे आचारविचारसाम्यादौ च सति तेषां मरणे स्वेच्छयाऽपस्नानमुदकदानं च कृत्वा यथौचिति आशौचं पालनीयम्, समानग्रामवासादीनामभावे इच्छायामसत्यां च तेषां मरणेऽपस्नानमुदकदानमाशौचपालनं च न कर्तव्यमिति व्यवस्था पारस्कराऽभिमताऽवगम्यते।

एतादृश्यां स्वशाखागृह्यसूत्रव्यवस्थायां सत्याम् ऋत्विगादिमरणविषये आशौचपालनस्याऽऽवश्यकत्वस्य प्रतिपादकानि लघुस्मृति-पुराणादिवचनानि तदनुसारीणि षडशीति-त्रिंशच्छ्लोकी-दशश्लोकी-निर्णयसिन्धु-धर्मसिन्धुप्रभृति-ग्रन्थकारकृतानि प्रतिपादनानि च पारस्करगृह्यसूत्रानुयायिभिर्नाऽऽदर्तव्यानि।

इच्छया ऋत्विगादिमरणनिमित्तकेऽपस्नाने उदकदाने च कृतेऽपि सद्यः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शुद्धिर्भवतीति पारस्करसम्प्रदायोऽवगम्यते, आशौचकालविशेषस्य पारस्करेणाऽनुक्तत्वात्। एवञ्च "अहस्तु दत्तकन्यासु बालेषु च विशोधनम्। गुर्वन्तेवास्यनूचानमातुलश्रोत्रियेषु च"[१], "मातुले पक्षिणीं रात्रिं शिष्यर्त्विग्बान्धवेषु च"[२], "असपिण्डेषु यथाऽऽसन्नं त्रिरात्रमहोरात्रमेकाहमिति कुर्वीत, आचार्योपाध्यायतत्पुत्रेषु त्रिरात्रं पक्षिण्येकाहम्, ऋत्विजां च, शिष्यसतीर्थ्यसब्रह्मचारिषु त्रिरात्रमहोरात्रमेकाहमिति कुर्वीत"[३], "आचार्यपत्नीपुत्रोपाध्यायमातुलश्वशुरश्वशुर्यसहाध्यायिशिष्येष्वतीतेष्वेकरात्रेण"[४], "असपिण्डे योनिसम्बन्धे सहाध्यायिनि च (पक्षिणीम्), सब्रह्मचारिण्येकाहम्"[५], "आचार्यतत्पुत्रस्त्रीयाज्यशिष्येषु चैवम् (त्र्यहम्)"[६] इत्यादीनि वचनानि च पारस्करानुयायिभिरुपेक्ष्याणि।

तत्र "प्रत्तानामितरे कुर्वीरन्, ताश्च तेषाम्"[७] इति पारस्करवचनाद् दत्तानां पितृष्वसृ-स्वसृ-दुहित्रादीनां स्त्रीणां मरणे तासां पतिपक्षेणैव निर्हरण-दहनाऽपस्नानाचरणोदकदानाशौचपालनेषु कर्तव्येषु, ताभिश्च जीवन्तीभिः पतिपक्षज्ञातीनामेव निर्हरणादिषु कर्तव्येषु अवगतेष्वपि दुहितुः कृते पित्रोस्तु गुरुत्वात् प्रत्तयाऽपि तया तयोर्मरणे समावृत्तेनाऽप्याचार्यमरणे इवाऽपस्नानमुदकदानं त्रिरात्रमाशौचपालनं च कर्तव्यमेवेत्यर्थः पारस्करगृह्यसूत्रस्थोदककर्मकण्डिकापरिशीलनादवगम्यते।

क्षत्रिय-वैश्य-शूद्राशौचनिरूपणम्

क्षत्रिय-वैश्ययोः कृते सपिण्डमरणाशौचं पक्षपरिमितं भवति, शूद्रस्य कृते तु पक्षद्वयपरिमितं भवतीत्ययमर्थोऽपि पारस्करेण सूचितोऽस्ति। तथा हि—

पक्षं द्वौ वाऽऽशौचम्। (३।१०।३८) इति।

तत्र यद्यपि कर्कादिभिर्मनुस्मृति-याज्ञवल्क्यस्मृत्यादिवचनैरपवाहितैः पारस्करवचनादपि क्षत्रियाणां कृते सपिण्डमरणे द्वादशरात्रमाशौचमित्यर्थो हठादानिनीषितो दृश्यते, तथापि वेदाध्ययनाधिकारवतोरपि क्षत्रियवैश्ययोर्वेदाध्यापनाधिकाररहितयोः सपिण्डमरणे आशौचं पक्षपरिमितं तुल्यमेवेति पारस्करमतं

१. याज्ञवल्क्यस्मृतौ विश्वरूपपाठे-३।२२, विज्ञानेश्वरपाठे-३।२४।

२. मनुस्मृतौ-५।८१।

३. बौधायनधर्मसूत्रे-१९७२ तमे क्रैस्ताब्दे वाराणस्यां मुद्रिते-१।११।२५-२८।

४. विष्णुस्मृतौ (विष्णुधर्मसूत्रे)-२२।४४।

५. गौतमप्रणीतधर्मसूत्रे, आनन्दाश्रममुद्रिते-२।५।१८-१९; ६. तत्रैव-२।५।२६।

७. पारस्करगृह्यसूत्रे-३।१०।४२-४३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शब्दादवगम्यमानं निष्प्रमाणया वाशब्दे कृतया लक्षणयाऽन्यथयितुमनुचितमेव मन्तव्यम्। "पञ्चदशरात्रेण राजन्यः"[१], "दशाहं ब्राह्मणानां तु क्षत्रियाणां त्रिपञ्चकम्। विंशद्रात्रं तु वैश्यानां शूद्राणां मासमेव हि"[२], "ब्राह्मणो दशरात्रेण पञ्चदशरात्रेण क्षत्रियः। वैश्यो विंशतिरात्रेण शूद्रो मासेन शुध्यति"[३] इति वचनानां दर्शनात्, विश्वरूपेण "ब्राह्मणस्य दशाहं तु भवति प्रेतसूतकम्। क्षत्रस्य द्वादशाहानि विशां पञ्चदशैव वा"[४] इति याज्ञवल्क्यवचनस्य व्याख्यायां "विशां पञ्चदशैव वेति वाशब्दः स्मृत्यन्तरोक्तावध्यन्तरविकल्पार्थतया सर्वत्राऽविशेषेण द्रष्टव्यः" इत्युक्तत्वात्, हरदत्तेन च "एकादशरात्रं क्षत्रियस्य"[५] इति गौतमवचनस्य व्याख्यायां "द्वादशरात्रेणेति याज्ञवल्क्यः, पञ्चदशरात्रेणेति वसिष्ठः, दशरात्रेणेति पराशरः, षोडशाहमिति पैठीनसिः" इति क्षत्रियस्य क्षत्रियसपिण्डमरणाशौचावधिविषये नानाविधानां मुनिमतानां प्रदर्शितत्वात्, "द्वादशाहं राजन्यस्य"[६] इति विष्णुवचनस्य व्याख्यायां केशववैजयन्त्यां नन्दपण्डितेनाऽपि "किञ्च राजन्यः क्षत्रियस्तस्याशौचं द्वादशाहम्; दशरात्रं वृद्धपराशरः, एकादशाहं गौतमः, पञ्चदशाहं वसिष्ठः, षोडशाहं पैठीनसिः; तदेषां कल्पानां यथाचारं व्यवस्था" इत्युक्तत्वाच्च क्षत्रियाशौचावधिविषये मुनिवचनेषु विभिन्नानां कालानामवगम्यमानत्वात् पारस्करमते क्षत्रियस्य क्षत्रिय-सपिण्डमरणे पक्षपरिमितमेवाऽऽशौचं स्वीकर्तव्यं पक्षशब्दस्य तत्र श्रूयमाणत्वाद् द्वादशरात्रशब्दस्य द्वादशाहशब्दस्य वा तत्राऽश्रूयमाणत्वादिति विवेक्तव्यम्।

अद्यत्वे तु गृह्यसूत्रवचनानि, धर्मसूत्रवचनानि, मनु-याज्ञवल्क्य-पराशर-शङ्ख-देवलादिस्मृतिवचनानि नानापुराणवचनानि च सर्वाण्यवधीर्य "सर्वेषामेव वर्णानां सूतके मृतके तथा। दशाहाच्छुद्धिरेतेषामिति शातातपोऽब्रवीत्"[७] इत्येक-मङ्गिरोवचनं पुरस्कृत्याऽर्वाचीनैर्विज्ञानेश्वरादिभिर्धर्मशास्त्रव्याख्याकारधर्मशास्त्रनिबन्ध-कारैः क्षत्रिय-वैश्य-शूद्राणां कृतेऽपि सजातिसपिण्डमरणे दशाहमेवाऽऽशौचमिति पक्षः प्रचारितो लोके प्रचलति। सोऽयं पक्षो गृह्यसूत्रादिव्यवस्थाप्रतिकूलो विद्वद्भिर्भृशं विचारणीयः। वर्णापेक्षाऽऽशौचव्यवस्था कलियुगेऽपि विकल्पेनाऽनुसरणीयेति तु कैश्चिदर्वाचीनतरैर्धर्मशास्त्रनिबन्धकारैरप्युक्तमस्त्येवेति च बुधैः स्मर्तव्यम्।

---

१. वासिष्ठधर्मशास्त्रे-४।२८।
२. देवलवचनम्, पराशरस्मृतिव्याख्यायां माधवाचार्यकृतायाम्, कालीघट्टनगरे मुद्रितायाम्, प्रथमे भागे, पृ. ५७०।
३. वसिष्ठवचनम्, तत्रैव-पृ. ५७१। ४. याज्ञवल्क्यस्मृतौ, बालक्रीडासहितायाम्-३।१९;
५. गौतमप्रणीतधर्मसूत्रे-२।५।२। ६. विष्णुस्मृतौ-२२।२;
७. याज्ञवल्क्यस्मृतिव्याख्यायां मिताक्षरायाम्-३।२२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतिक्रान्ताशौचनिरूपणम्

सपिण्डस्य, आचार्यस्य, मातामहस्य, मातामह्याः, उपनीताया अप्रत्तायाः सपिण्डकन्यायाश्चाऽतिक्रान्ताशौचं श्रुत्वा "त्रिरात्रं शावमाशौचम्, दशरात्रमित्येके" इति वचने अनुसृत्य येषां कृते पूर्णमाशौचं त्रिरात्रं स्वीक्रियते तैरेकरात्रम्, येषां कृते पूर्णमाशौचं दशरात्रं स्वीक्रियते तैस्त्रिरात्रमाशौचं कर्तव्यमिति व्यवस्था पारस्करगृह्यसूत्रे स्थिताऽवगम्यते। तथा हि—

अतीतश्चेदेकरात्रं त्रिरात्रं वा। (३।१०।४५) इति।

एतस्मिन् विषये ग्रन्थान्तरेषु तु नानाविधा व्यवस्था उक्ता दृश्यन्ते। तथा हि—

(क) देशान्तरस्थे प्रेत ऊर्ध्वं दशाहाच्छ्रुत्वैकरात्रमाशौचम्[१]। इति।

(ख) श्रुत्वा चोर्ध्वं दशम्याः पक्षिणीम्[२]। इति।

(ग) व्यतीतेऽशौचे संवत्सरान्तस्त्वेकरात्रेण। ततः परं स्नानेन (शुध्येत्)।[३] इति।

(घ) अतिक्रान्ते दशाहे तु त्रिरात्रमशुचिर्भवेत्।
संवत्सरे व्यतीते तु स्पृष्ट्वैवाऽपो विशुध्यति[४]।। इति।

(ङ) अतीते दशरात्रे तु त्रिरात्रमशुचिर्भवेत्।
तथा संवत्सरेऽतीते स्नात एव विशुध्यति[५]।। इति।

(च) प्रोषिते कालशेषः स्यात् पूर्णे दत्त्वोदकं शुचिः[६]। इति।

(छ) प्रोषिते कालशेषः स्यादशेषे त्र्यहमेव तु।
सर्वेषां वत्सरे पूर्णे प्रेते दत्त्वोदकं शुचिः[७]।।इति।

(ज) निर्दशं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च।
सवासा जलमाप्लुत्य शुद्धो भवति मानवः[८]।।इति।

---

१. वासिष्ठधर्मशास्त्रे-४।३६; २. गौतमप्रणीतधर्मसूत्रे-२।५।१७।
३. विष्णुस्मृतौ (विष्णुधर्मसूत्रे)-२२।४०; ४. मनुस्मृतौ-५।७६।
५. शङ्खस्मृतौ-१५।१२, अग्निपुराणे-१५७।१३-१४, १५८।३२-३३; विष्णुधर्मोत्तरपुराणे च-२।७५।१७।
६. याज्ञवल्क्यस्मृतौ-३।२१।
७. याज्ञवल्क्यस्मृतिव्याख्यायां मिताक्षरायां प्रदर्शितं पाठान्तरम्-३।२१।
८. मनुस्मृतौ-५।७७।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(झ) अत्रिपक्षात् त्रिरात्रं स्यात् षण्मासात् पक्षिणी तथा ।
परमेकाहमावर्षादूर्ध्वं स्नात्वा विशुध्यति[1] ।।इति।

(ञ) मासत्रये त्रिरात्रं स्यात् षण्मासेन तु पक्षिणी ।
अहस्तु नवमादर्वागूर्ध्वं स्नानेन शुध्यति[2] ।।इति।

(ट) अतीते सूतके स्वे स्वे त्रिरात्रं स्यादशौचकम् ।
संवत्सरे व्यतीते तु सद्यःशौचं विधीयते[3] ।।इति।

(ठ) अतीते सूतके प्रोक्तं सपिण्डानां त्रिरात्रकम् ।
तथैव मरणे स्नानमूर्ध्वं संवत्सराद् यदि[4] ।।इति।

(ड) मासत्रये त्रिरात्रं स्यात् षण्मासेन तु पक्षिणी ।
अहः संवत्सरादर्वाक् पूर्णे दत्त्वोदकं शुचिः[5] ।।इति।

(ढ) अर्वाक् त्रिपक्षात् त्रिनिशं षण्मासाच्च दिवानिशम् ।
अहः संवत्सरादर्वाग् देशान्तरमृतेष्वपि[6] ।।इति।

(ण) अतीते दशरात्रे तु वर्षस्याभ्यन्तरे तथा ।
त्रिरात्राच्छुद्धिरुद्दिष्टा स्नातस्य तु ततः परम्[7] ।।इति।

(त) अतिक्रान्ते दशाहे तु पश्चाज्जानाति चेद् गृही ।
त्रिरात्रं सूतकं तस्य न तद्द्रव्यस्य कर्हिचित्[8] ।।इति।

(थ) आदिष्टी नोदकं कुर्यादाव्रतस्य समापनात् ।
समाप्ते तूदकं दत्त्वा त्रिरात्रमशुचिर्भवेत्[9] ।।इति च।

---

१. देवलवचनम्, माधवाचार्यकृतपराशरस्मृतिव्याख्यायाम्-३।१०-११, प्रथमे भागे, पृ. ५९८।
२. वृद्धवसिष्ठवचनम्, याज्ञवल्क्यस्मृतिव्याख्यायां मिताक्षरायाम्-३।२१, निर्णयसिन्धौ च, पृ. ३७८।
३. जाबालिवचनम्, स्मृतिचन्द्रिकायाम्, आशौचकाण्डे, पृ.४९।
४. कूर्मपुराणे, काशिराजन्याससंस्करणे-२।२३।२६।
५. गरुडपुराणे, नागप्रकाशकेन पुनर्मुद्रिते-२।३४।६६।
६. विष्णुवचनम्, माधवाचार्यकृतपराशरस्मृतिव्याख्यायाम्, प्रथमे भागे, पृ. ५९८।
७. विष्णुधर्मोत्तरपुराणे, नागप्रकाशकेन पुनर्मुद्रिते-३।२३२।५।
८. स्मृत्यन्तरवचनम्, याज्ञवल्क्यस्मृतिव्याख्यायां मिताक्षरायाम्-३।१७।
९. मनुस्मृतौ-५।८८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपरि लिखितानां वचनानां विचारे संवत्सरादूर्ध्वं स्नानमात्रेण शुद्धिरित्यत्र प्रायः सर्वेषां वचनानां सम्मतेर्दर्शनात् पारस्करस्य वचनं संवत्सरान्तःकालविषयकं प्रतीयते; किन्तु "प्रोषिते कालशेषः स्यात् पूर्णे दत्त्वोदकं शुचिः"[१] इति याज्ञवल्क्यस्मृतिवचने संवत्सरादर्वागपि स्नानेनोदकदानेनैव शुद्धेः प्रतिपादितत्वात् तस्या व्यवस्थायाश्च बैजवापादिशाखान्तरमूलकतायाः सम्भाव्यमानत्वाद् एतस्मिन् विषयेऽपि प्रतिशाखं भिन्नाया व्यवस्थायाः स्वीकार्यत्वात् पारस्करसम्प्रदाये अतिक्रान्तस्य सपिण्डाद्याशौचस्य संवत्सरादर्वागूर्ध्वं च यदा कदाऽपि श्रवणे यथायथमेकरात्रं त्रिरात्रं वा पालनीयत्वमित्यपि वक्तुं शक्यमेव। वस्तुतः शब्दप्रमाणकेऽर्थे श्रुतस्य शब्दस्यैवार्थस्य स्वीकार्यत्वात् पारस्करवचने च संवत्सरादर्वागूर्ध्वं वेति चाऽश्रूयमाणत्वादयमेव द्वितीयः पक्षः स्वीकार्योऽवगन्तव्यः। यद्यप्युक्तस्य याज्ञवल्क्यस्मृतिवचनस्य विज्ञानेश्वरेण "प्रोषिते कालशेषः स्यादशेषे त्र्यहमेव तु। सर्वेषां वत्सरे पूर्णे प्रेते दत्त्वोदकं शुचिः" इति पाठान्तरं प्रदर्शितमस्ति, तथापि तस्य पाठान्तरस्य विश्वरूपेणाऽनुल्लिखितत्वात्, विज्ञानेश्वरेणाऽपि मूले स्वीकृतस्य पाठस्य पाठान्तरस्य च मध्ये कतरस्य परिग्राह्यत्वमित्यनिर्णीतत्वात्, मूले स्वीकृतस्य पाठस्याऽर्थस्य मनुस्मृतावपि "निर्दशं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च। सवासा जलमाप्लुत्य सद्य एव विशुध्यति"[२] इति वैकल्पिकरूपेण स्वीकृतेरवगम्यमानत्वात्, एतस्य मनुस्मृतिवचनस्य याज्ञवल्क्यस्मृतिमूलपाठस्थस्योक्तस्य वचनस्य समर्थने विज्ञानेश्वरेणाऽपि प्रस्तुतत्वात्, उक्तस्य मनुस्मृतिवचनस्याङ्गस्पर्शनमात्रार्थकशुद्धिविषयतया कृतस्य कुल्लूकभट्टव्याख्यानस्याऽसङ्गतत्वेनाऽस्वीकार्यत्वात्, अर्वाचीनैर्धर्मशास्त्रव्याख्याकारैर्धर्मशास्त्रनिबन्धकारैश्च कृतानां धर्मशास्त्रवचनपदवाक्यप्रकरणस्वारस्यप्रतिकूलानां धर्मशास्त्रवचनार्थानां तैः प्रदर्शितानां धर्मशास्त्रमूलग्रन्थस्थवचनपदवाक्यप्रकरणस्वारस्यविरुद्धानां व्यवस्थानां चाऽस्वीकार्यत्वात्, शब्दप्रमाणकेऽर्थे धर्मशास्त्रमूलग्रन्थस्थवचनविशेषपदवाक्यप्रकरणस्वारस्याऽनुकूलानामेवार्थानां व्यवस्थानां च स्वीकार्यत्वात्, "ऊनद्विवर्षे प्रेते गर्भपतने वा सपिण्डानां त्रिरात्रमाशौचम्, सद्यः शौचमिति गौतमः"[३] इत्यादिषु वचनेषु यस्मिन् विषये वासिष्ठधर्मशास्त्रकारस्य सम्प्रदाये सपिण्डानां त्रिरात्रमाशौचं सर्वथा तस्मिन्नेव विषये गौतमसम्प्रदाये

---

१. याज्ञवल्क्यस्मृतौ-३।२१; २. मनुस्मृतौ-५।७७।
३. वासिष्ठधर्मशास्त्रे-४।३४-३५।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सपिण्डानां सद्यः शौचमित्यर्थस्य स्वीकार्यत्वात्, "उदिते जुहोति"[1] "अनुदिते जुहोति"[2] इत्यादिषु वचनेषु दृष्टानां सर्वेषां पक्षाणामधिकारिविशेषविषयतया धर्मत्वमास्थेयमिति। "श्रुतिद्वैधं तु यत्र स्यात् तत्र धर्मावुभौ स्मृतौ। उभावपि हि तौ धर्मौ सम्यगुक्तौ मनीषिभिः।। उदितेऽनुदिते चैव समयाध्युषिते तथा। सर्वथा वर्तते यज्ञ इतीयं वैदिकी श्रुतिः"[3] इति मनुस्मृतिवचनादवगम्यमानत्वात् तत्तच्छाखाध्यायिनां जनानां कृते तत्तच्छाखाध्यायिपरिगृहीतगृह्यसूत्रधर्मसूत्र-ग्रन्थविहितानां विभिन्नानामेव आशौचव्यवस्थानामनुसरणीयत्वाच्च याज्ञवल्क्यस्मृतेः "प्रोषिते कालशेषः स्यात् पूर्णे दत्त्वोदकं शुचिः"[4] इति विश्वरूपविज्ञानेश्वरोभयस्वीकृतस्य मुख्यस्य पाठस्याऽपि सूब्ज एवार्थः स्वीकार्योऽवगम्यते। तेनैव न्यायेन पारस्करस्य "अतीतश्चेदेकरात्रं त्रिरात्रं वा"[5] इति सूत्रस्यार्थोऽपि अस्मदुक्तरूप एव स्वीकर्तव्यो व्यवहारेऽनुसर्तव्यश्च पारस्करानुयायिभिरित्यवसीयते।

सपिण्डाऽऽचार्य-मातामहानां मातामह्या उपनीताया अप्रत्ताया: सपिण्ड-कन्यायाश्च मरणेन जातमाशौचं विहायाऽन्येषां मरणेन जाते आशौचे त्वतीते सति किमप्याशौचं न भवतीति पारस्करगृह्यसूत्रोदककर्मप्रकरणपर्यालोचनादपि बोद्धुं शक्यमस्ति, ऋत्विगादीनामनतिक्रान्तस्याऽप्याशौचस्य ऐच्छिकतायाः "अथ कामोदकान्यृत्विक्श्वशुरसखिसम्बन्धिमातुलभागिनेयानाम्, प्रत्तानां च"[6] इति पारस्करवचनाद् अवगम्यमानत्वात्। एतस्मिन् विषये धर्मसिन्धुकारेणापि "मृताशौचेऽपि अनुपनीतमरणादिनिमित्तेषु त्रिरात्रैकरात्रेषु मातुलादिपरगोत्रीय-मरणनिमित्तकेषु पक्षिणीत्रिरात्रादिषु चातिक्रान्ताशौचं नास्ति"[7] इति स्फुटतयोक्तमस्ति।

---

१. "उषस्युपोदयं समयाविषिते उदिते वा प्रातः (होतव्यम्)" इति आपस्तम्बश्रौतसूत्रे-६।१।४।९, द्र. सत्याषाढश्रौतसूत्रे-३।७, भारद्वाजश्रौतसूत्रे-६।९।७-१०, वैखानसश्रौतसूत्रे-२।२, शाङ्खायनश्रौतसूत्रे-२।७।१-५, आश्वलायनश्रौतसूत्रे च-२।४।२४।

२. "प्रातर्जुहोत्यनुदिते" इति कात्यायनश्रौतसूत्रे (४।१५१), सायं तु "अस्तमिते जुहोति" (४।१४।६) इति तत्र प्रतिपादितम्। "श्यावोऽस्याहुतिमभ्यवहरति य उदिते जुहोति" इत्यादिकं वचनं च न्यायभाष्ये (२।१।५८,६०) दृश्यते। द्र. जैमिनीयधर्ममीमांसा-शाबरभाष्यम्-५।१।३३, २।४।९।

३. मनुस्मृतौ-२।१४-१५;

४. याज्ञवल्क्यस्मृतौ-३।२१।

५. पारस्करगृह्यसूत्रे-३।१०।४५;

६. पारस्करगृह्यसूत्रे-३।१०।४६-४७।

७. धर्मसिन्धौ, निर्णयसागरमुद्रायन्त्रालये १९०४ तमे क्रैस्ताब्दे मुद्रिते द्वितीयावृत्तिके, पृ. ३२७।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

असवर्णसपिण्डाशौचविचारः

पारस्करगृह्यसूत्रे असवर्णसपिण्डाशौचविषये स्पष्टं वचनं किमपि न दृश्यते। एतस्मिन् विषये ग्रन्थान्तरेषु तु विविधा व्यवस्था दृश्यन्ते। तथा हि—

(क) वर्णानामानुलोम्येन स्त्रीणामेको यदा पतिः ।
दशाहषट्त्र्यहैकाहं प्रसवे सूतकं भवेत्[१] ।।इति।

(ख) हीनवर्णानामधिकवर्णेषु सपिण्डेषु तदशौचव्यपगमे शुद्धिः, ब्राह्मणस्य क्षत्रविट्शूद्रेषु सपिण्डेषु षड्रात्रत्रिरात्रैकरात्रैः, क्षत्रियस्य विट्शूद्रयोः, षड्रात्रत्रिरात्राभ्याम्, वैश्यस्य शूद्रेषु षड्रात्रेण[२] ।। इति।

(ग) षड्भिस्त्रिभिरथैकेन क्षत्रविट्शूद्रयोनिषु ।
ब्राह्मणः शुद्धिमाप्नोति क्षत्रियस्तु तथैव च[३] ।।इति।

(घ) क्षत्रविट्शूद्रदायादा ये स्युर्विप्रस्य बान्धवाः ।
तेषामशौचे विप्रस्य दशाहाच्छुद्धिरिष्यते[४] ।। इति।

(ङ) सर्वे तूत्तरवर्णानामशौचं कुर्युरादृताः ।
तद्वर्णविधिदृष्टेन स्वं तु शौचं स्वयोनिषु[५] ।।इति।

(च) सर्वेषामेव वर्णानां सूतके मृतके तथा ।
दशाहाच्छुद्धिरेतेषामिति शातातपोऽब्रवीत्[६] ।।इति च।

तत्र पारस्करमते तु विशेषस्याऽनुक्तत्वाद् असवर्णेऽपि वैधविवाहजाते सपिण्डे मृते स्वस्ववर्णोक्तमेवाशौचं कर्तव्यमिति गम्यते, अस्य पक्षस्याऽपि ग्रन्थान्तरप्रदर्शितपक्षान्तराणामिव[७] पारस्करवचनस्वारस्यादनुसरणीयतायाः स्वीकर्तुं शक्यत्वात्, आशौचपालकस्थवर्णविशेषगतवैशिष्ट्यकृतचित्तशुद्ध्यादितारतम्यमूलकस्य आशौचावधिविशेषस्य वैधविवाहजाताऽसवर्णसपिण्डमरणकृताशौचविषयेऽपि योजनेऽनौचित्यस्याऽभावाच्च।

---

१. दक्षस्मृतौ, आनन्दाश्रममुद्रिते स्मृतीनां समुच्चये सङ्गृहीतायाम्-६।१२।
२. विष्णुस्मृतौ-२२।२१-२४।
३. अग्निपुराणे, नागप्रकाशकेन १९८५ तमे क्रैस्ताब्दे पुनर्मुद्रिते-१५७।३-४।
४. कूर्मपुराणे, काशिराजन्यासससंस्करणे-२।२३।३९; ५. तत्रैव-२।२३।४१।
६. अङ्गिरोवचनम्, याज्ञवल्क्यस्मृतिव्याख्यायां मिताक्षरायाम्-३।२२।
७. पक्षान्तराणि तद्व्याख्यानानि च द्रष्टव्यानि वीरमित्रोदये शुद्धिप्रकाशे वाराणसीसंस्करणे, पृ. ४५-४८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आशौचसम्पातविचारः

कर्कोपाध्यायादिव्याख्यागतानुगतिकतां परित्यज्य पारस्करगृह्यसूत्रस्थाऽऽशौचप्रकरणस्य सम्यग् विवेचने कृते आशौचसम्पातविषये तु पारस्करगृह्यसूत्रे किमपि विशिष्टं विधानं नोपलभ्यते। ग्रन्थान्तरेषु त्वाशौचसम्पातविषयकाणि विविधानि वचनानि दृश्यन्ते। तथा हि—

(क) तच्चेदन्तः पुनरापतेच्छेषेण शुध्येरन्, रात्रिशेषे द्वाभ्याम्, प्रभाते तिसृभिः[१]। इति।

(ख) अथ चेदन्तरा प्रमीयेत जायेत वा शिष्टैरेव दिवसैः शुध्येत्, अहःशेषे द्वाभ्याम्, प्रभाते तिसृभिः[२]। इति।

(ग) जननमरणयोस्सन्निपाते समानो दशरात्रः। अथ यदि दशरात्रास्सन्निपतेयुराद्यं दशरात्रमाशौचमा नवमाद् दिवसात्[३]। इति।

(घ) जननाऽऽशौचमध्ये यद्यपरं जननाशौचं स्यात्, तदा पूर्वाशौचव्यपगमे शुद्धिः, रात्रिशेषे दिनद्वयेन, प्रभाते दिनत्रयेण, मरणाशौचमध्ये ज्ञातिमरणेऽप्येवम्[४]। इति।

(ङ) जन्ममरणयोस्तुल्योपनिपातश्चेत्तदा त्रिरात्रशेषणात् पूर्वेणैव शुद्धिः, न्यूने त्रिरात्रपूरणम्, पुरोदयादन्त्ये त्रिरात्रम्, उदिते तु यथोक्तम्[५]। इति।

(च) अन्दर्दशाहे स्यातां चेत् पुनर्मरणजन्मनी।
तावत् स्यादशुचिर्विप्रो यावत्तत्स्यादनिर्दशम्[६]॥इति।

(छ) अन्तरा तु दशाहस्य पुनर्मरणजन्मनी।
तावत्स्यादशुचिर्विप्रो यावत्पूर्वं न गच्छति[७]॥इति।

---

१. वासिष्ठधर्मशास्त्रे-४।२४-२६, गौतमप्रणीतधर्मसूत्रे च-२।५।५-७।

२. शङ्खलिखितवचनम्, पराशरस्मृतिव्याख्यायां माधवकृतायाम्, १९७४ तमे क्रैस्ताब्दे कालीघट्टनगरे मुद्रितायाम्, प्रथमे भागे, पृ. ६२४।

३. बौधायनधर्मसूत्रे-१।११।१५-१६।

४. विष्णुस्मृतौ (विष्णुधर्मसूत्रे)-२२।३५-३८।

५. स्मृत्यन्तरवचनम्, याज्ञवल्क्यस्मृतिव्याख्यायां बालक्रीडायाम्-३।१९-२०।

६. मनुस्मृतौ ५।७९, गरुडपुराणे च-२।३९।१२।

७. पराशरस्मृतौ-३।३०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(ज) सपिण्डानां सपिण्डस्तु मृतेऽन्यस्मिन् मृतो यदि ।
पूर्वाशौचसमाख्यातैः कार्यास्त्वत्र दिनैः क्रियाः[१] ।।इति।

(झ) आद्यं भागद्वयं यावत् सूतकस्य तु सूतकम् ।
द्वितीयं पतति त्वाद्यात् सूतकाच्छुद्धिरिष्यते ।।
अत ऊर्ध्वं द्वितीयात्तु सूतकान्ताच्छुचिः स्मृतः ।
एवमेव विचार्य स्यान्मृतके मृतकान्तरम्[२] ।।इति।

(ञ) समानं खल्वशौचं तु प्रथमेन समापयेत् ।
असमानं द्वितीयेन धर्मराजवचो यथा[३] ।।इति।

(ट) स्वल्पाशौचस्य मध्ये तु दीर्घाशौचं भवेद् यदि ।
न पूर्वेण विशुद्धिः स्यात् स्वकालेनैव शुध्यति[४] ।।इति।

(ठ) यदि स्यात् सूतके सूतिर्मरणे वा मृतिर्भवेत् ।
शेषेणैव भवेच्छुद्धिरहश्शेषे त्रिरात्रकम्[५] ।।इति।

(ड) सूतके मृतकं चेत् स्यान्मृतके त्वथ सूतकम् ।
तत्राऽधिकृत्य मृतकं शौचं कुर्यान्न सूतकम्[६] ।।इति।

(ढ) शावाशौचे समुत्पन्ने सूतकं तु यदा भवेत् ।
शावेन शुध्यते सूतिर्न सूतिः शावशोधिनी[७] ।।इति।

(ण) मातर्यग्रे प्रमीतायामशुद्धौ म्रियते पिता ।
पितुः शेषेण शुद्धिः स्यान्मातुः कार्या तु पक्षिणी[८] ।।इति।

---

१. मार्कण्डेयपुराणे जीवानन्दसंस्करणे-३५।४७।
२. ब्रह्मपुराणवचनम्, निर्णयसिन्धौ, निर्णयसागरमुद्रिते पञ्चमे संस्करणे, पृ. ३८१।
३. शङ्खस्मृतौ, आनन्दाश्रममुद्रिते स्मृतीनां समुच्चये समाविष्टायाम्-१५।१०।
४. उशनसो वचनम्, याज्ञवल्क्यस्मृतिव्याख्यायां मिताक्षरायाम्-३।२०।
५. कूर्मपुराणे काशिराजन्याससंस्करणे-२।२३।२२।
६. अङ्गिरसो वचनम्, याज्ञवल्क्यस्मृतिव्याख्यायां मिताक्षरायाम्-३।२०।
७. षट्त्रिंशन्मतवचनम्, तत्रैव।
८. स्मृत्यन्तरवचनम्, मिताक्षरायाम् (३।२०), शङ्खस्मृतिवचनम्, अपरार्कव्याख्यायाम् (३।२०), हारलतायाम् (पृ. ६५), पराशरस्मृतिव्याख्यायां माधवकृतायाम् (३।२८-२९, पृ. ६२५), निर्णयसिन्धौ च (पृ. ३८१)। द्रष्टव्यं च वैष्णववसिष्ठस्मृतिवचनम् ६।४४३, दाल्भ्यस्मृतिवचनं च, श्लो. १२६ स्मृतिसन्दर्भे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(त) सपिण्डानां तु यः कश्चिद् वहेताऽथ दहेत वा ।
तस्याऽऽशौचं दशाहं तु नाऽन्याशौचेन शुध्यति[१] ।।इति।

(थ) पूर्वाशौचेन या शुद्धिः सूतके मृतके च सा ।
सूतिकामग्निदं हित्वा प्रेतस्य च सुतानपि[२] ।।इति।

(द) अन्तर्दशाहे जननात् पश्चाच्चेन्मरणं यदि ।
प्रेतमुद्दिश्य कर्तव्यं पिण्डदानं स्वबन्धुभिः ।।
प्रारब्धे प्रेतपिण्डे तु मध्ये चेज्जननं भवेत् ।
तथैवाऽऽशौचपिण्डाँस्तु शेषान् दद्याद् यथाविधि[३] ।। इति च।

उक्तेषु वचनेषु सत्सु याज्ञवल्क्यस्मृतेः शाखान्तरग्रन्थमूलकतया सम्भाविते "अन्तरा जन्ममरणे शेषाहोभिर्विशुध्यति"[४] इति वचने च सत्यपि पारस्करगृह्यसूत्रमेव सर्वथाऽवलम्ब्य सन्निपतितस्य द्वितीयस्याऽऽशौचस्याऽपि स्वाभाविकरूपेण समाप्तावेव शुद्धिः स्वीकर्तव्या प्रतीयते; पूर्वाशौचस्य कियति कालेऽवशिष्टे सन्निपतितं द्वितीयमाशौचं पूर्वाशौचगमन एव गच्छतीति विषये ग्रन्थान्तरेष्वपि विभिन्नानां मतानां दर्शनात् तेषां सापवादत्वस्य स्वीक्रियमाणत्वाच्च पारस्करमते स्वकालेनाऽनतीतं द्वितीयाशौचं प्रथमाशौचेन नैव गच्छतीति सिद्धान्तस्याऽपि स्वीकर्तुं शक्यत्वस्य सम्भावितत्वात्। एवञ्च माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशाखाध्यायिभिः पारस्करानुयायिभिर्द्विजोत्तमैराशौचसम्पात-विषयेऽपि स्वशाखागृह्यसूत्राद् योऽर्थोऽवगम्यते स एवाऽनुष्ठेयोऽवसीयते।

पारस्करोक्ताया आशौचव्यवस्थायाः सदाचारिजनविषयत्वम्

पारस्करोक्ताऽऽशौचव्यवस्था सदाचारिणां बन्धूनां कृतेऽस्तीति ग्रन्थस्वारस्यादेवाऽवगम्यते। एतच्च क्वचित् स्मृतौ पुराणेषु च स्फुटीकृतमपि दृश्यते। तथा हि—

(क) सतामेव हि बन्धूनां कर्म कुर्यात् प्रयत्नतः ।
भ्रष्टानामपि तुच्छानां पतितानां विकर्मिणाम् ।।

---

१. शातातपवचनम्, षडशीतिव्याख्यायां शुद्धिचन्द्रिकायाम्, श्लो. २२, पृ. ३०।
२. षडशीतौ, श्लो. २२।
३. शातातपवचनम्, याज्ञवल्क्यस्मृतिव्याख्यायां मिताक्षरायाम्-३।२०।
४. याज्ञवल्क्यस्मृतौ-३।२०; द्र. गरुडपुराणे-१।१०६।१५।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न कुर्वीत क्रियां यत्नादपि स्नानं समाचरेत् ।
असतां पतितानां च भस्मान्तं सूतकं स्मृतम्[१] ।।इति।

(ख) नैष्ठिकानां वनस्थानां यतीनां ब्रह्मचारिणाम् ।
नाऽऽशौचं कीर्त्यते सद्भिः पतिते च तथा मृते[२] ।।इति।

(ग) पतितानां तु यद् दत्तं श्राद्धं चाथ जलाञ्जलिः ।
न तत् प्रेतः समाप्नोति गगने प्रविलीयते[३] ।।इति।

(घ) अशुद्धेन तु यद् दत्तमुद्दिश्याऽशुद्धमेव च ।
नोपतिष्ठति तत् सर्वमन्तरिक्षे विनश्यति[४] ।।इति।

(ङ) महापातकिनो ये च तेभ्योऽपि च महत्तरः ।
पापकृन्नास्तिको लोके तस्मात्तं परिवर्जयेत्[५] ।।इति च।

महागुरुमरणाशौचनिरूपणम्

महागुरूणां मातापित्राचार्यपतीनां मरणे कियत्कालमाशौचं भवतीति विषये शाखान्तरगृह्यसूत्र-पितृमेधसूत्र-लघुस्मृतिपुराणेषु विशेषेणोक्तमपि दृश्यते। तथा हि-

(क) द्वादशरात्रं वा महागुरुषु दानाध्ययने वर्जयेरन्, दशाहं सपिण्डेषु, गुरौ सपिण्डे, अप्रत्तासु च स्त्रीषु; त्रिरात्रमितरेष्वाचार्येषु, ज्ञातौ चाऽसपिण्डे, प्रत्तासु च स्त्रीषु, अदन्तजाते, अपरिजाते च; एकाहं सब्रह्मचारिणि, समानग्रामीये च श्रोत्रिये[६]। इति।

(ख) मातरि पितर्याचार्य इति त्रिरात्रमक्षारलवणभोजनमधःशयनं ब्रह्मचर्यम्, त्र्यहं षडहं द्वादशाहं संवत्सरं वा यावद्ग्रहणं द्वादशाहावरार्ध्यं परमगुरुषु, एवमघोदकम्, इतरेषु त्रिरात्रम्, यावज्जीवं प्रेतपत्नी[७]। इति।

---

१. आङ्गिरसस्मृतौ, श्लो. १३७-१३९, स्मृतिसन्दर्भे पञ्चमे भागे, पृ. २९६३।
२. कूर्मपुराणे, काशिराजन्याससंस्करणे-२।२३।७१।
३. विष्णुधर्मोत्तरपुराणे, नागप्रकाशकेन पुनर्मुद्रिते-२।७६।१८-१९।
४. गरुडपुराणे, नागप्रकाशकेन पुनर्मुद्रिते-२।४।१५।
५. विष्णुधर्मोत्तरपुराणे, नागप्रकाशकेन पुनर्मुद्रिते-२।५१।११।
६. आश्वलायनगृह्यसूत्रे, १९८० तमे क्रैस्ताब्दे अड्यारपुस्तकालयेन मुद्रापिते-४।३।१५-२५।
७. बौधायनपितृमेधसूत्रे १९८२ तमे क्रैस्ताब्दे देहल्यां पुनर्मुद्रिते बौधायनगृह्यसूत्रे संलग्ने १।१२।१०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(ग) मातरि पितर्याचार्य इति द्वादशाहाः, तेषु चोदकोपस्पर्शनं तावन्तं कालम्[1]। इति च।

पारस्करगृह्यसूत्रे तूदककर्मप्रकरणे महागुरुमरणाशौचविषये तादृशं किमपि विशिष्टं प्रतिपादनं नोपलभ्यते। ततश्च पारस्करमते महागुरूणामाशौचमप्यन्येषां सपिण्डानामाशौचेन तुल्यमेव स्यादित्यापाततः प्रतीयते, कर्कोपाध्यायादिभिरपि एतस्मिन् विषये तत्र विचारः कृतो नोपलभ्यते तथापि अनध्यायप्रकरणे स्थिताद् "गुरौ प्रेतेऽपोऽभ्यवेयात्, दशरात्रं चोपरमेत्"[2] इति पारस्करवचनस्य दर्शनात्, तत्राऽऽचार्यशब्दस्योपाध्यायशब्दस्य च प्रयोगमकृत्वा गुरुशब्दस्य प्रयुक्तत्वात्, तत्र विशिष्टस्याऽभिप्रायस्य निहितताया अवगम्यमानत्वेन तत्र गुरुशब्देन न केवलमाचार्यस्योपाध्यायस्य वा ग्रहणं कार्यमपि तु पितुः, मातुः, पत्युश्च ग्रहणं कार्यमित्यवसीयते। तत्राऽनध्यायप्रकरणेऽपि "अपोऽभ्यवेयात्" इत्युदककर्मणोऽपि सूचितत्वाच्च पारस्करसम्प्रदायेऽपि पितुर्मातुः पत्युश्च मरणे गुणिनाम-गुणानां च सर्वेषां द्विजोत्तमानां दशरात्रमेवाऽऽशौचमित्यवगम्यते। यद्यप्येष विषय उदककर्मकण्डिकायामेव प्रतिपादयितुमुचितस्तथाप्येतस्य विषयस्य प्रसङ्गप्राप्तत्वादनध्यायप्रकरण एव प्रतिपादितत्वादेतस्य विषयस्य उदककर्मकण्डिकायां पुनरुक्तिर्न कृतेत्यवगम्यते। अथवा उदककर्मकण्डिकायां विहिताऽतिक्रान्ताशौचव्यवस्था महागुरुविषयेऽवस्थाविशेषे न प्रवर्तत इति प्रतिपादनायापि तथा कृतं स्यादिति सम्भाव्यते। दृश्यते हि क्वचिद् और्ध्वदेहिककर्मणः कर्तुरन्यस्याऽभावेन तस्याऽकृतत्वे पित्रादीनामाशौचे स्वल्पेन प्रभूतेन वाऽपि कालेनाऽतिक्रान्तेऽपि और्ध्वदेहिकक्रियायाः कर्तृणां पुत्रादीनां कृते पित्रादीनामाशौचं दशरात्रमेव भवतीति स्पष्टं वचनम्। तथा हि—

निर्दशे गुरुपाते च कृते चैवौर्ध्वदेहिके।
ऊर्ध्वं त्रिरात्रमाशौचं दशाहमकृतक्रिये[3] ।।इति।

वस्तुतस्तु "पितरौ चेन्मृतौ स्यातां दूरस्थोऽपि हि पुत्रकः। श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भवेत्"[4] इति पैठीनसिवचनमपि

---

१. आपस्तम्बधर्मसूत्रे १९६९ तमे क्रैस्ताब्दे वाराणस्यां मुद्रिते-१।३।२।४-५।

२. पारस्करगृह्यसूत्रे-२।११।७।

३. दाल्भ्यस्मृतौ, श्लो. १४२, स्मृतिसन्दर्भे मनसुखरायमोरप्रकाशिते, पञ्चमे भागे, पृ. २९४६।

४. याज्ञवल्क्यस्मृतिव्याख्यायां मिताक्षरायाम्-३।२१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अकृतक्रियगुरुपातविषयमेवाऽवगम्यते। "महागुरुनिपाते तु आर्द्रवस्त्रोपवासिना। अतीतेऽब्देऽपि कर्तव्यं प्रेतकार्यं यथाविधि"[१] इति दक्षवचनमपि उक्तविधेऽर्थ एवाऽनुकूलं प्रतीयते। अत एव एतस्मिन् विषये "ऊर्ध्वं संवत्सरादाद्याद् बन्धुश्चेच्छ्रूयते मृतः। भवेदेकाहमेवाऽत्र तच्च सन्न्यासिनां न तु।" इति देवलोक्तेः पित्रोरब्दमध्ये त्रिरात्रमूर्ध्वमेकाहः, बन्धुर्माता पिता भर्ता च, पूर्वोक्तदशाहस्तु कलिङ्गादिदेशपरः" इति शुद्धितत्त्वकारादयो गौडा वदन्तीत्यादिको निर्णयसिन्धौ[२] वीरमित्रोदये[३] च स्थित उल्लेखोऽपि परिशीलनीय एव दृश्यते। एतादृशमेव कञ्चन विशेषं सूचयितुमपि महागुरूणामाशौचं पारस्करगृह्यसूत्रे उदककर्मप्रकरणेऽ-प्रतिपाद्याऽनध्यायप्रकरणे प्रतिपादितं स्यादिति प्रतीयते। अत एवाऽयं विषयो गम्भीररूपेण विचारणीयोऽस्ति।

मनु-याज्ञवल्क्य-पराशरस्मृतिषु चैतस्य विषयस्य विशेषतः प्रतिपादनं कृतं नोपलभ्यते। गुरुकुले स्थितस्य ब्रह्मचारिणः कृते अध्यापनं कुर्वत आचार्यस्य मरणे दशरात्रमाशौचं भवति, समावृत्तस्य शिष्यस्य कृते तदानीम् अध्यापनमकुर्वत आचार्यस्य मरणे त्वाशौचमन्येषां सपिण्डानां यादृशमाशौचं तादृशमेव भवतीति प्रतिपादयितुमाचार्यस्य मरणे त्वाशौचमुदककर्मकण्डिकायां पुनः प्रतिपादित-मवगम्यते। क्षत्रिय-वैश्य-शूद्राणां कृते तु पितुः, मातुः, पत्युश्च मुख्यमाशौचमन्येषां सपिण्डानामाशौचेन तुल्यमेव भवतीति च पारस्करगृह्यसूत्रादेवाऽवगम्यते। ब्राह्मणानां कृते महागुरुमरणाशौचविषये पारस्करगृह्यसूत्रे प्रतिपादिताया व्यवस्थाया विवेचनात्मकस्य प्रतिपादनस्याऽकरणं कर्कोपाध्यायादीनां पारस्करगृह्यसूत्रस्य व्याख्यातृणामेतस्मिन् विषये विवेकस्य शैथिल्यमेव प्रकटयति। अनुस्मृति-पुराणादिवचनानामेवाऽनुगमनं कृत्वा व्याख्यातव्यपारस्करगृह्यसूत्रस्थसम्बद्धप्रकरणानां गम्भीरमनुशीलनमकृत्वैव पारस्करगृह्यसूत्रोदककर्मकण्डिकाया व्याख्याने प्रवृत्तत्वात् पारस्करोक्तमहागुरुमरणाशौचव्यवस्थाया विवेचने तेषामेतच्छैथिल्यं जातमवगम्यते।

पारस्करगृह्यसूत्रे आशौचिभिः पालनीयानां नियमानां पिण्डदानादीनां च प्रतिपादकेषु सूत्रेषु बहुवचनान्तानां क्रियापदानां प्रयोगे दृश्यमानेऽपि ब्राह्मणे[४] श्रौतसूत्रे[५] च और्ध्वदेहिककर्मणि मुख्यः कर्ता पुत्रो वा भ्राता वाऽन्यो वा कोऽपि

---

१. याज्ञवल्क्यस्मृतिव्याख्यायां मिताक्षरायाम्-३।२१।

२. निर्णयसिन्धौ, निर्णयसागरमुद्रिते, पञ्चमे संस्करणे, पृ. ३७८।

३. वीरमित्रोदये, शुद्धिप्रकाशे, वाराणस्यां मुद्रिते, पृ.४९-५०।

४. माध्यन्दिनीय-वाजसनेयि-शतपथब्राह्मणे-१२।५।२।१५।

५. कात्यायनश्रौतसूत्रे-२५।७।३८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्राह्मणो भवतीति प्रतिपादितत्वान्माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-शाखाध्यायिनामौर्ध्वदेहिककर्मणः कर्ता एक एव भवति, अन्ये तु सहायका एव भवन्ति, पिण्डदानादिकमन्ये नैव कुर्वन्ति, स्नानकाले यावदाशौचं प्रेतायोदकस्य दानं तु कुर्वन्तीति चाऽवगन्तव्यम्। एवं चाऽऽशौचिनियमा अपि कर्त्रैव विशेषतः पालनीया इत्यपि बोध्यम्। एते च विशेषतः परिपाल्या आशौचिनियमाः कर्त्राऽपि दशरात्रमेव पालनीया इति प्रकरणपर्यालोचनादेवाऽवगम्यते। एकादशे तु दिवसे तेषां दानाध्ययनादिवर्जननियमानां निवृत्तिर्भवति। एतस्मिन् विषयेऽधोलिखितानि वचनानि च स्मरणीयानि—

(क) श्राद्धे प्रागेव कुर्वीत् वैश्वदेवं तु साग्निकः ।
एकादशाहिकं मुक्त्वा तत्र ह्यन्ते विधीयते[1] ।। इति।

(ख) सम्प्राप्ते पार्वणश्राद्धे एकोद्दिष्टे तथैव च ।
अग्रतो वैश्वदेवः स्यात् पश्चादेकादशेऽहनि[2] ।। इति।

(ग) एकादशाहे पुत्रादेः कर्तुरपि पञ्चमहायज्ञाद्यधिकारः, सपिण्डानां दर्श-वार्षिकश्राद्धेष्वधिकारः,नान्दीश्राद्धमात्रं चतुःपुरुषसपिण्डैः सपिण्डी-करणात् प्राग् न कार्यम्[3] । इति।

(घ) एतद् गृहपतौ प्रेते कुर्यादेकादशेऽहनि ।
प्रागेवैकादशश्राद्धाद् वृद्धिश्राद्धविवर्जितम्।।
एवं ज्येष्ठः समादध्यात् कनीयांश्च विवर्जयेत् ।
एकादशेऽह्नि कुर्वन्ति द्वादशे वा विचक्षणाः[4] ।। इति।

---

१. लघुयज्ञपार्श्वपरिशिष्टे, हस्तलिखिते, श्लो. २७, शालङ्कायनवचनम्, चतुर्वर्गचिन्तामणौ परिशेषखण्डे कालनिर्णये, पृ. ६१०, पारस्करगृह्यसूत्रगदाधरभाष्ये (२।९।१६), पदार्थक्रमे वैश्वदेवनिर्णये, भाष्यपञ्चकयुते संस्करणे, पृ. २६८, संस्कारगणपतौ, पृ. ८५७, निर्णयसिन्धौ, च पृ. ३२६।

२. परिशिष्टवचनम्, चतुर्वर्गचिन्तामणौ परिशेषखण्डे कालनिर्णये, पृ. ६०९, पारस्कर-गृह्यसूत्रगदाधरभाष्ये, २।९।१६, पृ. २६९, संस्कारगणपतौ, पृ. ८५७, निर्णयसिन्धौ च, पृ. ३२६।

३. धर्मसिन्धौ एकादशाहकृत्यनिरूपणप्रकरणे, १९०४ तमे क्रैस्ताब्दे निर्णयसागरमुद्रायन्त्रालये मुद्रिते द्वितीयावृत्तिके, पृ. ३५०।

४ रेणुदीक्षितकृतायां कातीयगृह्यकारिकायाम्, आधानकालनिरूपणे, श्लो. १७-१८, पृ. २६१; गदाधरभाष्ये भाष्यपञ्चकयुतपुस्तके, पृ. २३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(ङ) दशाहात्तु परं सम्यग् विप्रोऽधीयीत धर्मवित् ।
दानं च विधिना देयमशुभान्तकरं शुभम्[१] ।। इति।

(च) सन्ध्यापञ्चमहायज्ञान् नैत्यकं स्मृतिकर्म च ।
तन्मध्ये हापयेत्तेषां दशाहान्ते पुनः क्रिया[२] ।। इति।

(छ) उभयत्र दशाहानि कुलस्यान्नं न भुज्यते ।
दानं प्रतिग्रहो होमः स्वाध्यायश्च निवर्तते[३] ।। इति।

(ज) दशाहं ब्राह्मणस्तिष्ठेद् दानहोमविवर्जितः ।
क्षत्रियो द्वादशाहं च वैश्यो मासार्धमेव च ।।
शूद्रश्च मासमासीत नित्यकर्मविवर्जितः ।
ततः परं निजं कर्म कुर्युः सर्वे यथोचितम्[४] ।। इति।

(झ) दश-द्वादश-मासार्ध-मास-संख्यैर्दिनैर्गतैः ।
स्वाः स्वाः काले क्रियाः कुर्युः सर्वे वर्णा यथाविधि।।
इति[५] च।

एवञ्च शाखान्तरे महागुरुमरणाशौचेऽन्यथा व्यवस्थायां सत्यामपि पारस्करगृह्यसूत्रे दशरात्रमेव मुख्यमाशौचमिति व्यवस्थाया अवगम्यमानत्वात्, तदनुकूलानामन्येषां स्मृतिपुराणवचनानां च दृश्यमानत्वात्, माध्यन्दिनीय-वाजसनेयिशुक्लयजुर्वेदशाखाध्यायिभिः पारस्करविहितैव व्यवस्थाऽनुसरणीयेति बोद्धव्यम्।

पारस्करोक्ता महागुरुमरणाशौचव्यवस्थाऽपि सदाचारवन्महागुरुमरणविषयेति ग्रन्थस्वारस्यादेवाऽगम्यते। तथापि महागुरौ भ्रष्टे पतिते "वैतानं प्रक्षिपेदप्सु आवसथ्यं चतुष्पथे। पात्राणि तु दहेदग्नौ यजमाने वृथामृते[६]" इत्यादिकानां वचनानां

---

१. संवर्तस्मृतौ, श्लो. ४५, वीरमित्रोदये शुद्धिप्रकाशे वाराणस्यां मुद्रिते, पृ. ८८।
२. जाबालिवचनम्, वीरमित्रोदये शुद्धिप्रकाशे वाराणस्यां मुद्रिते, पृ. ४४,८३।
३. यमवचनम्,वीरमित्रोदये शुद्धिप्रकाशे, पृ. ८६।
४. ब्रह्मपुराणे, नागप्रकाशकेन पुनर्मुद्रिते ११३।१४७-१४९, मार्कण्डेयपुराणे जीवानन्दसंस्करणे च ३५।४०-४१।
५. ब्रह्मपुराणे ११३।१५८, मार्कण्डेयपुराणे ३५।५०, वामनपुराणे, नागप्रकाशकेन पुनर्मुद्रिते च १४।१०२।
६. याज्ञवल्क्यस्मृतिव्याख्यायां मिताक्षरायाम्-३।६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषये चाऽपि कथञ्चित् प्रायश्चित्तपूर्वकं तस्य दहने और्ध्वदेहिककर्मणि च कृतेऽपि सपिण्डीकरणं तु न कार्यमिति व्यवस्था "अभिशस्तपतितभ्रूणघ्नान् स्त्रीं च व्यभिचारिणीं नाऽतिदिशेत्"[1] इति बैजवापोक्ता दृश्यते। पतितादीनामभिशस्तानां पित्रादीनां सुब्रह्मण्याह्वानेऽपि नामग्रहणस्याऽकार्यत्वं केचिद् वैदिका वदन्ति, तथापि केचित्तु पतितस्यापि पितुः पतिताया अपि मातुश्च प्रायश्चित्तपूर्वकं दहनादिकं सपिण्डीकरणं च कार्यमिति वदन्ति। मार्कण्डेयस्मृतौ तु दुराचारस्य पतितस्य पितुर्मरणे पुत्रस्याप्याशौचमपि न भवतीति स्फुटतया प्रतिपादितं दृश्यते। तथा हि—

पुत्रस्य जननात् पश्चात् पिता दुर्बुद्धितो यदि ।
चाण्डालो यवनो भिल्लो जायते स्वयमेव वा ।।
परपीडादिना वाऽपि बलाद् वा कामकारतः ।
पूर्वजातस्तत्तनयो निर्दुष्टः सच्चरित्रकः ।।
तेन सद्भिर्वोपनीतो न सङ्कीर्णश्च कैरपि ।
कृतनित्यक्रियः सम्यक् कृताध्ययनसत्क्रियः ।।
ततः परं मृतस्तातस्तादृशो यवनात्मकः ।
मृतौ तस्यास्य पुत्रस्य नाऽऽशौचं नोदकक्रिया[2] ।। इति।

एतस्यैवार्थस्य सामान्यतया समर्थकं पुराणवचनं च दृश्यते। तथा हि—

पतितानां न दाहः स्यान्नाऽन्त्येष्टिर्नाऽस्थिसञ्चयः ।
न चाऽश्रुपातपिण्डौ वा कार्यं श्राद्धादिकं क्वचित्[3] ।। इति।

पातित्यनिरूपकाणि वसिष्ठबौधायनापस्तम्बगौतमधर्मसूत्रमनुयाज्ञवल्क्य-पराशरादिस्मृत्यग्निपुराणादिपुराणवचनानि च विविधानि सन्त्येव, तथाप्यधोलिखितं वचनमपि विचार्यम्—

---

१. कृत्यकल्पतरौ चतुर्थे भागे श्राद्धकाण्डे, सपिण्डीकरणनिरूपणे, पृ. २५५।
२. मार्कण्डेयस्मृतौ, स्मृतिसन्दर्भे मनसुखरायमोरप्रकाशिते, षष्ठे भागे, पृ. १५६।
३. कूर्मपुराणे, काशिराजन्याससंस्करणे २।२३।७२, द्र.-निर्णयसिन्धौ स्थितं ब्रह्मपुराणवचनं च, पृ. ३८८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पातित्यं नाम तेषां तु पित्रादीनां प्रवच्म्यहम् ।
शूद्रैर्म्लेच्छैश्च चण्डालैः सम्प्रीत्या सह भोजनम्[1] ।। इति।

एवञ्च पारस्करगृह्यसूत्रविहिताशौचनिरूपणं यथामति कृतम् ।

एतस्य निबन्धस्य वैदिकशास्त्रीयपरम्पराप्राप्तवैधवेदाध्ययनादिव्यवस्थाभिज्ञैः स्वाध्यायभक्तैः श्रुति-स्मृति-पुराण-विशेषज्ञैर्धर्मकामैः शास्त्रधर्मरक्षणपराऽऽचरणैर्विद्वद्भिर्द्विजोत्तमैः सम्यगाकलनं कार्यम्। अत्र किमपि प्रामादिकं प्रतिपादनं वस्तुतोऽस्ति चेत् परया कृपया तदपि प्रमार्जनीयमिति शम् ।

१. लौगाक्षिस्मृतौ, स्मृतिसन्दर्भे, मनसुखरायमोरप्रकाशिते, षष्ठे भागे, पृ. ३८९।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न धातुलोप आर्धधातुके

पण्डितश्रीमनुदेवभट्टाचार्यः
उपाचार्यः, व्याकरणविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणसी

नानादिग्गतशुभ्रकीर्तिपटलीगोपाङ्गनालङ्कृतं
विश्वस्मिन् सुमनोमनोज्ञहृदयाम्भोजव्रजैकार्चितम् ।
आम्नायादिसमस्तशास्त्रविगलत्पीयूषयूषास्पदं
गोपीनाथमहो महोविलसितं वन्दामहेऽहर्निशम् ।।

अथेह 'न धातुलोप आर्धधातुके'[1] इति सूत्रमनुसृत्य किञ्चिदकिञ्चित्कर-मुपाचरामः। सूत्रमदो धात्वंशलोपनिमित्तकार्धधातुकपरकेग्लक्षणगुणवृद्धिप्रतिषेधक-मिति सिद्धान्तः।

तत्र किं सार्वत्रिकोऽयं निषेधो न वेति सङ्ख्या सङ्ख्यावतां पुरस्ता-दुपाचर्यते। तथा हि प्रसङ्गेऽमुष्मिन्नाचार्यः कात्यायनो व्याजहार—'यङ्-यक्-क्य-वलोपे प्रतिषेधः' इति।

एवञ्चोक्तपरिगणनान्नायं निषेधः सार्वत्रिक इति, तथा ह्युक्तविचरणानुसारं 'न धातुलोप आर्धधातुके' इत्यत्र 'न-यङ्-यक्-क्य-वलोप आर्धधातुके' इत्येव सूत्र्यताम्। ततश्च यङ्लोपे यक्लोपे क्यलोपे (औपदेशिकाकारान्त) वलोप एव सूत्रप्रवृत्तिः; एवञ्च 'धात्वंशभूतानां यङ्-यक्-क्य-व इत्येतेषां लोपस्य निमित्तभूत आर्धधातुके परे सति इग्लक्षणगुणवृद्धी नो भवतः' इत्यर्थः पर्यवसितः। यथाक्रममुदाहरणानि—

(क) यङ्लोपे—१. बेभिदिता, २. मरीमृजकः।

(ख) यक्लोपे—१. कुषुभिता, २. मगधकः।

(ग) क्यलोपे—१. समिधिता, २. दृषदकः।

(घ) वलोपे—जीरदानुः इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विवरणं यथा—

(क-१) 'बेभिदिता' इति। अत्र भिदिर्-विदारणे (रु.उ.अ.) अस्माद् 'धातोरेकाचो हलादेः क्रियासमभिहारे यङ्' इति यङि द्वित्वेऽभ्यासादिकार्ये 'बेभिद्य' इत्यस्मात् सनाद्यन्तत्वाद् धातुत्वात् कर्तरि तृचि इटि च 'बेभिद् य् इ तृ' इत्यत्र 'यस्य हलः' इति यलोपे सति 'बेभिद् तृ' अत्र लघूपधगुणस्य प्राप्तिरस्ति।

एवमेव—

(क-२) 'मरीमृजः' इति। अत्रापि यङन्ताद् 'मरीमृज्य' इति धातोः पचाद्यचि, 'मरीमृज्य अ' इत्यत्र 'यङोऽचि च' इति यङो लोपे, 'मरीमृज् अ' इत्यत्रापि लघूपधगुणप्राप्तिरस्ति। अग्रेऽपि—

(ख-१) 'कुषुभिता' इति। अत्र 'कुषुभ-क्षेपे' इति कण्ड्वादिधातुः, ततो यकि 'कुषुभ्य' इत्यस्मात् तृचि, इटि 'कुषुभ् य् इ तृ' इत्यत्र तृच्रूपमार्धधातुकं परनिमित्तमाश्रित्य 'यस्य हलः' इति यलोपे सति लघूपधगुणप्राप्तिरस्ति। एवमेव—

(ख-२) 'मगधकः' इति। अत्र उक्तगणीयो 'मगध-परिवेष्टने' इति धातुः। ततो यकि ण्वुलि, 'मगध् य अक' अत्रापि अकरूपमार्धधातुकं निमित्तीकृत्य धात्वंशभूतयकारसङ्घातलोपे सति 'मगध्' इत्यत्र 'अत उपधायाः' इति वृद्धिप्राप्तिरस्ति। इतोऽग्रे—

(ग-१) समिधिता इति। अत्र 'समिध्' इति शब्दः, तत्र 'आत्मनः समिधमिच्छति' इत्यर्थे 'सुप आत्मनः क्यच्' इति क्यचि, 'समिध्य' इत्यस्माद् धातुत्वात् तृचि इटि, 'समिध् य इ तृ', अत्र आर्धधातुके इटि परे क्यचो यकारलोपे सति, 'समिध् इ तृ' इति दशायां लघूपधगुणप्राप्तिश्चकास्ति। तथैव—

(ग-२) 'दृषदकः' इति। अत्र आत्मनो दृषदमिच्छतीत्यर्थे उक्तसूत्रेण क्यचि 'दृषद्य' इत्यस्माद् धातुत्वाद् ण्वुलि, तन्निमित्तके 'यस्य हलः' इति यकारसङ्घातलोपे 'दृषद् अक' इति दशायाम् 'अत उपधायाः' इति वृद्धिप्राप्तिः स्पष्टैव।

एवमेव—

(घ) 'जीरदानुः' इति। अत्र 'जीव-प्राणधारणे' औपदेशिकाकारान्तो धातुः, परिगणने औपदेशिकाकारान्तो वकारो गृहीतः। स च 'जीव' इत्युपदेशरूप इति बोध्यम्। अत्र 'जीवे रदानुः' इति प्रत्याहाराह्निकस्थहयवरट्[२] सूत्रकथितभाष्यदिशा रदानौ प्रत्यये 'जीव् रदानु' इति दशायाम्, लोपो व्योर्वलीति सूत्रेण धात्वंशस्य 'व' इत्यस्य लोपे सति 'जी रदानु' इति दशायां 'सार्वधातुकार्धधातुकयोः' इत्यनेन इगन्ताङ्गस्य 'जी' इत्यस्य गुणप्राप्तिः स्फुटैवेति बोध्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्र सर्वत्र धात्वंशलोपनिमित्तकार्धधातुकपरकता जागर्त्येव, ततश्च 'न धातुलोप आर्धधातुके' इत्यस्य उद्देश्यताऽवच्छेदकताक्रान्त्या यथाप्राप्तं गुणो वृद्धिर्वा न भवतीति प्रसिद्धं सिद्धमेवेति विदाङ्कुर्वन्तु विद्वांसः। अनार्धधातुके 'तोतार्ति'[3] इत्यादौ तूद्देश्यतावच्छेदकानाक्रान्तत्वादस्य सूत्रस्याप्रवृत्त्या न गुणनिषेध इति त्वन्यत्।

अत्राग्रे चिन्त्यन्तेरूपं यत् परिगणनेन को लाभः? तत्रोच्यते—यङ्यक्क्यवलोप एव आर्धधातुके परे गुणवृद्धी न भवतः, अन्यत्र तु गुणवृद्धी भवत एव। क्वान्यत्र? इत्यनुयोगे आचार्यकात्यायन उपाचचार—

'नुम्लोपे स्त्रिव्यनुबन्धलोपेऽप्रतिषेधार्थम्'।

अत्रेत्थमन्वयो बुधेलिमः—'नुम्लोपे स्त्रिव्यनुबन्धलोपे गुणवृद्ध्योः अप्रतिषेधार्थं परिगणनं कर्तव्यम्, 'यङ्यक्क्यवलोपे प्रतिषेधः'। एवञ्च—'सर्वं वाक्यं सावधारणं भवति, यथा अब्भक्षो वायुभक्ष[4] इति, अप एव भक्षयति, वायुमेव भक्षयति, एवमिहापि सिद्ध एव न साध्य इति' इति पस्पशाह्निकस्य भाष्योक्तोक्तिदिशा 'धात्वंशभूतयङ्यक्क्यवलोपनिमित्तकार्धधातुकपरकगुणवृद्धी एवानेन निषिध्येते इति, नान्यत्र' 'तोतोर्ति' इत्यादौ। भाष्येऽपि उदाहरणरूपेण नुमादयो गृहीताः। यथा —

'नुम्लोपे स्त्रिव्यनुबन्धलोपेऽप्रतिषेधार्थम्' इति। अत्र वार्तिके धात्वंशलोपनिमित्तकार्धधातुकपरकगुणवृद्धिनिषेधकानि त्रीणि स्थलानि निर्दिष्टानि, तानि यथा—

१. नुम्लोपे, २. स्त्रिवि, ३. अनुबन्धलोपे इति च। तत्र—

१. नुम्लोपे इति। 'नुम्'शब्दोऽत्र[5] नकारवचनः। तथा च नुम्लोपे = नकारलोपे इति।

२. स्त्रिवि इति। [6]स्त्रिवु-गतिशोषणयोः (दि.प.से.) इति धातावित्यर्थः। परिगणने 'यङ्यक्क्यवलोपे प्रतिषेधः' इत्यत्र 'वलोप'शब्देऽकारो विवक्षितः, तेन उपदेशेऽकारविशिष्टो धातुर्गृह्यते, यथा जीव-प्राणधारणे इति।

३. अनुबन्धलोपे इति च। एवञ्च नकारलोपे सति, स्त्रिव्धातौ वकारलोपे सति, अनुबन्धलोपे च सति गुणवृद्धी भवतः। एषु सत्स्वेव गुणवृद्धी भवतः, यङ्यक्क्यवलोपेषु सत्सु तु गुणवृद्धी न भवत इति विवेक इति बोध्यम्। यथाक्रममुदाहरणानि यथा—

(क) नलोपे—

अभाजि, रागः, उपबर्हणम्। तत्र 'अभाजि' इत्यत्र 'भञ्जो आमर्दने' इति (रु.प.से.) धातुः। अत्र औपदेशिक एव नकारः —

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'नकारजावनुस्वारपञ्चमौ झलि धातुषु ।
सकारजश्च शकारश्चेर्षाट्टवर्गस्तवर्गजः ।।

इति वचनात्। एवं 'रागः' इत्यत्रापीति। एवञ्चात्र नुमोऽभावाद् नकारसञ्ज्ञा-भूतनुम्शब्दो गृह्यतेतमामिति। अस्माद् धातोः कर्मणि लकारे लुङि 'भञ्जेश्च चिणि' इति वा नलोपे रूपम्। चिणं निमित्तीकृत्य नलोपोपधावृद्धी सिद्धे। 'रागः' इत्यत्र तु रञ्ज इत्यस्माद् घञि, 'घञि च भावकरणयोः' इति वलोपः। अत्रापि घञमेव निमित्तीकृत्य नलोपोपधावृद्धी अभूताम्। 'उपबर्हणम्' इत्यत्र तु उपोपसृष्टबृंहतेर्ल्युटि ततो 'बृहेरच्यनिटि' इति नकारलोपः। अत्रापि नलोप-लघूपधगुणौ ल्युण्निमित्तकावेवेति दिक्। इत्थं नुम्लोपे = नकारलोपे त्रीण्युदाहरणानि।

स्रिवे उदाहरणं यथा—

(ख) 'अस्रेमाणम्' इति। 'अत्र स्रिवुँ-गतिशोषणयोः' (दि.प.से.) इति धातुः। अत्र उँकारोऽनुनासिक एव युक्तः, इत्संज्ञकत्वात्। ततो 'धातोर्मनिन् क्वनिब्वनिपश्च' इति मनिनि, अनुबन्धलोपे 'स्रिव् मन्', अत्रापि मत्परकौ लोपेगङ्गगुणौ सिद्धौ। 'स्रेमन्' इत्यत्र 'नञ्' इति समासे णत्वादिषु जातेषु अस्रेमाणम् (गमनशीलः शोषणशीलो वा) इत्यभवत्।

(ग) अनुबन्धलोपे यथा—लूञ्—लविता, लवितुम्। अत्रानुबन्धस्य लोपे सत्यपि तृनि तृचि वा इगन्तस्याङ्गस्य गुणोऽभूत्।

तदेवम्—'न धातुलोप आर्धधातुके' इति सूत्रस्य स्थाने 'न यङ्-यक्-क्य-वलोप आर्धधातुके' इत्येव यदि सूत्र्यते, तर्हि प्रवृत्तिनिवृत्ती इत्थं भविष्यतः, तथा हि—

'न यङ्यक्क्यवलोप आर्धधातुके'।

प्रवृत्तिः (गुणवृद्ध्योर्निषेधः)	निवृत्तिः (गुणवृद्ध्योरप्रतिषेधः)
(क) मरीमृजकः, बेभिदिता (यङ्लोपे)	(क) अभाजि, रागः, उपबर्हणम् (नलोपे)
(ख) मगधकः, कुषुभिता (यक्लोपे)	(ख) अस्रेमाणम् (स्रिवि)
(ग) दृषदकः, समिधिता (क्यलोपे)	(ग) लविता, लवितुम् (अनुबन्धलोपे)
(घ) जीरदानुः (वलोपे)	

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूत्रेणानेन चतुर्षु स्थलेषु गुणवृद्धी निषिध्येते, अपरत्र त्रिषु स्थानेषु गुणवृद्धी विधीयेते इति अव्याप्त्यतिव्याप्तिनिरासः।

अत्र किञ्चित्—ननु चतुर्ष्वेव (यङ्लोपे यक्लोपे क्यलोपे वलोपे एव) स्थलेषु धात्वंशलोपनिमित्तकार्धधातुकपरकेको गुणवृद्ध्योर्निषेधादव्याप्तिः प्रसरीसरीति। तथा हि—

(क) स्यदः, (ख) प्रश्रयः, (ग) हिमश्रय इति।

अत्र हि—'स्यन्दूँ' प्रस्रवणे (भ्वा.आ.से.) इति धातुः, अस्माद् घञि, ततः 'स्यदो जवे' इत्यनेन नकारलोपे सत्यत्र घञो ञिन्निमित्तिका वृद्धिः प्राप्नोति। इदानीं 'धातुलोपे' इत्यत्र 'यङ्यक्क्यवलोपे' इति परिगणनात् 'सर्वं वाक्यं सावधारणं भवति' इति न्यायस्य जागरूकत्वाद् यङ्यक्क्यवलोप एव=यङ्लोप-यक्लोप-क्यलोप-वलोप-निमित्तक एवार्धधातुके परे गुणवद्ध्योर्निषेधात्, 'स्यदः' इत्यादौ उपर्युक्तचतुष्टयबहिर्भूतनिमित्तकार्धधातुके परे उपधावृद्धेरवसरात्। पूर्वं तु 'न धातुलोप आर्धधातुके' इति सूत्रे 'धात्वंशलोपनिमित्ते आर्धधातुके इको गुणवृद्धी न भवत इत्यर्थे सति, प्रकृते 'स्यदः' इत्यत्र 'स्यन्द' इत्यत्र च धात्वंशस्य नकारमात्रस्य लोपस्य निमित्ते घञि आर्धधातुके परे सत्त्वाद् वृद्धिर्निषिध्यते, नेदानीं तथेति दोषः[९]।

एवमेव—प्रोपसृष्टस्य[१०] हिमोपपदस्य श्रन्थधातोर्घञि तन्निमित्तकौ नकारलोपोपधावृद्धी भवतः, इदानीं परिगणनान्न स्यातामिति।

तत्रोच्यते—'स्यदो जवे', 'अवोदैध्मप्रश्रथहिमश्रथाः' इति निपातनाद् उभयं निर्भयं सिद्धमिति। तस्माद् 'यङ्यक्क्यवलोपे प्रतिषेधः' इति परिगणनं कर्तव्यमेव, येन धात्वंशत्वावच्छेदेन नहि, अपि तु धात्वंशसामानाधिकरण्येन एव गुणवृद्धिनिषेधः स्यात्, एवञ्च परिगणनं क्रियताम्, 'न यङ्-यक्-क्य-वलोप आर्धधातुके' इत्थं वा सूत्र्यतामिति। एवञ्च सति परिगणने, इष्टसङ्ग्रहः, अनिष्टनिरासः, निपातनेन च अतिव्याप्तिहार इति सकलेष्टसिद्धिरिति हेतोः परिगणनं कर्तव्यमेवेति। अत्रोच्यते—

'नास्ति परिगणनप्रयोजनम्'। न च एवं सति धात्वंशलोपनिमित्तकार्धधातुकपरकेको गुणवृद्ध्योः सार्वत्रिको निषेध आपतेत्। तथा च—नुम्लोपे (नकारलोपे) स्रिवुँ-गतिशोषणयोः (दि.प.से.) धातौ, अनुबन्धलोपे च यथाप्राप्तं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वृद्धेर्गुणस्य वा निषेधनिराकरणं कथन्तरां स्यादिति चेत्? शृणु, अमुष्मिन् सूत्रे पूर्वस्मात् सूत्रात् 'इको गुणवृद्धी' (१।१।३) इति सूत्राद् 'इकः' इति पदमनुवर्तते, एवञ्च—'धात्वंशलोपनिमित्ते आर्धधातुके परे सति इको गुणवृद्धी न भवतः' इत्यर्थः पर्यवसित इति बोध्यतांरूपम्। एवञ्चात्र वस्तुद्वयमवधेलिमम्—

१. इग्लक्षणगुणवृद्धिनिषेधः, २. आर्धधातुकनिमित्तको धात्वंशलोपः।

१. अभाजि, रागः—अत्र वृद्धिः इग्लक्षणा नास्ति। (यत्र इक्शब्देन गुणो वृद्धिर्वा विधीयेत, तत्र इग्लक्षणौ गुणवृद्धी भवतः)।

२. उपबर्हणम्, अस्नेमाणम्, लविता, पविता—एषु तु 'बृहेरच्यनिटि', 'लोपो व्योर्वलि' इत्याभ्यां सूत्राभ्यां नकारो वश्च लुप्येते, न तौ आर्धधातुकनिमित्तकौ। इत्थमेव लूञ् छेदने, पूञ् पवने इत्यत्रापीति। तस्मात्परिगणनं निष्प्रयोजनम्।

'स्यदः', 'प्रश्रथः', 'हिमश्रथः' इत्येषु इग्लक्षणगुणवृद्ध्यभावेऽपि निपानात् साधुत्वं सेत्स्यतीति सिद्धं वचः।

इदन्तु अवशिष्यते—'जीरदानुः' इति, अत्र जीव-प्राणधारणे (दि.आ.से.) धातो रदानौ प्रत्यये लोपो व्योर्वलीति वलोपस्य आर्धधातुकनिमित्तकत्वाभावात् (वल्प्रत्याहारमात्रनिमित्तकत्त्वात्)। एवञ्च—'अस्नेमाणम्' इत्यादाविव प्रत्यया-श्रयत्वाभावेन धात्वंशलोपनिमित्तकार्धधातुकपरकत्वाभावेन 'न धातुलोप आर्धधातुके' इति सूत्राप्रवृत्त्या गुणनिषेधप्रसङ्गाद् 'जेरदानुः' इत्थमनिष्टरूपप्रसक्तिः समापतेदिति चेत्? अत्र समाधिः, प्रकृतिप्रत्ययकल्पनाजालमालानां काल्पनिकत्वेन शास्त्रमात्रविषयत्वेन प्रक्रियान्तरेणापि[११] व्युत्पादयितुं शक्यतया दोषानवसरात्, तथात्वे च—जीवधातो रदानुक्प्रत्ययमकल्पयित्वा 'ज्या वयोहानौ' इत्यस्माद् रकि प्रत्यये सति उक्तरूपसिद्धेः। ज्याधातौ रकि प्रत्ययेऽनुबन्धलोपे, 'ग्रहिज्या....' इति सम्प्रसारणे 'सम्प्रसारणाच्च' इति पूर्वरूपे 'जिर' इति स्थिते 'हलश्च' इति दीर्घे 'जीरो दानुर्यस्यासौ' इति बहुव्रीहौ सति पूर्वपदप्रकृतिस्वरे 'जीरऽदानुः' अवग्रहे सति रेफाद् अकारः 'प्रत्यया आद्युदात्ताः' (३।१।४) उदात्ते सति इष्टसिद्धेः। सर्वैः पदपाठकारैस्तथैव स्वीकारात्। पूर्ववद् रदानुप्रत्ययेऽपि, आद्युदात्तत्वे सिद्धेऽपि अवग्रहभङ्गप्रसङ्गात्। किञ्च जीव इत्यस्मादपि रकि सति लोपो व्योर्वलीति लोपे इष्टसिद्धिः, तथात्वे च 'जीरदानुः' इत्यत्र 'क्ङिति च' इति गुणानवसरात्।

यद्यपीत्थम् 'उपबर्हणम्' इत्यत्र ल्युड्रूपार्धधातुकं निमित्तीकृत्य 'बृहेरच्यनिटि' इति धात्वंशलोपे सति गुणनिषेधः प्राप्नोति, तथापि तत्र बृहि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धातुमस्वीकृत्य तदर्थकस्यैव बृहधातोरस्वीकारेणादोषात्। एवञ्च 'बृहेरच्यनिटि' इति वार्तिकमपि निष्प्रयोजनम्। 'आतश्च निबृह्यते' इति अनजादौ, 'निबर्हिता' इत्यादौ इडादावपि नकारादर्शनात्। किञ्च अजादौ 'बृंहयति' इत्यादावपि नलोपादर्शनात्। एवञ्च परिगणनमन्यथासिद्धम्।

'भेद्यते', 'छेद्यते' इत्यादौ तु धातोर्लोपो यस्मिन्, तस्मिन् 'धातुलोपे' इति बहुव्रीहिणा समाधानात्; तेन यत्र लोपो गुणवृद्धी चैकमेवार्धधातुकप्रत्ययं निमित्तीकृत्य प्रवर्तेताम्, तत्रैव गुणवृद्धिनिषेधः, नान्यत्रेति विवेकात्। 'भेद्यते' इत्यादौ तु णिलोपो यकम्, लघूपधगुणश्च णिचं निमित्तीकुरुतस्तरामिति।

[१२]'पापचकः', 'पापठकः', 'मगधकः', 'दृषदकः' इत्यादौ त्वकारलोपे कृते, तस्य स्थानिवत्त्वेन अकारसत्त्वेनोपधायां लघोरतोऽभावान्नास्ति वृद्धिप्रसङ्गः। स्थानिवद्भावश्चात्र 'अचः परस्मिन् पूर्वविधौ' इत्यनेन।

अत्र पुनस्तराङ्किञ्चित्—

न केवलं परिगणनमन्यथासिद्धम्, अपि तु 'न धातुलोप आर्धधातुके' इति कृत्स्नं सूत्रमेव न्यक्षेण अन्यथासिद्धमतो निष्प्रयोजनमतो न कार्यमिति सिद्धान्तसिद्धोऽवलक्षः पक्ष इति सत्सम्मतं मतमिति निर्विवादो वादोऽस्तीति बुधेलिमम्। न चैवं सति 'बेभिदिता', 'मरीमृजकः', 'मगधकः', 'कुषुभिता' इत्यादौ गुणवृद्ध्योरभावः? इति शङ्क्यम्।

यङो यकः क्यचो वा 'य' इत्यस्य 'अतो लोपः', 'यस्य हलः' इत्येताभ्यां निवृत्तौ, ततः परम् 'अचः परस्मिन् पूर्वविधौ'[१३] इति अकारस्य स्थानिवद्भावेन सत्त्वाद् उपधायां लघोरतश्चासत्त्वात् 'पुगन्तलघूपधस्य च'[१४], 'अत उपधायाः' इत्यस्य च प्रवृत्तौ गुणवृद्ध्योरप्रसङ्गात्।

न च उक्तस्थलेषु दोषाभावेऽपि यत्र हलचोरुभयोः स्थाने आदेशः, तत्र दोष आपतति, तथा हि—

१. अतिशयेन पुनः पुनर्वा लुनातीति लोलूयते, लोलूयत इति लोलुवः, एवम्— 'मरीमृजः' 'सरीसृपः' 'पोपुवः' इति, एषु लक्ष्येषु 'लोलूय, पोपूय, मरीमृज्य, सरीसृप्य' इति यङन्तेभ्यः पचादेराकृतिगणत्वादचि, ततः 'यङोऽचि च' इति 'य' इत्यस्य लोपः, स च लोपः 'य' इति हलच्समुदायस्थानिकः। एवञ्च— ईदृशस्थलेषु 'अचः परस्मिन् पूर्वविधौ' इत्यस्य न प्रवृत्तिः, लोपस्य अज्झलुभयस्थानिकत्वेन अचस्थानिकत्वाभावात् 'परनिमित्तोऽजादेशो न

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थानिवत्' स्थानिभूतादचः पूर्वत्वेन दृष्टस्य विधौ कर्तव्ये, इत्येतदर्थक-सूत्रीयोद्देश्यतावच्छेदकताऽनाक्रान्तत्वादिति चेत्? न, उक्तोत्तरत्वात्, अर्थाद् अत्रापि 'अतो लोपः' इति सूत्रेणाकारं लोपयित्वा, ततः 'यङोऽचि च' इत्यनेन यमात्रस्य लोपे सति पूर्ववदिष्टसिद्धेरिति। एवञ्चात्रापि अकारस्य 'अचः परस्मिन्......' इति स्थानिवद्भावान्न गुणवृद्ध्यवसरलवलेशोऽपि।

अत्रेयं विचारणा—

'लोलुवः', 'मरीमृजः' इत्यादौ यदि पूर्वमेव 'यङोऽचि च' इति लुकि कृते, 'अतो लोपः' इत्यस्य अवसराभावात्कस्य स्थानिवत्त्वं स्यात्? तस्मादत्रायं विवेकः —

'यङोऽचि च', 'अतो लोपः' इति सूत्राभ्यां विधीयमानयोर्लुगल्लोपयोः कर्तव्याकर्तव्ये विचार्ये, तत्र 'विप्रतिषेधे परं कार्यम्'[१५] इति सूत्रात् 'पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः' इति परिभाषणात् परत्वादत्र पूर्वम् 'अतो लोपः' इत्यनेन अतो लोप एव भविष्यति, ततः परं 'य्' इत्यस्य 'यङोऽचि च' इत्यनेन निवृत्तिरिति प्रक्रियाविदां समयो जागर्तिरूपम्।

न च 'कृताकृतप्रसङ्गि नित्यम्'[१६] इति परिभाषाया जागरूकत्वाद् अतो लोपे कृतेऽकृतेऽपि लुकः प्राप्त्या, तस्य नित्यत्वात् 'पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः' इति परिभाषया परशास्त्रापेक्षयाऽपि ('अतो लोपः' इत्यपेक्षयापि) कृताकृतप्रसङ्गित्वेन नित्यस्य ('यङोऽचि च' इत्यस्य) बलीयस्त्वे न पूर्वं लुक् स्यादिति चेत्? न, लुगप्यत्रानित्यः, कथम्? 'शब्दान्तरस्य[१७] प्राप्नुवन् विधिरनित्यः' इति परिभाषान्तरस्य जागरूकत्वेन, प्रकृते 'यङोऽचि च' इति लोपस्य य्-य इति शब्दान्तरस्य प्राप्तत्वाल्लुगप्यनित्यः।

न च 'निरवकाशो विधिरपवादः'[१८] इति परिभाषान्तरस्यापि जागरूकत्वेन, अपवादस्य च सर्वापेक्षया बलवत्त्वादिति चेत्? न, 'अतो लोपः' इत्येतत्प्रवृत्त्यनन्तरं 'यङोऽचि च' इत्यनेन 'य्' इत्यस्य लोपविधानात् सावकाशात्।

किञ्च—तुष्यतु दुर्जनन्यायेन लुकोऽनवकाशत्वेऽपि न दोषः, कथमिति चेच्छ्रूयताम्—'अतो लोपः', 'यस्य हलः' इत्यनयोस्सूत्रयोः स्थाने योगविभाग[१९] इष्टसिद्ध्यर्थ इति प्रामाणिकाभाणकभणितेर्जागरूकत्वात् त्रीणि सूत्राणि विधास्यन्ते, तथा हि—

१. अतो लोपः, २. यस्य, ३. लोपः, इत्येवं रूपाणि। अत्र च द्वितीयस्मिन् सूत्रे 'अतः' इत्यनुवर्तयिष्यते, ततश्च 'आर्धधातुके परे यकाराकारस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लोपः' इत्यर्थः। ततः 'हलः' इति, तस्य च 'हल उत्तरस्य यकारस्य लोपो भवति' इत्यर्थः, एवञ्च 'लोलुवः' इत्यादौ अकारस्य लोपं विधाय, तस्य स्थानिवत्त्वाद् गुणवृद्धी न भविष्यत इति।

'नोनाव'[२०] इत्यत्र तु न दोषः, समाननिमित्तकस्यैव लुको लोपेन बाधात्। 'नोनूय' इति प्रकृतेर्यङो लोपस्त्वनैमित्तिकः, एवञ्च समाननिमित्तकता नास्ति। 'निकुचितः'[२१] इति तु गुणो न, 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति परिभाषणादिति। तस्मात् सूत्रमिदं प्रत्याख्यातव्यमेवेति महाभाष्याशयः[२२]।

अत्रेदं बोध्यम्—यत्खलूक्तं प्राग् यद् 'धातुलोपे' इति बहुव्रीहिः, तत्र किञ्चित्—यत्र बहुव्रीहितत्पुरुषयोरर्थभेदः, तत्र तत्पुरुष एवेति पातञ्जलः समयः[२३]। कथमिति चेत्? लाघवाद्[२४] बहुव्रीहौ वर्तिपदार्थबहिर्भूतान्यपदार्थबोधरूपगौरवस्य जागरूकत्वात्। स्पष्टञ्चैतदधिभाष्यम्। अत एव—'स्वाहेन्द्रशत्रुर्वर्धस्व' इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितास्थमन्त्रे[२५] शत्रुशब्दं रूढमपहाय, क्रियाप्रवृत्तिनिमित्तकं गृहीतवान् कैयटभट्टाचार्यः, स्पष्टञ्च तत्रैव प्रदीपे[२६]। प्रकृते तु 'धातोर्लोपः' इति तत्पुरुषे स्वीकृते आर्धधातुके धातुलोपगुणवृद्ध्योरन्यतरस्यैव विशेषणं स्यात्, आवृत्त्या[२७] वा तत् सम्पादनीयम्, इष्यते तु 'आर्धधातुके' इति पदं सहैव धातुलोपगुणवृद्ध्योर्विशेषणं स्यादिति, स्पष्टञ्चैतदधिभाष्यम्[२७], अन्यथा 'भेद्यते' 'छेद्यते,' 'रोध्यते' 'शेष्यते' इत्यादौ दोषलवलेशः प्रसरीसरीति। भिदादिभ्यो ण्यन्तेभ्यः कर्मणि लकारे वर्तमाने लटि प्रथमपुरुषैकवचने सार्वधातुके यकि 'भिद् इय् त' इत्यत्र अनिडादावार्धधातुके यकि णिलोपे लघूपधगुणे टेरेत्वे 'भेद्यते' इत्यादीनि रूपाणि। न चात्र 'भिद् इ य त' इति दशायां णेरनिटीत्यतः प्रागेव[२८] लघूपधगुणे सति 'भुक्तवन्तं प्रति मा भुङ्क्थाः' इति न्यायेन 'न धातुलोप....' इति सूत्रस्य प्रवृत्तौ सत्यामपि[२९] वैफल्याप्रवृत्त्यनवसरान्न दोष इति वाच्यम्, 'निषेधाश्च बलीयांसः'[३०] इति न्यायाद्[३१] उपसञ्जनिष्यमाणनिमित्तकेनाप्यपवादेनोपसञ्जात-निमित्तकस्याप्युत्सर्गशास्त्रस्य बाधात्।

किञ्च निमित्तं विनाशोन्मुखं दृष्ट्वा तत्प्रयुक्तं कार्यं पूर्वमेव न कुर्वतीति[३२] वैयाकरण्या सरण्या अकृतव्यूहपरिभाषया[३३] 'न धातुलोप....' इति निषेधस्य पूर्वमेव प्रवृत्तेः, अपवादविषयाभावस्यापि निमित्तत्वात्।

अत्र यद्यपि 'दधति' इत्यत्रेव 'दधस्तथोश्च' (८।२।३८) इत्यस्या-चारितार्थ्यदोषो नास्ति, 'न धातुलोप....' इत्यस्य प्राबल्यात् (द्र. बृहच्छब्देन्दु.)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्र किञ्चित्—ननु 'धातुलोपे' इत्यत्र लाघवात्तत्पुरुष एवाश्रीयताम्, तथापि अचः परस्मिन्निति णिलोपस्य स्थानिवत्त्वेन 'भेद्यते' इत्यादौ दोषानवसरात्, अभावातिदेशेन निषेधाप्रवृत्तेः, 'काममतिदिश्यतां सच्चासच्चापि नेह भारोऽस्ति' इति नियमात्। न चैवं सर्वत्र सति 'न धातुलोप....' इत्यस्य वैयर्थ्यीति शङ्क्यम्, 'लोलुवः', 'पोपुवः' इत्यादौ तत्सार्थक्यादिति चेत्, न, धात्वंशलोपाभावप्रतियोगिनोऽशास्त्रीयत्वेन तदभावस्य तासि परे नित्यानिट्त्ववद् अतिदेशाभावाददोषात्। यन्निमित्तप्रयुक्ता प्राप्तिः, तन्निमित्तकवैकल्यातिदेशद्वारैव तत्कार्याभावस्याप्यनेनातिदेशात्। यथा—'यन्निमित्तवैकल्यप्रयुक्ता प्राप्तिः, तन्निमित्तातिदेशद्वारैव तत्कार्यस्याप्यतिदेशः' इति स्वीकारात्। 'अचः परस्मिन् पूर्वविधौ' इति विधिशब्दबलात् कार्यवद् निमित्तस्यापि शास्त्रीयस्यैव ग्रहणौचित्यात्।

अत्रादो ज्ञातव्यम्—'न धातुलोप.....' इति सूत्रेण गुणवृद्ध्योर्विध्योरिक्परिभाषाया वा निषेधकम्? नाद्यम्, तयोर्व्यवहितत्वात्। नान्त्यम्, इक्परिभाषाया गुणत्वाद् इति चेत्, अत्रोच्यते—

गुणवृद्ध्योः प्राधान्यादयं निषेधस्तयोरेव, न तु तद्गुणभावाद् इक्परिभाषाया अयं निषेधः। प्राधान्यञ्चात्र संस्कार्यरूपम्[३४]। अयं भावः—यथा मीमांसकमते तिङ्प्रत्ययोपात्तया भावनया (तन्मते भावनारूपव्यापारस्य तिङर्थत्वात्) आक्षिप्तस्यापि कर्तृपदार्थस्य देवदत्तादेः क्रियां प्रति गुणभावेऽपि प्राधान्यम्, यथा वा 'दध्ना जुहोति' इति वाक्ये तृतीयान्तपदोपात्तस्य दध्नो गुणं प्रत्यनुवादार्थं विध्युपस्थापकत्वेन होमस्य गुणभूतस्याप्यन्वयः, तथा प्रकृते तत्तत्परिभाषोपस्थित्यर्थं तत्तत्प्रदेशभूतस्थानिप्रदर्शनलिङ्गतया (परिभाषाणां स्ववृत्तिलिङ्गचिह्नितोपस्थितित्वनियमात्) गुणभूतयोरपि तदुपकार्यतया गुणवृद्ध्योः प्राधान्यम्। (स्पष्टञ्चैतद् नागेशभट्टाचार्यशिष्यकृतभाष्यप्रदीपोद्द्योतच्छायायाम्)। किञ्च—'इको गुणवृद्धी' इत्यत्र विशिष्टानुवृत्त्यैव निर्वाहे, पुनर्गुणवृद्धिग्रहणसामर्थ्याद् एतदप्रवृत्तेः। न चैवम् 'इकः' इत्येव सूत्र्यताम्, परिभाषात्वभङ्गः, (तथात्वे—अनुवृत्त्यर्थमेव 'इकः' इति स्यादित्यभिप्रायः) योगविभागसामर्थ्येन परिभाषात्वाक्षतेः (द्र. बृहच्छब्देन्दु.)। अत एव— उत्तरत्र 'क्ङिति च', 'दीधीवेवीटाम्' इत्यनयोः सम्बन्धः सुकरः, परिभाषानिषेधे सति तत्रैतदसम्बन्धात्।

एतत्सूत्रकृतगुणवृद्धिनिषेधोदाहरणन्तु—'लोलुवः', 'पोपुवः' इत्यूकारान्तधातुष्वेवेति। हलन्तेभ्यः पच्प्रभृतिभ्यः क्रियासमभिहारे यङि, 'पापच्य्' इत्यस्मात् सनाद्यन्तत्वेन[३५] धातुत्वात् पचाद्यचि 'पापच्य अ' इत्यत्र यङोऽचि चेति लोपे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'पापचः' इति रूपम्। तत्र गुणेऽकारस्य अकार एव, तन्निषेधस्य निष्प्रयोजनात्[३६]। निषेधप्रयोजनं त्वित्थम्—यङन्ताद् यङ्लुगन्ताच्च रूपभेदे सति बोध्यम्, तथा हि क्रियासमभिहारे—

(क) यङ्	(ख) यङ्लुक्
पापच्य	पापच्
पापचकः	पापाचकः

अतिशयेन पुनः पुनर्वा पाककर्ता इत्यर्थः। अयं भावः—

(क) यङन्तात् 'पापच्य' इत्यादौ ण्वुलि[३७] अकि, 'पापच्य अक'[३८] इति स्थिते 'अतो लोपः', 'यस्य लोपः' इत्येताभ्यां विहिताभ्यां लोपाभ्यां रूपसिद्धिः। अत्र अलोपस्य स्थानिवत्त्वान्न वृद्धिः, 'यस्य लोपः' इत्यत्र 'यस्य' इति सङ्घातग्रहणमनाश्रयणीयम्।

(ख) यङ्लुगन्तात् 'पापच्'[३९] इत्यस्माद् ण्वुलि 'पापच् अक' इत्यत्र यङो लोपस्य अनैमित्तिकत्वाद् धात्वंशलोपनिमित्तकार्धधातुकपरकत्वाभावाद् 'अतो लोपः' इत्यनेन अकारस्य पृथग्लोपाकरत्वेन अचः परस्मिन्निति स्थानिवत्त्वाप्रसङ्गाद् इग्लक्षणयोरेव गुणवृद्ध्योर्निषेधात् प्रकृते समस्तकारणाभावात् प्रकृतसूत्रीयोद्देश्यतावच्छेदकाऽनाक्रान्त्या अप्रवृत्त्या यथायथं गुणवृद्धी भवत एवेति 'पापाचकः' इत्येव, एवं 'बेभेदिता' इत्यपि वृद्धिगुणघटितरूपे एव साधुनी इति बोध्यमिति (द्र.बृहच्छब्देन्दु.)।

इदं विचार्यते—अतिशयेन पुनः पुनर्वा लुनातीत्यर्थे कर्तरि पचाद्यचि किं रूपम्। तत्र यङन्तात् 'लोलूय' इत्यस्मादचि 'लोलूय अ' इत्यत्र यङोऽचि चेति लोपे 'लोलू अ' इत्यत्रानेन गुणाभावे उवङि[४०] 'लोलुवः' इति रूपम्। एवम्—पोपुवः, बोभुवः, तोष्टुवः, इयङि सति नेनियः (अतिशयेन पुनः पुनर्वा नेता), अग्रेऽपि बेभियः (ञिभी भये), चेचियः (चिञ् चयने), जेजियः (जि जये) इत्यादीनि रूपाणीति मन्ये। अत्र 'लोलुवः', 'नेनियः' इत्यत्र उवङियङोः आदिष्टादचः पूर्वत्वेन दृष्टस्य लघूपधगुणे कर्तव्ये न स्थानिवत्त्वम्, 'अङ्गकार्ये[४१] कृते पुनर्नाङ्गकार्यम्' इति, [४२]'सञ्ज्ञापूर्वकविधेरनित्यत्वाद् इति वा नियमात्। एवञ्च—'लोलुवः', 'नेनियः' इत्यादौ उवङि इयङि वा कृतयोः अङ्गवृत्तपरिभाषया गुणस्य न पुनः प्रवृत्तिः।

किञ्च—अत्र यङो यस्य सङ्घातलोपमकृत्वा 'अतो लोपः' इति पृथगल्लोपे 'या'[४३] 'वा' इत्यादिभ्यो यङि ततः पचाद्यचि 'यायाय् य' 'वावाय् अ' इत्यत्र

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'अतो लोपः', 'यस्य', 'हलः' इति पूर्वोक्तरीत्या योगविभागदर्शनदशादिशा पृथगल्लोपे, ततो व्यञ्जनमात्रस्य लुकि अजादेशस्य 'अचः परस्मिन् पूर्वविधौ' इति स्थानिभूतादचः पूर्वत्वेन दृष्टस्याकारस्य 'आतो लोप इटि च' आतो लोपे करणीये परनिमित्तकस्य अजादेशस्य स्थानिवत्त्वेन आतो लोपेन न भूयताम् इति वाच्यम्, 'योग इष्टसिद्ध्यर्थः' इति परिभाषणाद् गुणवृद्ध्यन्तरप्राप्तियोग्यविषयतायां सत्यामेव, योऽच्प्रत्ययः, तस्मिन्नेव सति पृथगल्लोपस्वीकारात्। गुणवृद्ध्यन्यतरप्राप्त्यनर्हविषयतायां 'यस्य हलः' इत्यत्र यस्येति सङ्घातग्रहणमिति स्वीकृत्या समुदायलुगेवेति यत्किञ्चिदेतत्।

एवञ्च योगविभागादिष्टसिद्धिः।

गुणवृद्ध्यन्तरप्राप्तियोग्यविषयेऽच्प्रत्यये 'अतो लोपः'

गुणवृद्ध्यन्तरप्राप्त्यनर्हविषयेऽच्प्रत्यये समुदायस्य यस्येति सङ्घातस्य लोपः।

इति पृथगल्लोपः।

अत्रोभयथा रूपसाम्यमेव, अत एव, 'सनीस्रंसते', 'दनीध्वंसते' इत्येव रूपम्। 'मृजूष् शुद्धौ' इत्यस्य यङ्लुगन्तात् 'मरीमृज्' इत्यतः कर्तरि पचाद्यचि यङो लोपस्य निर्निमित्तकतया गुणनिषेधाप्रवृत्तौ 'मरीमर्जः' इति, एवम्—ण्वुलि वृद्धिनिषेधाप्रवृत्तौ 'मरीमर्जकः', 'नोनाव' इति; परन्तु—'मरीमृज्य' इति यङन्तात् पचाद्यचि यङोऽचि चेति यङो लोपे 'न धातुलोप....' इति गुणनिषेधप्रवृत्तौ 'मरीमृजः' इति, एवम्—ण्वुलि 'मरीमृजकः' इत्येव रूपमिति विवेकः। 'न धातुलोपः....' इति प्रत्याख्यानपक्षे तु, पृथगल्लोपं कृत्वा तस्य स्थानिवत्त्वेन गुणनिषेधः सिद्ध इति बोध्यम्।

'दरीदृश्यते' इत्यादौ, अत्र अङादेशस्य लाक्षणिकत्वेनाग्रहात्, अनर्थकत्वादपि तदग्रहात्, विकरणानां श्नादीनां तु द्योत्यार्थेनार्थवत्त्वाङ्गीकारादिति[४४]।

एवञ्च 'गम्लृ गतौ' इत्यस्माद् 'धातोरेकाच....' इति बाधित्वा 'नित्यं कौटिल्ये गतौ' इति यङि, द्वित्वाभ्यासलोपजश्त्वादिषु 'जङ्गम्य' इत्यस्मात् कर्तरि अचि, ण्वुलि वा, 'जङ्गम्य अक' 'जङ्गम्य अ' इति स्थिते, 'गमहनजनखनघसां लोपः क्ङित्यनङि' इत्युपधालोपे चिकीर्षिते, 'अनङि' इति पर्युदासाद् निषेधो न प्रवर्तते, यङ्त्वात्, अर्थवत्त्वाभावात्, लाक्षणिकत्वाच्च। तेन 'जङ्गमकः, जङ्गमः' इत्येव भवतः। एवमेव—'याति' इत्यत्र अल्लोपोऽपि सिद्ध एव। अपरत्र

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यङ्लुगन्तात् ण्वुलि 'जङ्गम् अक' इत्यत्र नानेन वृद्धिनिषेधः, अतो 'जङ्गामकः' इत्येव रूपम्, 'पापाचकः' इत्यादिवदिति पूर्वमुक्तम्।

अत्र बृहच्छब्देन्दुशेखरे उक्तम्—'यत्तु 'गमहन…' इत्यत्र 'कित्यनङि' इत्येव वाच्यम्, ङिति तु 'अनङि' इति निषेधाद् भविष्यति, एवं सिद्धे सति, ङिति इति मुख्यश्रूयमाणाजादिङित्प्रत्ययग्रहणार्थम्, एवञ्चात्र लोपो न।

'मरीमृजकः' इत्यत्र व्यवस्थितविभाषाश्रयणाद् वृद्धिविकल्पो नेति, तन्न, पर्युदासे 'अङ्भिन्ने विकरणे' इत्यर्थस्याप्यापत्तेः, किञ्च उत्तरत्र 'ङिति' इत्यस्यावश्यकत्वाद् वृद्ध्यभावकल्पने मानाभावाच्च।

'दरीदृशकः' इत्यत्र अङ्निमित्तगुणस्तु न, उक्तयुक्तेः। एतेन 'यस्य हलः' इति 'समुदायलोपः' इत्यपास्तम्, सङ्घातग्रहणपक्षे 'आदेः[४५] परवचनात् सिद्धम्' इति तत्सूत्रस्थभाष्यविरोधात्। 'यङ्-यक्-क्यप्-अलोपे प्रतिषेधः'[४६] इति 'न धातुलोप...' इति सूत्रस्थवार्तिके यक्-क्यपोर्ग्रहणन्तु प्रौढ्यैव।

यत्तु—'यस्य' इति लोपस्यावयवलोपत्वे, यङन्ताद् ण्वुलि 'जङ्गमकः' इत्यत्र अतो लोपः स्यादिति प्राचीनोक्तदूषणावसरे त्वयापि 'पापाचकः' इत्यत्रेव वृद्धेर्दुर्वारतया, [४७]कुशकाशावलम्बनेन वृद्धिनिवारणस्य लोपनिवारणेऽपि तौल्याद् इति मनोरमायामुक्तम्, तत् तद्रीत्यापि तदीयग्रन्थस्य तुष्यतु दर्जनन्यायेन अशुद्धत्वबोधनायेत्यलम्। अत एव—'यङोऽचि' इति लुग्विधायकं भाष्ये न प्रत्याख्यातम्। धात्विति किम्? लूञ्—लविता। तदभावे बहुव्रीह्यलाभेन 'लोपनिमित्ते' इत्यर्थालाभात्।

ननु 'आर्धधातुके' इति व्यर्थम्, बहुव्रीहिस्तु—तं विनापि 'एकाचो द्वे इतिवद् भविष्यति' इति चेत्? न, 'तोतोर्ति'-[४८]व्यावृत्त्यर्थत्वात्।

'क्ङिति च' इति सूत्रस्थभाष्यात्तु एषां यङ्लुगन्तानामभाव एव लभ्यते भाषायामिति[४९] बोध्यम्। यदि तु—'लोपयति' इति लोप इति विगृह्य 'लोपनिमित्ते' इति व्याख्यायते, तदा धातुग्रहणं स्पष्टार्थमिति।

यङ्लुगन्तादचि 'लोलुवः', 'पोपुवः' इत्याद्येवोदाहरणमिति मत्वा 'ऊचोऽचि' इति वार्तिकं तु न युक्तम्, 'नेनियः' इत्याद्यसिद्धेरिति दिङ्मात्रमत्र युक्तं बोध्यम्। अत्रत्यो निर्णयो बहुकालसाध्य इत्येतावतैव सन्तोष्टव्यम्, अत एव विरन्तव्यमिति मन्तव्यमिति मितं वचः, सर्वदा सर्वमवदातमिति शम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'न लोप आर्धधातुके' हि सूत्रमेतदस्ति यद्
वृद्धिरेषिकाऽपि[५०] गुणश्च तेन बाध्यते ध्रुवं हि।
न चास्ति तत्प्रयोजनं यङो यकश्च वाक्ययो-
रनेन लोप एष इष्यते विधेहि मन्यतां तम्[५१] ।।
वस्तुतश्चतुर्षु तेषु च स्थलेषु निश्चितं हि
स्थानिवत्त्वहेतुनैव नो गुणादिके भवेद्यतः ।
प्रश्नथ-स्यदादिकं निपातनेन सिद्ध्यति
स जीरदानुशब्द एष सम्प्रसारणाद् भवेत्[५२] ।।
स्थानिवत्त्वहेतुनैव लोलुवादि सिद्ध्यति
योगभागसंश्रयाल्लुकोऽवकाश एव नास्ति ।
भिन्नवर्णसंश्रयाल्लुगत्र लोपबाधितो
सन्निपातलक्षणान्न कश्चिदस्ति दोष एव[५३] ।।
पुत्रा येन तु पाठिता निजधिया सर्वेऽपि ते संस्कृतं
कन्याश्चापि समास्तथैव सततं तत्संस्कृतं पाठितम् ।
प्रौढध्यानवशादिहाविरकरोत् श्रीव्यासकूटं तथा
वीणापाणियुतं गुरुं पशुपतिं तातं नमामो मुहुः।।

टिप्पणयः-

१. सूत्रमिदमष्टाध्याय्यां वृद्धिपादे प्रथमविंश्यां चतुर्थम्। प्रत्यध्यायं प्रतिपादं प्रथमसूत्रीय-प्रथमपदेन तत्पादव्यवहारः साम्प्रदायिकः, यथा—वृद्धिपादः, भूपाद इत्यादि। प्रथमपदेन ग्रन्थव्यपदेशो यथा वेदेष्वपि—ईशोपनिषद्, केनोपनिषद् इत्यादि। प्रतिपादञ्च प्रतिविंशति 'विंशी' इत्यपि साम्प्रदायिकः समयः, प्रतिपादान्तं सूत्रसंख्यानिर्देशे प्रतिविंशि प्रथमसूत्रपदेन संख्यानिर्णयः, यथा प्रथमाध्यायप्रथमपादे—

'वृद्धिराद्यन्तवदव्ययीभावप्रत्ययस्य लुक् पञ्चदश' इति। अत्र वृद्धिरादैच्, आद्यन्तवदेकस्मिन्, अव्ययीभावश्च, प्रत्ययस्य लुक्श्लुलुप इति सूत्राणि यथाक्रमं प्रथमम्, एकविंशम्, एकचत्वारिंशम्, एकषष्टितमं च, तत्र २०+२०+२०=६० षष्टिः सूत्राणि, अवशिष्टानि पञ्चदशसूत्राणि, सम्मेल्य ६०+१५=७५ पञ्चसप्ततिः सूत्राण्यत्र। विंशतितो न्यूने सम्पूर्णसंख्योल्लेखः। एवञ्च प्रतिपादं सूत्रसंख्या विंशत्या विभज्य, भागशेषः स्पष्ट-मुल्लेख्य इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२. हयवरट् इति। तत्र हि 'हयवरट्' इति, 'हरयवट्' इति न्यस्यतामिति प्रश्ने रेफस्य पूर्वोपदेशे 'हरयवद्' इति सूत्रे सति वलि रेफासद्भावाद् 'जीरदानुः' इत्यत्र लोपो व्योर्वलीति न प्रवर्तेतेत्याशङ्क्य 'रेफो व्योर्वलि' इत्यत्र निर्दिष्टेन 'रेफे वलि च परे व्योर्लोपः' इत्यर्थेन समाहितमिति।

३. तोतोर्तीति। 'तुर्वी हिंसायाम्' इति धातोर्यङ्लुकि लटि प्रथमैकवचने इडभावे रूपम्। पाणिनिना 'प्रथम' इत्यादयः सञ्ज्ञा एव विहिताः, 'शेषे प्रथमः' इति सूत्रणात्। पुरुषपदघटितनिर्देशात्। प्राचीनाचार्यव्यवहारानुरोधेन प्रसिद्धिबाहुल्येन पर्यायोऽपि, यथा- 'सुप्तिङुपग्रहलिङ्गनराणाम्....' इत्यादौ। प्राचीनसंस्कृते क्वचित् प्रसिद्ध्यतिशयात् सञ्ज्ञाया अपि पर्यायो व्यवह्रियते स्म, यथा—कमलाक्षो हि पद्माक्षोऽपि व्यवह्रियते स्म, नितरां स्वल्प ईदृशः प्रयोगः, न तु सर्वथा तदभावः। अत्र च उपग्रहः=आत्मनेपदपरस्मैपदव्यवस्थेति।

४. वायुभक्ष इति। तथा च भाष्यम्—सन्त्येकपदान्यप्यवधारणानि। तद्यथा—अब्भक्षो वायुभक्ष इति। अप एव भक्षयति, वायुमेव भक्षयति। (द्र. पस्पशा. धर्मजनकताधिकरणम्)

५. नुम् इति नकारस्य प्राचीनाचार्यसञ्ज्ञा, प्रातिपदिकस्य 'नाम' इतिवत्। 'यथेष्टं नामधातुषु' इत्यत्रेवात्रापि व्यवहारः। प्राचीनसञ्ज्ञानां बहुत्र व्यवहारोऽस्ति पाणिनीये, यथा— 'आङो ना स्त्रियाम्', 'आज्जसेरसुक्', 'दश समानाः' इत्यादि।

६. स्रिवुँ इति। अत्र धातोरुदित्त्वात्सानुनासिकपाठ एवार्षः।

७. अस्रेमाणम्। वैदिकोऽयं प्रयोगः, तथा हि—

'अजीजनन्नमृतं मर्त्यासोऽस्रेमाणं तरणिं वीळुजम्भम्।

दश स्वसारो अग्रुवः समीचीः पुमांसं जातमभि संरभन्ते॥ इति।

मन्त्रोऽयमृग्वेदस्य तृतीयाष्टकस्य प्रथमाध्यायस्य चतुस्त्रिंशस्य वर्गस्य मण्डलक्रमे तु तृतीयमण्डलस्य द्वितीयानुवाकस्य ऊनत्रिंशस्य सूक्तस्य त्रयोदशः। वैश्वामित्रं दर्शनम्। तत्रत्यवेदार्थप्रकाशसङ्क्षेपः—मर्त्यासः, मर्त्या=ऋत्विजः। अमृतम्=मरणधर्मरहितमत एव अस्रेमाणम्=क्षयरहितं हविर्भक्षणार्थं दृढदन्तं तरणिम्=अग्निम्। अजीजनन्=मन्थनेन उदपीपदन्.....इति।

८. गुणवृद्धी इति। 'धर्मादिष्वनियमः' इति राजदन्ताद्यन्तर्गणसूत्रात्परनिपातः, पूर्वनिपातानित्यत्वं तु 'लक्षणहेत्वोः.....' इत्यनेन साध्यम्।

९. 'स्यदो जवे' इति। जवेऽभिधेये 'स्यदः' इति घञि निपात्यते। स्यन्देर्नलोपो वृद्ध्यभावश्च। इक्प्रकरणाद् न धातुलोप इति प्रतिषेधो नास्ति (द्र.का. ६।४।२८)। जवः = वेगः। गोस्यदः = गोर्गतिविषयको वेगः, अश्वस्यदः (द्र. पदमञ्जरी)। वेगः = गतिविशेष इति (द्र. न्यासः)। तत्र (न धातुलोपसूत्रे) 'इको गुणवृद्धी' इगिति प्रकृतमनुवर्तते, तेनेग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः। न चेग्लक्षणा वृद्धिः, किन्तूपधालक्षणा। न चेयमुपधालक्षणा वृद्धिरिग्लक्षणा भवति निर्दिष्टस्थानिकत्वात्। तेन नास्त्यत्र तस्याः (वृद्धेः) प्रतिषेधः। गोस्यद इति भावे घञ् (स्यन्दनं स्यद इति भावसाधनोऽयमित्यर्थः) गवां स्यन्दो गोस्यन्दः, 'कृद्योगा षष्ठी समस्यते' इति (द्र.न्यासः)। जव इति किम्? तैलस्यन्दः, घृतस्यन्दः। (द्र.का.) तैलस्य श्रपणम् (स्यन्दनम्) इत्यर्थः (द्र.न्यासः)। अत्र नलोपो न।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवम् 'अवोदैध्मप्रश्रथहिमश्रथा:' (६।४।२९) इत्यत्रापि निपातनाद् यथायथं बोध्यम्। अवोपसृष्टस्य 'ऊन्दी क्लेदने' इत्यत्र घञि नलोप:, इन्धी दीप्तौ इत्यस्य घञि नलोपगुणौ, 'उन्दी क्लेदने' इत्यस्य औणादिके कनि नलोपगुणौ प्र-हिमान्यतरोपसृष्टस्य 'श्रन्थ मोचनप्रतिहर्षणयो:' इत्यस्य घञि नलोपवृद्ध्यभावश्च निपात्यते।

औणादिको मन्तु 'अर्ति-स्तु-सु-हु-सृ-धृ-क्षि-क्षु-भा-या-वा-पदि-यक्षि-नीभ्यो मन्' इति बाहुलकाद् (उणादयो बहुलम्) उन्देरपि। अत्र किञ्चित्—इग्लक्षणयोरेव गुणवृद्ध्योर्निषेधाद् अत्र निपातनावश्यकता। अत्र पुनस्तरां किञ्चिद् गुह्यमूह्यम्—न्यासे 'अत उपधाया:' इति प्रतीको धृत:, स च प्रकाशितकाशिकायां नादर्शि, तदेवं क्वचित् क्वचिद् न्यासपदमञ्जर्यो: धृतप्रतीकानां मूलेऽदर्शनादन्यथादर्शनाद्वा वामनेन जयादित्येन पृथक् पृथक् काशिके निरमायिषातामिति युधिष्ठिरमीमांसकोक्तं सङ्गच्छत इति।

१०. प्रोपसृष्टस्येति। उपसृष्टस्य धातोरित्थमेव निर्देशो वैयाकरणाभिमत:, प्रपूर्वकस्य प्रोपपदस्य इति तथा न रोचत इति बहूनां समय:।

११. प्रक्रियान्तरेणापीति। अत एव 'बाधितम्' इति पदं बाधतेर्निष्ठायाम्, बाधाशब्दादितचि कृदन्तं तद्धितान्तं वा विगृह्यताम्, इष्टापत्तिरेव। 'स्वरविधौ व्यञ्जनमविद्यमानवत्' इति।

१२. पापचक: = अतिशयेन पुन: पुनर्वा पक्ता इत्यर्थ:। यङन्ताद् ण्वुलि रूपम्। एवं 'पापठक:' इत्यपि। यङ्लुगन्ते तु 'पापाचक:' इत्येव (द्र.बृहच्छब्देन्दु.)।

१३. 'अच: परस्मिन्' इति। परनिमित्तकोऽजादेश: स्थानिवत् स्यात् स्थानिभूतादच: पूर्वत्वेन दृष्टस्य विधौ कर्तव्ये (द्र.सि.कौ.अच्सन्धौ)। 'पापचक:' इत्यादौ 'पापच्य अक' इति दशायाम् 'अतो लोप:' इति यकाराकारस्य लोप:, स च परनिमित्तक:, सूत्रस्य 'आर्धधातुकोपदेशकाले यदाकारान्तं तस्याकारस्य लोप: स्यादार्धधातुके परे' एतदर्थकत्वात्, प्रकृते यङ् हि आर्धधातुकोपदेश:, अकारान्तश्च, तस्याकारस्य लोप आर्धधातुकेऽकि परे इति। एवञ्च तत: पूर्वत्वेन दृष्टस्य विधौ कर्तव्ये परनिमित्तकस्य लोपरूपाजादेशस्य स्थानिवत्वम्। न च 'पुन: प्रसङ्गविज्ञानात्' इति न्यायेन 'भिन्धि' इत्यत्रेव हिर्यथा, तथा 'तिसृणाम्' इत्यत्र परत्वात् 'त्रिचतुरो: स्त्रियां तिसृचतसृ' इत्यनेन तिसरि सति, पुनस्त्रयादेशापत्तिरिति चेत्तत्रोच्यते—'सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव इत्यदोषात्। यथाप्रयोगं तत्र तत्र चरितार्थयोर्द्वयो: कार्ययोरसम्भवाद् बाधकाभावात् पर्यायेण यथा—'ण्वुल्तृचौ' इति धातुमात्राद्विधानेन विनिगमकाभावात् सर्वधातुव्यक्त्युद्देश्येन द्वयोर्विधानात्, तयोर्युगपत् प्रवृत्तौ, अन्यतरस्य धातुव्यवहितत्वेन पर्यायेण यथा ण्वुलस्तृचश्च पृथक् पृथक् प्रवृत्ति:, एवं विप्रतिषेधस्थलेऽपि प्रसज्येत, तदानयेष्टप्रवृत्ति: साध्यते। द्वयो: शास्त्रयोर्यौगपद्यासम्भव एव विप्रतिषेधशास्त्रविषय:। क्वचिल्लक्ष्यानुसारमिष्टानुरोधेन स्वरितत्वप्रतिज्ञाबलात् 'स्वरितेनाधिकार:' (द्र. तत्त्वबोधिनी, बृहल्लघुशेखरौ च) इत्यनुसारं पूर्वमेव भवतीति पूर्वविप्रतिषेधा गतार्था इत्यप्युपायान्तरमिति।

१४. पुगन्तलघूपधस्य चेति। 'भिनत्ति' इत्यादौ 'भिनद् ति' इति दशायां लघूपधाङ्गस्य गुणनिषेधसिद्धये लघ्वी चासौ उपधा चेति लघूपधम्, तस्येति विग्रहे भाष्य उक्त:।

१५. विप्रतिषेधे परं कार्यमिति। पर:=इष्ट:। विप्रतिषेधो द्विधा—१. पूर्वविप्रतिषेध:, २. परविप्रतिषेध:। तत्र यत्र येन इष्टसिद्धि:, लक्ष्यानुरोधात् तेन कार्यं कार्यम्। एवञ्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विप्रतिषेधे=तुल्यबलविरोधे परम्=इष्टं कार्यम्, अत एव परशब्दस्य परदेशरूपमर्थमङ्गीकृत्य, तदपवादभूतानि पूर्वविप्रतिषेधकानि सर्वाणि वार्तिकानि भाष्ये प्रत्याख्यातानि, इष्टार्थस्वीकारस्यैवेष्टत्वात्। पूर्वदेशपरदेशरूपार्थसत्त्वादिति। (द्र.परिभाषेन्दौ)।

१६. कृताकृत इति। कृताकृतप्रसङ्गत्वेनैव परशास्त्रापेक्षया नित्यं बलवद् इति, तथा च 'परान्नित्यं बलवद्' इति। अत एव 'तुदति' इत्यादौ, परं गुणं प्रबाध्य नित्यः शप्प्रत्ययः पूर्वं भवतीति।

१७. शब्दान्तरस्येति। 'कृताकृतप्रसङ्गि नित्यम्, तद्विपरीतमनित्यम्' इति; उत्तरांशस्य विवरणमस्ति—'शब्दान्तरस्य' इति। कृते यस्यां व्यक्तौ प्रवृत्तिः, अकृतेऽपि तस्यामेव प्रवृत्तौ नित्यम्, अन्यथाऽनित्यमिति भावः। (द्र.महाभाष्यच्छायाटिप्पणी)।

१८. निरवकाश इति। अपवादपदार्थस्तु 'येन नाप्राप्ते यो विधिरारभ्यते, स तस्य बाधको भवति' इति। अत्र नाऽप्राप्ते=यत्कर्तृकावश्यकप्राप्तावित्यर्थः। यथा—'वृद्धिरेचि' इति। 'अदेङ् गुणः' इत्यस्यापवादः। 'सूत्रयो=स्थाने' अत्र 'खपरे शरि विसर्गलोपो वा वक्तव्यः' इति विसर्गलोपः, 'महिम्नस्तोत्रम्' इतिवत्। अत एव श्रीमद्भागवते—'नन्दः किमकरोद् ब्रह्मन् छ्रेय एव महोदयम्। यशोदा च महाभागा पपौ यस्यास्तनं हरिः'।। इत्यत्र यशोदापक्षेऽर्थः स्फुट एव, नन्दपक्षे तु यस्य=नन्दस्य आस्तनं हरिः पपौ=पालितवान् इत्यर्थः स्पष्ट एव। (द्र.बलदेवविद्याभूषणकृता व्याख्या) अन्यथा 'पपौ यस्यास्तनं हरिः' इत्यत्र नन्दपक्षेऽर्थो घटेत। उक्तवार्तिकेन विसर्गलोपे इष्टसिद्धिः।

१९. योगविभाग इति। योगविभाग इष्टसिद्ध्यर्थ इति। ननु कोऽर्थोऽस्याः? योगविभाग इष्टसिद्ध्यर्थ एवेति चेत्? शास्त्रमात्रमिष्टसिद्ध्यर्थमेव, व्यावर्त्यं न स्यादस्याः। 'योगविभाग एवेष्टसिद्ध्यर्थः' इति हास्यास्पदम्। तत्रोच्यते—योगविभागोऽधिकलक्ष्यसङ्ग्रहार्थ इत्यर्थ इति भाति। वस्तुतस्तु पाणिनिना वृद्धिरादैजदेङ्गुण इति संहितापाठः प्राणायि, तत इष्टसिद्ध्यर्थः खण्डपाठात्मको योगविभागः कृत इति ऐतिह्यं बोध्यम्। 'योगे योगे उपतिष्ठते' इत्यादौ तथाऽर्थदर्शनात्।

२०. नोनावेति। 'नू शब्दे' इत्यस्माद् यङ्लुगन्ताद् द्वित्वेऽभ्यासगुणे 'नोनूय' इत्यस्मात् कर्तरि लकारे परोक्षे लिटि तिपि णलि, 'यङोऽचि च' चकाराद् यङो लोपे 'नोनू अ' वृद्धौ, अवादेशे 'नोनाव' इति रूपम्, 'तोष्टाव' इत्यर्थः।

२१. निकुचित इति। 'कुञ्च क्रुञ्च कौटिल्याल्पभावयोः' (भ्वा.प.से.) इति धातुपाठः। द्विसप्ततिर्व्रज्यन्ताः परस्मैपदिनः, तन्मध्ये तार्तीयकोऽयम्। तदुक्तम्—कौटिल्याल्पीभावयोश्च कुञ्चक्रुञ्चौ प्रकीर्तितौ। (द्र.कृष्णशङ्करकृतधातुपाठकारिका) तत्र न्युपसृष्टस्य कुञ्चतेर्निष्ठायां रूपम्। 'नि कुञ्च इ त' इत्यत्र 'अनिदितां....' इति सूत्रेण नलोपे (नकारजावनुस्वारपञ्चमौ झलि धातुषु) 'नि+कुच्+इ+क्त' अत्र 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' परिभाषया नलोपे सति जातह्रस्वोपधः सन् 'उदुपधाद्....' इति कित्त्वं न नाशयिष्यतीति। अर्थात् क्तस्य कित्त्वविघातो न भविष्यति, ततश्च क्ङिति चेति गुणो न।

२२. भाष्याशय इति। 'अनारम्भो वा' इत्युक्त्या प्रयोजनोनि अन्यथासिद्धानीति हृदयम्। एतदर्थं सर्वत्र यदि यङोऽचि चेत्यपास्य 'अतो लोपः', 'यस्य हलः' इमे आश्रीयेते, तदा कुटिलङ्गच्छतीत्यर्थे 'जङ्गम्या अच्' इत्यत्र यङन्तस्य जङ्गम्यस्य अवयवस्य यङोऽकारलोपे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ततः स्थानिवत्त्वे 'गमहन....' इति उपधालोपः प्रसज्येत, तत्रोच्यते—स्थानिवत्त्वेन अङ्परकत्वाद् अनङीति निषेधान्नोपधालोप इति दिक्।

२३. पातञ्जलः समय इति। 'समयाः शपथाचारकालसिद्धान्तसंविदः' (द्र.नामलिङ्गा. ३।३।१४९) 'समयः शपथाचारसिद्धान्तेषु तथा धियि क्रियाकारे च निर्देशे सङ्केते कालभाषयोः' (द्र.मे. १२०।१११)।

(ख) बहुव्रीहितत्पुरुषयोरर्थभेदविषयके विचारे द्र. बृहद्वैयाकरणभूषणम्, अस्मत्सम्पादितम्, पृ. १९४ रूपाली टिप्पणीति।

अयञ्च वैदिकः प्रयोगः, सम्पूर्णमन्त्रो यथा—

आ तें सुपुर्णा अंमिनन्तुँ एवैः
कृष्णो नोंनाव वृषुभो यदीुदम्।
शिवाभिर्न स्मयमानाभिरागात्
पतन्ति मिहः स्तुनयन्त्युभ्रा॥ इति।

(द्र.१।१३।७९।२, अष्टकानुसारन्तु १।५।२७।२) तत्रत्यवेदार्थप्रकाशसंक्षेपो यथा—

'हे अग्ने! ते सुपर्णाः=शोभनपतनाः, रश्मयः, एवैः=गन्तृभिः=मरुद्भः सह अभिनतं= आ समन्ताद् मेघं हिंसन्ति=वर्षणार्थं ताडयन्ति, प्रहतश्च कृष्णः कृष्णवर्णो वृषभः=वर्षिता मेघः नोनाव=भृशं शब्दमकरोत्। वैद्युताग्निप्रेरितः पर्जन्य आगच्छति......नोनाव=नौनेर्यङ्लुगन्ताल्लिटि। 'कास्प्रत्ययादाममन्त्रे लिटि' (कासोऽनेकाचश्चाममन्त्रे लिटि) इत्युक्तानामत्र। अत्र अच्छन्दसीति नोक्तम्, ब्राह्मणे आम इष्टत्वात्। पुत्रमामन्त्रयामास, प्रत्ययान्तत्वादाम्, अथ ह शुनःशेप ईक्षाञ्चक्रे, 'इजादेश्च...' इत्यामिति।

२४. लांघवाद् इति। बहुव्रीहौ अन्यपदार्थकल्पनारूपं गौरवम्, तच्च 'संसर्गो विप्रयोगश्च....' इत्यादिभिर्निर्णेयम्। तत्पुरुषे तन्नापेक्ष्यत इत्येव लाघवमिति। अत्र किञ्चित्–वाक्यपदीये मूले—'संसर्गो विप्रयोगश्च...' इत्ययमेव पाठः, 'संयोगो विप्रयोगश्च....' इति पाठस्तु प्रामादिक इति।

२५. ....मन्त्र इति। तथा हि कृष्णयजुर्वेदीयतैत्तिरीयशाखायाम्—'त्वष्टा हतपुत्रो वीन्द्रः सोममाहरत् तस्मिन्निन्द्र उपहवमैच्छत् तं नोपाह्वयत पुत्रं मेऽवधीरिति स यज्ञवेशसं कृत्वा प्रासहा सोममपिबत् तस्य यदशिष्यत तत्त्वष्टाऽऽहवनीयमुपप्रावर्तयत् स्वाहेन्द्रशत्रुर्वर्धस्वेति स यावदूर्ध्वः पराविध्यति तावति स्वयमेव व्यरमत यदि वा तावत्प्रवणमासीद्यदि वा तावदध्यग्नेरासीत्स सम्भवन्नग्नीषोमावभि समभवत् स स इषुमात्रमिषुमात्रं विष्वङ्ङवर्धत स इमाँल्लोकानवृणोद्यद् इमाँल्लोकानवृणोत् तद् वृत्रस्य वृत्रत्वम्। तत्र 'इन्द्रस्य शमयिता शातयिता वा भव' इति क्रियाशब्दोऽत्र शत्रुशब्द आश्रितः, न तु रूढिशब्दः, तदाश्रयणे हि बहुव्रीहितत्पुरुषयोरर्थभेदः इति। अत्र किञ्चित्—ननु इन्द्रशत्रुशब्दस्य लौकिकत्वे स्वरप्रयुक्तयोर्गुणदोषयोः प्रसक्तिः, स्वरस्य वेदमात्रविषयत्वादिति चेत्? न, स्वरविधौ छन्दोऽधिकाराभावात्। एतावानेव भेदः—छन्दसि त्रैस्वर्यम् एकश्रुतिश्च व्यवस्थयाऽऽश्रीयते, लोके त्वैच्छिकः (द्र० शब्दकौस्तुभः)। प्रकृते तु—इन्द्राभिन्नत्वे सिद्धे सति, 'इन्द्रशत्रुर्भव'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्यत्रार्थे प्रतिपाद्ये, अन्तोदात्ते प्रयोक्तव्ये, आद्युदात्त ऋत्विजा प्रयुक्त इत्यर्थान्तराभिधादिन्द्र एव वृत्रस्य शातयिता (शत्रुः) सम्पन्नः। (द्र० प्रदी.) नात्र सम्बुद्धिप्रसक्तिः—

'सम्बोधनं न लोकेऽस्ति विधातव्येन वस्तुना।
यथेन्द्रशत्रुर्वर्धस्व यथा राजा भवेति च'।। (द्र० वाक्य० ३।१० पुरुषसमुद्देशे)

अतश्च—'सिद्धस्याभिमुखीभावमात्रं सम्बोधनं विदुः'।। इति। (वाक्य० ३, साधन० १६३)

अत्र किञ्चित्—यद्यत्र रूढ्या रिपुवाचकः शत्रुशब्द एवाश्रीयेत, तदा बहुव्रीहितत्पुरुषयोरर्थाभेदात् पूर्वपदप्रकृतिस्वरः (बहुव्रीहौ प्रकृत्या पूर्वपदम्) अन्तोदात्तो वा (समासस्य) भवतु दोषो नास्ति, भाष्यव्यवस्थया चात्र तत्पुरुषो भविष्यतीति, तदानीं क्रियावाचकं शत्रुशब्दकल्पनम्, ततः स्वरदोषात्समाधिप्रभृतिदोषकल्पनाजल्पनाजालजालेनालमिति स एव पक्षः कथमत्र नाश्रीयत इति। 'तस्मादिन्द्रोऽबिभेदपि त्वष्टा तस्मै त्वष्टा वज्रमसिञ्चत्तपो वै, स वज्र आसीत्तमुद्यन्तुं नाशक्नोदथ वै तर्हि विष्णुरन्या देवताऽऽसीत्सोऽब्रवीद्विष्णवे हीदमाहरिष्यामो येनायमिदमिति स विष्णुस्त्रेधात्मानं वि न्यधत्त पृथिव्यां तृतीयमन्तरिक्षे तृतीयं दिवि तृतीयमभिपर्यावर्ताद्ध्यबिभेद्यत् पृथिव्यां तृतीयमासीत्तेनेन्द्रो वज्रमुदयच्छद्विष्णवनुस्थितः सोऽब्रवीन्मा मे प्रहरेति वा इदं मयि वीर्यं तत्ते प्रदास्यामीति तदस्मै प्रायच्छत् तत्प्रत्यगृह्णादधामेति तद्विष्णवेऽति प्रायच्छत्........,। एषा त्रैधातवीयमिष्टेर्दैवतार्थमाख्यायिका। वैश्वदेवदर्शनम् (द्र०कृ०यजु० २।४।१२।१)। अन्यत्रापि यथा—

'त्वष्टा हतपुत्रो वीन्द्रं सोममाहरत्तस्मिन्निन्द्र उपहवमैच्छत्तं नोपाह्वयत पुत्रं मेऽवधीरिति....स यज्ञवेशसं कृत्वा प्रासहा सोममपिबत्तस्य यदत्यशिष्यत तत्त्वष्टाऽऽहवनीयमुपप्रावर्तयत..... 'स्वाहेन्द्रशत्रुर्वर्धस्वेति' यदवर्तयत् तद्वृत्रस्य वृत्रत्वं यदब्रवीत् स्वाहेन्द्रशत्रुर्वर्धस्वेति, तस्मादस्येन्द्रः शत्रुरभवत्......।' पूर्णिमायामग्नीषोमीयपुरोडाशविधिः। प्राजापत्यं दर्शनम्। (द्र.कृ.यजु. २।५।२।१)

२६. आवृत्त्या इति। यदि आचार्येण तन्त्रेण उभयार्थकः शब्दः प्रयुज्यते, तदानीं बोद्ध्रा आवृत्त्या अर्थौ बोद्धव्यौ। एवमेकशेषविषयेऽपि, तदुक्तम्—बोद्धुस्तु आवृत्त्या एव बोधः। (द्र० हलन्त्यं सूत्रे मनोरमा-बृहल्लघुशब्दरत्नम्)

२७. अधिभाष्यम् इति। 'धातुलोपः' इति नैवं विज्ञायते, धातोर्लोपो धातुलोपः, धातुलोपे इति। कथं तर्हि? धातोर्लोपो यस्मिंस्तदिदम्, धातुलोपे इति।

किञ्च—अत्र गमकत्वाज्ज्ञापकत्वाच्च व्यधिकरणपदो बहुव्रीहिः, तत्र च—श्रुतान्यपदार्थपरित्यागेन अश्रुतान्यपदार्थकल्पनायोगाद् 'आर्धधातुकम्' एव अन्यपदार्थत्वेनाश्रीयते, अत एव नपुंसकमुक्तम्। तथा च—'धातुलोपविशेष्यार्धधातुकविशेष्यता गुणवृद्ध्योरिति भावः (द्र० निर्णयसागरटिप्पणसमुद्धृतच्छाया)।

२८. प्रागेवेति। 'भेद्यते', 'छेद्यते', 'रोध्यते' इत्यादौ णेरनिटीति टिलोपात् पूर्वमेव लघूपधगुणे सतीष्टसिद्धिरित्यभिमानः; परन्तु 'उपसञ्जनिष्यमाणनिमित्तोऽप्यपवाद उपसञ्जातनिमित्तमप्युत्सर्गं बाधते' इति परिभाषया पूर्वं लघूपधगुणो न भविष्यतीत्याशयः, 'भिदि य ते' इत्यत्र 'सनाद्यन्ता....' इति 'भिदि' इत्यस्य धातुत्वाद् यग्रूपार्धधातुकपरकस्य णिलोपस्य सत्त्वात्। अतो बहुव्रीहिः स्वीकार्यः, तल्लाभस्तूक्त इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२९. वैफल्य इति। वैफल्याः=वैफल्यादित्यर्थः। विफलस्य भावो वैफल्यम्, तदेव वैफली, ब्राह्मणादेराकृतिगणत्वात् ष्यञ्, षित्वान्ङीष्, यचि भम्, यस्येति च, हलस्तद्धितस्य, विभक्तिकार्यम्, औचिती, साहितीत्यादिवत् प्रयोगः।

३०. बलीयांस इति। अयं भावः—अन्तरङ्गाद् उपजीव्यांदपि निषेधो बलीयानिति बोध्यम्। यभा—स्यन्दूँ प्रस्रवणे इति धातोः कर्तरि लकारे, भविष्यत्सामान्ये लृटि, 'वृद्भ्यः स्यसनोः' इति वैकल्पिकपरस्मैपदविधानात् प्रथमैकवचने तिपि अनुबन्धलोपे शपं प्रबाध्य स्यादेशे 'स्वरतिसूतिसूयतिधूञूदितो वा' इति वेटं 'न वृद्भ्यश्चतुर्भ्यः' इति बाधित्वा, ततश्चर्त्वे 'स्यन्त्स्यति' इति रूपम्। अत्रेदं चिन्त्यते—अत्र 'न वृद्भ्यश्चतुर्भ्यः' इति इण्निषेधकम्, तत्र आत्मनेपदनिमित्ताभाव एव निमित्तम्, ततो निषेधो बहिरङ्गः, ऊदिन्निमित्तको वेडन्तरङ्गः, ततश्च वेट् स्यात्? तत्र समाधीयते—'निषेधाश्च बलीयांसः' इति। विधिर्निषेधस्योपजीव्यः, अभावस्य प्रतियोगीव। अन्तरङ्गादुपजीव्याच्च बलीयस्त्वादेव 'स्यन्त्स्यति' इत्यत्र न वेट्। 'न वृद्भ्यः....' इत्यत्र 'चतुर्भ्यः' इति स्पष्टार्थमेव। निषेधस्याबलीयस्त्वे तु 'अतिरात्रे षोडशिनं पात्रविशेषं गृह्णाति', 'नातिरात्रे षोडशिनं गृह्णाति' इत्यत्र 'उदिते जुहोति', 'अनुदिते जुहोति' इत्यत्रेव विकल्पापत्तिः प्रसज्येत इत्यादिमञ्जूषायां विस्तरः। परिभाषा चेयम्—'न लुमता...', 'कमेर्णिङ्' इत्यत्र भाष्ये स्पष्टम्।

३१. उपसञ्जनिष्यमाणेति। 'उपसञ्जनिष्यमाणनिमित्तोऽप्यपवाद उपसञ्जातनिमित्तमप्युत्सर्गं बाधते' इति। यथा—'दधति' इत्यादौ यद्यन्तादेशो नाकरिष्यत्तर्हि 'अदभ्यस्तात्' इत्यदादेशोऽभविष्यदिति सम्भावनायां पूर्वमेव 'झोऽन्त' इति प्रवर्तते, ततो दधतीति साधु।

३२. न कुर्वन्तीति। यथा वा—'निमित्तापाये नैमित्तिकस्यापायः' इति। ननु कथमेतत्? न हि दण्डनाशे घटो नश्यतीति लोके प्रत्यक्षमेव। वस्तुतो निमित्तमत्रासमवायिकारणम्, तथा चासमवायिकारणनाशात् (कपालद्वयसंयोगनाशात्) घटनाशः प्रत्यक्ष एव। न्यायानुगता कारणत्रैविधी समेषु जन्येष्वद्यतनेष्वपि यन्त्रेषु। तथा चेत्थं बुधेलिमम्,

कारणम्

समवायि	असमवायि	निमित्तम्
अवयवः	तत्संयोगः	उपकरणान्तराणि कुलालादयश्च
PART	(FITTING TIGHTING)	(TIGHTAR MATERIALS ETCETERA)

सर्वेष्वपि आधुनिकयानयन्त्रादिष्वप्येषा कारणव्यवस्था स्पष्टैवेति।

यथा Moter याने अवयवाः=Parts, समवायिकारणम्, तेषा संयोगः Tighting of parts असमवायिकारणम्, तद्भिन्नानि Mecker Tightee उपकरणान्तराणि Materials प्रभृतीनि निमित्तमिति । तत्र Tighting रूपस्य (संयोगरूपस्य) असमवायिकारणनाशात् (अभावेन) Moter यानं न चलिष्यति पदमपीति बोध्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३३. परिभाषयेति। 'अकृतव्यूहाः पाणिनीयाः' इति। 'पाणिनीया भाविनिमित्तविनाशेऽकृतव्यूहा भवन्ति' इति सम्पूर्णस्वरूपम्। अर्थस्तु—यदि बहिरङ्गशास्त्रेणान्तरङ्गशास्त्रविनाशः पश्चात् करिष्यते, तदानीं पूर्वमेव पाणिनीया अन्तरङ्गशास्त्रप्रवृत्तिं न कुर्वन्तीति। यथा 'सदेर्लिटि क्वसौ द्वित्वाभ्यासकार्ययोः सतोः (सद् सद् वस्—एत्वाभ्यासलोपयोः) सेद् वस् इति दशायाम्, 'वस्वेकाचाद्घसाम्' इति वस इट्प्राप्तिः; परन्तु 'सेद् वस्' कृदन्तत्वादर्थ-वत्त्वात्प्रातिपदिकत्वाद्द्वितीयाबहुत्वे शसि अनुबन्धलोपे भत्वे सति 'वसोः सम्प्रसारणम्' इति भाविसम्प्रसारणे ततः पररूपे 'सेद् उस् अस्' इति सति वलादित्वं नङ्क्ष्यतीति, तन्मत्वा पूर्वमेव नेटः प्रवृत्तिरिति प्राङ्मतम्।

नागेशभट्टाचार्यास्तु—'सेद् वस् अस्' इति स्थिते इट्सम्प्रसारणयोः प्राप्तयोः 'लक्षणप्रतिपदोक्त'-परिभाषया सम्प्रसारणं स्वत एव पूर्वं भविष्यतीति, तेनैव वलादित्वभङ्गान्नेटः प्राप्तिरिति 'समर्थानां....' इत्यत्र 'असिद्धवद....' इत्यत्र च प्रदीप उक्तत्वान्नास्याः परिभाषायाः प्रयोजनमिति सङ्क्षेपः।

३४. संस्कार्यरूपमिति। अयं भावः—गुणविधायकं वृद्धिविधायकं च यत्तद् विधिसूत्रं भवति, तच्च संस्कार्यम्, 'इको गुणवृद्धी' इति परिभाषा सती विधिसूत्रं संस्करोतीति विध्युप-कारकत्वेन गुणभूता। मीमांसकनये यथा—व्यापारेण (भावनया) प्रत्ययोपात्ते कर्ताऽऽक्षिप्यते, तस्य क्रियां प्रति गुणभावेऽपि प्राधान्यम्, यद्वा 'दध्ना जुहोति' अत्र तृतीयान्तपदोपात्तदधिगुणं प्रति अनुवादार्थं विध्युपस्थापकतया गुणभूतस्यापि होमस्य, तद्वत्प्रकृते परिभाषोपस्थित्यर्थं तत्प्रदेशभूतस्थानिपदप्रदर्शनलिङ्गतया गुणभूतयोरपि तदुपकार्यतया प्राधान्यं तयोरिति। (द्र॰ महाभाष्ये निर्णयसागरीयटिप्पणी—छाया)

३५. सनाद्यन्तेति। सनादयश्च द्वादश, ते च के? तत्रोच्यते—सन्-क्यच्-काम्यच्-क्यङ्-क्यषोऽथाऽऽचारक्विप्-णिङ्-यङौ तथा। यगाय ईयङ् णिङ् चेति द्वादशामी सनादयः।। (द्र.बृ.शे.) तदेव व्यर्थं सञ्ज्ञापयतीति वैयाकरणः पन्थाः। यथा—ऋत उदित्यत्र तपरत्वं व्यर्थं सञ्ज्ञापकम्, इति चेत्? तत्रेत्थं पङ्क्तियोजना—'न विभक्तौ तुस्माः' इति सूत्रे। आदेः = आदिपदस्य (पाठक्रमादार्थक्रमस्य बलीयस्त्वेन) विभक्तिपदस्य। सार्थक्याय = शाब्दबोधाय इत्यादि। यदि, उपदेशेऽन्त्यं हलिद् न स्यात्तदा विभक्तिपदवाच्ययोः सुप्-तिङ्-(विभक्तिश्चेति सूत्रात्) शब्दयोः शाब्दबोधो न स्यात्। तत्र पकारस्य ङकारस्य चेत्सञ्ज्ञाभावे प्रत्याहारासिद्धेरिति गुह्यमूह्यमिति मम पितृदेवश्रीचरणा वैयाकरणकेशरिणः **पण्डितश्रीपशुपतिभट्टाचार्यमहोदयश्रीचरणा** इति।

३६. निष्प्रयोजनादिति। निष्प्रयोजनं वस्तु व्यर्थञ्चेत्, नैव तद् दोषायेति बोध्यम्। सप्रयोजनं वस्तु अन्यथासिद्धं सद् व्यर्थं चेत्तज्ज्ञापकं भवतीति सत्समयः। स्पष्टञ्चैतदनुनासिकसञ्ज्ञासूत्रे भाष्ये। 'नैव दोषो न प्रयोजनम्' इति। अत्र किञ्चित्—एतद्दिशा 'न विभक्तौ तुस्माः' इत्यादेः सार्थक्याय उपदेशेऽन्त्यं हलित् स्यादित्यर्थ आवश्यकः..... इत्यादि कथं सङ्गटताम्? यतो हि—इदानीम् (हलिति सूत्रेऽन्त्यमित् स्याद् इत्यर्थे एव स्वीकृते) तुस्मानामित्त्वाप्राप्त्या तन्निषेधो निष्प्रयोजनः, निष्प्रयोजनस्य व्यर्थत्वं न दोषाय, यस्य प्रयोजनं विद्यमानं सदन्यथासिद्धं भवति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३७. ण्वुलीति। अत्र युवोरनाकौ विहितौ न तु 'युव्योरनाकौ' इति। एवम् 'अहंशुभयोर्युस्' इत्यपि। इदं भावः—तेन 'कु' इत्यत्रानुनासिकत्वं कल्प्यम्। 'अहंशुभयोर्युस्' इत्यत्र 'यु' इत्यस्य अकादेशो न, सित्सामर्थ्यात्। अन्यथा अकि कृते 'अहमकः' इति स्यात्, इष्यते सित्वात्पदत्वेऽनुस्वारे 'अहंयुः' इति, सत्यपि तन्न स्यादिति सित्त्वं व्यर्थं भवेदिति।

३८. 'पापच्य अक' इति। अत्र यथाप्राप्तं सवर्णदीर्घम्, 'अतो गुणे' इति पररूपं बाधित्वा अग्रे प्रक्रियेति बोध्यम्। इयं परिभाषा खण्डिता। तथा हि—'युष्मभ्यम्' इत्यादौ 'अभ्यम्' इति च्छित्वा 'शेषे लोपः' इत्यन्तलोपे 'अतो गुणे' इति रूपं सिद्धम्।

३९. 'पापच्' इति। यङ्लुगन्तात् 'पापच्' इत्यस्मात् ण्वुलि 'पापाचकः' इति रूपमिति विवेक इति निस्सन्देहं स्वीकरणीयम्, प्रक्रिया तु मूले स्फुटेति दिक्।

४०. उवङीति। 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इति श्नुप्रत्ययान्तस्याङ्गस्य धातोरिवर्णोवर्णान्तस्य 'भ्रू' इत्येतस्य च इयङ् उवङ् इत्येतावादेशौ भवतोऽजादौ प्रत्यये परतः। (द्र॰काशिका-६।४।७७) अत्र इश्च उश्च यू तयोर्य्वोः, ह्रस्वयोरिदं ग्रहणम्, दीर्घयोरपि कार्यं भवति सवर्णग्रहणात् (द्र.-पदमञ्जरी)। अत्राण् गृह्यमाणः सवर्णान् ग्राहयतीति ह्रस्वौ गृह्यमाणो दीर्घावपि ग्राहयतः, तदन्तस्यापि भवतः (द्र. न्यासः)।

४१. अङ्गकार्य इति। अयं भावः—'अङ्गवृत्ते पुनर्वृत्तौ अविधिः' इति हि परिभाषास्वरूपम्। अङ्गे=अङ्गाधिकारे वृत्तं=निष्पन्नं यत्कार्यम्, तस्मिन् सति पुनरन्यस्याङ्गकार्यस्य वृत्तौ अविधानं=विधानं न भवतीत्यर्थः। युष्मभ्यम् इत्यत्र 'भ्यसो भ्यम्' इति च्छेदे 'शेषे लोपः' इति दलोपे, ततः पुनः 'बहुवचने झल्येत्' इति अङ्गाधिकारीयं कार्यान्तरं न भवतीति।

४२. सञ्ज्ञापूर्वकेति। एषा भाष्येऽदृष्टा, अतः परिभाषेन्दावनादृता। इत्थं 'स्तिपा शपा....', 'आगमशास्त्रमनित्यम्', 'गणकार्यमनित्यम्', 'अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम्', 'नञ्घटितमनित्यम्' इत्यादिपरिभाषा भाष्येऽदृष्टाः, अतश्च परिभाषाव्याख्याता अप्यनादृताः। आसामन्यथासिद्धत्वम्, एतत्साधितप्रयोगाणामनभिहितत्वं वेति नागेशहृदयमिति।

४३. या इति। 'या प्रापणे' (अ.प.से.) प्रापणं गतिः। 'वा गतिगन्धनयोः' (अ.प.से.) गन्धनं सूचनम्। तदुक्तम्—'या प्रापणे समाख्यातो वा गतौ गन्धनेऽपि' इति (द्र. सूर्यपुरस्थरैक्वजातीयब्राह्मणज्योतिर्वित्केशवात्मजकृष्णशङ्करशर्मणा गर्गगोत्रेण अष्टाविंशत्युत्तराष्टादशशतमितशालिवाहनाब्दे राधमासि सितदले तृतीये गुरुवारे कृता धातुपाठकारिकादाधिमथटिप्पणीसहितसंस्करणे)। अत्र किञ्चित्—यदुक्तं गन्धनम्=सूचनम्, तत्तु हिंसात्मकम्, 'गन्ध अर्दने' 'अर्द हिंसायाम्' इति चुरादौ। 'गन्धनावक्षेपण-सेवन-साहसिक्य-प्रतियत्न-प्रकथनोपयोगेषु कृञः' (१।३।३२) इत्यादौ यथा। धातूनामनेकार्थत्वे इमान्यपि प्रमाणानीति दिक्।

४४. द्योत्यार्थेनेति। व्यङ्ग्य-लक्ष्य-शक्य-द्योतक-अनुवायेति भेदात्। तेषु द्योतकस्तु शक्त्याधायकः, यथा—उपसर्गाः। यथा—गच्छति अवगच्छति, अत्र 'अव' इति द्योतकः, स च गमेरेव निहितार्थं द्योतयति। अनुवादकस्तु प्रकृत्यर्थमेवानुवदति। यथा—'द्वौ'। अत्र द्वित्वरूपं प्रकृत्यर्थमेव विभक्तिरनुवदति। अनन्वितार्थकविभक्तिकल्पनापेक्षयाऽ-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नुवादकविभक्तेरेव न्याय्यत्वाद् द्विशब्दादौ विभक्तिः। 'पञ्चकं प्रातिपदिकार्थः' इति पक्षे विभक्तयो द्योतका एव। द्योतकानुवादकाभ्यां पुनरुक्तिर्न भवति। साक्षादर्थोपस्थापिका शक्तिः, तत्र निष्प्रयोजनं द्विरुक्तिश्चेत्पुनरुक्तिः, अन्यथा तत्रापि द्विरुक्ति; यथा—'नयने तस्य हि नयने' इत्यादौ। 'व्यतिलुनीते', 'गार्ग्यायणी' इत्यादौ वि-अति आत्मनेपदैः, फङीष्भ्याञ्च द्योतकत्वेन न पुनरुक्तिरिति। कुत्रचित्तु द्योतना इति 'औपसन्दानिकी' इति शब्देनोच्यते। एवञ्च औपसन्दानिकी-शक्तिरेव द्योतना (द्र. वर्धमानकृतकिरणावली-प्रकाशः)। उपसन्दीयतेऽसाविति औपसन्दानिकी। कर्मसाधनोऽयं शब्दः। उपसन्दानम्= समभिव्याहृतपदम्, तद्वृत्ति शक्त्युद्बोधकमिति। (द्र. बृहद्वैयाकरणभूषणम्, रूपाली-टिप्पणी, पृ० २१५ मत्कृतं संस्क०) एवञ्च—मुद्रितवैयाकरण-सिद्धान्तमञ्जूषायामेतत्कृते 'औषसन्दानिकी' इति दृश्यमानो मूर्धन्यमध्यपाठोऽशुद्ध इति।

४५. 'आदेः परस्य' इत्यस्यायमर्थः—परस्य यद्विहितं तत्तस्यादेर्बोध्यम्। अत्र अल इत्यनुवर्तते 'अलोऽन्त्यस्य (१।१।५२) इति सूत्रात्। परत्वेन निर्दिष्टस्य अल आदेरित्यर्थः। आदेशविधौ परस्येति षष्ठ्यन्तत्वेन उपस्थितिर्हि एतदुपस्थितौ लिङ्गम्, एवञ्चादिरपि प्रत्यासत्तिन्यायेन परत्वेन निर्दिष्टस्यैवेति ज्ञेयम्।

४६. '........क्यप्-अलोपे प्रतिषेध इति। मुद्रिते बृहच्छब्देन्दुशेखरे 'यङ्-यक्-क्यप्-अलोपे....' इति पाठः, स च चिन्त्यः, भाष्ये—'यङ्-यक्-क्य-वलोपे' इत्येव पाठः, वलोपे जीरदानुरित्युदाहरणाच्च, अत्र वकारोऽकारविशिष्ट इत्यपि कैयटे स्पष्टम्, कथमन्यथा स्रिविर्व्यावर्त्येत इति तेनैवोक्तत्वाच्च।

४७. कुशकाशेति। कुशकाशावलम्बनन्यायस्तु हिन्द्याम्—'डूबते को तिनके का सहारा' इत्याभाणकसमानार्थः।

४८. तोतोर्तीति। 'तुर्वी हिंसायाम्', यङ्लुगन्तादस्मात् कर्तरि लकारे वर्तमाने लटि प्रथमैकवचने इडभावे रूपम्, अतिशयेन पुनः पुनर्वा हिंसतीत्यर्थः। कौमुद्यामिदमेव प्रत्युदाहृतम्—'इति नेह गुणनिषेधः, तिबादीनामनार्धधातुकत्वादिति बृहच्छेखरेऽपि—ननु आर्धधातुके इति व्यर्थम्, बहुव्रीहिस्तु तं विनापि 'एकाचो द्वे' इतिवद् भविष्यतीति चेत्? न, 'तोतोर्ति'-व्यावृत्त्यर्थत्वात्। यथा ममैव—'तोतोर्ति प्रतिमानवं हि सुषमा सारस्वती दुर्मदम्'।।

(द्र. सारस्वती-सुषमा, स्वर्णजयन्तीविशेषाङ्कः, पृ०१७)

४९. भाषायामिति। एतच्च नागेशमते। दीक्षितमते तु—भाषायामपि एतेषां प्रयोगः, अत एव 'चरीकर्ति बरीभर्ति सञ्जरीहर्ति नित्यशः' इति कौस्तुभमङ्गलारम्भः सङ्गच्छते। भट्टिकाव्ये लौकिकप्रयोगमात्रोदाहरणके—'यदि रवौ वरीवर्दि कोकिलो रोरवीति च। मयूरोऽपि नरीनर्ति मरीमर्मि तदा प्रिये'।। इति दृश्यते।

५०. एषिकेति। एषा एव एषिका। 'न सामिवचने' (४।५।४) सूत्रज्ञापितम्, तत्प्रत्याख्यानपक्षे च 'यावादिभ्यः कन्' इत्याकृतिगणीयानुमितं स्वार्थिकं कनं प्रबाध्य, 'अव्यय-सर्वनाम्नामकच् प्राक्टेः' इत्यकचि, 'तन्मध्यपतितस्तद्ग्रहणेन गृह्यते' इति परिभाषणात् सर्वनामसंज्ञाप्रयुक्तकार्यविभक्तिकार्येषु रूपसिद्धिः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

५१. अत्र—'नलोप आर्धधातुके' इति प्रथमश्लोके वर्णच्छन्दोऽन्तर्गतसमपादच्छन्दोऽन्यतम-षोडशाक्षरपादकाष्टजात्यन्तर्गतपञ्चचामराख्यं छन्दः, तल्लक्षणं यथा—'प्रमाणिका पदद्वयं वदन्ति पञ्चचामरम्' इति। प्रमाणिकाच्छन्दस्तु वर्णच्छन्दोऽन्यतमसमपादच्छन्दोऽन्त-र्गतानुष्टुब्जातिकम्, तल्लक्षणं यथा—'प्रमाणिका जरौ लगौ' इति।

५२. अत्र उपजातिश्छन्दः। तथा हि—अत्र प्रथमद्वितीययोः 'चित्र'नामकं छन्दः, तल्लक्षणं तु—चित्रसञ्ज्ञमीरितं समानिका पदद्वयमिति। समानिकालक्षणन्तु—'ग्लौ जरौ समानिका' इति। तृतीयतुर्ययोश्च प्रमाणिकाच्छन्दः, तल्लक्षणमुक्तमेव। एवञ्च— 'इत्थं किलान्यास्वपि मिश्रितासु वदन्ति जातिष्विदमेव नाम' इत्युक्त्या उपजातिश्छन्दः। अत्र च षष्टिजातिकयोरेव द्वयोः चित्रपञ्चचामरयोः समानजातिकयोः षोडशाक्षरकपादयोर्मेलनात् शुद्धो जातिः। (द्र० श्रीमद्भागवतम्, गुर्जरस्थविद्याहितनिधिसभाप्रकाशितो-पलब्धसमस्तव्याख्यासहितं संस्क. दशमस्क० विवरणम्)।

५३. अत्र तु चित्रनामकं छन्दः, स्पष्टमेवेति।

वीणापाणिमहो वन्दे मातरं पुत्रवत्सलाम् ।
तातं पशुपतिं वन्दे संस्कृतप्राणमादरात् ।। इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्मसिद्धान्तविवेचनम्

डॉ. हरिप्रसाद-अधिकारी
प्राध्यापकः
तुलनात्मकधर्मदर्शनविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये, वाराणसी

❀ ❀ ❀

मनसाप्यचिन्त्यरचनारूपेऽस्मिन् जगति मुह्यन्ति तावद् बुधा अपि का कथा पुनरज्ञानोपहतचित्तानां सामान्यजनानाम्? अत एवाह भगवान् श्रीकृष्णो गीतायामर्जुनमुद्दिश्य—

किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः ।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात्[1] ।।

लोकेऽपि तावद् दृश्यत एवानुपदं लोका कर्माकर्मनिर्धारणे मोहमुपयान्त्येव। भारतीयपरम्परायां कर्मसिद्धान्तस्य महत्त्वं सर्वोपरि राजते। अतस्तद्विज्ञायात्र दिङ्-निर्देशः क्रियते—कर्मणां सम्बन्धोऽनेकजन्मभिः सह जायतेऽथवैकेन जन्मना सह? जीवनेऽस्मिन् पूर्वजन्मकृतकर्मणां फलागमो जायतेऽथवास्यैव जन्मकृतकर्मणः? एवं विधाः प्रश्नाः सृष्टिकालत एव मानवमनांसि समुद्वेलयन्ति। समये समये बहुभिश्चिन्तकैर्मुनिवरैश्चास्य प्रश्नस्य समुचितोत्तरान्वेषणाय यत्ना अप्यनुष्ठीयन्ते, परमिदानीं यावत् सर्वमान्यं निर्दुष्टं समाधानं नासादितमिति मन्यन्ते विचारकाः सम्प्रत्यपि।

कर्मफलसम्बन्धे चार्वाक-जैन-बौद्ध-सांख्ययोग-न्यायवैशेषिक-पूर्वोत्तरमीमांसादिषु वैशद्येन विवेचितं वर्तते। प्रस्तुतेऽस्मिँल्लेखे भारतीयदर्शनानां संस्कृतीनां परम्पराणाञ्च पृष्ठभूमिमनुश्रित्य कर्मसिद्धान्तो लोकव्यवस्था चेति विषयो विवेचयिष्यते।

लेखारम्भ एकः प्रश्नः समुद्भावित आसीद् यत् कर्मसम्बन्धोऽनेन जन्मनैव भवत्यथवानन्तजन्मभिः? प्रसङ्गेऽत्र भारतीयपरम्परायां प्रायः सम्मानितं मत-मित्थमस्ति—

१. गीता-४।१६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् ।
नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ।।

यदि कर्मसम्बन्धः केवलमेकेन जन्मना भवेत्तदा मान्यतेयं कथं सुरक्षिता तिष्ठेत्? अतः कर्मणां महत्त्वमस्तित्वं वा न केवलमेकजन्मसम्बद्धमपि त्वनेकजन्मसम्बद्धमतिफलितम्। परन्तु परम्परायामिहैवास्मिन्नेव जन्मनि सर्वं भोक्तव्यमिति सिद्धान्तोऽप्यवलोक्यते। तत्प्रमाणन्तु—

त्रिभिर्वर्षैस्त्रिभिर्मासैस्त्रिभिः पक्षैस्त्रिभिर्दिनैः ।
अत्युत्कटैः पापपुण्यैरिहैव फलमश्नुते ।।

अत्र तावदिहैवेति दार्ढ्यात्, न त्वन्यत्र परलोकादिष्वित्यप्यवगम्यते। यथा शास्त्रेषु स्वर्गलोक-नरकलोक-वैकुण्ठलोकानां कल्पना वर्तते, तथैव बहुत्रास्मिन्नेव लोके सर्वमस्तीत्यपि वर्ण्यते। यथोक्तं श्रीमद्भागवते—

अत्रैव नरकः स्वर्ग इति मातः प्रचक्षते ।
या यातना वै नारक्यस्ता इहाप्युपलक्षिताः[१] ।।

ईश्वरो जीवसृष्टिं कर्मानुसारमेव विधत्त इत्यस्ति पारम्परिकं मतम्, परं सर्वारम्भे कर्मणामप्यस्त्वित्वाभावात् कथमेतत् सम्भवतीति प्रश्नो जागर्ति चेतसि। कर्मणामनादित्वस्वीकारेणास्य प्रश्नस्य समाधानं क्रियते सर्वैः। अनादिसमाधानमप्यस्माकं चिन्तनशक्तिदारिद्र्यमेव व्यनक्ति। पूर्वकर्माधारेण जीवो जननमरणादिकर्मसु प्रवर्तत इत्यपि प्रतिपादितं श्रीमद्भागवत एव—

कर्मणा दैवनेत्रेण जन्तुर्देहोपपत्तये ।
स्त्रियाः प्रविष्ट उदरं पुंसो रेतः कणाश्रयः[२] ।।

एवंविधानि परस्परं विरुद्धवाक्यानि सिद्धान्ताश्च शास्त्रेषूपलभ्यन्ते। सर्वशास्त्राणां समालोडनमन्तरा न शक्यते समासादयितुं किमपि तत्त्वम्। एतदर्थं भारतीयदर्शनानां विहङ्गावलोकनं क्रियतेऽत्र। लोकव्यवहारोऽयं यदि पूर्वकर्मनियन्त्रितो वर्तत इति स्वीक्रियते तदापि बहवोऽनुत्तरणीयप्रश्ना जाग्रति परितः। पूर्वशरीरपातानन्तं किं तत्त्वमवशिष्यते? यद् व्यवस्थामिमां सञ्चालयति? प्रश्नस्यास्य समाधाने नैकमत्यं बिभ्रति भारतीयदर्शनानि। कुत्रचित् प्रकृतिः, कुत्रचिदीश्वरः, कुत्रचिच्च स्वयं कर्मैव व्यवस्थापकत्वेनापि स्वीकृतम्।

१. श्रीमद्भागवते तृतीयस्कन्धः २९ श्लोकः।
२. तत्रैव ३१ अध्याये १ श्लोकः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आत्मवादिदर्शनेषु व्यवस्थेयं सारल्येन सञ्चलति, परमनात्मवादिनो बौद्धा अपि कर्मफलव्यवस्थामङ्गीकुर्वन्ति। किञ्च मानवेन जीवनपर्यन्तं यानि कर्माणि क्रियन्ते, प्रायस्तेषां सम्बन्धोऽनेनैव जीवनेन भवति। मुख्यतः स्वभोजनावाससुखसाधन-प्रभृतीनां सङ्कलन एव गच्छति सर्वं मनुष्यजीवनम्। कतरत् कर्मास्ति तद् यद् भविष्यस्य कृते क्रियते? यद्यस्मिन् जन्मनि परजन्मनः कृते न क्रियते किमपि, तदा पूर्वजन्मनि कथं कृतं स्यात्? एतेषां प्रश्नानामप्युत्तरं श्रद्धागुहायामेवोपलभ्यन्ते।

यद्यपि समस्तभारतीयदर्शनानां परमोद्देश्यं दुःखनिवृत्तिर्मोक्षावाप्तिश्चास्ति, तथापि प्रसङ्गतोऽत्र कर्मफलसम्बन्धे लोकव्यवस्थाविषये च बहुविवेचितमास्ते। निष्कर्षतः कर्माणि बन्धनकारकाणि भवन्तीति मतं सर्वे समामनन्ति। कर्मविवेचक-गीताशास्त्रे प्रतिपादितम्—

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा।
इति मां योऽभिजानाति कर्मभिर्न स बाध्यते[१]॥

एवमेव ज्ञानेन कर्मक्षयो जायते कर्मक्षयाच्च मोक्षोऽधिगम्यत इति मतं प्रकटितं श्रीमद्भागवते—

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि दृष्ट एवात्मनीश्वरे[२]॥

इत्थं कर्म मोक्षमार्गस्य बाधकत्वेन सर्वत्रोपस्थापितम्। एवमेवेश्वर-पुनर्जन्म-वेदप्रामाण्याधारेणास्तिकनास्तिकानां विभाजनं कृतं वर्तते। वेदप्रामाण्याधारेणैव चार्वाक-जैन-बौद्धा नास्तिककोटौ समायान्ति। ईश्वराधारेण तु चार्वाक-जैन-बौद्ध-सांख्य-पूर्वमीमांसादर्शनानि नास्तिकानि भवन्ति। कर्माधारेण तु केवलं चार्वाकदर्शनमेव नास्तिकत्वं भजते। अपराणि तु कर्मफलस्वीकारात् पुनर्जन्म-स्वीकाराच्चास्तिकानि भवन्ति।

एतेषु दर्शनेषु पूर्वमीमांसादर्शनं कर्मसिद्धान्तविवेचनप्रसङ्गे महत्त्वपूर्णम्। मीमांसायां कार्यकारणसम्बन्धविषये शक्तिसिद्धान्तः स्वीक्रियते। बीजं स्वकीया-दृश्यशक्तिबलेनैवाङ्कुरोत्पादनसमर्थं जायते। शक्तिरहितं बीजमङ्कुरोत्पादनाय नालं भवति। एवमेवाग्नौ दाहकताशक्तिः, शब्देऽप्यर्थबोधनशक्तिः, प्रकाशे भासकताशक्ति-रित्यादिक्रमेण मीमांसकाः स्वकीयं शक्तिसिद्धान्तं स्थापयन्ति। एतच्छक्त्याधारेणैव मीमांसादर्शनं जटिलतमस्यास्य कर्मसिद्धान्तस्य व्याख्यानं करोति। अत्र प्रश्नोऽयं

१. गीता-४।१४; २. श्रीमद्भागवते-२।२१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समुदेति यत् मनुष्यकृतकर्मणां नाशस्त्वस्मिन्नेव लोके जायते, तर्हि कथं विनष्टं कर्म परलोकादिषु फलं प्रयच्छति? मीमांसका अस्याः समस्यायाः समाधानमपूर्वपदार्थकल्पनया कुर्वन्ति। तन्मतानुसारं यज्ञानुष्ठानानन्तरकस्यामेपूर्वपदार्थस्य जन्म जायते। इयञ्च सा शक्तिरस्ति या यथावसरं फलं प्रयच्छति। लौकिकानां वैदिकानाञ्च सर्वेषां कर्मणां फलानि सञ्चितानि भवन्तीति शास्त्रे स्वीक्रियते—

नैवाकृतिः फलति नैव कुलं न शीलं
विद्यापि नैव न च यत्नकृतापि सेवा।
भाग्यानि पूर्वतपसः किल सञ्चितानि
काले फलन्ति पुरुषस्य यथैव वृक्षाः ।।

यद्धि बौद्धदर्शनं वेदेश्वरात्मादिपूर्वस्वीकृतविषयान् न स्वीकरोति, तदपि कर्ममहत्त्वं स्पष्टतया स्वीकरोति। अमुमेव कर्मसिद्धान्तमाधारीकृत्य बौद्धदर्शने लोकव्यवस्था व्यवस्थाप्यते। यथैकस्य बालकस्योत्पत्तौ तस्य जीवनस्यारम्भः। वस्तुतः किमस्ति बालकः? शरीरमनसोः समुदायः। किमस्ति शरीरम्? असंख्यपरमाणूनां समुदायः। प्रतिक्षणं परिवर्तनशीला अपि परमाणवः स्थानापन्नत्वात् पूर्वजीवनसाम्यतां गतिशीलतां च द्योतयन्ति।

अस्यैवाधारेण कस्यापि जनस्य जीवनस्याध्ययनं कर्तुं शक्यते। एवं कृते तज्जीवनं नूनं पूर्वकृतकर्मप्रभावितं समासाद्यते। यद्यपि बाल्यकालादारभ्य वृद्धावस्थां यावत् शरीरे नैकानि परिवर्तनानि जायन्ते, तथापि कार्यकारणशृङ्खलाया अविच्छिन्नरूपेण प्रवहमानत्वात् स एवायं जन इति प्रत्यभिज्ञा जायते। यदा हि वर्तमानं जीवनचक्रमिदमेतावत्कालं यावद् व्यवस्थितरूपेण कार्यकारणसिद्धान्ताश्रितं भवति, जीवने क्वापि किमप्याकस्मिकं नावलोक्यते, सर्वत्रैव तारतम्यमयी सङ्गतिरवलोक्यते, तदाऽत्र पूर्वकृतकर्मपरिणामस्वीकरणमेवोचितं युक्तियुक्तञ्च। नो चेदाकस्मिकतावादः समाश्रयणीयो भविष्यति, यस्य हि जीवने नैकमप्युदाहरणं समासाद्यते।

अत्र तावत् कोऽपि प्रश्नमुद्भावयितुं प्रभवति यद् मातापित्रोः शरीराभ्यां स्वशरीरानुगुणं शरीरमुत्पाद्यते, एवमेव सन्ततेर्मनोबुद्ध्यादीनां निर्माणमपि कथन्न मातापितृभ्यां जायते? प्रश्नोऽयं पूर्णरूपेण युक्तियुक्तो न वर्तते, यतो हि यदि बुद्ध्यादीनामप्युत्पत्तिर्मातापितृभ्यां स्वीक्रियेत तदा बुद्धिमतां बुद्धिमत्य एव सन्ततयः स्युः, नावलोक्यते एवंविधं साम्यं लोके। यदि जीवनप्रवाह इदं जीवनमतिक्रम्य पूर्वापरसम्बद्धः स्वीक्रियते, तदाऽस्याः समस्यायाः समाधानं जायते। पुनरत्र निष्कर्षरूपेणेदं वक्तुं शक्यते यत् पूर्वकृतकर्मणैव परवर्तिजीवननिर्माणं जायते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वसंस्कारसम्पन्नो बालक एव कुत्रचिद् मन्दतां कुत्रचिच्च तीव्रतां बिभर्ति। यथा बाल्यकालेऽधीतं संस्काररूपेण जीवनपर्यन्तं तिष्ठति, तथैव बाल्यकाले स्वतः स्फूर्तप्रतिभा पूर्वजन्मसम्बद्धा वर्तते। इत्थमाकस्मिकतादोषात्त्राणमविच्छिन्नजीवन-प्रवाहसिद्धिश्च जायते।[1]

अनेन विवेचनेनेदं निर्गलितं यत् कर्मसिद्धान्तप्रतिष्ठापनाय जीवनप्रवाह-नित्यताङ्गीकर्तव्या। जीवनप्रवाहनित्यतां विना कर्मवादस्य न कमपि युक्तियुक्त-तात्पर्यमभिव्यज्यते। किं नित्यात्मनोऽस्तित्वं विनापि जीवनप्रवाहनित्यता सम्भाव्यते? वैदिकदर्शनदृष्ट्या त्वात्मनो नित्यत्वात् स एवातीतवर्तमान-भविष्यज्जीवनानामधिष्ठानभूतः, परं बौद्धसिद्धान्ते नित्यात्मनोऽस्तित्वाभावा-ज्जीवनप्रवाहनित्यताव्यवस्था कठिनतरा प्रतीयते; किन्तु बौद्धसिद्धान्ते आत्मनो नित्यास्तित्वं विनापि जीवनप्रवाहनित्यता व्यवस्थाप्यते। तद्दृष्ट्या जीवनमिदं तृष्णामूलकमस्ति। अतो मनुष्यः स्वकीययैव वासनया परिभावितः सन् भवचक्रमाध्यमेन जन्ममृत्योः परिवर्तनशीलचक्रे पतितो जायते। ईश्वरवादिनोऽपि प्राय एवमेव मतं प्रकटीकुर्वन्ति यदीश्वरः केवलं जीवकर्माधोरण तदनुकूल-जन्मादिकार्याणि सञ्चालयति, न तु स्वपक्षतः किमपि शुभमशुभं वा करोति। यद्यप्युपर्युक्तकथनद्वयमेवानवस्थादोषरहितं नास्ति, तथापि कर्ममहत्त्वन्तूभयत्रापि समानरूपेण राजत इति फलितम्।

अत्रेदमप्यवगन्तव्यं यत् कर्मसिद्धान्तो लोकव्यवस्था च न केवलं सीमितेऽर्थे ग्राह्योऽपि तु सर्वभूमण्डलव्यवस्थाऽथ च तत्र कर्मसिद्धान्तस्यान्वेषणं स्पष्टी-करणञ्चावश्यकम्। यतो हि कर्मसम्बन्धो न केवलं चेतनैः सह, अपि त्वचेतनपदार्था अपि कर्मसम्बद्धा भवन्ति। इममेव कर्मसिद्धान्तमङ्गीकृत्य नैयायिकाः—'क्षित्यङ्कुरादिकं कर्तृजन्यं कार्यत्वाद् घटवत्' इति तर्केणेश्वरसिद्धिं कुर्वन्ति[2]। अस्तु, कर्ममहत्त्वं प्रत्यक्षतयापि सिध्यति। लोके प्रायः शुभाशुभानां कृतकर्मणां फलं दृष्टिगोचरतां याति। स्वकार्यसाधनाय कर्माचरणमावश्यकमिति नीतिशास्त्रेऽप्युल्लिखितम्—

उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः।।

सृष्टौ वर्तमानाः सर्वेऽपि पदार्थाः परस्परसम्बद्धा भवन्ति। अतो निरपेक्षरूपेण केवलमेकस्य वस्तुनो व्याख्या रहस्योद्घाटनं वा न कर्तुं शक्यते।

---

१. बौद्धदर्शने, महापण्डितराहुलसांकृत्यायनस्य।
२. न्यायसिद्धान्तमुक्तावल्याः प्रारम्भे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतो हेतोः सम्यग्रूपेण कर्मसिद्धान्तावबोधाय—पुनर्जन्म-आत्मा-ईश्वर-लोक-परलोक-धर्माधर्म-कुशलाकुशलादिविषयाणां सम्यग्ज्ञानमावश्यकमस्ति।

एवमेव कर्मणामपि भवन्ति बहुविधा विभेदाः। ऐच्छिकमनैच्छिकं स्वाभाविकमिति कर्मणां मुख्यतया भेदत्रयं स्वीक्रियते। तत्र केवलमैच्छिककर्माण्येव शुभाशुभफलव्यवस्थापकानि भवन्ति, न तु स्वाभाविकानि, अनैच्छिकानि वा। स्वाभाविककर्माण्युद्दिश्यैवाह श्रीकृष्णः—

न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः[1] ।।

एवमेव—

कर्मणैव हि संसिद्धिमास्थिता जनकादयः।
लोकसङ्ग्रहमेवापि सम्पश्यन् कर्तुमर्हसि[2] ।।

इत्थं वैदिका बौद्धाश्च समभावेन कर्ममहत्त्वं स्वीकुर्वन्ति। गौतमबुद्धोऽपि स्पष्टमाह धम्मपदे—'न जच्चा वसलो होति न जच्चा होति ब्राह्मणो। कम्मुना वसलो होति कम्मुना होति ब्राह्मणो'।।

एतद्विवेचनाधारेणेदं वक्तुं शक्यते यत् संसारेऽवस्थितैः सर्वैः मनुष्यैरवश्यमेव स्वकर्तव्याचरणं विधेयम्। इहलोके परलोके च कर्ममहत्त्वमविच्छिन्नरूपेण राजते। पूर्वजन्मकर्मैवाद्य भाग्यरूपेणास्माकं पुरस्तात् समुपैति। एवमेवाद्यतनीयं कर्मापि न केवलमस्य जीवनस्य कृते लाभप्रदमपि त्वागामिजीवनस्य कृते प्रेरणाप्रदं भविष्यति। यद्यपि भारतीयशास्त्रेषु भक्तिज्ञानकर्मणां सम्बन्धे परस्परं विरुद्धमतानि सन्ति, तथापि सूक्ष्मेक्षिकया तदनुशीलने कृते 'एकं सद् विप्रा बहुधा वदन्ति' इति निष्कर्षः समासाद्यते। ज्ञानकर्मणोर्मनोरमः सम्बन्धः साधितो वर्तते योगवासिष्ठे—

उभाभ्यामपि पक्षाभ्यां यथा खे पक्षिणां गतिः।
तथैव ज्ञानकर्मभ्यां जायते परमं पदम्[3] ।। इति।

---

१. गीता-३।५; २. तत्रैव-३।२०।
३. योगवासिष्ठः - १।८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अद्वैते प्रपञ्चोपादानत्वविमर्शः

डॉ. रामकिशोरत्रिपाठी
व्याकरणविभागाध्यक्षः
श्रीमाथुरचतुर्वेदसंस्कृतमहाविद्यालयस्य
डैम्पियरनगरम्, मथुरा

❀ ❀ ❀

अत्यद्भुतं विश्वविधानमूलं यच्छाश्वतं दृष्टिपथं न याति ।
मिथ्यापदार्थः प्रतिभाति लोके सत्यानृतं दर्शनशास्त्रगम्यम् ।।
मोहो जनान् नूनमुपैति बन्धं रागप्रमत्तो मतिमाजहाति ।
द्वैषस्वभावाद् धृतिसन्निवासस्तन्नाशहेतुश्च भवत्यद्वैतम् ।।
अज्ञानं हि प्रपञ्चस्य निमित्तकारणं स्मृतम् ।
विवर्तेन परं ब्रह्म तदुपादानमुच्यते ।।

जन्मजन्मान्तरवासनाशक्तहृदयत्वान्नित्यानित्यवस्तुविवेकशून्यमतीनां लोकेषणादारेषणापुत्रेषणावित्तेषणादिमोहकलितमनसां ममेदमस्याहमिति स्वाज्ञानानियतद्वैविध्याशक्तपामराणामुद्धारार्थं परमकारुणिकहृदयैस्तथ्यातथ्यविवेचनकुशलैः सर्वशास्त्रविशारदैः सनातनधर्मरक्षणतत्परैर्लोकहितैषणालब्धजनिभिः सर्वदा प्राणिमात्रस्य कल्याणचिन्तकैर्वेदान्तदर्शने प्रसिद्धगीतोपनिषद्ब्रह्मसूत्रादिप्रस्थानत्रये विहितभाष्यत्वेन लब्धाचार्यपदवीकैः परिव्राट्प्रमुखैः शङ्करैर्भेदबुद्ध्योत्पन्नं द्वैतमतं निरस्य सकलभेदहीनमद्वैतमतमुद्धृतम्। द्वैतं नाम द्वाभ्यां प्रकाराभ्यामितं ज्ञातं द्वीतं द्वीतमेव द्वैतम् (स्वार्थेऽण्प्रत्ययः) स्वसजातीयविजातीयस्वगतभेदशून्यस्याद्वयस्य सर्वविकारहीनस्यानाद्यनन्ताव्ययाक्षरस्वरूपस्य ब्रह्मणो जीवेश्वररूपेण प्रकृतिविकृतिरूपेण भेदात्मकज्ञानमेव द्वैतपदेनाभिधीयते। यद्वा द्वयोर्भावो द्विता तदेव द्वैतं तदात्मकज्ञानाश्रितमिति। न द्वैतमद्वैतम्।

द्वैताभावः (भेदाभावः) तदस्यास्तीति अद्वैतं ब्रह्म (निर्धर्मकम्)। तथा चोक्तम् 'शिवमद्वैतं तुरीयं मन्यन्ते'[१], 'एकमेवाद्वितीयं ब्रह्म'[२], 'सर्वं खल्विदं ब्रह्म'[३], 'नेह नानास्ति किञ्चन'[४], 'आत्मा वा इदमेक एवाग्र आसीत्'[५]।

---

१. बृहदा. ६।२।६; २. छान्दो. ६।२।१।
३.. मा.उप.म., २; ४. कठोपनिषद् २।१।११; ५. ऐत० १।१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथवा द्वाभ्यां परस्परविलक्षणाभ्यां प्रकाराभ्यां स्वतन्त्रसत्त्वपरतन्त्रसत्त्वाभ्यां चेतनाचेतनत्वादिभ्यां चेतं ज्ञातं वस्तु द्वीतमित्युच्यते, तदेव द्वैतम्। अत्र द्वैतपदं भेदात्मकज्ञानपरम्। द्विशब्दश्चानेकार्थस्य बोधकः। अतश्चिदचिदीश्वरभेदैस्तदवान्तरभेदैर्जीवप्राकृताप्राकृतकालेश्वररूपैस्तदवान्तरभेदैश्चेदं ज्ञातं वस्तु द्वीतं तदेव द्वैतमिति। न द्वैतमद्वैतं द्वैताभाव इत्यर्थः। नञ्तत्पुरुषसमासः। को ह्यत्र नञर्थः, अब्राह्मणमानयेत्यत्र ब्राह्मणभिन्नब्राह्मणसदृशमित्यर्थवद् द्वैतभिन्नद्वैतसदृशमर्थ इति चेत्, प्रतियोगिविधया द्वैतस्यापि सत्तास्वीकाराद् द्वैतापत्तिर्दुर्वारा स्यात्। अनुदरा कन्येतिवदल्पत्वमिति चेन्नाल्पद्वैतस्वीकारापत्तेः। तदन्यत्वार्थस्वीकारेऽपि द्वैतापत्तिः। अप्राशस्त्यार्थेऽपि प्रतियोगितया द्वैतस्य प्रतीतेः। विरोधे हि धर्माधर्मवद् द्वैताद्वैतयोः समानसत्ताकत्वेन द्वैतमेवापद्येत। अतोऽत्र नञर्थोऽभावमात्रम्, ब्रह्मणि सार्वत्रिकद्वैताभावस्य श्रुतिसिद्धत्वात्। 'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्'[1], 'दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः'[2]।

'अद्वैतं परमार्थो हि द्वैतं तद्भेद उच्यते।
तेषामुभयथा द्वैतं तेनायं न विरुध्यते'[3] ।।

अविद्यावशाद्धि निर्गुणे निर्विकारे निरवयवेऽद्वये ब्रह्मणि प्रपञ्चादिद्वैतमारोप्यते। अद्वैतमित्यस्यारोपितद्वैतवदर्थः[4]। स चारोपोऽज्ञानकृत एव। 'इन्द्रो मायाभिः पुरुरूप ईयते। न तु तद् द्वितीयमस्ति'[5] इति श्रुतेः।

'मायया भिद्यते ह्येतन्नान्यथा तु कथञ्चन।
तत्त्वतो भिद्यमाने हि मर्त्यताममृतं व्रजेत्'[6] ।।

यथा चाकचिक्यवशाद् रज्जुः सर्पाकारेण विवर्तते, यथा च मरुस्थलीयसिकतास्वपि मृगस्य जलभ्रमः, तथैव परमार्थतोऽद्वयं निरवयवञ्च ब्रह्म मायया प्रपञ्चाकारेण विवर्तते। यद्यपि नानाश्रुतिप्रमाणैरेकमेवाद्वितीयं ब्रह्मस्वरूपं निश्चितम्, तथापि भ्रान्तिवशात्तत्र नानात्वमपि प्रतीयते। 'नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिम्'[7]। तत्र च निमित्तमज्ञानम्। तच्चाज्ञानमविद्यामायादिपदेनापि व्यवह्रियते। वस्तुतोऽसदपि जगदज्ञानेनावृताधिष्ठानमहिम्ना सद्वदवभासते।

---

१. श्वेता. ६।१।९।
२. मुण्डको. २।१।२;
३. मा.कारि. ३।१८।
४. वैयाकरणभूषणसारे, कारिका ४०;
५. बृहदा. २।५।१९।
६. मा.उप. ३।१९;
७. मुण्डको. १।१।६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मायानिमित्तं सकलप्रसूतेः सैव प्रपञ्चस्य वितानहेतुः ।
विवर्तते ब्रह्म तदाश्रितं सदा भ्रान्त्याऽऽश्रयस्यापि जगत्प्रतीतिः ।।

अज्ञानपदेनात्र न ज्ञानप्रतियोगिताकाभावो गृह्यते, तस्याभावरूपत्वे प्रपञ्चोत्पत्तावनिमित्तत्वं प्रपद्येत। किञ्चाज्ञानमत्र ज्ञानविरोधि ज्ञानसमसत्ताकं ज्ञानवच्चानादिरूपमभिमन्यते। तथा चोक्तम्—

'अनादिभावरूपं यद्विज्ञाने न विलीयते।
तदज्ञानमिति प्राज्ञा लक्षणं सम्प्रचक्षते'[1] ।।

अज्ञानं यदि ज्ञानसमसत्ताकं न स्यात्तदा ज्ञानं नावृणुयात्, आवृणोति च ज्ञानमतोऽज्ञानं ज्ञानसमसत्ताकमिति।

'अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः' ।[2]

अज्ञानं हि शक्तिद्वयसमन्वितमेव भेदबुद्धिप्रवर्तकम्। तत्रावरणशक्त्या प्राणिमात्रस्य चक्षुरादिज्ञानेन्द्रियाण्यावृत्य विक्षेपशक्त्या च प्रपञ्चे प्रवृत्तिमुत्पादयति। तथा चोक्तं सङ्क्षेपशारीरके—

'आच्छाद्य विक्षिपति संस्फुरदात्मरूपं जीवेश्वरत्वजगदाकृतिभिर्मृषैव।
अज्ञानमावरणविभ्रमशक्तियोगादात्मत्वमात्रविषयाश्रयताबलेन'[3] ।।

तदेवाज्ञानं क्रियारूपोपाधिनाऽविद्या-मायेति संज्ञां भजते। तत्र विशुद्धसत्त्व-गुणरूपोपाधिनोपहितमीश्वरोपाधिस्वरूपं माया। मिमीते शुद्धं ब्रह्म परिच्छिनत्तीति व्युत्पत्त्या माङ्-माने धातोः 'माच्छाससिसूभ्यो यः'[4] इत्युणादिसूत्रेण यप्रत्यये स्त्रीत्वाट्टापि मायेति शब्दनिष्पत्तिः। यद्वा मया = ज्ञानेन, याति = निवर्तते या सा माया ज्ञाननिवर्त्यशीलेत्यर्थः। अज्ञानस्य ज्ञाननिवर्तनत्वमन्यत्रापि स्मृतम्। यथा—

'ज्ञानेन तदज्ञानं येषां नाशितमात्मनः ।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम्'[5] ।।

माया हि सत्त्वगुणप्रधानत्वादावरणविक्षेपशक्तिहीनत्वेन प्रपञ्चोत्पत्ताव-निमित्तम्। तथा चोक्तम्—'अनादिरनिर्वाच्या भूतप्रकृतिश्चिन्मात्रसम्बन्धिनी माया'

१. तत्त्वदीपिकायामनिर्वचनीयनिरूपणे।
२. गीता-५।१५;
३. सङ्क्षेपशारीरके-१।२०।
४. उणादिसूत्रम्-४।११८;
५. गीता-५।१६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनादिर्विश्वसम्भूतिर्माया चिन्मात्रसंश्रया ।
तदेकदेशोऽविद्या तु विक्षेपावरणान्विता'[१] ।।

इदमेवाज्ञानं सत्त्वरजस्तमोगुणसाम्यावस्थापन्नं सांख्यनये मूलप्रकृतिः। उक्तञ्च—'मूलप्रकृतिरविकृतिः'[२]। तस्या एव मूलप्रकृतेः प्रकाशात्मकसत्त्वोद्रेकान्मायाऽविद्येति व्यपदेशः। तत्र विशुद्धसत्त्वप्रधाना माया, मलिनसत्त्वप्रधाना ह्यविद्या। मायां वशीकृत्य तस्यामेव प्रतिफलितश्चिदात्मा सर्वज्ञत्वादिगुणसम्पन्न ईश्वरः। 'इन्द्रो मायाभिः पुरुरूप ईयते',[३] 'मायां तु प्रकृतिं विद्यान्मायिनं परमेश्वरम्'[४]। उक्तञ्च—

'सत्त्वशुद्ध्यविशुद्धिभ्यां मायाऽविद्ये च ते मते।
मायाबिम्बो वशीकृत्य तां स्यात्सर्वज्ञ ईश्वरः'[५] ।।

अविद्यैव ब्रह्मणो जीवेश्वररूपेण निरवच्छिन्नब्रह्मस्वरूपेण च विभेदहेतुः। तत्र सत्त्वगुणप्रधानमायावच्छिन्न ईश्वरस्तयोपहितश्चैतन्य ईश्वरसाक्षी। मलिनसत्त्वप्रधानाविद्यावच्छिन्नो जीवस्तया चोपहितश्चैतन्यो जीवसाक्षी। उक्तञ्च विवरणप्रमेयसङ्ग्रहे—ज्ञानाभावभ्रान्तिज्ञानतत्संस्कारा एवाऽज्ञानाभिधानास्त एव ब्रह्मतत्त्वावभासप्रतिवध्योक्तव्यवहारं जनयिष्यन्ति। शुद्धसत्त्वगुणान्विताविद्यावच्छिन्नः परमात्मा सर्वनियन्तृत्वाद् भोग्यभोक्तृप्रवृत्तिप्रयोजकत्वाच्चेश्वर इति व्यपदिश्यते। रजोगुणात्मिकयाऽविद्ययाऽन्वितो हिरण्यगर्भो ब्रह्मेत्युच्यते। सृष्ट्यादौ हिरण्यगर्भ एवोत्पद्यते, तस्यैव च वैदिकसृष्टिप्रवर्तकत्वमभिमतम्[६]। 'हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्। स दाधार पृथिवीं द्याम्...'। सर्वोपाधिनिरवच्छिन्नः स्वसजातीयविजातीयस्वगतभेदशून्यश्च परमात्मा सर्वव्यापकत्वाद् ब्रह्म विभुः सर्वशक्त्याश्रयतया च पुरुष इत्युच्यते'[७]। 'यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैः'[८]। 'सर्वं ह्येतद् ब्रह्मायमात्मा'[९], सर्वव्यापिनमात्मानं क्षीरे सर्पिरिवार्पितमिति श्रुतयस्तदेव प्रमाणयन्ति[१०]।

---

१. सिद्धान्तलेशसङ्ग्रहे, प्रथमपरिच्छेदे;
२. सांख्यकारिका।
३. ऋ.सं.-६।४७।१८;
४. श्वेता.-४।१०।
५. पञ्चदशीतत्त्वविवेके-१६;
६. विवरणप्रमेयसङ्ग्रहे।
७. ऋ.स.-६।२।९;
८. मुण्ड.-२।२।५।
९. मा.उप.-१।२;
१०. श्वेता.उप.-३।१।१६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मायोपाधिमुपेत्य सत्यनियतं सर्वप्रपञ्चाश्रयं
तस्या एव विशुद्धसत्त्वसुभगो लोकेश्वरः ख्यायते ।
मालिन्यञ्च समाश्रितो विभुरयं जीवः स्वकर्मानुगः
सर्वोपाधिविनिर्गतं निरवयवं शान्तञ्च दान्तं सदा ।।

मायाऽविद्ययोरुपाधेयभिन्नत्वेऽपि लोके पर्यायत्वेन व्यवहारो दृश्यते। तत्र शुक्त्यधिष्ठाने भ्रान्तं रजतमविद्यामयं मायामयं वेति विचारणायामविद्यामयमेवोच्यते, तत्त्वज्ञाननिवर्त्यशीलत्वात्। न च मायैवाविद्यालक्षणप्रसिद्धिभ्यां तयोर्भेदावगमात्। तत्रेयान् भेदः, माया हि कर्तुरिच्छामेवानुसरति, न विपरीतमतः स्वाश्रयं न व्यामोहयति, अविद्या तु स्वाधिष्ठानमावृत्य विक्षेपशक्त्याऽधिष्ठानस्वरूपान्तरमप्युत्पादयति, तथाप्यस्ति तादृशमुभयनिष्ठं किमपि लक्षणं येनोभयोर्लोके पर्यायतोपयुज्यते। 'अनिर्वचनीयत्वे सति तत्त्वावभासप्रतिबन्धविपर्यावभासयोर्हेतुत्वं लक्षणं तच्चोभयोरविशिष्टम्'[1]। सा चाविद्या ब्रह्माश्रितैव प्रपञ्चोत्पत्तिनिमित्तम्। 'मयाध्यक्षेण प्रकृतिः सूयते सचराचरम्'[2] इति स्मृतिवचनात्।

अविद्यायां प्रतिबिम्बत्वेन स्थितस्तत्परतन्त्रश्च चिदात्मा स्वाविनाशिस्वरूपपरिज्ञानादभिमानी जीवः। अविद्या हि प्राणिमात्रस्य स्थूलसूक्ष्मादिकारणशरीरनिमित्तम्। जीवस्त्वविद्योपाधिवैचक्षण्यान्नानादेवतिर्यगादिदेहभेदाद्भिन्नः। 'अविद्यावशगस्त्वन्यस्तद्वैचिन्त्यादनेकधा'[3], अनादिरनिर्वाच्या भूतप्रकृतिश्चिन्मात्रसम्बन्धिनी माया। तस्यां चित्प्रतिबिम्ब ईश्वरः सर्वशक्तिसम्पन्नत्वात् कर्तेत्युच्यते। मायोपहितस्यैव ब्रह्मणः कर्तृत्वादिकं सम्भवति। अनुपहितस्य निरवयवत्वात् कर्तृत्वासम्भवः। 'एष पुरुषो न शृणोति न पश्यति न जिघ्रति न रसयते न स्पृशते नाभिवदते नादत्ते'[4] इति श्रुतेः। 'न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः'[5] इति स्मृतेश्च। तन्मायाया एवावरण-विक्षेपशक्त्यात्मकाविद्याभिधानेषु परिच्छिन्नानन्तप्रदेशेषु चित्प्रतिबिम्बो जीवः। अविद्याकृत एव दृग्दृश्यविभेदः। तत्र दृश्यं ब्रह्माधिष्ठानेन विवर्तमानोऽविद्यापरिणामः प्रपञ्चः। दृक् = द्रष्टा आत्मा एकोऽप्यौपाधिकभेदेन त्रिविधः, ईश्वरो जीवस्साक्षी चेति। तत्र कारणीभूताज्ञानोपाधिरीश्वरः। अन्तःकरणतत्संस्कारावच्छिन्नाज्ञानोपहितो जीवः। अविद्याप्रतिबिम्बेश्वरपक्षे बिम्बचैतन्यं साक्षी बिम्बेश्वरपक्षे तु बिम्बप्रतिमुखानुगतमुखस्वरूपवज्जीवेश्वरा-

---

१. विवरणप्रमेयसङ्ग्रहे; २. गीता-९।१०।
३. तत्त्वविवेके-१७; ४. प्रश्नोपनिषद्-४।२।
५. गीता.-५।१४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नुगतसर्वानुसन्धातृचैतन्यं साक्षीत्युच्यते। अज्ञानोपलक्षितस्य परमात्मनः समष्टिव्यष्ट्युपाधिद्वारेणेश्वरजीवभेदः। तत्र समष्ट्यज्ञानोपलक्षितं चैतन्यं सर्वस्य चराचरात्मकप्रपञ्चस्य साक्षित्वेन सर्वज्ञ इत्युच्यते। सर्वेषां जीवानां कर्मानुरूपेप्सितफलदातृत्वेनेश्वरः, सर्वेषां जीवानामन्तर्हृदये स्थित्वा बुद्धिनियामकत्वेनान्तर्यामीत्युच्यते। अस्यैव परमात्मनः सर्वस्य चराचरात्मकप्रपञ्चस्य विवर्ताधिष्ठानत्वेन जगत्कारणत्वमिति व्यपदेशः। मायावच्छिन्नेश्वरचैतन्यमेवोद्भूतसत्त्वगुणमायान्वितं पालयितृविष्णु-नारायणादिवाच्यतां भजते। तदेवोद्भूतरजोगुणमायावच्छिन्नं स्रष्टृब्रह्मविधात्रादिशब्दप्रतिपाद्यतां तदेवोद्भूततमोगुणमायान्वितं संहर्तृमहेश्वररुद्रादिशब्दाभिधेयतां चाधिगच्छति। तथा चोक्तम्—'स च परमेश्वर एकोऽपि स्वोपाधिभूतमायानिष्ठसत्त्वरजस्तमोगुणभेदेन विष्णु-ब्रह्म-महेश्वर इत्यादिशब्दवाच्यतां लभते। निरवच्छिन्नः परमात्मा ब्रह्मेत्युच्यते'[1]।

प्रपञ्चोत्पत्तावद्वैतसिद्धान्तानुयायिनामाचार्याणावैमत्यमपि दृश्यते। अत्र तत्त्वनिर्णयकारो मायाब्रह्मद्वयमपि प्रपञ्चोपादानमिति मन्यते। सत्ताजाड्यरूपोभयधर्मानुगत्या जगदुत्पत्तिस्तत्र ब्रह्म विवर्तमानतयोपादानमविद्यापरिणामतया।

न केवलं ब्रह्म जगन्निमित्तं प्रपञ्चसृष्टिः प्रमदाबलेन ।
विवर्तते ब्रह्म निमित्तमेत्य सशक्तमायापरिणामहेतुः ।।

सङ्क्षेपशारीरककारस्तु ब्रह्मैवोपादानकारणमविद्या तु द्वारमात्रमित्याह। स्वप्नादौ चेतनस्याप्युपादानतादर्शनात्। न हि तत्र चेतनातिरिक्तं किञ्चिदवशिष्यते। न च कूटस्थस्य स्वत उपादानत्वे तद्विकारापत्तिः, मायाया अपि द्वारत्वेन कारणत्वस्वीकारात्। एतेन मायोपहितब्रह्म प्रपञ्चोपादानहेतुरिति फलम्। तथा चोक्तम्—

'उपादानता चेतनस्यापि दृष्टा यथा स्वप्नसर्गे विचित्रे प्रतीचः।
यथा चोर्णनाभस्य सूत्रेषु पुंसां यथा केशलोमादिसृष्टौ च दृष्टा'[2]।।

मायाद्वारमत्र प्रपञ्चसृष्टिकर्मोपाधिः। अविद्यारूपक्रियोपाधिमाश्रित्य चिदात्मा प्रपञ्चसर्जने क्षमते। तत्र ब्रह्मणोऽधिष्ठानतया विवर्तोपादानत्वं मायोपहितस्य चेतनत्वाच्च कर्तृत्वमित्यभिमन्यते। अविद्या हि सृष्टिकर्माश्रिता परिणामहेतुमात्रम्।

'अज्ञानतज्जघना चिदधिक्रियायां द्वारं परं भवति नाधिकृतत्वमस्याः ।
नाचेतनस्य घटतेऽधिकृतिः कदाचित्कर्तृत्वशक्तिविरहादिति वक्ष्यते हि'[3] ।।

---

१. वेदान्तपरिभाषा, प्रत्यक्षपरिच्छेदे; २. सङ्क्षेपशारीरके-१।५४५।
३. सङ्क्षेपशारीरके-१।५५५;

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भामतीकारमते जीवाश्रितमायाविषयीकृतस्य ब्रह्मण एव जाड्याश्रयत्वेन प्रपञ्चाकारेण विवर्तोपादानता। माया सहकारिमात्रम्। उक्तञ्चानुमानिकाधिकरणे 'तदधीनत्वादर्थवत्'[1] इति सूत्रशाङ्करभाष्यं व्याकुर्वता वाचस्पतिमिश्रेण—'प्रपञ्च-विभ्रमस्य हीश्वराधिष्ठानत्वमहिविभ्रमस्येव रज्ज्वधिष्ठानम्, तेन यथाऽहिविभ्रमो रज्जूपादानः, एवं प्रपञ्चविभ्रम ईश्वरोपादानः, तस्माज्जीवाधिकरणाऽप्यविद्या निमित्ततया विषयतया वेश्वरमाश्रयत इतीश्वराश्रयेत्युच्यते, न त्वाधारतया, विद्यास्वभावे ब्रह्मणि तदनुपपत्तेः'[2]।

सिद्धान्तमुक्तावलीकाराः प्रकाशानन्दस्वामिनस्तु, 'तदेतद् ब्रह्मापूर्व-मनपरमनन्तरमबाह्यम्'[3], 'आशीर्यो न हि शीयते, असङ्गो न हि सज्यते'[4], 'न तस्य कार्यं करणं च विद्यते'[5] इत्यादिश्रुतिप्रमाणेन दृश्यत्वाद्यनुमानसिद्धानिर्वचनी-यस्य जगतोऽनाद्यनिर्वचनीयाऽविद्यैव कारणं न ब्रह्म, तस्य कूटस्थत्वेन कार्यकारण-हीनत्वात्। कथं तर्हि ब्रह्मणो जगत्कारणत्वं श्रुतौ प्रसिद्धम्? अधिष्ठानत्वेन कारणत्वोपचारात्। तथा च श्रुतिः—'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्'[6]। उक्तञ्च भगवत्पादेन—'अस्ति तावद् ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावं सर्वज्ञं सर्वशक्तिसमन्वितम्'[7], अतोऽविद्यैवावरणविक्षेपशक्तिसमन्विता प्रपञ्चोपादानहेतुः।

व्याख्यानभेदान्मतेऽपि भेदः संदृश्यते कर्तृवचोविरूपात् ।
सिद्धान्ततः सर्वमतैक्यमेव मायाप्रपञ्चस्य निमित्तमेकम् ।।
तदाश्रयं ब्रह्म विवर्तहेतुरविद्ययाऽनित्यजगत्प्रसूतिः ।।

सा चाविद्या तमोगुणप्रधानावरणशक्त्या वास्तविकं वस्तुतत्त्वमावृत्त्य रजोगुणप्रधानविक्षेपशक्त्या वृक्षादिस्थावररूपं मनुष्यपशुसरीसृपादिजङ्गमस्वरूपञ्च प्रपञ्चं सृजति। परमार्थतोऽसद्रूपस्य प्रपञ्चजातस्याधिष्ठानं विना प्रत्ययाक्षमत्वाद् ब्रह्मैवाधिष्ठानत्वेनाश्रयते। तथा चोक्तम्—

'ब्रह्माज्ञानाज्जगज्जम ब्रह्मणोऽकारणत्वतः।
अधिष्ठानत्वमात्रेण कारणं ब्रह्म गीयते'[8] ।।

---

१. ब्र.सू.-१।४।३;
२. भामती, ब्र.सू.,शा.भा.,१।४।३।
३. बृ. उ.-२।५।१९;
४. बृ. उ. ३।३।२६।
५. श्वेता.-६।८;
६. तत्रैव।
७. तत्रैव-६।१९;
८. शा.भा.ब्र.सू.-१।१।१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यद्यपि 'यतो वा इमानि भूतानि जायन्ते'[१], 'तस्माद्वा एतस्मादाकाशः सम्भूतः'[२], 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च'[३] इत्यादिश्रुतयः परब्रह्मण एव प्रपञ्चोपादानत्वमवबोधयन्ति। उक्तञ्च सङ्क्षेपशारीरके-'निमित्तं च योनिश्च यत्कारणं तत्परं ब्रह्म सर्वस्य जन्मादिभाजः'[४]। अज्ञानस्य कारणत्वपक्षे किं सदज्ञानं कारणमसद्वा? सदिति चेन्नाभावरूपस्याज्ञानस्य सत्ताऽस्वीकारात्। स्वसजातीयविजातीयस्वगतभेदशून्यस्य ब्रह्मणोऽतिरिक्ताज्ञानस्य सत्तास्वीकारापत्तेः। स्वयं सत्ताहीनस्य कारणत्वव्यभिचाराच्च। 'आत्मा वा इदमेक एवाग्र आसीत्, नान्यत्किञ्चन मिषत्'[५], 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्'[६] इत्यादिश्रुति-विरोधापत्तेश्च। 'आत्मैवेदं सर्वम्'[७], 'अधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम्'[८], 'इदं सर्वं यदयमात्मा'[९] इत्यादिश्रुतिभिरात्मव्यतिरेकेणाभावदर्शनाद् ब्रह्मैव प्रपञ्चस्योपादानं निमित्तञ्च। लोके यथा लूताकीटः स्वोत्पाद्यमानं तन्तुलक्षणं कार्यं प्रति स्वचैतन्यप्रधानतया निमित्तं चैतन्यसन्निधानव्यतिरेकेण जडस्य देहस्य मृतशरीरवत्तन्तुजनकत्वासम्भवात् स्वशरीरप्राधान्येनोपादानं च भवति। यथा ब्रीह्यादिस्थावरान्ता ओषधयः पृथिव्यामेवोत्पद्यन्ते, तत्रैव च लीयन्ते। यथा च जीवतः पुरुषात् केशलोमानि सम्भवन्ति, तथैव निमित्तान्तराननपेक्ष्य विलक्षणमिदं जगद् अक्षररूपाद् ब्रह्मण उत्पद्यते। तथा चोक्तम्—

'यथोर्णनाभिः सृजते गृह्यते च यथा पृथिव्यामोषधयः सम्भवन्ति ।
यथा सतः पुरुषात् केशलोमानि तथाऽक्षरात् सम्भवन्तीह विश्वम्'[१०] ।।

'जन्माद्यस्य यतः'[११] इत्यनेनापि ब्रह्मणो जगज्जन्मादिकारणत्वमुक्तम्। तथा चोक्तं शाङ्करभाष्येऽपि—'अस्य जगतो नामरूपाभ्यां व्याकृतस्यानेककर्तृभोक्तृ-संयुक्तस्य प्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयस्य मनसाऽप्यचिन्त्यरचनारूपस्य जन्मस्थितिभङ्गं यतः सर्वज्ञात् सर्वशक्तेः कारणाद् भवति तद् ब्रह्मेति'[१२], 'यतो वा इमानि भूतानि जायन्ते, यस्मिन् जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति, तद् विजिज्ञासस्व तद् ब्रह्म'[१३] इति श्रुतिरपि ब्रह्मण उपादानत्वं बोधयति।

---

१. श्रीप्रकाशानन्दकृत-सि.मु., श्लो.-३८।
२. तैत्तिरीयोपनिषद्-३।१।१;
३. तैत्तिरीयोपनिषद्-२।१।१।
४. सङ्क्षेपशारीरके, श्लो.-५३२;
५. एतरेयो.-१।१।
६. छा.उप.-६।२।१;
७. छा.उ.-२५।२१।
८. मु.उ.-२।२।११;
९. बृ.उ.-२।४।६।
१०. मु.उ.-१।१।७;
११. ब्र.सू.-१।१।२। १२. ब्र.सू., शा.भा.-१।१।२; १३. तै.उ.-३।१।१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्रेदं जिज्ञास्यते—ब्रह्मणो निमित्तत्वेन कारणत्वमाहोस्विदुपादानत्वेन, कारणत्वस्य चोभयथा दर्शनात्। कार्यप्रकृतिरुपादानं यथा घटस्य मृत्तिका। तदितरद् दण्डादिनिमित्तकारणमुपादानादन्यन्निमित्तमिति लोकसिद्धम्। अत एव 'कार्यी निमित्ततया नाश्रीयते'[१] इति शाब्दिकनये प्रसिद्धम्। यद्यपि लोके एकस्य निमित्तत्वमुपादानत्वञ्च न प्रायेण दृश्यते, तथापि सर्वज्ञस्य सर्वशक्तिमतः परमेश्वरस्योभयं घटते। ईक्षापूर्वककर्तृत्वश्रवणान्निमित्तत्वम्। 'स ईक्षाञ्चक्रे'[२], 'सोऽकामयत बहु स्यां प्रजायेय'[३], 'एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम्'[४] इत्यादिश्रुतिभिरुभयत्वदर्शनात्। 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्'[५], 'अविद्योपदेशाच्च'[६], 'साक्षाच्चोभयाम्नानात्'[७], 'आत्मकृतेः परिणामात्'[८], 'योनिश्च हि गीयते'[९] इति बादरायणीयानि सूत्राणि ब्रह्मणः प्रकृतित्वमेव बोधयन्ति।

कार्यं दृष्ट्वा कारणानुमानात्, कार्यं हि जगत् सावयवमचेतनमशुद्धञ्च दृश्यते। अतस्तादृशेनैव कारणेन भवितव्यम्। न हि श्वेतसूत्रैर्लोहितः पट उत्पद्यते, कार्यकारणयोः सारूप्यदर्शनात्। ब्रह्म हि कूटस्थमविकारि निरवयवञ्च श्रूयते। तथा च श्रुतिः—'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्'[१०]। ब्रह्मण इच्छाशक्तेरेव परिणतिरिदं जगत्। सा चेच्छाशक्तिरविद्यैव नापरा काचित्। मायावच्छिन्नस्यैव ब्रह्मणो विवर्तोऽयं प्रपञ्चः। प्रकृतिर्हि द्विधा—परिणामोपादानभूता च। तत्र परिणामोपादानभूतायाः प्रकृतेरेव गुणाः कार्येष्वादधते, न तु विवर्तोपादानभूतायाः। अधिष्ठानसमसत्ताककार्यापत्तिः परिणामः, अधिष्ठानविषयसत्ताककार्यापत्तिश्च विवर्त इति वचनात्। दुग्धं दधि भवतीति परिणामः। शुक्तौ रजतमिति विवर्तः।

तथा चोक्तम्—

अतत्त्वतोऽन्यथाप्रथाविवर्त इत्युदीरितः।
सतत्त्वतोऽन्यथाप्रथा विकार इत्युदीर्यते[११] ।।

---

१. परिभाषेन्दुशेखरे, परि.-१०; २. प्रश्नो.-६।३।
३. तै.उ.-२।६; ४. मा-उ.-६।६।
५. ब्र.सू.-१।४।२४; ६. तदेव-१।४।२५।
७. तदेव-१।४।२५; ८. तदेव-१।४।२७।
९. तदेव-१।४।२८; १०. श्वेता.उ.-६।१९।
११. वाक्यपदीये, ब्रह्मकाण्डे, प्रदीपटीकायाम्, का.-१;

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथैन्द्रजालिको नटः स्वकीयैन्द्रजालविद्यया दर्शकसमुदायं मोहयित्वा स्वमायया नानाप्रपञ्चं सृजति, न च तत्र स्वयं मोहमुपैति, ऐन्द्रजालविद्याया नटाधीनत्वात्। तथैव निजेच्छाशक्तिरूपयाऽविद्यया प्राणिमात्रं विमोह्य जगत्सर्जनं विधत्ते परमात्मा। तथा चोक्तम्—

'अस्य द्वैतेन्द्रजालस्य यदुपादानकारणम्।
अज्ञानं तदुपाश्रित्य ब्रह्म कारणमुच्यते'[१]।।

मायावच्छिन्न ईश्वररूपः परमात्माऽपि अविद्यावशाद् विहितकर्मणां भोगेच्छया रामकृष्णादिरूपेणावतरति। तत्रापि जनिहेतुरविद्यैव। उक्तञ्च भगवता श्रीकृष्णेन—

'मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम्।
सम्भवः सर्वभूतानां ततो भवति भारत'[२]।।

यद्यपि सुखदुःखादिसमवायिकारणतावच्छेदकतयाऽऽत्मत्वजातिसिद्धौ परमेश्वरे सुखानुत्पादेन सुखसमवायिकारणत्वस्य तत्राभावात् परमेश्वरसाधारणी आत्मत्वजातिर्न सिद्ध्यति, तथापि फलोपधायकतारूपकारणतायाः परमेश्वरेऽसत्त्वेऽपि स्वरूपयोग्यताख्यरूपकारणतायाः सत्त्वेनात्मत्वजातिः सिद्ध्यति। 'ईश्वरेऽपि सा जातिरस्त्येव। अदृष्टादिरूपकारणाभावान्न सुखदुःखाद्युत्पत्तिः'[३]। नित्यस्य स्वरूपयोग्यत्वे फलावश्यंभावनियम इत्यस्याप्रयोजकत्वाद् भगवता शङ्करेणापि अविद्यायाः प्रपञ्चोपादानत्वमुरीकृतम्। तथा चोक्तम्—'अविद्यात्मिका हि बीजशक्तिरव्यक्तशब्दनिर्देश्या परमेश्वराश्रया मायामयी महासुषुप्तिः, यस्यां स्वरूपप्रतिबोधरहिताः शेरते संसारिणो जीवाः'[४]।

ननु प्रपञ्चोपादानं किं माया, ब्रह्म, उभयं वा। नाद्यः, अधिष्ठानमन्तरा मायाया एवासम्भवात् तस्याः कार्यकारणेन परिणामायोगाज्जडायास्तस्याश्चैतन्यायोगे प्रवृत्त्ययोगात्। कार्ये प्रपञ्चे सत्ताया अनुगमाद् मायामात्रस्योपादानत्वाभावात्। न हि मायायाः सत्त्वमङ्गीक्रियते। प्रपञ्चोपादानस्यैकत्वं सद्रूपत्वञ्च श्रुत्या बोधितम्। 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्'[५]। नापि द्वितीयः, ब्रह्मणः कारणत्वे तस्य सत्यत्वेन तदुपादानकस्य प्रपञ्चस्यापि सत्यत्वापातात्। 'सत्यं ज्ञानमनन्तं ब्रह्म'[६]। ब्रह्मणो निर्विकारत्वं श्रुतिभिः

---

१. ब्र.सू. वार्तिकम्;
२. गीता-१४।३।
३. न्या.सि.मु., आत्मत्वनिरूपणे;
४. शा.भा., ब्र.सू.-१।४।३।
५. छा.उ.-६।२।१;
६. तै.उ.-२।१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वीकारात्। 'निष्फलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्'[१]। न च जडत्वसत्यत्वयोरनुगमात् प्रपञ्चस्योभयोपादानकत्वं तृतीयः पक्षः स्वीकार्य इति वाच्यम्, विकल्पासहत्वात्। तथा हि किं पटं प्रति सूत्राणामिव परस्परविशिष्टयोः समप्रधानयोर्मायाब्रह्मणोरुपादानत्वम्, उत मायाशक्तिमतो ब्रह्मणो मायाद्वारस्य वा तस्य। न तावत् प्रथमः पक्षः, उभयोः समप्रधानत्वाद् ब्रह्मणोऽपि विकारित्वापातात्। सूत्रारब्धपटवत् प्रपञ्चोऽप्युभयारब्धः स्यात्। किञ्चोभयोः समप्रधानयोरुपादानत्वे प्रपञ्चे सत्यत्वानिर्वचनीययोरापातः, सितासितसूत्रारब्धपटे सितासितत्ववत्। न च तयोर्धर्मयोरेकत्र सहावस्थितिः सम्भवति विरोधात्।

द्वितीयपक्षोऽपि न युक्तः, मायाशक्तिमद् ब्रह्मण उपादानत्वे तस्य विकारित्वादनित्यत्वापत्तिर्दुर्वारा स्यात्। मायाशक्तेर्विशेषणत्वे तस्याश्च ब्रह्मणि विद्यमानत्वेन निर्विशेषश्रुतिविरोधः। मायाया विशेषणत्वेऽपि मायाविशिष्टस्याब्रह्मत्वे तस्य जगत्कारणत्वानुपपत्तिः स्यात्। किञ्च विशिष्टस्य ब्रह्मणः परिणामरूपं जगदिति समसत्ताककार्यापत्तेर्विवर्तवादहानापत्तिः, असमसत्ताककार्यापत्तिर्विवर्त इति स्मरणात्।

एवमेव मायाद्वारा ब्रह्म कारणमिति तृतीयपक्षोऽपि न युज्यते। तथा हि द्वारत्वं सहकारित्वम्। मायायाः सहकारित्व उपादानत्वाभावात्, प्रपञ्चे जडत्वादिधर्मानुपपत्तेः। न हि घटे सहकारिदण्डादिधर्मा अनुवर्तन्ते। अतो मायोपहितं ब्रह्म जगत्कारणम्। 'यः सर्वज्ञः स सर्ववित्'[२]। 'तस्माद् वा एतस्मादात्मन आकाशः सम्भूतः'[३] इत्यादिश्रुतेश्च। तथाऽवगमात्। सर्वज्ञत्वञ्च ब्रह्मणः स्वोपाधिभूतमायायां तत्परिणामे च प्रतिबिम्बितत्वेन भासकत्वम्। अतीतानागतादिविषयाकारपरिणतोपाधौ प्रतिबिम्बितं चैतन्यं सर्वं पश्यति। एवमज्ञानोपहितत्वं तस्य युक्तम्। तदेव ब्रह्म जगदुपादानम्। तस्माद्वा एतस्माद् इत्यनेनाऽप्यज्ञानोपहितादात्मनो जगज्जायत इति स्पष्टमेवावगम्यते। तथा चोक्तम्—'स्वमायया सृष्टमिदं सदसल्लक्षणं विभुः। प्रविष्ट ईयते तत्तत्स्वरूपोऽग्निरिवैधसि'[४]। सा च माया मया= प्रमया (ज्ञानेन) याति = निवर्तत इति व्युत्पत्त्या ज्ञाननिवर्त्या ब्रह्मणो विशेषशक्ति सहकारिणी वा।

मायोपहितस्य ब्रह्मणः कारणत्वेऽपि मायायाः परिणामितया ब्रह्मणश्च विवर्ताधिष्ठानतया कारणत्वाङ्गीकारान्न पूर्वोक्तदोषाः सम्भवन्ति। एवञ्च जगदुपादानत्वं ब्रह्मण आरोपितम्। 'शक्तिद्वयवदज्ञानोपहितं चैतन्यं स्वप्रधानतया

---

१. श्वेता.उ.-६।१९; २. मु.उ.-१।१।९।
३. तै.उ.-२।१।१; ४. श्रीमद्भागवते-११।७।४७।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निमित्तं स्वोपाधिप्राधान्यतयोपादानं च भवति'[१]। 'तत्सृष्ट्वा तदेवानुप्राविशत्'[२] इति श्रुतेश्च। मायोपहितस्यैव ब्रह्मणो जीवेश्वरादिरूप औपाधिकभेदः। 'सर्वदैकरूपोऽप्यौपाधिकभेदेन त्रिविधः—ईश्वरो जीवस्साक्षी चेति'[३]। तथा च निर्विकारत्वनिर्विशेषत्वश्रुतिः सामञ्जस्यं भजते। न च मायापरिणामे मनागपि ब्रह्मणो विकारित्वं सम्भवति, आरोपितेनाधिष्ठानस्य संश्लेषासम्भवात्। न ह्यारोपितेन रजतेन मनागपि शुक्तिसंश्लेषो भवति। तथा च—'चेतनं ब्रह्मैकमद्वितीयं जगतः कारणम्' इति यदुक्तं तन्नोपपद्यते, कस्मात् उपसंहारदर्शनात्। इह हि लोके कुलालादयो घटपटादीनां कर्तारो मृद्दण्डचक्रसूत्रसलिलाद्यनेककारकसाधनोपसंहारेण सङ्गृहीतसाधनाः सन्तस्तत्तत्कार्यं कुर्वाणा दृश्यन्ते।

यथा चक्रचीवरदण्डाद्यनेककारणसमवहितेषु कुलालेहाधीना मृत्तिकैव घटाकारेण परिणमते, तथैव प्रपञ्चाकारेण मायापरिणामः...., ब्रह्मणस्तु नित्यशुद्धबुद्धमुक्तस्वभावत्वान्न विकारसम्भवः। 'प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः। भूतग्राममिमं कृस्नमवशं प्रकृतेर्वशात्'[४]। परमात्मवशीभूता माया तदिच्छानुरूपमेव प्रपञ्चं सृजति। तथा चोक्तम्—'यथा च मायावी स्वयं प्रसारितां मायामिच्छयाऽनायासेनैवोपसंहरति, एवं शारीरोऽपीमां सृष्टिमुपसंहरेत्'[५]। मायाया ब्रह्मणः परतन्त्रत्वात् तत्कार्यमपि परतन्त्रमिति। 'त्वं मायया विगुणयाऽऽत्मनि दुर्विभाव्यं व्यक्तं सृजस्यवसि लुम्पसि तद्गुणस्थः'[६]। 'प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः'[७]।

वाचस्पतिमिश्रास्तु जीवाश्रिताविद्याविषयीकृतं ब्रह्मैव जाड्याश्रयप्रपञ्चाकारेण विवर्तमानतयोपादानं माया हि सहकारिमात्रम्। 'अविद्याकल्पितेन तु नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मना तत्त्वातत्त्वाभ्यामनिर्वचनीयेन परिणामादिव्यवहारास्पदत्वं ब्रह्म प्रतिपद्यते'[८]। उक्तञ्च वेदान्तकल्पतरुकारेण—

'स्वशक्त्या नटवद् ब्रह्म कारणं शङ्करोऽब्रवीत्।
जीवभ्रान्तिनिमित्तं तद् बभाषे भामतीपतिः।।
अज्ञातं नटवद् ब्रह्म कारणं शङ्करोऽब्रवीत्।
जीवाज्ञातं जगद्बीजं जगौ वाचस्पतिस्तथा'[९]।

---

१. वेदान्तसारे-१०।११;
२. तै.उ.-२।६।१।
३. सिद्धान्तबिन्दौ पृ.-३४९;
४. शा.भा., ब्र.सू.-२।१।२१।
५. गीता-९।८;
६. शा.भा., ब्र.सू.-२।२।२१।
७. श्रीमद्भागवते-११।६।८;
८. गीता-९।८।
९. भामती, शा.भा.ब्र.सू.-२।१।२६;

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इयमविद्यैव सकलद्वैतोत्पत्तौ निमित्तम्। ब्रह्मजीवभेदो ब्रह्मस्वरूपमावृत्य जीवेश्वरप्रभेदश्च मायाधीनावेव। अविद्याप्रतिबिम्बितं चैतन्यं जीवः। बिम्बभूतमीश्वरः। अविद्यायाश्चानादित्वादेव अनादिजीवब्रह्मविभागहेतुत्वमविरुद्धम्। अविद्यानादित्वं च 'प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि'[1] इति स्मृतावुक्तम्। प्रकृतिपदेनात्र मायाऽभिप्रेता। 'मायां तु प्रकृतिं विद्यादिति'[2] श्रुतेः। मायाऽविद्ययोरभेदात्। अनिर्वचनीयत्वादेव ज्ञाननिवर्त्यत्वमपि श्रुतेः, मायाऽविद्ययोरभेदात्। अनिर्वचनीयत्वादेव ज्ञाननिवर्त्यत्वमपि सिद्ध्यति। तत्राविद्याप्रतिबिम्बितं चैतन्यं जीवः। बिम्बभूतमीश्वरः। उभयानुस्यूतं शुद्धमिति विभागः। जीवस्य प्रतिबिम्बत्वे 'रूपं रूपं प्रतिरूपो बभूव'[3], 'एकधा बहुधा चैव दृश्यते जलचन्द्रवत्' इति श्रुतिप्रमाणम्। सा चाविद्या जीवब्रह्मोभयत्र सम्बन्धमाश्रित्य जीवभागमाश्रित्यैव प्रपञ्चं सृजति। उक्तञ्च विवरणकारेण—'यद्यप्यसावविद्या चिन्मात्रसम्बन्धिनी जीवब्रह्मणी विभजते, तथापि ब्रह्मस्वरूपमुपेक्ष्य जीवभाग एव पक्षपातिनी संसारं जनयेत्'[4]।

अयं भावः—यथा न्यायनये नित्येषु विकारहीनेषु परमाणुषु ईश्वरेच्छाशक्तिवशात् क्रिया सञ्जायते। ततः परमाणुद्वयस्यैव द्व्यणुकं द्व्यणुकत्रयस्यैकस्त्रसरेण्वादिक्रमेण पृथिव्यादिद्रव्याणामुत्पत्तिः। तत्रेश्वरेच्छारूपशक्त्या एव प्राधान्यम्। सांख्यसिद्धान्ते मूलप्रकृतिरविकृतिस्ततोऽहंतत्त्वमुत्पद्यते। तस्माच्च पञ्चतन्मात्रादिक्रमेण प्रपञ्चसृष्टिः।

कुत्रचिदीश्वरेच्छाऽसौ मायाऽविद्यास्वरूपिणी।
प्रकृतिः सांख्यशास्त्रे च प्रपञ्चोत्पत्तिकारणम्॥
स्वतन्त्रापि पराधीना ब्रह्मसङ्केतानुवर्तिनी।
स्वयं च जडरूपत्वाच्चैतन्यमाश्रयते मुदा॥

प्रपञ्चो हि द्विधाः जाग्रतः स्वाप्निकश्चेति। तत्र जाग्रत्प्रपञ्चस्येव स्वप्नप्रपञ्चस्यापि निमित्तमविद्यैव। तत्र जागरितप्रपञ्चस्तु अविद्याया आवरणशक्त्यावृतं वस्तुतत्त्वमनादिवासनावासितविक्षेपात्मिकया विमोहशक्त्याऽन्यथैवावभासते, चाकचिक्याधिक्याच्छुक्तौ रजतवत्। द्विविधं हि विषयावरकमज्ञानम्। एकं विषयाश्रितं रज्ज्वादिविक्षेपोपादानभूतं कार्यकल्प्यम्, अन्यत् पुरुषाश्रितम् 'इदमहं न जानामि' इत्यनुभूयमानम्। यतश्च पुरुषाश्रितमज्ञानमधिष्ठानभूतरज्जुविषयकाज्ञानतादात्म्यापन्नसर्पादिविक्षेपे नोपादानम्। न च विषयाश्रितमज्ञानम् 'इदमहं न

१. वेदान्तकल्पतरुः, ब्र.सू.-२।१।१९; २. गीता-१३।१९।
३. श्वेता.उ.-२।२।९; ४. कठो.-२।२।७।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जानामि' इति साक्षिरूपप्रकाशसम्बद्धम्। अतोऽज्ञानद्वयमावश्यकम्। 'तथा च घटादेः स्वावच्छिन्नचैतन्येऽध्यस्ततया विषयचैतन्यसत्तैव घटादिसत्ता। अधिष्ठान-सत्ताऽतिरिक्ताया आरोपितसत्ताया अनङ्गीकारात्'[१], 'तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति'[२]। यद्यपि ब्रह्मातिरिक्तं सर्वमेव जडं तथापि प्रत्यक्षतोऽनु-भूयमानवैलक्षण्येन कस्यचित् किञ्चित् स्वभावविशेषादिकमास्थेयम्। यथा घटदीपकौ द्वावपि जडौ, तथापि घटस्य स्वभाने आलोकचक्षुःसन्निकर्षा-द्यपेक्षाप्रदीपस्य तु आलोकानपेक्षा, स तु घटं प्रकाशयत् स्वात्मानमपि प्रकाशयति, एवमेव वृत्तिरपि विनैव वृत्त्यन्तरं तदर्थं जाता तं प्रकाशयन्ती स्वात्मानमपि प्रकाशयति। ननु ब्रह्मण एव वस्तुत्वे जीवस्य शुक्त्यादेश्चावस्तुत्वात्कर्तृत्वाद्यध्या-रोपे रजताद्यध्यारोपे चाव्याप्तिः स्यादिति चेन्न, ब्रह्मण्येव जीवत्वस्यापि कल्पितत्वात्कर्तृत्वादेश्च सोपाधिकभ्रमतयोपाध्यनुरक्ते ब्रह्मण्येवाध्यारोपाच्छुक्त्यादे-रपि रजताधिष्ठानचैतन्यावच्छेदकत्वेनाधिष्ठानत्वमुपचर्यते। न पुनस्तस्यैवाधिष्ठान-त्वमज्ञातं हि वस्त्वारोपाधिष्ठानम्। न च शुक्त्यादेरज्ञाततत्वमस्ति जडत्वाच्चिन्मात्र-निष्ठत्वाच्चिन्मात्रविषयत्वाच्चाज्ञानस्य।

ततश्च सत्यस्य वस्तुनो मिथ्यावस्तुसम्भेदावभासोऽध्यारोपः। एतेन चिज्जडयोः परस्परतादात्म्याध्यासे शून्यमेव जगतस्तत्त्वं स्यादध्यस्तस्य मिथ्यात्वादिति केषाञ्चिच्चोद्यं निरस्तम्। भ्रमकाले परिस्फुरदंशस्य मिथ्यात्वेऽ-प्यपरिस्फुरतोऽशान्तस्य विद्यमानत्वात्। तदुक्तमभियुक्तैः—

'अध्यस्तमेव परिस्फुरति भ्रमेषु नान्यत्कथञ्चन परिस्फुरति भ्रमेषु।
रज्जुत्वशुक्तिशकलत्वमरुक्षितित्व-चन्द्रैकताप्रभृतिकानुपलम्भनेन ।।

त्रिविधो हि जीवः, स्वोपाध्यवान्तरभेदेन विश्वतैजसप्राज्ञभेदाच्च। तत्रा-विद्यान्तःकरणस्थूलशरीरावच्छिन्नो जाग्रदवस्थाभिमानी विश्वः। स एव स्थूलशरीराभिमानरहित उपाधिद्वयोपहितः स्वप्नाभिमानी तैजसः। शरीरान्तः-करणोपाधिद्वयरहितोऽन्तःकरणसंस्कारावच्छिन्नाविद्यामात्रोपहितसुषुप्त्यभिमानी प्राज्ञः। तत्र जाग्रदवस्थायां स्वप्नावस्थायाञ्च वासनाप्रवर्तकमनोऽनुभावनया प्रपञ्चसृष्टिः। सुषुप्तौ तु वृत्तिसहितस्य मनसः पुरीततनाड्यां प्रविष्टौ सङ्कल्पादिराहित्यान्न किमपि भानम्। सङ्कल्पवृत्तावुपरतायां जगल्लयोऽयं पुनः प्रादुर्भावफलको नात्यन्तिको नाशः, उत्तरसर्गानुपपत्तेः। नापि सर्वथाऽभानम्, प्रतिभासमात्रशरीरस्य मिथ्यावस्तु-नोऽनवभासे तदभावस्यैवापत्तेः; किन्तु सुप्तेव तिष्ठति कार्य्यप्रवृत्त्यभावात्। यथा

१. विवरणप्रमेयसङ्ग्रहेऽध्यासप्रकरणे। २. वेदान्तपरिभाषा, प्रत्यक्षनिरूपणे;

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्फटिके जपाकुसुमसन्निधानाद्रक्तत्वावभासस्तत्रैव स्फटिकांशप्रमोषे यद् गगनत्वावभास:, तथैव शुद्धायां चिति मायोपाधिसान्निध्यादीश्वरत्वाध्यास:। सोऽयमात्माऽऽवरणविक्षेपशक्त्याऽविद्याया आश्रय:। तत्रावरणांशेन शुद्धरूपतिरोधानम्। विक्षेपांशेनेशादिस्थूलदेहान्तानां प्रतिभास:। तयोर्निवृत्तौ शुद्धचित्स्वरूपेणावतिष्ठते। तथा चोक्तम्—

'प्रकृतौ प्रविलीनेषु भेदेष्वेकत्वदर्शिनाम् ।
द्रव्यसत्त्वं प्रपद्यन्ते स्वाश्रया एव जातय:'[1] ।।

चित्तस्य द्रव्यरूपो वृत्त्याख्य: परिणाम इन्द्रियप्रणाल्या निर्गत्य विषयेण संयुज्य सूक्ष्मावस्थारूपविषयवासनावशात् तत्तद्विषयाकारेण परिणमते। न तु तस्यां वृत्तौ संयुक्तबाह्यविषयप्रतिबिम्ब:, स्वप्नादौ बाह्यविषयासंयोगेन तत्प्रतिबिम्बासम्भवात्। तत्रोभयोरियान् भेद:, जागरितप्रपञ्चभाने बहिर्मुखेन्द्रियप्रणाल्या निर्गत्य चित्तवृत्तिर्बाह्यविषयेण संयुज्य तदाकारेण परिणमते। '[2]जागरितस्थानो बहि:प्राज्ञ: सप्ताङ्ग एकोनविंशतिमुख: स्थूलभुग्वैश्वानर:। स्वप्नप्रपञ्चभाने अन्तर्मुखेन्द्रियप्रणाल्या वासनामात्रेण कल्पिते व्यवहारातीते विषये संयुज्य चित्तवृत्तिर्वासनाकल्पितविषयाकारेण परिणमते'[3]। 'स्वप्नस्थानोऽन्त:प्रज्ञ: सप्ताङ्ग एकोनविंशतिमुख: प्रविविक्तभुक्तैजस:। अविद्याऽऽवृतस्य शुक्त्यादि-रूपाधिष्ठानस्य रजतादिरूपेण विवर्त एव प्रपञ्चसृष्टि:। तृषिता मृगा अपां धारा: पश्यन्ति, न च ता: सन्ति, यथा गन्धर्वनगराणि दूरतो दृश्यन्ते, उपसृत्य च नोपलभ्यन्ते। तथैव बहिर्देशेऽसत एव जगत्प्रत्यय:'[4]। तथा चोक्तम्—

'मृगतृष्णायामुदकं शुक्तौ रजतं भुजङ्गमो रज्ज्वाम् ।
तैमिरिकचन्द्रयुगवद् भ्रान्तमखिलं जगद्रूपम्'[5] ।।

निद्राक्षये व्यावहारिकप्रपञ्चज्ञानेन निवर्त्यशीलो व्यवहारायोग्य: स्वप्नप्रपञ्चो व्यावहारिकसत्ताकशुक्त्याद्यधिष्ठानज्ञानेन निवर्त्यशीलरजतादिवद् भ्रम इति केचित्। तथा चाह भाष्यकार:—'किं चाहमद्य स्वप्ने हस्तिनमद्राक्षं नेदानीं तं पश्यामीति दृष्टमेव प्रतिबुद्ध: प्रत्याचष्टे'[6]। वेदान्तिनस्तु सर्वस्यापि प्रपञ्चस्य मायामयत्वान्नोभयोर्भेद:। शुक्त्यधिष्ठाने भ्रमेण प्रतीयमानरजतादिदृष्टान्तेन जगत्प्रत्ययं मन्यमाना ब्रह्मभिन्नं सर्वं मिथ्यैवावगच्छन्ति। यथा व्यावहारिकसत्ताज्ञानेन भ्रमसत्ता निवर्तते, तथैव व्यावहारिकसत्ताऽपि त्रिकालाबाध्यपारमार्थिकसत्ताज्ञानेन निवर्तते।

१. श्वेता.उ.-६।१४;
२. संक्षेपशारीरके; ३६।
३. वाक्य.-३।४३;
४. माण्डूक्यो.-१।२।
५. तत्रैव-१।३;
६. प.सा.-२२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उभयोर्निवर्त्यशीलत्वात् समत्वमिति न तयोर्भेदः। उक्तञ्च 'मायामात्रं तु कात्स्न्र्येनानभिव्यक्तस्वरूपत्वात्'[१]।

स्वप्नदृष्टान्तेन प्रपञ्चसर्जनं मन्यमाना वेदान्तिनो वस्तुतो बाह्यसत्ताशून्या एव, अनादिवासनावासितचित्तवृत्तौ स्थिता विषया भासन्ते। 'स्वाप्नो विकारो वासनामय एव, न तु पारमार्थिकोऽस्ति'[२]। तथा च श्रुतिः— 'न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ, रथान् रथयोगान् पथः सृजते'[३], 'न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वात्'[४]। स्वाप्निकप्रपञ्चस्य मिथ्यात्वं प्रसाध्य तद्दृष्टान्तेनैव जागरितस्य मिथ्यात्वं विचिन्वन्ति। यथा बाह्यसत्ताहीनमपि मायाशक्तिप्रसारिपण्यापणगृहप्रसादपुञ्जनपदव्यवहाराकीर्णमिव गन्धर्वनगरं चक्षुरिन्द्रियव्यवहारयोग्यम्। यथा च स्वप्ने प्रियसंयोगवियोगजन्यसुखाद्यनुभवः, तथैव जागरितप्रपञ्चोऽपि।

'स्वप्नमाये यथा दृष्टे गन्धर्वनगरं यथा।
तथा विश्वमिदं दृष्टं वेदान्तेषु विचक्षणैः'[५] ।।

सर्वत्रापि मायाशक्त्यैव प्रपञ्चसृष्टिः, ब्रह्म तु निमित्तमात्रम्। 'सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकैव सत्यम्'[६]। एवमेव मायामयजागरितस्वप्नादिप्रपञ्चसृष्टिः सत्यन्तु ब्रह्मैव नान्यत् किञ्चित्। सा चाविद्या—

नासद्रूपा न सद्रूपाऽस्या अनिर्वचनीयता।
प्रपञ्चोऽपि तदापन्नोऽनिर्वचनीय उच्यते।
उपादत्ते च स्वं रूपं प्रपञ्चोत्पत्तिहेतवे।
तद्विकारं समासाद्य जगदेतत् प्रवर्तते ।।
सत्त्वासत्त्वप्रधानत्वान्मायाऽविद्येति कथ्यते।
एतदुपाधिना ब्रह्मजीवेश्वराभिमानिनौ ।।
जीवोऽविद्यावशीभूतो मायाऽवच्छिन्न ईश्वरः।
साक्षिणौ च समाख्यातौ तदुपाधिस्वरूपतः ।। इति।

---

१. ब्र.सू.-३।२।३;
२. शा.भा., ब्र.सू.-२।३।४
३. बृहदा.उ.-४।३।१०;
४. तत्रैव-४।३।१०।
५. माण्डू.-२।३१;
६. छान्दो.उ.-६-१-४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाकविभवभूतिनाट्यसाहित्ये जीवनमूल्यदर्शनम्

डॉ॰ बालकृष्णशर्मा

सहायकप्राध्यापकः, साहित्यविभागाध्यक्षश्च
शासकीयसंस्कृतमहाविद्यालये
ग्वालियरनगरे

❀ ❀ ❀

क्रान्तदर्शिनः कवयः काव्यरचनासु इतिवृत्तसमाश्रयेण जीवनदर्शनं प्रस्तुवन्ति। अस्यां जीवनदर्शनप्रस्तुत्यामेव कवेः कवित्वं भासते, न तु कथावस्तुनि। यतो हि कथावस्तुप्रस्तुतिस्त्वितिहासादीनां विषयः। यथोक्तं ध्वन्यालोककारेणानन्दवर्धनेन—

'न हि कवेरितिवृत्तमात्रनिर्वहणेन किञ्चित्प्रयोजनमितिहासादेव तत्सिद्धेः'[1]।

इदं जीवनदर्शनं कविः कान्तासम्मितोपदेशरूपे व्यञ्जनावृत्त्या निबध्नाति येन तस्य काव्यमतितरां शोभामावहति। अत एव ध्वनिकारेणोक्तम्—

'सारभूतोऽर्थः स्वशब्दानभिधेयत्वेन प्रकाशितः सुतरामेव शोभामावहति। प्रसिद्धिश्चेयमस्त्येव विदग्धविद्वत्परिषत्सु यदभिमततरं वस्तु व्यङ्ग्यत्वेन प्रकाश्यते न साक्षाच्छब्दवाच्यत्वेन'[2]।

जीवनदर्शने मानवजीवनस्य विविधपक्षाः समाहिताः। तत्र सत्पक्षोऽपि विराजते असत्पक्षश्च। काव्ये नायकादिपात्राण्याश्रित्य जीवनस्य सत्पक्षः प्रकाश्यते, प्रतिनायकादिपात्राण्याश्रित्य च जीवनस्यासत्पक्षः प्रदर्श्यते। सदसतोः सङ्घर्षं प्रदर्श्य पार्यन्तिकरूपेण कविः सत्पक्षस्योत्कर्षं निबध्नाति। अत्र सत्पक्षप्रतिष्ठापनोद्देश्येन कविर्नायकादीनां पात्राणां येषां गुणानां निबन्धनं विदधाति, त एव जीवनमूल्यरूपेण ज्ञायन्ते। अतो जीवनमूल्यपदेन तत्तत्पात्रोत्कर्षापकर्षप्रतिपादकवैशिष्ट्यानि गृह्यन्ते। यतो हि काव्ये नाट्ये च सत्पक्षोत्कर्षप्रतिपादनमेव भवति कवेः परमं प्रयोजनं यस्य सम्यगधिगतये स असत्पक्षस्यापि विन्यासं करोति, अतो

१. ध्वन्यालोके-३।४ वृत्तौ; २. तत्रैव-४।५ वृत्तौ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जीवनमूल्यदर्शनसन्दर्भे सत्पक्षस्यैव विमर्शो विधीयते। अपि च 'शब्दोपदेशापशब्दोपदेशयोर्मध्ये शब्दोपदेश एव ज्याय:'[१] इति पातञ्जलमहाभाष्यदर्शितसरण्या सदसत्पक्षयोर्मध्ये सत्पक्षविन्यास एव ज्यायो भवति येन जीवनमूल्यप्रसङ्गे सत्पक्षविमर्श एव श्रेयस्कर:।

इत्थं प्रतीयते यज्जीवने उत्कर्षाधायकतत्त्वानां सद्भावेन विनिवेशनेन वा तद् बहुमूल्यं भवति, अपकर्षाधायकतत्त्वानां सद्भावेन विनिवेशनेन वा च तद्धेयं भवति। कस्यचिज्जीवने किं तत्त्वमुत्कर्षकारि किञ्चापकर्षकारीति कविना सम्यग्रूपेण लोकशास्त्राभ्यामवगन्तव्यम्। अस्माद्धेतो: कवये लोकशास्त्रयोर्बोधरूपिणी उचितानुचितविवेकरूपिणी वा व्युत्पत्तिरपेक्षिता भवति। अत: काव्यशास्त्रिभि: काव्यहेतुनिरूपणावसरे व्युत्पत्तिरपि निरूपिता। तद्यथा—

'छन्दोव्याकरणकलालोकस्थितिपदपदार्थविज्ञानात्।
युक्तायुक्तविवेको व्युत्पत्तिरियं समासेन'[२] ।।
'उचितानुचितविवेको व्युत्पत्तिरिति यायावरीय:'[३]।

जीवनमूल्यव्याख्यायां भवभूति: परमसिद्धहस्तो दत्तचित्तश्च प्रतिभाति। स जीवनमूल्याकलनाय गुणरूपमानदण्डमुररीकरोति। तद्यथा तस्याधोलिखितेन पद्येन प्रकटीभवति—

'शिशुर्वा शिष्या वा यदसि मम तत्तिष्ठतु तथा
विशुद्धेरुत्कर्षस्त्वयि तु मम भक्तिं द्रढयति।
शिशुत्वं स्त्रैण्यं वा भवतु ननु वन्द्यासि जगतां
गुणा: पूजास्थानं गुणिषु न च लिङ्गं न च वय:'[४] ।।

अर्थाद् यावन्मात्रं यस्य जीवनं गुणनिर्भरं भवति तावन्मात्रमेव तस्य जीवनस्यापेक्षा भवति, जीवनापेक्षानुसारेण च जीवनमूल्यं निश्चीयते। जीवनमूल्यानुसारेण कस्यचिज्जनस्य महत्त्वं स्थानं वा लोके निर्धार्यते। तद्यथा भवभूतिनोक्तम्—

'कष्टं जन: कुलधनैरनुरञ्जनीयस्तन्नो यदुक्तमशिवं न हि तत्क्षमं ते।
नैसर्गिकी सुरभिण: कुसुमस्य सिद्धा मूर्ध्नि स्थितिर्न चरणैरवताडनानि'[५] ।।

---

१. महाभाष्ये पस्पशाह्निके; २. रुद्रटकाव्यालङ्कारे-१।१८।
३. काव्यमीमांसाया: प्रथमाधिकरणस्य पञ्चमाध्याये।
४. उत्तररामचरिते-४।११; ५. तत्रैव-१।१४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जीवनमूल्यविवेचनप्रसङ्गे ज्ञातव्यं यदिदं द्विधा भवति व्यापकजीवनमूल्यं प्रासङ्गिकजीवनमूल्यञ्चेति भेदाभ्याम्। तत्र ये गुणाः सार्वकालिकाः सार्वभौमाः सार्वजनीनाश्च ते व्यापकजीवनमूल्ये उपादीयन्ते, ये च यथाकालं—

यथास्थानं यथाप्रसङ्गं वा ग्राह्यास्ते प्रासङ्गिकजीवनमूल्ये समादधति। महाकविभवभूतिः स्वनाटकेषु उभयविधगुणान् यथाप्रसङ्गं निरूपयति। उत्तररामचरितेऽतिख्याते करुणरसप्रधाने स्वसर्वोत्कृष्टनाटके कविना कारुण्यस्नेहदयासौख्यप्रियवृत्तिवाक्संयमकल्याणीमतिप्रभृतिव्यापकजीवनमूल्यानां यथास्थानं सुष्ठुतरं निबन्धनं कृतमस्ति। एवमेवातिथ्यप्रजावात्सल्यापत्यस्नेहदाम्पत्यप्रेमपातिव्रत्यशिष्यसमदृष्टिप्रभृतिप्रासङ्गिकजीवनमूल्यानामपि नाटकेऽस्मिन् यथाप्रसङ्गं विन्यासो विहितो नाटककारेण। अतोऽत्र समासेन केषाञ्चन जीवनमूल्यानां विमर्शो विधीयते।

'उत्तररामचरितमिति' प्रथिते रामस्य राज्यसिंहासनाधिरोहणोत्तरकालिकेतिवृत्तनिरूपके नाटके कविरादर्शनृपतिजीवनमूल्यादर्शपतिजीवनमूल्ययोर्मध्ये द्वन्द्वं प्रस्तौति। रामो द्वयोरादर्शयोः प्रतिष्ठापनाय यथाशक्यमाजीवनं यतते। एकत्र स 'राजा प्रकृतिरञ्जनात्' इति न्यायेन राज्ञो जीवनमूल्यं व्यञ्जयितुमित्थं वदति—

'स्नेहं दयां च सौख्यं च यदि वा जानकीमपि ।
आराधनाय लोकानां मुञ्चतो नास्ति मे व्यथा'[१] ।।

अपरत्रादर्शपत्युर्जीवनमूल्यख्यापनाय स प्रियाया लोकोत्तरं स्वरूपं वर्णयन्नाह—

'इयं गेहे लक्ष्मीरियममृतवर्तिर्नयनयो-
रसावस्याः स्पर्शो वपुषि बहुलश्चन्दनरसः ।
अयं बाहुः कण्ठे शिशिरमसृणो मौक्तिकसरः
किमस्या न प्रेयो यदि परमसह्यस्तु विरहः'[२] ।।

नाटकेऽस्मिन् महाकविभवभूतिर्व्यापकजीवनमूल्यप्रासङ्गिकजीवनमूल्ययोर्मध्ये सङ्घर्षं प्रदर्श्य व्यापकजीवनमूल्यस्य महत्तां प्रतिपादयति, तथापि प्रासङ्गिकजीवनमूल्यस्य महत्तां न न्यूनीकरोति। अस्मादेव करणाद् रामः स्वयमेव सीतां परित्यजति, तथापि तस्या निरन्तरमभावमनुभवति तीव्रतया। तद्यथा प्रतिभाति कुशवचनेन—

१. उत्तररामचरिते-१।१२; २. तत्रैव-१।३८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'विना सीतादेव्या किमिव हि न दुःखं रघुपतेः
प्रियानाशे कृत्स्नं किल जगदरण्यं हि भवति।
स च स्नेहस्तावानयमपि वियोगो निरवधिः
किमेव त्वं पृच्छस्यनधिगतरामायण इव'[१] ।।

रामस्य जीवने व्यापकजीवनमूल्यानां प्रासङ्गिकजीवनमूल्यानाञ्च समानभावेन प्रदर्शनायैव भवभूतिस्तं लोकोत्तररूपेण प्रस्तौति। तद्यथा—

'वज्रादपि कठोराणि मृदूनि कुसुमादपि।
लोकोत्तराणां चेतांसि को नु विज्ञातुमर्हति'[२] ।।

नाटककार एकत्र राममुखात् 'विनिश्चेतुं शक्यो न सुखमिति वा दुःखमिति वा'[३], 'म्लानस्य जीवकुसुमस्य विकासनानि',[४] 'इयं गेहे लक्ष्मीरियममृत-वर्तिर्नयनयोः',[५] 'अद्वैतं सुखदुःखयोरनुगतं सर्वास्ववस्थासु यद्'[६] 'त्वया जगन्ति पुण्यानि,'[७] 'न किञ्चिदपि कुर्वाणः सौख्यैर्दुःखान्यपोहति,'[८] चिराद्वेगारम्भी प्रसृत इव तीव्रो विषरसः'[९] इत्यादिप्रियाप्रीतिप्रतिपादकानि वचनानि निःसारयति सीताविरहितस्य रामस्य पुटपाकप्रतीकाशत्वञ्च निरूपयति। तद्यथा—

'अनिर्भिन्नो गभीरत्वादन्तर्गूढघनव्यथः।
पुटपाकप्रतीकाशो रामस्य करुणो रसः'[१०] ।।

अपरत्र च कविः सीताया मुखात् 'अत एव राघवकुलधुरन्धर आर्यपुत्रः,'[११] 'तस्मै कोपिष्यामि यदि तं प्रेक्षमाणा आत्मनः प्रभविष्यामि',[१२] 'जाने पुनः प्रत्यागतमिव जीवितं त्रैलोक्यस्य,'[१३] 'त्वमेव सखि वासन्ति दारुणा कठोरा च यैवमार्यपुत्रं प्रदीप्तं प्रदीपयसि,'[१४] 'अहमेतस्य हृदयं जानामि ममाप्येषः,'[१५] 'नमो नमोऽपूर्वपुण्यजनितदर्शनाभ्यामार्यपुत्रचरणकमलाभ्याम्'[१६] इत्यादिप्रियप्रीतिप्रतिपादकानि वचनानि निःसारयति, येन पत्युर्दृष्ट्यां प्रियायाः प्रियायाश्च दृष्ट्यां पत्युर्जीवनमूल्यं व्यञ्जितम्। उत्तररामचरिते नाटककारः सीतारामयोरसाधारणदाम्पत्यप्रेमव्याजेन दाम्पत्यप्रेमरूपमुदात्तजीवनमूल्यं परमप्रभावोत्पादकतया चित्रयति। तद्यथा—

---

१. उत्तररामचरिते-६।३०; २. तत्रैव-२।७; ३. तत्रैव-१।३५।
४. तत्रैव-१।३६; ५. तत्रैव-१।३८; ६. तत्रैव-१।३९।
७. तत्रैव-१।४३; ८. तत्रैव-२।१९; ९. तत्रैव-२।२६।
१०. तत्रैव-३।१; ११. तत्रैव-१।१२ अनन्तरम्।
१२. तत्रैव-१।५१ अनन्तरम्; १३. तत्रैव-३।१० अनन्तरम्।
१४. तत्रैव-३।२७ अनन्तरम्; १५. तत्रैव-३।१२ अनन्तरम्।
१६. तत्रैव-३।४६ अनन्तरम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'अद्वैतं सुखदुःखयोरनुगतं सर्वास्ववस्थासु यद्
विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्यो रसः ।
कालेनावरणात्ययात्परिणते यत्स्नेहसारे स्थितं
भद्रं तस्य सुमानुषस्य कथमप्येकं हि तत्प्राप्यते'[1] ।।

अद्यत्वे निरन्तरं ह्रासोन्मुखदाम्पत्यजीवनमूल्यस्य सञ्जीवनाय भवभूतेः पद्यमिदं भवितुं शक्नोति किञ्चिदसाधारणप्रेरणावचनम्। यतो ह्यत्र दाम्पत्यजीवनस्य कश्चिदलौकिकादर्शः प्रस्तुतः।

दाम्पत्यप्रेम्णा तुल्यमपत्यप्रेम्णोऽपि चित्रणं भवभूतिर्जीवनमूल्यत्वेन करोति। यतो ह्यपत्यं नाम दम्पत्तिस्नेहप्रकर्षत्वम्। यथोक्तं भवभूतिना—'प्रसवः खलु प्रकर्षपर्यन्तः स्नेहस्य। परं चैतदन्योन्यसंश्लेषणं पित्रोः'[2]।

अद्यत्वे निरन्तरं क्षीयमाणापत्यप्रेम्णः प्रतिष्ठापनाय भवभूतेरधोलिखितं पद्यं भवितुमर्हति किञ्चिदनिर्वचनीयप्रेरकतत्त्वम्। तद्यथा—

'अन्तःकरणतत्त्वस्य दम्पत्योः स्नेहसंश्रयात् ।
आनन्दग्रन्थिरेकोऽयमपत्यमिति बध्यते'[3] ।।

साधुपुरुषाणां जीवनमूल्यं तेषां वृत्तौ वाचि मत्याम् अनवगीतपरिचये च विराजते। यथा भवभूतिनोक्तम्—

'प्रियप्रायावृत्तिर्विनयमधुरो वाचि नियमः
प्रकृत्या कल्याणी मतिरनवगीतः परिचयः ।
पुरो वा पश्चाद् वा तदिदमविपर्यासितरसं
रहस्यं साधूनामनुपधि विशुद्धं विजयते'[4] ।।

जीवने करुणायाः सर्वोच्चस्थानं भवतीति स्वीकुर्वन् भवभूतिः कारुण्यरूप-जीवनमूल्यं प्रधानतया व्यञ्जितवान् स्वोत्तररामचरिते। नाटकेऽस्मिन् आद्योपान्तं कारुण्यमहिमा विराजते येन भवभूतिविषये उक्तिरियं प्रथिता जाता—'कारुण्यं भवभूतिरेव तनुते'।

वस्तुतः कारुण्येन विना जीवनं जीवनमेव न भवति। इदं तथ्यं कविना सीतारामयोः कारुण्यनिर्भरचरिताभ्यां सूचितम्। रामायणे आदिकविना या

१. उत्तररामचरिते-१।३९; २. तत्रैव-३।१७ प्राक्।
३. तत्रैव-३।१७; ४. तत्रैव-२।२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कारुण्यभावना सूत्रिता 'शोकः श्लोकत्वमागतः'[१] इत्येवंवादिना निर्व्यूढा च सीतात्यन्तवियोगपर्यन्तमेव स्वप्रबन्धमुपरचयता तस्याः कारुण्यभावनायाः पराकष्ठा दृश्यते भवभूतेरुत्तररामचरिताख्ये नाटके। अत्र करुणा शरीरिणी भूत्वा सीताव्याजेन स्वयमेव विराजते। तद्यथा—

'परिपाण्डुदुर्बलकपोलसुन्दरं दधती विलोलकबरीकमाननम् ।
करुणस्य मूर्तिरथवा शरीरिणी विरहव्यथेव वनमेति जानकी'[२] ।।

इत्थं नाटकेऽस्मिन् विविधजीवनमूल्यानां परमहृदयावर्जकरूपेण विन्यासः कृतोऽस्ति येनेदं न केवलं नाम्ना उत्तरमपि तु वर्ण्येनाप्युत्तरत्वं भजते। उत्तररामचरितेन तुल्यं महावीरचरितेऽपि कविना सुव्यक्तानि विविधजीवनमूल्यानि। अत्र तेन कतिपय-जीवनमूल्यानां माहात्म्यप्रतिपादनाय द्वन्द्वस्थितेश्चारुतया निबन्धनं कृतम्। तद्यथा भ्रातृप्रेमरूपजीवनमूल्यस्य मार्मिकाभिव्यञ्जनायै द्वन्द्वोऽयं कविना चित्रितः—

'अपरिष्वज्य भरतं नास्ति मे गच्छतो धृतिः ।
अस्मत्प्रवासदुःखार्त्तं न त्वेनं द्रष्टुमुत्सहे'[३] ।।

अर्थाद् रामो दुःखार्त्तं भरतं द्रष्टुमपि न समर्थः, तस्य च दर्शनेन विना शान्तिमपि न लभते इत्यप्रतिमभ्रातृप्रेमरूपजीवनमूल्यव्यञ्जना भवत्यत्र। वाल्मीकिरामायणीयकथावस्तुनि यत्र कुत्रचित् कैकेयीरामादीनां जीवनमूल्येषु न्यूनता दृश्यते तत्र सर्वत्र भवभूतिः स्वाभाविकपरिवर्तनं कृत्वा नवीनतया मौलिकतया वा कथावस्तु प्रास्तौत्। तद्यथा कैकेयीमन्थराबालिप्रभृतिवृत्तान्तेषु कविना प्रभूतपरिवर्तनं कृतं रामादीनां वृत्तञ्च चरित्रपरिष्कारपुरस्सरं श्लाघ्यरूपे प्रस्तुतम्। अनेन भवभूतेरादर्शजीवनमूल्यं प्रति सहजा निष्ठा भासते।

मालतीमाधवाख्ये प्रकरणरूपके भवभूतिना प्रेमरूपजीवनमूल्यस्य गाम्भीर्येण प्राचुर्येण उदात्ततया च निबन्धनं कृतमस्ति। अत्र स्त्रीणां कृते भर्तुर्जीवनमूल्यं पुंसां कृते च पत्न्या जीवनमूल्यं विशदयन् कविराह—

'प्रेयो मित्रं बन्धुता वा समग्रा सर्वे कामाः शेवधिर्जीवितं वा ।
स्त्रीणां भर्ता धर्मदाराश्च पुंसामित्यन्योन्यं वत्सयोर्ज्ञातमस्तु'[४] ।।

पद्यमिदमाधुनिकसमये प्रेमपथसञ्चरतां स्त्रीपुंसां कृते किमप्यपार्थिवपाथेयं भवितुमर्हति। प्रकरणेऽस्मिन् कविः प्रेम्णो नानाचेष्टात्मकरूपं निरूपयन् तस्यागाधतां सूचयति। तद्यथा—

१. वाल्मीकिरामायणे-१।३।४०; २. उ.रा.च.-३।४।
३. महा.च.-४।४३; १. मालतीमाधवे-६।१८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'प्रेमार्द्राः प्रणयस्पृशः परिचयादुद्गाढरागोदया-
स्तास्ता मुग्धदृशो निसर्गमधुराश्चेष्टा भवेयुर्मयि।
यास्वन्तःकरणस्य बाह्यकरणव्यापाररोधी क्षणा-
दाशंसा परिकल्पितास्वपि भवत्यानन्दसान्द्रो लयः'[1] ।।

अत्र कविर्मालतीव्याजेन प्रेम्णः उद्दामरूपचित्रणेऽपि न सङ्कोचमञ्चति येन कामपुरुषार्थस्य प्रबलता निरतिशयसंयमसापेक्षता च व्यज्येते। तद्यथा—

'मनोरोगस्तीव्रो विषमिव विसर्पत्यविरतं
प्रमाथी निर्धूमो ज्वलति विधुतः पावक इव।
हिनस्ति प्रत्यङ्गं ज्वर इव गरीयानित इतो
न मां त्रातुं तातः प्रभवति न चाम्बा न भवती'[2] ।।

प्रकरणेऽस्मिन् प्रेम्णा सह सौहार्दरूपजीवनमूल्यस्यापि मञ्जुलाभिव्यक्ति-र्दृश्यते। निखिले कथावस्तुनि सुहृद्व्यापारो विविधरूपेषु विन्यस्तः। कुत्रचित् कामन्दिकी माधवस्य साहाय्यं विदधाति, कुत्रचिद् मकरन्दो मैत्रीभावम्, कुत्रचिच्च सौदामिनीप्रभृतययो मित्रेष्टसाधने दत्तावधाना दृश्यन्ते। अत्र भवभूतिना कामन्दिकी-सौदामिनी-मकरन्द-मदयन्तिकावलोकिता-लवङ्गिका-बुद्धरक्षिता इत्येतानि पात्राणि सौहार्दभावं निर्वोढुं कल्पितानि येन सौहार्दभावरूपजीवनमूल्यस्य माहात्म्यं व्यज्यते। मैत्रीभावस्योदात्ततां व्यञ्जयितुकामः कविः कामन्दिकीव्याजेनाह—

'यन्मां विधेयविषये स भवान्नियुङ्क्ते
स्नेहस्य तत्फलमसौ प्रणयस्य सारः।
प्राणैस्तपोभिरथवाभिमतं मदीयैः
कृत्यं घटेत सुहृदो यदि तत्कृतं स्यात्'[3] ।।

अर्थाद् मित्रजीवनस्य निखिलसाफल्यं सकलोपयोगित्वं वा सौहार्दभावनिर्वाहे निहितं भवति। एतस्मादेव कारणात् सन्मित्रदुर्लभत्वं जगति प्रसिद्धम्।

एवं महाकविभवभूतेर्नाट्यसाहित्यपरिशीलनेन तथ्यमिदं विशदीभवति यद् विविधजीवनमूल्यानां विन्यासे प्रतिष्ठापने चासौ कविरभिनिवेशपूर्वकं यतमानो दृश्यते। तत्तज्जीवनमूल्यानां निबन्धने कवेरादर्शोन्मुखीप्रवृत्तिः सर्वत्र प्रसरतुकामा अवलोक्यते, येन कवेरादर्शजीवनमूल्यानि प्रति नैसर्गिकीनिष्ठा प्रकटीभवति।

१. मालतीमाधवे-५।७; २. तत्रैव-२।१; ३. तत्रैव-१।१०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यमहाकविषु भवभूतेर्महनीयस्थानभाजनमूले अयमेव हेतुरस्ति। तस्य आदर्शोन्मुखीप्रवृत्तिः, उदात्ततामण्डितजीवनमूल्यप्रस्तुतिः, गाम्भीर्यभरितजीवनदर्शनाभिव्यक्तिः, मर्यादोच्छलितप्रीतिरीतिः, गरिमामयदाम्पत्यप्रीतिः, नैसर्गिकाभालसितकाव्यकलासृष्टिः, लालित्यभूषितभाषासम्पत्तिः, रमणीयताखचितरचनावृत्तिः, चारुताचित्रितकल्पनाशक्तिरित्येतानि सर्वाणि वैशिष्ट्यानि कवेर्भवभूतित्वं प्रमाणयन्ति।

भवभूतिनाट्यसाहित्यपरिशीलनानन्तरमत्र प्रश्नः समुदेति यत्कविः कस्मात् कारणात् काव्ये जीवनमूल्यव्यञ्जकानि वैशिष्ट्यानि निबध्नाति? केन प्रयोजनेन वा स जीवनादर्शभूतानि तथ्यानि पात्रचरितेषु प्रधानतया समादधाति? विषयेऽस्मिन् काव्यशास्त्रिभिर्बहुधा विचारितम्। तत्र कान्तासम्मितोपदेशरूपेण प्रभावोत्पादकतया लोकशिक्षायै शाश्वतमूल्यसंरक्षणाय च रामादिवदाचरणप्रेरणायै च कविः काव्ये जीवनमूल्यव्यञ्जकान् गुणान् चित्रयति नायकादिचरितेषु। यथाह काव्यप्रकाशकार आचार्यमम्मटः—'प्रभुसम्मितशब्दप्रधानवेदादिशास्त्रेभ्यः सुहृत्सम्मितार्थतात्पर्यवत्पुराणादीतिहासेभ्यश्च शब्दार्थयोर्गुणभावेन रसाङ्गभूतव्यापारप्रवणतया विलक्षणं यत्काव्यं लोकोत्तरवर्णनानिपुणकविकर्म तत्कान्तेव सरसतापादनेनाभिमुखीकृत्य 'रामादिवद्वर्तितव्यं न रावणादिवदित्युपदेशं च कवेः सहृदयस्य च करोतीति सर्वथा तत्र यतनीयम्'[१]।

धर्मार्थकाममोक्षरूपपुरुषार्थचतुष्टये मानवमनसो यथोचितरूपेण प्रवर्तनायापि तत्तत्पुरुषार्थाचरणरतनायकादिचरितचित्रणेन कविः पुरुषार्थसम्बद्धजीवनमूल्यप्रतिपादकानि तत्त्वानि काव्ये विनिवेशयति। तद्यथा धर्मपुरुषार्थाचरणरतरामयुधिष्ठिरादीनां चरितविन्यासेन कवय आदर्शजीवनयापनाय प्रेरयन्ति। कामपुरुषार्थाचरणरतवत्सराजादीनां चरितविन्यासेन ते काममाहात्म्यं व्यञ्जयति। एवमेव चन्द्रगुप्तचाणक्यादीनां चरितविन्यासेन काव्यकारा अर्थपुरुषार्थमाहात्म्यं प्रमाणयन्ति, जीमूतवाहनादीनाञ्च चरितविन्यासेन मोक्षपुरुषार्थं प्रति प्रवृत्तिमुत्पादयन्ति। रामायणमहाभारतादिकाव्येषु त्वेकत्रैव विभिन्नपुरुषार्थाचरणरतचरितानां विन्यासो विलसति। महाभारते भगवान् वेदव्यासः स्पष्टमेवोद्घोषयति—

'धर्मे ह्यर्थे च कामे च मोक्षे च भरतर्षभ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्'[२] ॥

आदर्शचरितविन्यासव्याजेन नायकादिषु गुणगणप्रदर्शनमाध्यमेन वा कवयो लोकेभ्य आदर्शाचरणाय शिक्षां ददति। यथाह भगवान् मनुः —

१. काव्यप्रकाशे-१।२ वृत्तौ; २. महाभारते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः'[१] ।।

लोकशिक्षणरूपकार्यमिदं सम्पादयितुं कवयो नाभिधावृत्तिं समाश्रयन्ति, अपि तु व्यञ्जनावृत्तिसमाश्रयेण ते लोकं हृदयावर्जकरीत्या प्रभावोत्पादकतया च शिक्षयन्ति। यतो ह्यभिधावृत्तिसमाश्रितचरितं न तथा प्रभावोत्पादने लोकशिक्षणे च कल्पते यथा व्यञ्जनावृत्तिसमाश्रयेण सम्भवति। एतस्मादेव कारणाद् ध्वन्यालोककारेणानन्दवर्धनेनोक्तम्—'सारभूतोऽर्थः स्वशब्दानभिधेयत्वेन प्रकाशितः सुतरामेव शोभामावहति। प्रसिद्धिश्चेयमस्त्येव विदग्धविद्वत्परिषत्सु यदभिमततरं वस्तु व्यङ्ग्यत्वेन प्रकाश्यते न साक्षाच्छब्दवाच्यत्वेन'[२]। एवं व्यञ्जनावृत्तिसमाश्रयेण सुकुमाररीत्या चतुर्वर्गशिक्षणपरं काव्यं लोके प्रतिष्ठितम्। स्वलक्ष्यमधिगन्तुं तत् कस्यचित् श्रेष्ठपुरुषस्याचरणं ललितशब्दार्थयोजनया निबध्नाति लोकश्च तदधीत्य श्रुत्वा समवलोक्य वा तथैव परिवर्तते। यथाह भगवान् श्रीकृष्णः —

'यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते'[३] ।।

काव्यस्य लक्ष्यो भवति लोकः। लोकमेव प्रीणयितुं वा शिक्षयितुं वा तत् प्रवर्तते। कार्यमिदं तत् श्रेष्ठजनचरितविन्यासेन साधयति। अतो नाट्यशास्त्रकारो भरतो भूयोभूयो नाट्यस्य लोकोपदेशकत्वं लोकोपकारकत्वं वा प्रतिपादयति। तद्यथा—

'धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्धनम् ।
लोकोपदेशजननं नाट्यमेतद् भविष्यति' ।।

काव्यालङ्कारकारभामहाचार्योऽपि काव्यं धर्मार्थकाममोक्षाणां वैचक्षण्यं करोतीति कथयन् तत्र पुरुषार्थचतुष्टयप्रवृत्तिपरकचरितनिबन्धनौचित्यं प्रतिपादयति, काव्ये च जीवनमूल्याधायकतत्त्वानां गुणनां वा अभिनिवेशपूर्वकं विन्यासाय प्रेरयति। तद्यथा—

'धर्मार्थकाममोक्षाणां वैचक्षण्यं कलासु च ।
करोति कीर्तिं प्रीतिं च साधुकाव्यनिबन्धनम्' ।।

कार्यमिदं काव्यं सुकुमारक्रमेण हृदयावर्जकरूपेणाविद्वदङ्गनाबालप्रतीतार्थरूपेण च साधयति। अत एवोक्तं रुद्रटकुन्तकाभ्याम्—

---

१. मनुस्मृतौ; २. ध्वन्यालोके-४।५ वृत्तौ।
३. श्रीमद्भगवद्गीतायाम्-३।२१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'ननु काव्येन क्रियते सरसानामवगमश्चतुर्वर्गे ।
लघु मृदु च नीरसेभ्यस्ते हि त्रस्यन्ति शास्त्रेभ्यः' ।।

'धर्मादिसाधनोपायः सुकुमारक्रमोदितः ।
काव्यबन्धोऽभिजातानां हृदयाह्लादकारकः' ।।

वस्तुतोऽत्रैव काव्यं शास्त्राद् विभिद्यते। यतो हि शास्त्रेऽपि जीवनमूल्याधायकवैशिष्ट्यानां दयादाक्षिण्यकरुणासत्यवादितातिथिसत्काराचार्यभक्तिप्रभृतीनामनुशासनं विद्यते, येषामधिगतिर्व्यङ्ग्यविधायां काव्येषु भवति; परन्तु शास्त्रे तदनुशासनं प्रभुसम्मितोपदेशरूपेण शुष्कक्रमेण चोच्यते, काव्येषु च कान्तासम्मितोपदेशरूपेण सुकुमारक्रमेण च व्यज्यते। अतः काव्यगतजीवनमूल्याधायकगुणानामनुशासनं मृद्वौषधवत्प्रभावशालि भवति, शास्त्रगतं च तत् कटुकौषधवत् प्रभवति। यथोक्तमाचार्यकुन्तकेन—

'कटुकौषधवच्छास्त्रमविद्याव्याधिनाशनम् ।
आह्लाद्यामृतवत् काव्यमविवेकगदापहम्' ।।

विवेचनेनानेन तथ्यमिदं विशदीभूतं यज्जीवनमूल्याधायकविभिन्नगुणानां वैशिष्ट्यानां वा विन्यासस्य भूयानवसरो भवति काव्येषु नाटकेषु च। अत एव महाकवयो नाटककाराश्च स्वस्वकाव्यरचनासु प्रभावोत्पादकतया लालित्यान्वितरीत्या च जीवनमूल्यव्यञ्जकान् गुणान् चित्रयितुं दत्तावधाना दृश्यन्ते। रामकृष्णयुधिष्ठिरादीनां चरितमाश्रित्य महाकाव्यनाटकादीनां प्रणयनपरम्परामूले इदमेव कारणमस्ति। रामायणमहाभारतश्रीमद्भागवतादीनामुपजीव्यतामूलेऽप्ययमेव हेतुर्वर्तते। महाकविभवभूतिर्जीवनमूल्याधायकगुणानां बाहुल्येन विन्यासस्य प्रबलपक्षधरो नाटककारोऽस्ति। आदर्शचरितचित्रणानुरक्तः स मर्यादापुरुषोत्तमरामस्य कथावृत्तमुपादाय मानवजीवनसञ्जीवनसमर्थस्नेहदयाकरुणामैत्रीप्रजावत्सलतागुरुभक्तिपातिव्रत्यैकपत्नीव्रतातिथिसत्कृतिभ्रातृप्रेमप्रभृतिगुणानां कमनीयतया निबन्धनं कृतवान् सहृदयजनेभ्यश्च तेषामुपादेयत्वं रमणीयतया प्रतिपादितवान्। संस्कृतनाट्यसाहित्यविभूतिमहाकविभवभूतिभावानुभूतिप्रतिरूपं तस्य रूपकत्रयमत्र प्रमाणमिति शम्।

●

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाणश्चतुर्भाणी च

डॉ. वनेश्वरपाठकः
संस्कृतसदनम्, इर्गूरोड,
पहाड़ी साइड, राँची,
बिहार-प्रदेशः

❀ ❀ ❀

१. भाणस्य शास्त्रीयं वैशिष्ट्यम्

दशविधरूपकेषु भाणरूपकं रूपकसाहित्ये स्वं विशिष्टं स्थानमधिकरोति। भाणस्य व्युत्पत्तिमूलकोऽर्थोऽस्ति—'एकमुखेनैव भाण्यन्ते उक्तिमन्तः क्रियन्ते अप्रतिष्ठा अपि पात्रविशेषा यत्रेति भाणः'[1]। भाणस्यापरा व्युत्पत्तिरस्ति—'भण्यन्ते व्योमोक्त्या (आकाशभाषितेन) नायकेन स्वपरवृत्तं प्रकाश्यतेऽत्रेति भाणः'[2]। अर्थाद् रूपकप्रकारेऽस्मिन् भाणे एकेन पात्रेण आकाशभाषितैः स्ववृत्तं परवृत्तं च प्रकाश्यते।

भाणस्य भरतेन (ना.शा. १८।१६०-१६२), धनञ्जयेन (दशरू. ३।४९-५१), विश्वनाथेन (सा.द. ६/२२७-३०) च कृतैर्भाणलक्षणैरिदं विज्ञायते यद् भाणे धूर्तचरितवर्णनं प्रधानम्। अस्मिन्नेक एव लोकव्यवहारकुशलो बुद्धिमान् पुरुषो रङ्गमञ्चे उपस्थाय स्वानुभूतं परानुभूतं वा विषयमाकाशभाषितैरुक्तिप्रत्युक्तिद्वारा नानाविधैश्चेष्टितैः सामाजिकान् प्रति प्रकाशयति। स च पुरुषो विटो[3] भवति। धूर्तविटसम्प्रयोज्यो नानावस्थान्तरात्मको भाण एकाङ्को भवति। तत्र भारती वृत्तिः प्रयुज्यते। अस्मिन् शौर्यसौभाग्यवर्णनैर्वीरशृङ्गारयोरभिव्यञ्जना विधीयते। मनोरञ्जनस्य दृष्ट्याऽस्मिन् दशलास्याङ्गानामुपन्यासस्तथा मुखनिर्बहणसन्ध्योर्योजना क्रियते।

---

१. ना.शा., १८।१०७ अभिनवभारती।

२. उभयत्र (व्युत्पत्तिद्वये) शब्दार्थकाद् भण्धातोर्घञ्प्रत्ययः 'भडि परिभाषणे' इति परिभाषणार्थकाद् भड्धातोर्निष्पन्नः 'भण्डः' भाणस्य मूलमिति केचन वदन्ति। परिभाषणम् = परिहासः सोपालम्भः।

३. 'भाणे विटः' अपरपृष्ठे द्रष्टव्यः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाणे रसविधानस्य सम्बन्धे भरतेन किमपि नोक्तम्; किन्तु धनञ्जयस्य तट्टीकाकारस्य धनिकस्य तथा विश्वनाथस्य मतानुसारं भाणे भारतीवृत्तेः प्रयोगः, **मुखनिर्वहणसन्ध्योर्योजना**, दशलास्याङ्गानामुपयोगस्तथा वीरशृङ्गारयोः सूचनेति वस्तुचतुष्टयमपेक्षितमस्ति। यथोक्तं तैः—'सूचयेद् वीरशृङ्गारौ शौर्यसौभाग्यवर्णनैः' इत्यादि।

अत्रेदं विचार्यते—भाणे वीरशृङ्गारयोः सूचना न सङ्घटते, तयोरुत्तमप्रकृतिकत्वात्। उत्तमप्रकृतिके नायक एव तयोर्वर्णनं क्रियते। भाणे तूत्तमप्रकृतेरभावः। तत्र शृङ्गारस्य कथञ्चित् स्वीकृतावपि वीरस्य तु तत्रावसर एव नास्ति। अत एव भाणरचनाया मौलिकविशेषताया अनुपयुक्तत्वात् तत्र वीरस्य प्रयोगः परिहृतः प्राचीनैर्भाणकारैः। भरतेन तु भाणे रसविधानस्य विषये स्पष्टतः किमपि नोक्तम्।

भाणे शृङ्गारस्यापि प्रयोगः शारदातनयस्य नाभिमतः। स तु तत्र शृङ्गाराभासं मन्यते। उक्तं च तेन—'शृङ्गाराभास एव स्यान्न शृङ्गारः कदाचन'[1]। भाणे साधारणस्त्रिया नायिकात्वाद् विटादीनाञ्च नायकत्वात् तत्र शृङ्गारस्य प्रयोगो नोचितः, प्रकतिविरुद्धत्वादिति तस्य मतम्। धनञ्जयेन तदनुसारिणा विश्वनाथेनापि 'सूचयेद् वीरशृङ्गारौ' इति वदता भाणे रसस्य सूचनीयत्वं स्वीक्रियते। तयोर्मते शौर्यसौभाग्ययोर्वर्णनमात्रेण रसनिष्पत्तिर्जायते। शारदातनयोऽपि 'चतुर्विधाभिनये यदि दृश्यो रसो भवति' इत्यादि भाषमाणो भाणे रसस्य सूचनीयत्वमेव समर्थयति[2]।

भाणः कैशिकीवृत्तिहीनो भवति—'कैशिकीवृत्तिहीनानि रूपाण्येतानि कारयेत्' (ना.शा. १८।८९) इत्यादिब्रुवता भरतेन कैशिकीवृत्तिहीनत्वाद् भाणे शृङ्गारोऽपि न सम्भवतीति सूचितप्रायम्, 'शृङ्गारे कैशिकीवृत्तिरिति' सिद्धान्तात्। अत एव भाणे 'प्रायेण भारती क्वापि कैशिक्यपि वृत्तिर्भवतीति विश्वनाथाभिमतं भरतविरोधान्न समीचीनम्।

एवमेव 'भाणानां रञ्जकरसप्रधानत्वम्, तेभ्यो लोकपरिदृष्टस्य रञ्जनावैचित्र्यस्य निष्पत्तेः' इत्यादिब्रुवतोऽभिनवगुप्तस्य मतम्[3], भाणे शृङ्गाराभास एव स्यान्न तु शृङ्गारः' इति शारदातनयमतञ्चापि नात्र स्वीकरणीयं प्रतिभाति। भाणे विटःवेटतीति विटः। 'विट् शब्दे' इति विट्धातोः कप्रत्ययेन निष्पन्नो विटशब्दो 'वेश्यापतिर्भुजङ्गः स्याद् विटः पल्लवकः स्मृतः' इति हलायुधकोशात् पल्लवक-

१. भावप्रकाशनम्, ४।१४२; २. तदेव-४।२२।

३. ना.शा., १८।११०, १९।१२०, अभिनवभारती। अत्राभिनवगुप्तेन कृता भाणानां रसस्य रञ्जकरसेति नवीना संज्ञापि विचारणीयाऽस्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भुजङ्ग-वेश्यापति-कामुक-विदग्ध-नागर-षट्प्रज्ञ-कामकेलिकामुकानुचर-धूर्तकाम-तन्त्रकलाकोविदेत्यर्थानां वाचकः। भागवतानुसारं विटः प्रियवार्ताकरो भवति—'सतामयं सारभृतां निसर्गो यदर्थवाणी श्रुतिचेतसामपि। प्रतिक्षणं नाट्यवदच्युतस्य स्त्रिया विटानामिव साधुवार्त्ता:'।। विटः कामोपचारकुशलो दक्षिणश्च भवतीति भरतः[१], विटः केवलं हास्यश्रृङ्गारात्मकरूपकेष्वेव प्रयुज्यते इत्यभिनवगुप्तः[२], विटो वेशोपचारकुशलो मधुरो दक्षिणः कविरिति शारदातनयः, धनञ्जयविश्वनाथौ विटं निपुणं पण्डितं च मन्येते। वेशोपासकस्य कामसहायस्य विटस्य सम्यक् परिचयो विकाराश्च मृच्छकटिकनाम्नि प्रकरणे दृष्टिमायान्ति।

भाणस्य भाषा

भाणे भारतीवृत्तेः प्रयोगात् तत्र विटः संस्कृतभाषामेव प्रयुङ्क्ते, न तु प्राकृतम्। मृच्छकटिके चतुर्भाण्यां चासौ तथैव दृश्यते। अन्ये शकारचेटादयः प्राकृतं वदन्ति; किन्तु विटः संस्कृतं वदतीति तस्यानुत्तमपात्रत्वेऽपि वैशिष्ट्यम्। अतः 'विटः प्राकृतवादी च प्रायो बहुविकारवान्'[३] इति शारदातनयविचारो विचारणीयोऽस्ति।

भाणस्य कथावस्तु

भरतस्य मते धूर्तविटसम्प्रयोज्ये, विविधाश्रये, बहुचेष्टिते, एकाङ्के च भाणे नानावस्थान्तरात्मको लोकव्यवहारो (वेश्यावृत्तान्तः) निबध्यते। 'हास्योचित-धूर्तादीनामनुप्रवेशेन समानयोगक्षेमो भाणः' इत्यभिनवगुप्तो मनुते। विश्वनाथस्य मते भाणे वृत्तमुत्पाद्यं भवति।

२. भाणरचनायाः प्राचीनत्वम्

संस्कृतसाहित्ये प्राचीनताया दृष्ट्या भाणस्य स्थानं नाटकमिव महत्त्वपूर्ण-मस्ति। भाणस्य स्वरूपं निरूपयन् भरतो भाणरचनायाः प्राचीनत्वं पारम्परिकत्वं च सूचयति—'भाणस्यापि हि निखिलं लक्षणमुक्तं तथा प्रमाणानुगतम्'[४]।

---

१. भरतस्य मतानुसारं विटः शास्त्रवित्, शिल्पसम्पन्नः, रूपवान्, प्रियदर्शनः, प्रियभाषी, अविकत्थनः, चतुरः, कामोपचारकुशलः, दक्षिणः, देशकालवित्, स्त्रीलुब्ध इत्येवमादिरूपस्त्रयस्त्रिंशद्गुणसम्पन्नः प्रतिष्ठितो नागरिकः प्रतिभाति।

२. अभिनवभारती, प्रथमखण्डम्, पृ. ३२।

३. भावप्रकाशनम्, पृ. ९४,२६७-६९।

४. ना.शा., १८।१६०-१६३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३. त्रिवर्गसाधनता

रूपकाणां क्रमनिर्धारणे भरतस्याभिप्रायं प्रकटीकुर्वताऽभिनवगुप्तेन प्रोक्तम्—'रूपकाणां क्रमनिर्धारणमिदमङ्कसंख्यादृष्ट्या त्रिवर्गोपायत्वप्राधान्यापेक्षया भरतेन कृतम्। नाटकं प्रकरणं नाटिकां च विहाय रूपकाणामन्येषां त्रिवर्गोपायत्वं नास्ति, तेषामेकाङ्कत्वात्'[१]। नाट्यशास्त्रकारेण रूपकाणां भेदान् निरूपयता भाणो रूपकेषु पञ्चमस्थाने स्थापितोऽस्ति'[२]।

दशरूपककारेण धनञ्जयेन भाणस्य तृतीयं स्थानं निर्दिष्टमस्ति[३]। साहित्यदर्पणकारो विश्वनाथोऽप्यत्र धनञ्जयमेवानुसरति[४]। डिमश्चतुरङ्कोऽपि सर्वैर्यत्र कुत्रचित् क्रमे स्थापितोऽस्ति। वस्तुतस्तु नाटकं तथा प्रकरणं विहायापरेषु रूपकेषु क्रमनिर्धारणे किमपि वैशिष्ट्यं नास्ति। अतोऽत्राभिनवगुप्तस्य विचारेऽस्मिन् किमपि तर्कसम्मतं तत्त्वं नावलोक्यते।

४. चतुर्भाणी (संक्षिप्तः परिचयः)

प्राचीनकाले रचिता भाणाः केरलात् (केरलातः) समुपलब्धा सन्ति। तेषां प्रकाशनं चतुर्भाणीति नाम्ना १९२२ शतके शिवपुरीतः (मद्रासतः) सञ्जातम्[५]। अस्याश्चतुर्भाण्या भाषाशैली भावसरणिश्च प्राधान्येनास्याः प्राचीनतायाः परिचायिके स्तः।

चतुर्भाण्यां पद्मप्राभृतकम्, उभयाभिसारिका, धूर्तविटसंवादः, पादताडितकमिति चतुर्णां भाणानां सङ्ग्रहोऽस्ति। तेषां रचयितारः क्रमशः शूद्रकः, वररुचिः, ईश्वरदत्तः, श्यामिलकश्चेति चत्वारः सन्ति। चतुर्भाण्यां सङ्गृहीतानां भाणानां रचयितृणां सम्बन्धे एकः प्राचीनतमः श्लोकः प्रचलितोऽस्ति—

'वररुचिरीश्वरदत्तः श्यामिलकः शूद्रकश्च चत्वारः।
एते भाणान् बभणुः का शक्तिः कालिदासस्य' ।।

तेषां चतुर्णां क्रमानुसारमियं स्थितिः—शूद्रकः, वररुचिः, ईश्वरदत्तः, श्यामिलकः। तत्र पद्मप्राभृतकस्य कर्ता शूद्रकः, उभयाभिसारिकाया रचयिता वररुचिः, धूर्तविटसंवादस्य निर्माता ईश्वरदत्तस्तथा पादताडितकस्य प्रणेता श्यामिलकोऽस्ति;

---

१. ना.शा, १८।६२, अभिनवभारती; २. तत्रैव-१८।२०३।
३. दशरू.-१।८; ४. सा.द., परि.६।
५. चतुर्भाणी 'शृङ्गारहाट' इति नाम्ना श्रीमोतीचन्द्रेणानूदिता, हिन्दीग्रन्थरत्नाकरकार्यालय'-प्राइवेट-लिमिटेड, बम्बईतः १९६० शतके प्रकाशिताऽभवत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किन्तु भाणानामेषां कर्तॄणां विषये ऐतिहासिकानां प्रमाणं दुर्बलमस्ति। सर्वेषां भाणानां समाप्तिवाक्यैरेव तेषां रचयितॄणां सम्बन्धे स्वल्पः परिचयः प्राप्यते।

(क) पद्मप्राभृतकम्

अस्य रचयिता शूद्रक इति प्रायोवादः। तस्य कर्तृत्वेऽकर्तृत्वविरोधे वा किमपि प्रमाणं नोपलभ्यते। स राजा एवं रूपककार आसीत्। बाणभट्टस्य कादम्बर्यां शूद्रक उज्जयिन्या नृपतित्वेन वर्णितोऽस्ति। ऐतिहासिकः पुरुषः स खीस्तपूर्वतृतीयशतके वर्त्तमान आसीत्। विवादे सत्यपि शूद्रको मृच्छकटिकं नाम प्रकरणस्य प्रणेतेति पारम्परिकं तथ्यम्। शूद्रकस्य साहित्यिककृतीनां वर्णनं राभिल-सोमिल(सौमिल्ल)[1] कर्तृकत्वेनापि विद्यते।

अस्मिन् भाणे कर्णीपुत्रस्य मूलदेवस्य नायकत्वेन स्थितस्य तन्मित्रस्य शशेति नाम्नो विटस्य, तस्य प्रथमप्रेयस्यविपुलायास्ततश्च देवसेनाया वृत्तान्तो मनोरमत्वेन वर्णितोऽस्ति। प्राचीनकाले कामकेलिविदो मूलदेवस्य महती ख्यातिरासीत्। कादम्बर्यां विन्ध्याटवीवर्णने बाणेनापि मूलदेवस्य तत्सखस्य शशस्य चोल्लेखः कृतोऽस्ति—'कर्णीसुतेनेव सन्निहितविपुलाचला शशोपगता च'। अस्मिन् भाणेऽपि कर्णीपुत्रस्य प्रथमप्रेयस्या विपुलया सह प्रेमप्रसङ्गे शशस्य समावेशः कृतोऽस्ति। प्राचीनकाले मूलदेवः कामतन्त्रस्य विशेषतो वेशिकतन्त्रस्य मुख्यपात्रमासीत्। क्षेमेन्द्रेणापि कलाविलासे तस्योल्लेखः कृतोऽस्ति। शुकसप्तत्याः कथास्वपि वेशिकविषयेषु तस्य प्रामुख्येन वर्णनमस्ति।

भाणेऽस्मिन् मूलदेवेन कर्णीसुतेन देवसेनाया मनोवृत्तिं विज्ञातुं प्रेषितो विटः सर्वप्रथममुज्जयिन्याः परिभ्रमणं करोति। अस्मिन् प्रसङ्गेऽसौ प्रच्छन्नपुंश्चलिकै-र्वेश्यालम्पटकैर्मनोरञ्जकैः पुरुषैः सह काल्पनिकं वार्तालापं कुर्वन् देवसेनासदन-मासीदति। ततस्तस्या मनोवृत्तिं विज्ञाय तथा तस्याः प्रेमपरिचयरूपं पद्मोपहारमादाय कर्णीपुत्रमुपैति। इत्थं पद्मोपहारमाधृत्य भाणस्यास्यान्वर्थकं नाम पद्मप्राभृतकमिति।

अस्मिन् भाणे समाजे पाण्डित्येन धार्मिकत्वेन च प्रसिद्धानां पुरुषाणां प्रच्छन्नकामुकत्वस्य वेश्यालम्पटत्वस्य च वर्णनं कृत्वा कविर्जनसाधारणानां मनसि तान् प्रति विकर्षणमुत्पादयति। भाणोऽयं तदानीं लोके विख्यातानां कतिपयपुरुषाणां सूचनामपि ददाति।

---

१. 'तत्र प्रथितयशसां भास-सौमिल्ल-कविपुत्रादीनाम्......'इत्यादि, मालविकाग्निमित्रस्य प्रस्तावनायां कालिदासः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(ख) उभयाभिसारिका

भाणोऽयं वररुचेः कृतिः। स च कण्ठाभरणकाव्यस्य रचयितेति महाभाष्यकारः पतञ्जलिः। वररुचेरपरा कृतिश्चारुमतीति प्रसिद्धिः। अवन्तिसुन्दरीकथानुसारं तस्य जन्मस्थानं गोदावर्यास्तटप्रदेशभूमिः। अयं वार्तिककारात् कात्यायनादभिन्नः। अस्य समयः ख्रीस्तपूर्वकतृतीयशतकम्। अस्मिन् भाणे नान्द्यन्ते प्रविष्टस्य सूत्रधारस्य सर्वमारम्भवाक्यं भासस्य स्वप्नवासवदत्तनामनाटकस्यारम्भवाक्यान्यनुसरति। अत इदं सुस्पष्टं यद् भाणस्यास्य रचयिता भासस्य पश्चाद्वर्त्तीति।

भाणेऽस्मिन् लोध्रवृक्षेण सहोपमितो विटः स्वप्रेयस्या नारायणदत्तया सह केनापि कारणेन सञ्जातकलहाभिनिवेशेन सागरदत्तश्रेष्ठिपुत्रेण कुबेरदत्तेनानुरुद्धो द्वयोरेकत्राभिसरणे साहाय्यं करोति। तस्य प्रयत्नेन द्वयोः प्रेमिजनयोरन्योन्यं प्रत्यभिसरणादयं भाण उभयाभिसारिकेत्यन्वर्थकं नाम बिभर्त्ति।

(ग) धूर्त-विट-संवादः

ईश्वरदत्तकवेः कृतिरयं भाणो वसन्तर्तुवर्णनेन प्रारभते। भोजकृते शृङ्गारप्रकाशे भाणस्यास्योल्लेखात्, हेमचन्द्रस्य काव्यानुशासनेऽस्य श्लोकस्यैकस्योद्धृतत्वाच्च कवेरीश्वरदत्तस्यैकादशशतकात् पूर्ववर्त्तित्वमनुमीयते। ईश्वरदत्तो मगधवासीति प्रसिद्धिः।

भाणस्यारम्भे प्रविष्टेन सूत्रधारेण वर्णिताद् विटस्वरूपादिदं विदितं भवति यत् तदानीं वृद्धा नीलीलेपात् स्वं जर्जरत्वं प्रच्छादयन्ति स्म। पद्मप्राभृतकेऽपि विट एवं वर्णितोऽस्ति। अस्मिन् भाणे विटो धूर्तसभाभिर्वेशवाटैश्च परिपूर्णस्य पृथिव्यां प्रख्यातकीर्तेः कुसुमपुरस्य परिभ्रमणं कुर्वन् वेशात् प्रतिनिवृत्तेन श्रेष्ठिपुत्रेण कृतिपालकेन सह वार्तालापं करोति। कृतिपालकोऽनवरतसुखतृष्णां कामिनीं परित्याजयन्तं पितरं प्रति क्रुद्धो ब्रूते—"पिता नाम खलु स यौवनस्य पुरुषस्य मूर्तिमान् शिरोरोगः।.......अत्र मे गृहीतपरशोः क्षत्रियवधोद्यतस्य जामदग्न्यस्येव लोकमपैतृकं कर्तुं मतिर्जायते, अन्यच्च कष्टं भावाय निवेदयामि। तातः किल मां दारकर्मणि नियुङ्क्ते मम त्वेष निर्णयः—कर्तव्यं खलु नैव भोः कुलवधूकारां प्रवेष्टुं मनः"। विटः-'यद्येष भवतो निर्णयः प्रीताः स्मः' इति तमुक्त्वा परित्यज्य च तं वेशं प्रविशति। तत्र गोष्ठ्यां विश्वलकेन धूर्तेन कामतन्त्रविषयान् कांश्चित् संशयान् पृष्टोऽसौ यथाशक्ति तेषां समाधानं करोति। धूर्तविटयोर्मध्ये प्रचलितं कामतन्त्रविषयं प्रश्नोत्तरमतीवमनोरञ्जकमस्ति। तयोः पारस्परिकं संवादमाधृत्य भाणोऽयं धूर्तविटसंवादेति नाम्ना ख्यातोऽस्ति। काल्पनिकेऽस्मिन् धूर्तविटसंवादे शास्त्रदृष्ट्या लोकदृष्ट्या च त्याज्यत्वेन हितकरमपि वस्तु सम्मुखमायाति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(घ) पादताडितकम्

कविवरश्यामिलकेन विरचितः पादताडितकं नाम भाणो भाणसाहित्ये श्लाघ्यत्वेन स्थितः। अयं भाणः श्यामिलकस्य कवेः कृतिरिति सूत्रधार-वचसाऽभिज्ञायते—'एवमार्यमिश्रान् प्रणिपत्य विज्ञापयामि यद् वयमार्यश्यामिलकस्य कृतिं पादताडितकं नाम भाणं प्रयोक्तुं व्यवसिता इति'। कर्तुरेतादृशः परिचयः पूर्वोक्तेषु त्रिषु भाणेषु नैव दृश्यते। अस्य भाणस्याभिनयोऽप्युज्जयिन्यां जातो यत्र स्वयं श्यामिलकोऽप्येकं पात्रमासीदित्यपि सूत्रधारोक्त्या ज्ञायते—'धूर्तचाक्रिकः खलतिः श्यामिलको घण्टामादाय घोषयति' इति। श्यामिलकः चाक्रिकः (चक्रिकस्य घण्टया उद्घोषकः) खल्वाटशिराश्चासीदित्यपि सूत्रधारस्य वचनेनानेन परिज्ञातं भवति। अस्य भाणस्यारम्भो भाणशैलीं सर्वांशत्वेनानुसरति।

ग्रन्थस्य समाप्तिवाक्येनेदमपि ज्ञायते यत् कविवरोऽयमुदीच्यस्तथा विश्वेश्वरदत्तस्य पुत्र आसीत्। उदीच्यत्वेन कविरयं कश्मीरनिवासीति विदुषां मतम्। क्षेमेन्द्रेण औचित्यविचारचर्चायामस्य पद्यमुद्धृतमस्ति। अभिनवगुप्तेनास्य नामनिर्देशः कृतोऽस्ति। तेन ग्रन्थस्यास्योद्धरणान्यपि गृहीतानि सन्ति। अयं महिमभट्टस्य गुरोः श्यामिलकादभिन्न इति ख्यातिः। अतः श्यामिलको नवमशतकात् पूर्वं विद्यमान आसीदिति सम्भाव्यते।

अस्मिन् भाणे विटो दद्रुणमाधवात्—"सुराष्ट्राणां वारमुख्यया मदन-सेनिकया तत्र भवांस्तौण्डिककोकिर्विष्णुनागश्चरणतलेन शिरस्यनुगृहीतः, तस्या वेशदेवतायास्तं सम्भावनाविशेषमवमानं तथा तेनात्मानमशुचिं मन्यमानः प्रायश्चित्तं कर्तुं ब्राह्मणपीठिकां गतः। ततश्च धर्मशास्त्रिभिः 'विटजातिं सन्निपात्य विटमुखेभ्यः प्रायश्चित्तं मृग्यताम्' इति निर्दिष्टो विटसन्निपातं प्रति प्रस्थितः" इति विज्ञाय जम्बूद्वीपतिलकभूतस्य सार्वभौमनरेन्द्राधिष्ठितस्य सार्वभौमनगरस्य[१] परिभ्रमणं करोति। अस्मिन् परिभ्रमणेऽसौ विटमहत्तरस्य भट्टिजीमूतस्य वेशमहापथोपस्थितं समन्तात् सन्निपातितविटजनसङ्कुलं विटसमाजभवनं प्रविशति। तत्रोपस्थितेभ्यः

१. सार्वभौमनगरमिदं कुसुमपुरमथवोज्जयिनीति सन्दिग्धो विषयः। सार्वभौमनरेन्द्रशब्दोऽत्र कुसुमपुरपुरन्दरं महेन्द्रादित्यं चन्द्रगुप्तविक्रमादित्यं सूचयति। सार्वभौमनगरेऽस्मिन् शक-यवन-तुषार-पारसीक-मगध-कलिङ्ग-वङ्ग-महिषक-चोल-पाण्ड्य-केरल-प्रभृतिदेशानां निवासिनो वसन्ति स्म। 'अवन्ति-सुराष्ट्रापरान्त विजयानन्तरं विक्रमादित्य उज्जयिन्यां द्वितीयां राजधानीमस्थापयत्' इति केषाञ्चन मतम्। इतः पूर्वं शकाः क्षत्रपवंश्या उज्जयिन्याः शासका आसन्। रघुवंशेऽपि अपरान्तविजयस्योल्लेखोऽस्ति रघोर्दिग्विजये। पादताडितकस्य सर्वं विवरणमेतदस्य रचनां गुप्तकालिकीं सूचयति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वेभ्यो विटेभ्योऽसौ तौण्डिककोकेर्विष्णुनागस्य प्रायश्चित्तार्थं निवेदयति। ततो विटमहत्तरो भट्टिजीमूतोऽन्येषां प्रायश्चित्तविधानं प्रतिषेध्यापरं प्रायश्चित्तं निर्दिशति— 'कापि सुन्दरी स्वकिसलयकोमलकरेणास्य केशस्य प्रसाधनं न करोतु। अयमपि तथैव रुक्षकेशान् धारयंस्तिष्ठतु''। अपि च मदनसेनिकायाः प्रायश्चित्तं श्रूयताम्— 'सा सालक्तकेन सनूपुरेण च चरणेन मे शिरोऽनुगृह्णातु। अयञ्च तयाऽनुगृह्यमाणं मां पश्यत्विति'। सर्वे विटा विटमहत्तरस्य भट्टिजीमूतस्य प्रायश्चित्तविधानमिदं ससाधुवादं प्रशंसन्ति।

इत्थं मदनसेनिकायाः पादताडितेनारब्धो विटमहत्तरेण भट्टिना काम्यमानेन तस्याः पादताडितेन च समाप्तिं गतोऽयं भाणोऽन्वर्थनामास्ति।

(५) भाणस्य शास्त्रीयवैशिष्ट्यस्यालोके चतुर्भाण्याः समीक्षणम्

विटः—चतुर्भाण्यां विटः केन्द्रीयपुरुषोऽस्ति; किन्त्वयं विटोऽन्यभाणानां विटा इव निष्कर्मा, अयोग्यः, अनुत्तमकोटिकः, शृङ्गारी पुरुषो नास्ति। नापि विटोऽयं व्यक्तित्वस्य चारित्र्यस्य च दृष्ट्या गम्भीरनाटकेषूपेक्षितोऽस्ति। प्राचीनभाणेषु विटः शृङ्गारी, कामतन्त्रकुशलः, काव्यकलानिपुणस्तथा पूर्णगौरवेण सह प्रभावशाली पुरुषोऽस्ति। भरतस्य मतानुसारं भाणो धूर्तविटसम्प्रयोज्योऽस्ति तथा विटस्तत्र नायकत्वस्य महिमानं न लभते। भाणेषु तस्य तथैव चित्रणमस्ति; किन्त्वेतत् सत्यं यद् भाणेषु केवलो विट एव रङ्गमञ्चे सर्वत्रोपस्थितो भवति, तथा नायकत्वं तत्र सुतरां गच्छति। चतुर्भाण्यां विटो भरतस्य मतानुसारं चतुरः, प्रियभाषी, कामोपचारकुशलः, दक्षिणः, प्रतिष्ठितो नागरिकः; धनञ्जयविश्वनाथयोर्मतानुसारं निपुणः, पण्डितः, शारदातनयस्य मतानुसारं कामोपचारकुशलः, मधुरः, दक्षिणः कविर्वर्त्तते। स विटस्य वैशिष्ट्येन विशिष्टः प्रभाववान् पुरुषोऽस्ति।

चतुर्भाण्यां शूद्रकस्य शक्तिशालिन्या लेखन्याः प्रसूतिः पद्मप्राभृतकं सर्वोत्कृष्टत्वेन वर्त्तते। तत्र समाजे लब्धस्थानानां कवीनाम्, वैयाकरणपण्डितानाम्, धार्मिकाणाम्, परिव्राजकानाञ्च प्रच्छन्नकामुकत्वमुद्घाट्य शूद्रकेण मृच्छकटिके इवात्रापि समाजस्य बहूपकृतम्। अत्र विटस्य वैदग्ध्यं दर्शनीयमस्ति।

भाषा-प्रयोगः

'भाणेषु भारतीवृत्तिरुपयुज्यते' इति नियमाच्चतुर्भाण्यां सर्वत्र संस्कृतस्य प्रयोगः। केवलं पादताडितके भद्रायुधस्य यशोवर्णनप्रसङ्गे दाशेरकस्योक्तौ वारद्वयं प्राकृतस्य प्रयोगो दृश्यते। चतुर्भाण्यां समेषां पात्राणां भाषाऽतीवप्रौढा, अत्यन्तपरिष्कृता, सुव्यवस्थिता च विद्यते। यद्यपि भाणेषु ग्राम्याऽश्लीलभाषाया

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निन्दनीयवार्तालापस्य चाधिक्यं सहजतया मुखरमस्ति, तथापि चतुर्भाण्यां सर्वत्र संयमो दृश्यते। चतुर्भाण्या भाषा सुबन्धोर्बाणभट्टस्य च प्रभावपूर्णां गद्यशैली-मनुहरति। चतुर्भाण्यां भाषायाः सरलत्वेऽपि तत्र गूढव्यञ्जनायाः प्राचुर्यं दर्शनीयमस्ति।

छन्दोयोजना

छन्दसां विविधतया तथा तेषां समुचितयोजनया काव्यसौष्ठवं विवर्द्धते। चतुर्भाण्यां छन्दसां वैविध्येन तेषां समुचितयोजनया च भाषाऽतीवप्रौढा विद्यते। अपरिचितानां प्राक्तनानां सुपरिचितानामर्वाचीनानाञ्च छन्दसां सुन्दरः प्रयोगश्चतुर्भाण्या भाणानां निर्मातृणां छन्दोविधाननैपुण्यं निदर्शयति।

चतुर्भाण्याः कार्यक्षेत्रम्

चतुर्भाण्यां सङ्गृहीतानां भाणानां कार्यक्षेत्रमुज्जयिनी अथवा कुसुमपुरं विद्यते। उभयाभिसारिकाया धूर्तविटसंवादस्य च कार्यक्षेत्रं कुसुमपुरमस्ति। पद्मप्राभृतकस्य पादताडितकस्य च कार्यस्थानमुज्जयिनी वर्त्तते; किन्तु पादताडितक-कारेण सार्वभौमनगरेति स्तानाम्ना निर्दिष्टस्य नगरस्य वास्तविकं नाम स्पष्टं नास्ति। यद्यप्यत्र विटो नगरवीथ्यां परिभ्रमति तथा काल्पनिकैः पुरुषैः सह वार्तालापं करोति; किन्तु ते नगरवासिनो जना इव न प्रतीयन्ते। अतः पादताडितकस्य स्थानं सन्दिग्धमस्ति। 'सार्वभौमनगरमिदं सार्वभौमनरेन्द्रस्य चन्द्रगुप्तविक्रमादित्यस्य द्वितीया राजधानी उज्जायिनीति सम्भाव्यते' इति केषाञ्चन मतम्। वयं तु कालिदासस्याश्रयदातुर्यशोधर्मन्शकारिविक्रमादित्यस्य (खीस्तपूर्वप्रथमशतके स्थितस्य) एव द्वितीयां राजधानीमुज्जयिनीं मन्यामहे।

निष्कर्षः

लोकानुरञ्जनं भाणस्य प्रमुखमुद्देश्यमस्ति। रञ्जनावैचित्र्यायैव भाणे रसनिबन्धनं क्रियते, यस्याभिधानमभिनवगुप्तेन रञ्जकरसेति विहितमस्ति। भाणस्योपयोगितां निर्दिशता नाट्यदर्पणकारेणोक्तम्—'अत्र विटादीनां परप्रवञ्चनात्मकं वृत्तं प्रेक्षकाणामवञ्चनीयतापादनार्थं व्युत्पाद्यते' इति। अर्थाद् भाणे विटादीनां चरित्रचित्रणस्योद्देश्यमस्ति धूर्तजनप्रवञ्चनातः सामाजिकानां मनसि सतर्कताधानम्, येन सामाजिका धूर्तैः प्रवञ्चिता न भवेयुरिति।

भाणेष्वनेकत्र वैयाकरणानां पौराणिकानां ज्यौतिर्विदां भागवतानां धार्मिकाणां दार्शनिकानाञ्चोपहासः कृतोऽस्ति। चतुर्भाण्या अनुशीलनेनेदं सुस्पष्टं भवति यत्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्या रचनाया उद्देश्यमस्ति—तदानीन्तनसमाजे महत्सु स्थानेषु स्थितानामपि जनानां प्रच्छन्नकामुकताया वेश्यालम्पटतायाश्च प्रदर्शनं कृत्वा तेषामुपहासः क्रियते। परवर्त्तिषु भाणेषु एतदर्थमेव शृङ्गारस्याश्लीलतायाश्च प्राचुर्यं दृश्यते; परन्तु चतुर्भाण्यामत्र संयमः। चतुर्भाण्यामप्यनेकत्राश्लीलताऽऽलोक्यते; परन्तु विटानामाकाशभाषितपात्राणां च संवादशैली एतादृशी मनोहारिणी तथा सव्यङ्ग्याऽस्ति, यस्याः साम्यं संस्कृतसाहित्येऽपरत्र दृष्टिं नैति। चतुर्भाण्यां यत्र तत्र निर्दिष्टा ऐतिहासिकपुरुषाः, ऐतिहासिकघटनाः, वैदेशिकानां सम्पर्कः, भौगोलिकस्थानानामुल्लेखाश्च ऐतिहासिकदृष्ट्या महते उपयोगाय सन्ति।

भाषायाः सौष्ठवात् परिष्कृतशैल्यां सरसभावानां प्रभावात्मकाभिव्यक्तेश्च रूपकविधाया भाणस्य श्लाघनीयनिदर्शनानां चतुर्भाण्या भाणानां साहित्ये महत्त्वमक्षुण्णमस्ति। चतुर्भाण्यां सङ्गृहीता भाणा रूपकविधाया एकस्या विशिष्टरचनायाः प्राचीनतमानि निदर्शनानि सन्ति तथा साहित्यस्य वास्तविकगुणेन विशिष्टशैल्या च सम्पन्नाः सन्ति। अत एव ते संस्कृतसाहित्ये स्वं श्लाघनीयं स्थानमधिकुर्वन्ति। भाणानामेकमपरं वैशिष्ट्यमिदमस्ति यत् ते कामतन्त्रस्य विविधसिद्धान्तान् प्रतिपादयन्तः कामुकानां ज्ञानवर्द्धनायोपयोगिनः सन्ति।

चतुर्भाण्यां जीवनस्याधिक्यम्, तेषां कलात्मकं प्रतिपादनम्, प्रौढभाषायाः प्रयोग इत्येवमादयो विशेषाः सन्ति ये परवर्त्तिषु भाणेषु न दृश्यन्ते। परवर्त्तिनो भाणा जीवनहीनकलाया निदर्शनानि सन्ति। विषयवैविध्याभावः, विषयस्य भावस्य रसस्य घटनानां चरित्राणां शैल्याश्चैकरूपता तेषु दृश्यते। परवर्तिभाणेषु रूढिगतविवरणानां सर्वांशतः साम्येन तत्र पाठकानां मनो न रमते। अत एव समाजे भाणा लोकप्रियतां नाभजन्।

नाटकस्य यत्प्रयोजनं तद् भाणप्रहसनाद्यैरेकाङ्कैः रूपकैः पूर्णतां नैति। अत्र केवलं रञ्जनावैचित्र्यमेव (मनोरञ्जनमेव) प्रधानम्। अतो भाणप्रहसनादिरूपकाणि विशिष्टसमाजस्योपयोगाय न सम्पद्यन्ते। अनुत्तमप्रकृतिकत्वमप्येषां ह्रासस्य कारणमिति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आनन्दस्वरूपविमर्शः[1]

डॉ. मनुलताशर्मा
संस्कृतविभागाध्यक्षा,
आर्यमहिलामहाविद्यालये
वाराणसी

भारतीयवाङ्मये आनन्दशब्दस्य प्रयोगोऽतीवोदात्तो व्यापकरूपतया विविधेऽर्थे च वर्तते। शब्देऽस्मिन् प्रेयसः समारभ्य श्रेयःपर्यन्तम्, अभ्युदयान्निःश्रेयसपर्यन्तं, सांसारिकसुखोपभोगाद् ब्रह्मात्मैक्यपर्यन्तं, कलानिर्मितेः कलानुभूतिपर्यन्तं तथाऽऽत्मोपलब्धितः प्रमातुरानन्दानुभूतिं यावत् सर्वे भावाः सहजतया समाविष्टाः सन्ति। ब्रह्मणः स्वरूपाभिव्यक्तिमारभ्य नितान्तलौकिकाह्लादानुभूतिपर्यन्तं यः कश्चनानन्दः समनुभूयतेऽस्माभिः सांसारिकैर्यश्च लौकिकालौकिकादिविविधैर्विशेषणैर्विशिष्यते तद्विषये समुदेति काचनानन्ददायिनी जिज्ञासा हृदि सर्वेषां सहृदयानामतस्तस्य स्वरूपादिविमर्शपरा काचन चर्चाऽत्र प्रस्तूयते।

आनन्दशब्दस्य व्युत्पत्तिः पर्यायवाचिनश्च

'आनन्दशब्दः' आङुपसर्गपूर्वकसमृद्ध्यर्थकटुनदिधातोर्घञि प्रत्यये कृते निष्पद्यते। इत्थम् 'आ समन्तान्नन्दति नन्दयति वा समृद्धो भवति समृद्धं करोतीति वा आनन्दः' इत्यर्थो भवति।

अत्रायमभिसन्धिः—'यः सर्वतोभावेन समृद्धः सन् समृद्धञ्च कुर्वन्, सर्वविषयकाभावबोधविगलनञ्च करोति, अन्यवस्तुविषयकज्ञानञ्च निरुणद्धि, स एवानन्दः। वस्तुतो यावदिष्टवस्तुप्राप्तिर्न भवति, तावदभावः प्रतीयते, चित्तचाञ्चल्याद् दुःखमनुभूयते च। अत ईप्सितप्राप्तौ चित्तस्थैर्याद् दुःखनिवृत्तिपूर्वकपूर्णतारूपसमृद्धिरेवाऽऽनन्दपदस्यार्थः। कोशेष्वपि तावत्, यथाऽमरकोषे—

१. बेङ्गलूरुनगरे सम्पन्ने दशमे विश्वसंस्कृतसम्मेलने पठितोऽयं निबन्धः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुत् प्रीतिः प्रमदो हर्षप्रमोदामोदसम्मदाः ।
स्यादानन्दथुरानन्दशर्मशातसुखानि च ।। इति।

(अमरकोषः, १।४।२४)

द्वादशेष्वर्थेषु निर्दिष्टोऽयमानन्दः। हलायुधे शब्दकल्पद्रुमे वाचस्पत्ये चाप्येतस्योल्लासाह्लादसन्तोषप्रेमस्नेहादररुचिक्षेमकल्याणदुःखादिप्रशमनमनुकूलतादयोऽर्था निर्दिष्टाः सन्ति। यद्यप्येते प्रयोगविधावपरपर्यायाः परं विश्लेषणदृशा विवेचने कृते सत्येषु सूक्ष्मो भेदो वर्तत एव। अनेनैव हेतुना आनन्दपदार्थस्य कोशप्रतिपादितार्थेभ्यः पार्थक्यं दृश्यते। एतत्पार्थक्यं ज्ञातुमेते शब्दा विश्लेषणीयाः सन्ति। एषु मोदप्रमोदामोदप्रमदसम्मदशब्दाः 'मुद् हर्षे' 'मदीहर्षे' 'प्रमदसम्मदौ' हर्षे इति हर्षार्थकधातुभ्यो निष्पन्नाः सन्ति। यद्यप्यामोदशब्दस्य गन्धेऽर्थेऽपि प्रयोगो दृश्यते, 'आमोदो गन्धहर्षयोः' इत्युक्तेः। हर्षशब्दो 'हृष् तुष्टौ' इति धातोर्निष्पन्नः। अतो हर्षशब्दो विचार्यते—

यदिन्द्रियाणि हृष्यन्ति हर्षयन्ति परानपि ।
तस्माद्धर्ष इति ज्ञेयः प्रसादो मनसो हि सः[१] ।।

अयमाशयः—हर्षश्चित्तप्रसादः। अस्योद्भव इष्टलाभात्, प्रियसमागमात्, गुरुराजदेवताप्रसादाच्च सम्भवति। यथा प्रोक्तम्—

देवभर्तृगुरुस्वामिप्रसादः प्रियसङ्गमः।
मनोरथाप्तिरप्राप्यमनोहरधनागमः ।।
तथोत्पत्तिश्च पुत्रादेर्विभावो यत्र जायते।
नेत्रवक्त्रप्रसादश्च प्रियोक्तिः पुलकोद्‌गम।।
अश्रुस्वेदादयश्चानुभावा हर्षं तमादिशेत्[२] ।।

इत्थमेव हिंसार्थक-'शृधातोः' मनिन्-प्रत्यये कृते शर्मन्-शब्दो निष्पद्यते 'शृणाति हिनस्ति दुःखम्' इत्यर्थे। एवमेव तनूकरणार्थकशोधातोर्निष्पन्नः शातशब्दः, 'श्यति दुःखम्' इति प्रयोगदर्शनात्। शोभनं खम्, शोभनानि खानि येनेति सुखम्। आङुपसर्गपूर्वकात् 'ह्लादी सुखे च' इत्यस्माद्धातोर्निष्पन्न

१. साहित्यदर्पणः, शशिकलाव्याख्यायां तृतीयपरिच्छेदे उद्धृतम्, पृ.२२१।
२. रसगङ्गाधरः, प्रथमानने उद्धृतम्, पृ.२९८, तुलनीयम्—नाट्यशास्त्रे सप्तमेऽध्याये ६१-६२ तमकारिकाभ्याम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आह्लादशब्दोऽपि सुखार्थक एव। प्रीतिशब्दश्च 'प्रीञ् तर्पणे' धातोः क्तिन्प्रत्यये कृते 'प्रीणनं तर्पणं प्रीणाति तर्पयति वा प्रीतिः' इत्यर्थं प्रतिपादयति। स्वस्वविशिष्टार्थ-प्रतिपादकानामेषां शब्दानामानन्दशब्देन सह विश्लेषणे कृते ज्ञायते यत् समृद्ध्यर्थके आनन्दे मोदप्रमोदामोदप्रमदसम्मदशर्मशातसुखप्रीतिहर्षाह्लादशब्दवाच्यानां मनः-प्रसादनाभीष्टप्राप्त्यशुभनाशामङ्गलनिवारणमनस्तुष्ट्याद्यर्थानां समावेशो वर्तते। अमरकोषस्य रामाश्रमीटीकायामानन्दस्य पर्यायभूतानामुपर्युक्तशब्दानां परिगणनं विधाय एते द्वादश आनन्दस्येति कृता टिप्पणी प्रकारान्तरेणामुमेवार्थमभिव्यनक्ति[1]। प्रकारान्तरेणाप्येष एवार्थः परिपुष्टो भवति।

काव्यशास्त्रग्रन्थेषु सञ्चारिभावानां लक्षणप्रसङ्गे हर्षशब्द आनन्दार्थे परिगणितः। तल्लक्षणञ्च तैस्तैराचार्यैरुक्तम्, यथा—''इष्टप्राप्त्यादिजन्मा सुखविशेषो हर्षः,[2] हर्षस्त्विष्टावाप्तेर्मनःप्रसादोऽश्रुगद्गदादिकरः[3], मनःप्रसादो हर्षस्यादिष्टावाप्तिः स्तवादिभिः''[4]। एतैर्लक्षणैः प्रतीयते यद् हर्षस्य सम्बन्ध इन्द्रियतुष्ट्या सहाधिको वर्तते।

विभिन्नानां ग्रन्थानामुद्धरणेनाप्येष विमर्शः परिपुष्टो भवति यदामोदप्रमोद-तृप्तिहर्षानन्दादयो यद्यपि समानार्थकास्तथाप्येषु सूक्ष्मोऽन्तरो वर्तत एव। ऋग्वेदस्य नवममण्डले एकस्मिन् मन्त्रे[5] वर्णितमस्ति—'यत्रानन्दाश्च मोदाश्च मुदः प्रमुद आसते' इति। आनन्दमुदप्रमुदमोदादीनां पृथक् पृथग् निरूपणेन सुस्पष्टं प्रतीयते यदेते विभिन्नार्थकाः सन्ति। बृहदारण्यकोपनिषदि स्वप्नावस्थावर्णनप्रसङ्गे—'न तत्रानन्दा मुदः प्रमुदो भवन्त्यथानन्दान्मुदः प्रमुदः सृजते'[6]। अत्र शङ्कराचार्यो विवृणुते—'आनन्दाः सुखविशेषाः, मुदो हर्षाः पुत्रादिलाभनिमित्ताः, प्रमुदस्त एव प्रकर्षोपेताः, अथ चानन्दादीन् सृजते'[7]।

तैत्तिरीयोपनिषदि 'मोद-प्रमोद-आनन्द-ब्रह्मपुच्छम्'[8] इति प्रतिपादनेन मोद-प्रमोदानन्दादयः पृथक्परिगणिताः, उत्तररामचरितेऽपीदृशमेवोद्धरणं दृश्यते—

---

१. अमरकोषः – १।४।२४-२५।
२. रसगङ्गाधरः, प्रथमाननम्, पृ.२९८।
३. साहित्यदर्पणः – ३।१६५;
४. सरस्वतीकण्ठाभरणम्-५।१५३।
५. ऋग्वेदः – ९।११३।११;
६. बृहदारण्यकोपनिषद्-४।३।१०।
७. बृहदारण्यकोपनिषदि, शाङ्करभाष्ये-४।३।१०।
८. उपनिषत्सङ्ग्रहे, तैत्तिरीयोपनिषदि, समापनांशे-२।९।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

'यत्रानन्दाश्च मोदाश्च यत्र पुण्याश्च सम्पदः'[१]। अत्र वीरराघवष्टीकते—'आनन्द आत्मानुभवजन्यो हर्षः', 'मोदश्च दिव्यविषयानुभवजन्यं सुखम्'[२]।

आनन्दानुभूतेर्वैशिष्ट्यम्

शास्त्रगतप्रयोगैः काव्यगतप्रयोगैश्चाऽऽनन्दशब्दस्यार्थगाम्भीर्यं प्रकाशते। उत्तररामचरिते सीतापरित्यागेन व्यथितहृदयस्य रामस्य हृदयोद्गारेऽप्येषां पार्थक्यं लक्ष्यते—'क्व तावानानन्दो निरतिशयविस्रम्भबहुलः, क्व वान्योन्यप्रेम, क्व च नु गहनाः कौतुकरसाः। सुखे वा दुःखे वा क्व नु खलु तदैक्यं हृदययोः, तथाप्येषः प्राणः स्फुरति न तु पापो विरमति'[३]।

पुनः सीतया संस्पृष्टस्य रामस्याभिव्यक्तौ भवभूतिनाऽऽनन्दशब्दस्य प्रयोगो यस्मिन् सन्दर्भे विहितः, स तृप्त्यात्मलयाद्यर्थानां वाचकः। सीतासंस्पर्शजन्यां तामानन्दानुभूतिमभिव्यञ्जयन् रामोऽभिधत्ते—

स्पर्शः पुरा परिचितो नियतं स एव
सञ्जीवनश्च मनसः परितोषणश्च।
सन्तापजां सपदि यः परिहृत्य मूर्च्छा-
मानन्दनेन जडतां पुनरातनोति[४]॥

अन्यत्र च—

आलिम्पन्नमृतमयैरिव प्रलेपैरन्तर्वा बहिरपि वा शरीरधातून्।
संस्पर्शः पुनरपि जीवयन्नकस्मादानन्दादपरमिवादधाति मोहम्[५]॥

अत्रेदं तात्पर्यम्—आनन्दानुभूतिः पीयूषास्वादवन्मनस्तोषिण्यगाधतृप्तिकरी च। आनन्दानुभूतिरपि मोह इवास्ते। मोहे यथा निश्चेष्टता भवति, तथैवाऽऽनन्देऽपि। आनन्दप्रदानेन नवीना काचिदनिर्वचनीया जडता प्रकटीकृता। जाड्यं द्विविधं मोहावस्थायाम्, आनन्दावस्थायाञ्चेति[६]।

मालतीं प्रत्यनुरक्तस्य माधवस्योक्तावप्यानन्दस्याऽयमेवार्थः प्रकटितः। यथा—

---

१. उत्तररामचरितम्-२।११२;
२. तत्रैव, वीरराघवस्य टीका।
३. तत्रैव-६।३३;
४. तत्रैव-३।१२।
५. तत्रैव-३।३१;
६. तत्रैव, प्रियंवदा-टीका-३।१२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यद्विस्मयस्तिमितमस्तमितान्यभाव-
मानन्दमग्नममृतप्लवनादिवासीत् ।
तत्सन्निधौ तदधुना हृदयं मदीय-
मङ्गारचुम्बितमिव व्यथमानमास्ते[1] ।।

नैषधीयचरिते महाकविना श्रीहर्षेणाऽनेकत्रप्रयुक्तानामानन्दशब्दस्य प्रयोगस्थलानामनुशीलनेनाप्यानन्दपदार्थं स्फुटं प्रकाशते। तत्रानन्दो निर्मुक्तो निस्सीमो वेलातिक्रान्तसुधासमुद्रवदगाधो गम्भीरो वाक्पथातीतो हृदयानुभवः प्रोक्तः। 'वचसामपि गोचरो न यः स तमानन्दमविन्दत द्विजः'[2] 'हृदयभरणोद्वेलानन्दः सखीवृतभीमजा, नयनविषयीभावे भावं दधार धराधिपः'[3]। 'स्वाच्छन्द्यमानन्द-परम्पराणां भैमी तमालोक्य किमप्यवाप। महारयं निर्झरिणीव वारामासाद्य धाराधरकेलिकालम्'[4] इत्यादिभिरुक्तिभिरर्थोऽयं प्रमाणितः। अस्यानुभूतिरानन्दमृद्वीका मधुरसवन्मादयति—'अधिगतमतिवेलानन्दमार्द्वीकमत्तः'[5]। अस्यां सान्द्रताऽगाधता तन्मयता च भवति यस्यां निमग्नस्याऽन्यस्य कस्यापि वस्तुनोऽभावो न प्रतीयते। इत्थमानन्दशब्दस्य व्युत्पत्तिलभ्योऽर्थः सर्वथा सङ्गच्छते—'आ समन्तान् नन्दति, नन्दयति वा समृद्धं करोति भवति वा इत्यानन्दः'।

नैषधीयचरितस्यैकेन पद्येनास्यानुभूतेः सम्यग् व्याख्यानं विधातुं शक्यते। तथा हि—

तन्नालीकनले चलेतरमनाः साम्यान्मनागप्यभू-
दप्यग्रे चतुरः स्थितान्न चतुरापातुं दृशा नैषधान्।
आनन्दाम्बुनिधौ निमज्ज्य नितरां दूरं गता तत्तला-
ल्लङ्कारीभवनाज्जनाय ददती पातालकन्याभ्रमम्[6] ।।

अयमाशयः—नलेऽनुरक्ताया दमयन्त्याश्चित्तं तं प्रति स्थिरं तन्मयञ्चासीत्। स्थिरे तन्मये च चित्ते आनन्दोद्रेकः स्वाभाविकः। अत एव तस्मिन्नानन्दसुधासमुद्रे निमग्नां हर्षस्य परां सीमानमवाप्तां दमयन्तीं पातालकन्याभ्रमं जनयित्रीं वर्णयति हर्षः।

---

१. मालतीमाधवम्-१।२०; २. नैषधमहाकाव्यम्-२।१।
३. तत्रैव-७।१०८; ४. तत्रैव-८।८,७।२,४।११२।
५. तत्रैव-३।१३५; ६. तत्रैव-१२।१११।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्थमानन्दपदार्थस्यानुशीलनानन्तरं ज्ञायते यदानन्दानुभवे सहृदयानां हृदयं द्रुतं मनस्तन्मयं चित्तमैकाग्र्यं नयनं वाष्पजलाप्लुतं शरीरं पुलकितं वचनं गद्‌गदञ्च भवति।

सुखानन्दयोरन्तरम्

प्रायो जनाः सुखे आनन्दे च भेदं नावगच्छन्ति। परं तात्त्विकदृशा द्वयोर्वर्तते किमप्यन्तरम्। सुखं द्विविधं सातिशयं निरतिशयञ्च। तत्र निरतिशयसुखमेवानन्दः। स एव ब्रह्मणः स्वरूपभूतः। सातिशयं सुखं परिवर्तनशीलं क्षणभङ्गुरमस्थिरञ्चास्ति। आनन्दो नित्यः स्थिरश्चास्ति। यतो हि जाग्रत्-स्वप्न-सुषुप्तिसु तुरीयावस्थायांञ्चाऽय-मनुभूयते। एतावता प्रतिभाति यदात्मनः स्वाभाविकं लक्षणमानन्दः।

पुनः सुखदुःखयोश्च द्वन्द्वो वर्तते, 'सुखं हि दुःखान्यनुभूय शोभते' इत्युक्तेः। आनन्दश्च द्वन्द्वातीतः। तदनुभूतिश्चाद्वैतानुभूतिः। सुखमानन्दस्याल्पीयसी मात्रोच्यते, 'तस्यैव मात्रामुपजीवन्ति' इति श्रुतेः। आनन्दश्चाऽऽनन्दघनशब्देनोच्यते। सुखस्य सम्बन्धः शरीरेन्द्रियमनोभिः 'आनन्दस्य च स्वात्मना। सुखं ज्ञेयं विषयश्च' आनन्दो विषयी ज्ञाता च। सुखं लौकिकमानन्दो ह्यलौकिकः। सुखमानन्दे निर्भरमानन्द-श्चात्मनिर्भरः। सुखस्य क्षेत्रमभ्युदयः आनन्दस्य च निःश्रेयससिद्धिः। आनन्दश्चाभय-पदमस्ति 'द्वितीयाद् वै भयं भवतीति' श्रुतेः। आनन्दानुभूतौ आनन्दमयावस्था-यामन्यस्याभानादभयप्राप्तिर्भवति। आनन्दास्वादे निमग्नस्यान्यत् सर्वं तिरोहितं भवति। एवंभूतस्यानन्दस्योपलब्धौ तदेव साधनं यदात्मलाभस्य। ज्ञान-कर्म-भक्ति-प्रपत्ति-पुष्टि-योगमार्गाश्च एतस्योपलब्धौ साधनानि सन्ति। परमानन्दावाप्तिरेव मोक्षः।

इत्थं सुखानन्दयोरन्तरं सोपानपरम्पराया अन्तरमस्ति। सुखं प्रथमः सोपान आनन्दश्चान्तिमः।

प्रीतिरानन्दयोर्भेदः

'प्रीञ् तर्पणे कान्तौ च' इत्यस्माद्धातोर्निष्पन्ना प्रीतिस्त्रिविधा भवति— इन्द्रियतृप्तिः, मनस्तृप्तिः, आत्मतृप्तिश्च। अत्राऽऽत्मतृप्तिस्तु साक्षात् परानन्द-रूपैव। तत्र प्रीतेरानन्दस्य च नास्ति भेदः, परम् इन्द्रियतृप्तौ मनस्तृप्तौ वा तस्यै-वानन्दस्याभासमात्रम्, न तु स एवानन्द इत्यस्ति प्रीत्यानन्दयोर्भेदः। इच्छापूर्तिरूपा या प्रीतिः, सा तु विषयसम्बन्धात् सुखपदवाच्या, न तु परमानन्दरूपा।

प्रीतौ मनःप्रसादो भवति। स च दुःखहानाद् इष्टलाभाद्वा भवति। मनःप्रसादाच्च चित्तस्थैर्यं तदनन्तरमानन्दानुभव इत्यस्ति प्रीत्यानन्दयोः सोपानपरम्परेव क्रमः। निरुपाधिका प्रीतिरानन्द एव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनेन विश्लेषणेन प्रतीयते यदा चित्तं स्वस्वभावसुलभचाञ्चल्यं विहाय तन्मयं भूत्वा परं विश्रान्तं भवति चित्तस्य तन्मयावस्थायां स एव विश्रामो निर्वृतिविशेष आनन्दपदार्थः।

आनन्दस्य प्रभेदाः

आनन्दपदार्थस्यानुशीलनानन्तरमस्य प्रभेदानां वर्णनं स्वरूपविवेचनञ्चावश्यकं प्रतिभाति। आध्यात्मिकदृशा आनन्दशब्दः परब्रह्मणः स्वरूपाभिधायको यत् स्वरूपमखण्डमद्वैतमतुलमभयं प्रशान्तं प्रसन्नं शिवं सहजं समरसं प्रतिभाति। परं व्यवहारेऽस्य प्रयोगो बहुष्वर्थेषु दृश्यते। फलत आनन्दशब्दः प्रयोगानुसारं वर्गद्वये विभक्तः—आध्यात्मिकानन्द एकः, आधिभौतिकानन्दश्चापरः। आध्यात्मिकानन्दे ब्रह्मानन्दः, मोक्षानन्दः, योगानन्दः, भक्त्यानन्दश्च परिगण्यन्ते। भौतिकानन्दस्य पुनस्त्रयो भेदाः—इन्द्रियानन्दः, रागात्मकानन्दः, बौद्धिकानन्दश्च। परमानन्दस्येदं वर्गीकरणमात्यन्तिकं नास्ति। यतो ह्यानन्दस्योभावपि प्रयोगावन्योन्यापेक्षिणौ वर्तेते। यथा, इन्द्रियानुभूतिर्बौद्धिकानुभूतिर्वा आध्यात्मिकानुभूतिं विनाऽसम्भविनी तथैवाध्यात्मिकानुभूतिरपि सर्वथा इन्द्रियानुभूतिनिरपेक्षा भवितुं नार्हति। अतो वक्तुं शक्यते यदिदं वर्गीकरणं सर्वांशत आनन्दस्य वर्गीकरणं नास्ति। केवलं तत्तत्प्रभेदेष्वनुस्यूतस्य कस्यचिदेकस्य तत्त्वस्य प्राधान्यं द्योतयति।

वर्णितेष्वानन्दप्रभेदेष्वेको बहुचर्चितः प्रभेदोऽवशिष्यते, योऽस्ति काव्यानन्दः, यः पूर्वोक्तान् सर्वानपि प्रभेदानतिशेते पूर्वोक्तेभ्यः सर्वेभ्योऽपि प्रभेदेभ्यो विलक्षणश्च वर्तते। काव्यशास्त्रिभिरयमानन्दो रसशब्देन संज्ञितः।

ब्रह्मानन्दः

आनन्दप्रभेदानां स्वरूपविश्लेषणाय तिस्रोऽप्यानन्दानुभूतयो विश्लेषणीयाः सन्ति। तत्र तावदाध्यात्मिकानन्देषु ब्रह्मानन्द एव विवेचनीयः। श्रुतौ आनन्दः परब्रह्मणः स्वरूपम्। तत्र तस्यानन्दरूपताऽतिचर्चिता वर्तते। तथा हि—'तद्विज्ञानेन परिपश्यन्ति धीरा आनन्दरूपममृतं यद्विभाति'[1], 'आनन्दं ब्रह्मणो विद्वान्'[2], 'आनन्दो ब्रह्मेति व्यजानात्'[3], 'रसो वै सः', 'रसं ह्येवाऽयं लब्ध्वाऽऽनन्दीभवति'[4] 'आधारमानन्दमखण्डबोधं यस्मिन् लयं याति पुरत्रयं च'[5], 'आनन्दाब्धिर्यः परः

१. मुण्डकोपनिषद्-२।२।७;
२. तैत्तिरीयोपनिषद्-२।४।
३. तत्रैव-३।६;
४. तत्रैव-२।७।
५. कैवल्योपनिषद्-१४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सोऽहमस्मि प्रत्यग्धातुर्नात्र संशीतिरस्ति। आनन्दमन्तर्निजमाश्रयं तमाशापिशाचीमवमानयन्तम्'[१] 'सर्वपूर्णस्वरूपोऽस्मि सच्चिदानन्दलक्षणः'[२], 'परब्रह्मस्वरूपोऽहं परमानन्दमस्म्यहम्'[३], 'नित्यशुद्धचिदानन्दसत्तामात्रोऽहमव्ययः। नित्यबुद्धं विशुद्धैकसच्चिदानन्दमस्म्यहम्'[४], 'नामरूपविमुक्तोऽहमहमानन्दविग्रहः'[५] इत्यादीनि श्रुतिवाक्यानि ब्रह्मण आनन्दस्वरूपतां मुहुर्मुहुः प्रतिपादयन्ति। न केवलं निर्गुणं ब्रह्म, अपि तु सगुणब्रह्मणो विविधस्वरूपाणां विष्णुरामकृष्णशिवादीनां माहात्म्यवर्णने तेषामानन्दरूपताया बहुधोल्लेखोऽस्ति। तैत्तिरीयोपनिषदि सृष्टेरुद्भव आनन्दात्, स्थितिलयादयश्चानन्द एव वर्णिताः सन्ति[६]। बृहदारण्यकोपनिषद्यपि परमानन्दरूपेणाऽयं वर्णितः। अस्यानन्दस्य मात्रामाश्रित्यान्ये प्राणिनो जीवन्ति। अयमानन्दो मनुष्य-पितृगण-गन्धर्व-कर्मदेव-आजानदेव-प्रजापति-निष्कामश्रोत्रिय-ब्रह्मलोकानन्देषु यथोत्तरं शतगुणोत्कृष्ट इति निरूपयन् निष्कामब्रह्मविद् एतान् सर्वानानन्दान् अनुभवतीत्युक्तम्[७]।

तथ्यमिदं तैत्तिरीयोपनिषद्यपि प्रकारान्तरेण वर्णितमस्ति, यत्रोपर्युक्तानां मनुष्यगन्धर्वादीनां क्रमशः शतगुणोत्तराधिकानन्दानां समे प्रभेदा एकत्वं प्राप्नुवन्ति, स आनन्दः प्रजापतिब्रह्मणः, सोऽपि तस्य परमानन्दस्य एका मात्राऽस्ति, यस्यानन्दस्य मात्राः समुद्रजलस्य बिन्दुवद्विभक्ताः, पुनः यस्मिन्नानन्दे एकत्वं प्राप्नुवन्ति, स एव स्वाभाविकोऽद्वैतरूपेण स्थितः परमानन्दोऽस्ति, यत्र आनन्दस्याऽऽनन्दिनो वा भेदो न वर्तते[८]।

एवमयमानन्दो ब्रह्मणः स्वरूपमस्ति, गुणो वा धर्मो वा नास्ति। अतो ब्रह्मणो निर्विशेषताया व्याघातको नास्ति। ब्रह्म स्वप्रकाशचैतन्यमयं सुखस्वरूपमस्तीत्येव 'विज्ञानमानन्दं ब्रह्म'[९] इति श्रुतेस्तात्पर्यम्। एतदेव बृहदारण्यकभाष्येऽपि चर्चितम्[१०], तत्र विज्ञानमानन्दो वाऽभिन्नरूपतया ब्रह्मणः स्वरूपमिति निरूपयन् इदं स्वरूपभूतविज्ञानं विषयविज्ञानवद् दुःखानुविद्धं नास्त्यपि तु प्रसन्नं शिवमतुलं सहजं नित्यतृप्तमेकरसमस्तीति वर्णितम्[११]।

---

१. मैत्रेय्युपनिषद्-१।११-१२; २. तत्रैव-३।१२; ३. तेजोबिन्दूपनिषद्-३।११।
४. तत्रैव-३।११; ५. तत्रैव-३।३६।
६. आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते। आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्त्यभिसंविशन्तीति।। (तैत्तिरीयोपनिषद्-३।६)
७. एषोऽस्य परम आनन्द एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति। (बृहदारण्यकोपनिषद्-४।३।३२-३३)
८. तैत्तिरीयोपनिषद्, शाङ्करभाष्यम्-२।८।१-४; ९. बृहदारण्यकोपनिषद्-३।९।२८।
१०-११. तत्रैव, शाङ्करभाष्यम्, ३।९।२८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्रह्मण इदमानन्दरूपं सुखशब्देनाऽपि वर्णितम्—'यो वै भूमा तत्सुखम्'[1] इति। इदं सुखं लौकिकानुभवानुरोधाद् द्विधा वर्णितं सातिशयं निरतिशयञ्च। तत्र विषयसुखं सातिशयं, ब्रह्मसुखञ्च निरतिशयमुक्तम्[2]। अत इदं सुखमानन्दो वा विज्ञानं वा पृथक् पृथग् वस्तु नास्ति। द्वयोः शब्दयोः प्रयोगः स्वस्वप्रवृत्तिनिमित्तमाश्रित्योपपद्यते। ब्रह्मणि जाड्यनिराकरणाय विज्ञानशब्दः, दुःखरूपताविघाताय च सुखशब्द आनन्दशब्दो वा प्रयुक्तः। अयमानन्दः सांसारिकसुखमात्रं नास्ति, परमसंवेद्यस्य निरतिशयस्यानन्दस्य रूपमस्ति[3]।

आनन्दस्यानिवार्यस्वरूपं परिपूर्णता निरतिशयता च वर्तते। इदं छान्दोग्योपनिषदि 'यो वै भूमा तत्सुखम्' इति श्रुतिव्याख्यानेऽपि निरूपितम्। भूमाशब्दं व्याकुर्वाणा श्रुतिस्तं क्रियाकारकभावरहितमभेदस्वरूपं प्राह। यावदितरसम्भावना दृष्टिदृश्यविभाजनं वा वर्तते, तावदल्पता वर्तते, इयमल्पतैव दुःखबीजम्। अतो वास्तविकं सुखं ब्रह्मस्वरूपमेव, तच्च स्वतः प्रतिष्ठितम्। अनयोक्त्या छान्दोग्ये ब्रह्मणः स्वरूपभूतस्य सुखस्याऽऽनन्दस्य स्वसंवेद्यता अन्यासंवेद्यता च प्रोक्ता। तदेवोपरि पुरस्तात् पृष्ठतः सर्वासु दिक्षु च वर्तते[4]।

इत्थं श्रुतिषु बहुवर्णितां ब्रह्मण आनन्दरूपतां समीक्ष्य काश्चन जिज्ञासाः समुद्भवन्ति—

---

१. छान्दोग्योपनिषद्, ७।२३।१, ७।२४।१।

२. सुखं च द्विविधं सातिशयं निरतिशयञ्चेति। तत्र सातिशयं सुखं विषयानुसङ्गजनितान्तःकरणवृत्तितारतम्यकृतानन्दलेशाविर्भावविशेषः। निरतिशयसुखं च ब्रह्मैव।
(वेदान्तपरिभाषा, प्रयोजनपरिच्छेदः)

३. तस्मादात्मप्रकाशप्रकृष्टानन्दस्वभावमेव ब्रह्मेति युक्तम्। एवञ्च लौकिकानन्द एतस्य मात्रेति युज्यते। अवच्छेदात्, दुःखनिवृत्तौ तु दुर्योजमेतत्। इतश्चानन्दस्वभाव आत्मा, परमप्रेमास्पदत्वात्। (ब्रह्मसिद्धिः, पृ.५)

४. यो वै भूमा महन्निरतिशयं बह्विति पर्यायास्तत्सुखम्। ततोऽर्वाक् सातिशयत्वादल्पम्। अतस्तस्मिन्नल्पे सुखं नास्ति। अल्पस्याधिकतृष्णाहेतुत्वात्। तृष्णा च दुःखबीजम्। नहि दुःखबीजं सुखं दृष्टं ज्वरादि लोके। तस्माद्युक्तं नाल्पे सुखमस्तीति। अतो भूमैव सुखम्। तृष्णादिदुःखबीजत्वासम्भवाद्भूम्नः। (छान्दोग्योपनिषद्, शाङ्करभाष्यम्-७।२३।१)

यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमाथ यत्रान्यत्पश्यत्यन्यद्विजानाति तदल्पं यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्यम्। (तत्रैव, ७।२४।१)

स एवाधस्तात्स उपरिष्टात्स पश्चात्स पुरस्तात्स दक्षिणतः स उत्तरतः स एवेदं सर्वमित्यथातोऽहङ्कारादेश एवाहमेवाधस्तादहमुपरिष्टादहं पश्चादहं पुरस्तादहं दक्षिणतोऽहमुत्तरतोऽहमेवेदं सर्वमिति। (तत्रैव, ७।२५।१)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१. संसारे प्रसिद्धस्य सुखार्थकानन्दस्य, ब्रह्मणः स्वरूपानन्दस्य च को भेदः?

२. मोक्षे य आत्मानन्दोऽनुभवपथमायाति किं ब्रह्मानन्दस्तस्मात् पृथग्वर्तते?

३. अपि च विज्ञानं क्रियारूपं तस्य च कारकमन्तरा निष्पत्तिर्भवितुं नार्हति। अतः स्वरूपभूतविज्ञानमपि पृथगेव वर्तते।

आसां जिज्ञासानां समाधानार्थमानन्दपदार्थोऽपि पर्याप्तं विवेचितः। तैत्तिरीयोपनिषद्भाष्ये आनन्दपदार्थो बहुधा विमृष्टः। ब्रह्मणः स्वरूपभूतस्यानन्दस्य विवेचने स आनन्दो विषयानन्दात् पृथगत्युत्कृष्टश्च वर्णितः। लौकिकसुखस्य दृष्टान्तद्वाराऽऽनन्दस्वरूपं बोधयन् स आनन्दो लोकसुखसीमातिक्रान्तः, परमात्मनोऽभिन्नस्वरूपः परिपूर्णश्चोक्तः[1]।

केचन मनीषिणो निगदन्ति, आनन्दशब्दोऽयं दुःखाभावं बोधयन् ब्रह्मणि सार्थकः। अयं भावरूपो नास्ति, परमिदं न युक्तम्। अयमानन्दो भावरूपो न त्वभावरूपः। यतो हि सांसारिकानन्दस्य भावरूपेणैवोपलब्धिर्भवति। एतावत् कालपर्यन्तम् अहं दुःखी नासम् एतादृश्यनुभूतिर्न केषाञ्चिदपि जायते, परम् 'अहं सुखी' एतादृश्येवानुभूतिः सर्वेषां भवति। अयं सांसारिकानन्दो ब्रह्मानन्दस्यैव कणमात्राभासः, एतावता ब्रह्मानन्दो भावरूपैव सिद्ध्यति। पुनश्चोपनिषत्स्वात्मा पुत्रमित्रकलत्राद्यपेक्षया परमप्रेमास्पदं वर्णितम्, प्रेम एवानन्दः। अत आनन्दो भावरूपः सिद्ध्यति[2]।

ब्रह्म आनन्दस्वरूपं सुखस्वरूपं वास्ति, अत्र किं बीजमिति जिज्ञासायाम् एवं वक्तुं शक्यते, प्राणिनां स्वानुभव एवात्र प्रमाणम्। सर्वोऽपि जनः स्वसत्तां

---

१. किमानन्दो विषयविषयिसम्बन्धजनितो लौकिकानन्दवद् आहोस्वित् स्वाभाविक इत्येवमेषाऽऽनन्दस्य मीमांसा। तत्र लौकिकानन्दो बाह्याध्यात्मिकसाधनसम्पत्तिनिमित्त उत्कृष्टः। स य एष निर्दिश्यते ब्रह्मानन्दानुगमार्थम्। अनेन हि प्रसिद्धेनानन्देन व्यावृत्तविषयबुद्धिगम्य आनन्दोऽनुगन्तुं न शक्नोति। लौकिकोऽप्यानन्दो ब्रह्मानन्दस्यैव मात्रा अविद्यया तिरस्क्रियमाणे विज्ञान उत्कृष्यमाणायां चाविद्यायां ब्रह्मादिभिः कर्मवशाद्यथाविज्ञानं विषयादिसाधनसम्बन्धवशाच्च विभाव्यमानश्च लोकेऽनवस्थितो लौकिकः सम्पद्यते।....निरस्ते त्वविद्याकृते विषयविषयिभागे विद्यया स्वाभाविकः परिपूर्ण एक आनन्दोऽद्वैतो भवति।..अभिन्नः स्वाभाविक आनन्दः परमात्मैव, न विषयविषयिसम्बन्धजनित इति।
(तैत्तिरीयोपनिषद्, शाङ्करभाष्यम्-२।८।४)

२. तस्मादात्मप्रकाशप्रकृष्टानन्दस्वभावमेव ब्रह्मेति युक्तम्। एवञ्च लौकिकानन्द एतस्य मात्रेति युज्यते, अवच्छेदात्, दुःखनिवृत्तौ च दुर्योजमेतत्। इतश्चानन्दस्वभाव आत्मा परमप्रेमास्पदत्वात्। श्रूयते हि परमप्रेमास्पदत्वम्। तदेतत्प्रेयः पुत्रादिति। (ब्रह्मसिद्धिः, पृ. ५)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाञ्छति। न कोऽपि स्वाभावं वाञ्छति एवं सर्वोऽपि जनो ज्ञानं कामयते, न त्वज्ञानम्। एवं सर्वोऽपि जनः सुखं कामयते न दुःखम्[1]। अतः सर्वेषां प्राणिनां स्वभाव एव सच्चित्सुखात्मकः प्रतीयते। सङ्क्षेपशारीरकेऽपि सर्वज्ञमुनिना आत्मन आनन्दरूपता साधिता। यतो हि प्राणिनामात्मा सर्वाधिकप्रियस्तथा सुषुप्त्यनन्तरं 'सुखमहमस्वाप्सम्, न किञ्चिदवेदिषम्' इति स्मरणद्वारा या सुखस्य प्रतीतिः, सैव प्रमाणं सुखस्वरूपे ब्रह्मण्यात्मनि वा। प्राणिनामात्मा सर्वाधिकप्रियो भवति, स्वात्मनि च सर्वेषामाब्रह्मकृमिकीटादीनां प्राणिनां निरुपाधिका प्रीतिर्दृश्यते। अत एवाऽऽत्मा ब्रह्म वा सुखस्वरूपं परमप्रेमास्पदम्। यतो हि यद्वस्तु सुखात्मकं न भवति, तत् प्रेमास्पदमपि न भवति[2]।

आनन्देन न्यायरत्नदीपावल्याम्[3], चित्सुखाचार्येण तत्त्वप्रदीपिकायाम्[4], विमुक्तात्मना चेष्टसिद्धावात्मन आनन्दरूपता मीमांसिता। तत्र विमुक्तात्मनो मतं यच्छुभकर्मणः फलस्वरूपोपस्थितविषयेण सहेन्द्रियसंयोगे जातेऽन्तःकरणं प्रसीदति; अस्यां प्रसन्नवृत्तावात्मा स्फुटं प्रतिबिम्बते तत् प्रतिबिम्बितात्मानन्द एव आनन्दनाम्नाऽनुभूयते व्यवह्रियते च। शास्त्रेष्विदं विषयसुखमित्युक्तम्। यस्यात्मनश्छायामात्रेणाऽन्तःकरणमानन्दनिमग्नं भवति स आत्मा एव वस्तुत आनन्दरूपः[5]।

'अद्वैतसिद्धि'नाम्नि ग्रन्थे आचार्यो मधुसूदनसरस्वती आनन्दस्वरूपं विवेचयन् नैकान् विकल्पानुद्भाव्य समाहितवान्। तथा हि—

---

१. न वा अरे भूतानां कामाय भूतानि प्रियाणि भवन्त्यात्मनस्तु कामाय भूतानि प्रियाणि भवन्ति। न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवति।
(बृहदारण्यकोपनिषद्-२।४।५)

२. प्राज्ञे सुखं समनुभूय समुत्थितः सन् सर्वप्रकारविषयप्रतिपत्तिशून्ये।
सुप्तोऽहमत्र सुखमित्यनुसन्दधानः सर्वोऽपि जन्तुरवगच्छति तस्य सौख्यम्॥
प्रेमाऽनुपाधिरसुखात्मनि नोपलब्धः स प्रत्यगात्मनि कृमेरपि नित्यसिद्धः।
प्रेयः श्रुतेरपि ततः सुखताऽनुमानं नैयायिकोऽपि न दृगात्मनि निह्नुवीत॥
(सङ्क्षेपशारीरकम्-१।२३-२५)

३. न्यायरत्नदीपावली, पृ., १३१।१३६।

४. तत्त्वप्रदीपिका, पृ. ५६६-५६८।

५. शुभकर्मणा उपस्थापिते विषयविशेषे तदिन्द्रियसंयोगाज्जातेऽन्तःकरणवृत्तिविशेषे प्रसन्ने सति निर्मलमिवादर्शे मुखम्, आत्मैवानन्दः प्रकटीभवति। तद्विषयसुखमिति प्रसिद्धं लोके।
(इष्टसिद्धिः, पृष्ठ २८)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किमानन्दत्वं जातिः? अनुकूलवेदनीयं वा, अनुकूलवेदनं वा, अनुकूलभवनं वा, ज्ञानात्मकं वा, दुःखविरोधि वा, दुःखाभावोपलक्षितस्वरूपं वा, न्यायदर्शनानुरूपं गुणरूपं वा।

आनन्दविषये उद्भूतानेतान् विकल्पान् निराकुर्वन् समाधत्ते—

१. आनन्दत्वं न जातिः। अखण्डस्वरूपानन्दे काऽपि जातिर्न भवति।

२. अनुकूलवेदनीयमपि नास्ति। ब्रह्मस्वरूपे आनन्दे वेदितुरभावात्। ब्रह्म चावेद्यं स्वप्रकाशज्ञानस्वरूपं कस्यापि ज्ञानस्य विषयभूतं नास्ति।

३. अनुकूलता च सापेक्षा वर्तते। अनुकूलता यं प्रति भवति यश्चानुकूलो भवति तयोरपेक्षाऽनुकूलतायां वर्तते। यदि वेदनस्वभावापेक्षयाऽनुकूलता स्वाभाविकीति वयं स्वीकुर्मस्तदा सखण्डताऽऽपद्येत।

यद्यनुकूलता औपाधिकी तदाऽऽनन्दत्वाभावस्यापि सम्भावना जायेत। अतो ब्रह्मस्वरूपेऽनुकूलताया उपपत्तिर्भवितुं नार्हति[१]।

४. यदि ज्ञानात्मक आनन्दस्तदा दुःखादिज्ञानेऽपि स स्यात्। अतो ब्रह्मणः स्वरूपभूत आनन्दोऽनिर्वचनीय एवेत्यपि न वक्तव्यं तस्य निर्वचनसम्भवात्। निरुपाधिकेष्टत्वं परमप्रेमास्पदत्वमानन्दत्वमिति निर्वचनात्[२]। एतदेव सङ्क्षेपशारीरकेऽपि निरूपितम्—'निरुपाधिकप्रेमास्पदत्वमिति'[३]। स्वामिविद्यारण्योऽव्यभिचारिप्रीत्यास्पदत्वमानन्दत्वमिति प्राह[४]।

शैवदर्शनेऽपि विशिष्टार्थे आनन्दोऽयं प्रतिपादितः। तत्र आत्मा विमर्श-पराशक्ति-चिति-प्रकाशैकघनपरमेश्वर-परासंवित्-परमशिव-परमपद-परमवीर्य-परमामृत-परमतेजः-परमज्योतिरादिभिः शब्दैर्व्यवहृतः परमानन्दमय इत्यपि वर्णितः। परमशिवस्यान्यदपि रूपं शक्तिशब्देन व्यवहृतं यत् परमशिवेन पूर्णतयाऽभिन्नमिति

---

१. आनन्दत्वं जातिविशेषो वा, अनुकूलतया वेदनीयत्वं वा, अनुकूलवेदनत्वं वा, अनुकूलत्वमात्रं वा, ज्ञानात्मकत्वमेव वा, दुःखविरोधित्वं, दुःखाभावोपलक्षितस्वरूपत्वं वा पराङ्गीकृतं वा।...नाद्यः, अखण्डस्वरूपानन्दे तद्भावात्। न द्वितीयः, मोक्षे वेदितुरभावाद् आत्मनो वेद्यत्वाच्च। किञ्च आनुकूल्यं किञ्चित्सापेक्षं न चान्यं प्रति तद्युक्तमिति स्वं प्रत्येव वक्तव्यत्वेन सविशेषत्वापातात्। (अद्वैतसिद्धिः, पृ. ७५०-५१)

२. आनन्दत्वस्य निरुपाधिकेष्टरूपत्वात्, (अद्वैतसिद्धिः, पृ. ७५१)

३. सङ्क्षेपशारीरकम्-१।२३,२५।

४. सुखे वैषयिके प्रीतिमात्रमात्मा त्वतिप्रियः।
सुखे व्यभिचरत्येषा नात्मनि व्यभिचारिणी ।। (पञ्चदशी-१२।२५)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्राङ्गीकृतम्[1]। अस्याः पञ्चभेदेषु द्वितीयः प्रभेद आनन्दशक्तिरिति शब्देन परिगणितः। सा शक्तिः स्वतन्त्रतयाऽऽत्मानं निरपेक्षमानन्दमनुभावयति। नेत्रतन्त्रे वर्णितं यद् शिवादभिन्ना सा चिद्रूपा शक्तिरद्भुतमानन्दं वितनोति। योगी तत् सामरस्यं समवाप्याऽऽनन्दविलीनो भवति[2]।

अस्मिन्नेवार्थे सौन्दर्यलहर्यां शङ्कराचार्योऽपि—

शिवाऽऽकारे मञ्चे परमशिवपर्यङ्कनिलयाम्।
भजन्ति त्वां धन्याः कतिचन चिदानन्दलहरीम्[3]।।
अतः शेषः शेषीत्ययमुभयसाधारणतया।
स्थितः सम्बन्धो वां समरसपरानन्दपरयोः[4]।।
चिदानन्दाकारैः शिवयुवतिभावेन विमृषे[5]।

इत्याद्युक्तिभिः शक्तिमन्तं शिवमानन्दरूपं व्याजहार।

पुनश्च शैवदर्शने जीवस्य जाग्रत्-स्वप्न-सुषुप्ति-तुरीय-तुरीयातीताभिधाः पञ्चावस्था वर्णिताः सन्ति। तत्र तुरीयातीतावस्थायां जीवः 'पूर्णानवच्छिन्न-वपुरानन्दनिर्भरः' इति प्रोक्तः। एषैवावस्था परमपदशब्देन, अनुत्तरावस्थाशब्देन च वर्णिता, यस्याऽवस्थाया अग्रे काचनाऽन्यावस्था न भवति। यस्यामवस्थायां जीवः पूर्णानन्दस्वरूपो भवति।

तन्त्रालोके प्राणायामविधिनाऽखण्डानन्दप्राप्तिर्निर्दिष्टा। तत्रोक्तम्—'यद्य-प्यानन्दाभिव्यक्ती रसवति हृदये भवति, तथापि शून्यतायां विश्रान्तिवशात् प्रथमं

---

१. शिवसूत्रविमर्शिनी, पृ. ४, प्रत्यभिज्ञाहृदयम्, पृ. २-८, नेत्रतन्त्रम्, प्रथमो भागः, पृ.५४-५५।

२. (क) तस्य च स्वातन्त्र्यमानन्दशक्तिः, तच्चमत्कार इच्छाशक्तिः, प्रकाशरूपा चिच्छक्तिः, आमर्शात्मकता ज्ञानशक्तिः, सर्वाकारयोगित्वं क्रियाशक्तिः; इत्येवं मुख्याभिः शक्ति-भिर्युक्तोऽपि वस्तुत इच्छाज्ञानक्रियाशक्तियुक्तोऽनवच्छिन्नः प्रकाशो निजानन्द-विश्रान्तशिवरूपः स एव स्वातन्त्र्यादात्मानं सङ्कुचितमवभासयन् अणुरित्युच्यते।
(तन्त्रसारः, प्रथमाह्निकम्, पृ. २१)
एवं शून्यात् प्रभृति व्यानान्तं या एता विश्रान्तयस्ता एव निजानन्दः, निरानन्दः; परानन्दो ब्रह्मानन्दोः; महानन्दः, चिदानन्द इति षडानन्दभूमय उपदिष्टाः, यासामेकोऽनुसन्धाता उदयास्तमयविहीनोऽन्तर्विश्रान्तिपरमार्थरूपो जगदानन्दः।
(तन्त्रसारः पञ्चमाह्निकम्, पृ. १६७)
(ख) नाहमस्मि न चान्योऽस्ति ध्येयं चात्र न विद्यते।
आनन्दपदसंलीनं मनः समरसीगतम्।। (नेत्रतन्त्रम्, प्रथमो भागः, पृ. १९८)

३-४-५. सौन्दर्यलहरी, श्लोक. ८,३४,३५।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

योगी निरानन्दो भवति। प्राणायामद्वारा यदा स प्राणवायुक्षेत्रे प्रविशति, तदा परानन्दं प्राप्नोति। अपानवायुक्षेत्रे स परानन्दादग्रे सरति, परं समानवायुक्षेत्रे प्रविश्य स ब्रह्मानन्दमयो भवति। उदानवायुक्षेत्रे च स महानन्दं प्राप्नोति, परं व्यानवायुक्षेत्रे विश्रान्तिं समवाप्य सर्वोपाधिविनिर्मुक्तो भूत्वा चिदानन्दं प्राप्नोति[१]।

शैवसिद्धान्ते इयं चिदानन्दावस्था एव मोक्षावस्थाऽभिधीयते। मृगेन्द्रतन्त्रे वर्णितं यद् योगी योगविधिना समस्तचिन्तनविनिर्मुक्तो भूत्वा यदा स्वहृद्देशे निज-स्वरूपं साक्षात्करोति, तदा ज्ञानमयमखण्डानन्दमयमव्ययरूपं प्राप्नोति। सैव 'शिवोऽहम्' इति स्थितिः[२]। तस्यां स्थितौ योगी अखण्डानन्दघनात् शिवादभिन्नो भूत्वा अखण्डमानन्दमनुभवति, पुनः अशिवममङ्गलमयं दुःखं प्रति न परावर्तते। ईश्वरप्रत्यभिज्ञाविवृत्तिविमर्शिन्यामपि योगिनामस्या अन्तिमावस्थितेरुल्लेखो वर्तते। तत्रोक्तम्—'योगी तस्मिन्ननन्ते तत्त्वसमूहरूपिणि शिवतत्त्वे विलीयते यत् चिदानन्दघनपरमाक्षरस्वरूपमस्ति'[३]। इत्थं प्रत्यभिज्ञादर्शनानुसारं शिव एव चिदानन्दघनः, शिवत्वप्राप्तिरेव मोक्षप्राप्तिर्वर्तते।

मोक्षानन्दो योगानन्दश्च

समस्तभारतीयदर्शनानामेकमेवोद्देश्यं प्राणिनामात्यन्तिकी दुःखनिवृत्तिः परमानन्दावाप्तिश्च। अतः सर्वे दार्शनिकसम्प्रदाया दुःखोच्छेदाय परमानन्दावाप्तये च दुःखदुःखहेतु-मोक्ष-मोक्षोपायरूपचतुर्व्यूहात्मकं सिद्धान्तं प्रतिपादयन्ति। एषु दार्शनिकसम्प्रदायेषु बौद्ध-जैन-न्याय-वैशेषिक-साङ्ख्ययोग-मीमांसा-वेदान्तादि-मतावलम्बिनो यां मुक्तिं काङ्क्षन्ति, सा क्वचिदविद्यानाशेन, क्वचित् कर्मावरण-भङ्गेन क्वचिद् विवेकज्ञानेन, क्वचित् कैवल्यसिद्ध्या तदनुसारं स्वरूपप्रतिष्ठायां प्रतिष्ठिते सति क्वचिदज्ञानावरणभङ्गेन, क्वचिद् ब्रह्मसायुज्येन च भवति। सर्वेषां मतेषु मुक्तिर्दुःखोच्छेदकारिणी यस्यां सिद्धौ पुरुषो जन्ममरणबन्धनाद् विनिर्मुक्तो भवति। अयमेव मोक्षः। प्रायः सर्वेषां मतेषु मुक्तिरात्यन्तिकदुःखनिवृत्तिरूपैवास्ति, तथापि तस्या आनन्दरूपतायाश्चर्चाऽद्वैतवेदान्ते विशेषतयोपलभ्यते। तत्र ब्रह्मणः

---

१. तन्त्रालोकः, पञ्चमाह्निकम्, श्लो. ४४-५२।

२. तेन प्रकाशरूपेण ज्ञानशक्तिप्ररोचना। सर्वकारकनिष्पाद्यमवैति विषयं परम्।।
(मृगेन्द्रतन्त्रम्, विद्यापादे-१।१०।१०, योगपादश्च)

३. (क) ईश्वरप्रत्यभिज्ञाविवृत्तिविमर्शिनी (द्वितीयो भागः) पृ. २६८; प्रत्यभिज्ञाहृदयम्, पृ. ५२।
(ख) अज्ञानं किल बन्धहेतुरुदितः शास्त्रे मलं तत्स्मृतं
पूर्णज्ञानकलोदये तदखिलं निर्मूलतां गच्छति।
ध्वस्ताशेषमलात्मसंविदुदये मोक्षश्च तेनामुना
शास्त्रेण प्रकटीकरोमि निखिलं यज्ज्ञेयतत्त्वं भवेत्।। (तन्त्रसारः, प्रथमाह्निकम्)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वरूपं सच्चिदानन्दात्मकमस्ति। अत एव तेषां मतेन आनन्दात्मकब्रह्मावाप्तिश्च मोक्षः शोकनिवृत्तिश्च[१]। यथोक्तम्—'ब्रह्मविद् ब्रह्मैव भवति'[२], 'तरति शोकमात्मवित्'[३], 'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय'[४] इति। अतो मोक्षानन्दो ब्रह्मानन्दावाप्तेरानन्दः। योगसाधनेनापि जीवो जन्मजन्मान्तर-बन्धनाद् विनिर्मुक्तो भूत्वा स्वरूपप्रतिष्ठायां प्रतिष्ठितो भवति यत्र केवला चितिशक्तिरेव भासते[५]। अयमेव योगस्यानन्दः।

भक्त्यानन्दः

ईश्वरे परानुरक्तिरेव भक्तिः[६]। नारदानुसारं सा परमप्रेमस्वरूपा, अमृतस्वरूपा च[७]। यल्लब्ध्वा पुमान् अमृतो भवति तृप्तो भवति च[८]। अस्यां भक्तौ सर्वत्र स्वाराध्य एव दृश्यते। इत्थं भगवदाकारकारितायां चित्तवृत्तौ परमानन्दस्य भगवतोऽनुभूतिरेव भक्त्यानन्दः। श्रीमद्भागवते प्रोक्तम्—

यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत्।
योगेन दानधर्मेण श्रेयोभिरितरैरपि।
सर्वं यद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा।
स्वर्गापवर्गमद्धाम कथञ्चिद् यदि वाञ्छसि[९]।।

श्रीमद्भगवद्गीतायां कृष्णेन प्रोक्तम्—

ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः।
अनन्येनैव योगेन मां ध्यायन्त उपासते।।
तेषामहं समुद्धर्ता मृत्युसंसारसागरात्।
भवामि न चिरात् पार्थ मय्यावेशितचेतसाम्[१०]।।

अतो भक्तेर्य आनन्दः स ब्रह्मसामीप्यरूपैष आनन्दः। स्वाराध्यसारूप्य-सायुज्यसामीप्यरूपैवानन्दश्च।

---

१. वेदान्तपरिभाषा, प्रयोजनपरिच्छेदः; २. मुण्डकोपनिषद्-३।२।९।
३. छान्दोग्योपनिषद्-१।१।३; ४. श्वेताश्वतरोपनिषद्-३।८।
५. पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति।। (पातञ्जलयोगसूत्रम्-३४)
६. शाण्डिल्यभक्तिसूत्रम्; ७. नारदभक्तिसूत्रम्-२-३।
८. तत्रैव-४-५; ९. श्रीमद्भागवतम्-११।३२।३३।
१०. श्रीमद्भगवद्गीता-१२।६-७।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आधिभौतिकानन्दः

तत्तद् भौतिकविषयैः सहेन्द्रियसन्निकर्षे जाते सति, अन्तःकरणे समुद्भूतस्याऽद्भुतमनोह्लादस्य स्थितिरेवाऽऽधिभौतिकानन्दः। अभिप्रायोऽयं वर्तते यस्य वस्तुनो दर्शनेन साक्षात्कारेण वा इन्द्रियाणि तृप्तानि भवन्ति, मनश्चित्तं वा तृप्तं भवति तद्वस्तु प्रियं भवति। अनन्तरं तद्दर्शनादिजन्यं सुखमपि प्रियं भवति। तेनान्तःकरणे तल्लीनतामय्यद्भुताह्लाददायिनी या स्थितिः प्रादुर्भवति, सैवाऽऽधिभौतिकानन्दः। अयमानन्दस्त्रिविधो भवति—१. इन्द्रियानन्दः, २. रागात्मकानन्दः, ३. बौद्धिकानन्दश्च। तत्र इन्द्रियानन्दः प्रियजनदर्शनश्रवणादिजन्य आनन्दः। प्रियस्य स्नेहजन्यो य आनन्दः, स रागात्मकानन्दः, तथा शास्त्रीयप्रश्नानां समाधाने, कठिनग्रन्थग्रन्थिविभेदने, समस्यापूर्तिप्रहेलिकागणितविज्ञानादिविषयकजटिलप्रश्नानां समाधाने च समाधातुरानन्द एव बौद्धिकानन्दः। एतेषामुदाहरणानि तथा हि विषयानन्दे—शकुन्तलाया अद्भुतं सौन्दर्यं समवेक्ष्य 'लब्धं नेत्रनिर्वाणम्'[१] इति वक्तुर्दुष्यन्तस्य य आनन्दस्तथा 'अतन्द्रचन्द्राभरणा समुद्दीपितमन्मथा। तारकातरला श्यामा सानन्दं न करोति कम्'[२]।। इति वर्णयितुर्नायकस्य तथा—

त्वं मुग्धाक्षि विनैव कञ्चुलिकया धत्से मनोहारिणीं
लक्ष्मीमित्यभिधायिनि प्रियतमे तद्वीटिकासंस्पृशि।
शय्योपान्तनिविष्टसस्मितसखीनेत्रोत्सवानन्दितो
निर्यातः शनकैरलीकवचनोपन्यासमालीजनः[३]।।

इति कवयितुर्नायकस्य तथा सख्युर्नेत्रविकासं दृष्ट्वाऽऽलिजनानां य आनन्दः, स इन्द्रियानन्द एव; परन्तु 'आनन्दपरिवाहिणा चक्षुषा परिष्वजमान इव गुरुरुपस्थितः'[४] इत्युक्तौ कण्ठस्य येषामानन्दाश्रूणां चर्चा वर्त्तते, तानि पुत्र्याः सुयोग्यवरप्राप्तेस्तथा तदनुकूलं तस्याः पतिगृहगमनावसरे प्रोद्भूतप्रगाढस्नेह-जन्यतल्लीनतायाः स्थितेः परिचायकानि। इयमेव रागात्मकानन्दस्य स्थितिः।

'क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे'[५] इति पङ्क्तिमभिलक्ष्य रचितानि पद्यानि।

---

१. अभिज्ञानशाकुन्तलम्-तृतीयोऽङ्कः; २. काव्यप्रकाशः-४।७२।
३. तत्रैव-४।३१; ४. अभिज्ञानशाकुन्तलम्, चतुर्थोऽङ्कः।
५. भोजप्रबन्धः-१६८-१७१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कमले कमलोत्पत्तिः श्रूयते न च दृश्यते।
बाले तव मुखाम्भोजे कथमिन्दीवरद्वयम्[1]।।

इतीमं श्लोकं श्रुत्वा अर्थञ्चाधिगम्य सहृदयानां मनस्सु यस्यानन्दस्यानुभूतिर्भवति, स एव बौद्धिकानन्दः। 'अत्र तुनोक्तम्, तत्रापि नोक्तम् इति पौनरुक्त्यम्', 'अत्र तुना उक्तम् तत्र अपिना उक्तमिति पौनरुक्त्यम्'[2] इत्यस्मिन् स्थले समस्या-समाधाने, एवं गणितस्य गूढप्रश्नानां समाधाने सति वैज्ञानिकानामाविष्कारसिद्धौ च य आनन्द उपलभ्यते, स बौद्धिकानन्दस्यैव विषयः।

काव्यानन्दः

इत्थं ब्रह्मानन्द-मोक्षानन्द-योगानन्द-भक्त्यानन्द-भौतिकानन्दादीनामनुशीलने कृतेऽवशिष्यते एको बहुश्रुतः प्रभेदो य उक्तप्रभेदेभ्यो विलक्षणः काव्यानन्द इत्युच्यते। दृश्यश्रव्योभयविधकाव्यदर्शनश्रवणपठनसमनन्तरमेव यो विशिष्टानन्दः सहृदयैरनुभूयते स एव काव्यानन्दः। एतत्स्वरूपं काव्यतत्त्वज्ञैः सम्यग्विमृष्टम्। विगलितवेद्यान्तरसकलप्रयोजनमौलिभूतेत्यादिविशेषणविशिष्टोऽयमानन्दोऽलौकिको ब्रह्मानन्दसहोदर इति व्यपदिष्टः। युक्तयोगी समाधिस्थः सन् यथा ब्रह्मानन्दे निमग्नो भवति, तथैव सहृदया अपि रसानुभवकाले तल्लीना भवन्ति। साहित्यस्यायमानन्दः काव्यशास्त्रकारै रसपदेनाभिहितः। आनन्दोऽयं विषयानन्दवन् न सातिशयः, न वा ब्रह्मानन्दवन् निरतिशयोऽपि तु पण्डितराजानुसारं चमत्कारत्वापरपर्यायोऽनुभव-साक्षिको जातिविशेषः[3]। रसास्वादनसमये सहृदया यं विलक्षणं चमत्कारमनुभवन्ति, स एव चमत्कारः सकलविघ्नविनिर्मुक्तसंवित्पदेनाभिहितः[4]। काव्यानुशासनस्य व्याख्याता यं चमत्कारं परिभाषयन् प्राह—अद्भुतभोगात्मस्पन्दावेशरूपो हि चमत्कारः'[5] इति। तदुद्धृतं विश्वनाथेन—'रसे सारश्चमत्कारः सर्वत्राप्यनुभूयते'[6] इत्यादि। अनेनोद्धरणेन प्रतीयते काव्यानन्द एकमलौकिकसंवेदनं यं चमत्कारशब्देन वक्तुं शक्यते।

---

१. महाकविकालिदास, डॉ. रमाशङ्करतिवारी, पृ.३०।
२. काव्यप्रकाशः, द्वितीयोल्लासः, व्याख्या—विश्वेश्वरसिद्धान्तशिरोमणिः, पृ. ३९।
३. लोकोत्तरत्वं चाह्लादगतश्चमत्कारत्वापरपर्यायोऽनुभवसाक्षिको जातिविशेषः।
(रसगङ्गाधरः, प्रथमाननम्, पृ.११)
४. नाट्यशास्त्रम्, षष्ठाऽध्यायस्यांशभूते अभिनवरससिद्धान्ते, पृ. ३४।
५. काव्यानुशासनम्-२।१; ६. साहित्यदर्पणः, तृतीयपरिच्छेदः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रसोऽयं काव्यशास्त्रिभिर्बहुधा व्याख्यात:। प्राय: सर्वैराचार्यै रस आनन्दमय: स्वीकृत:। तत्रादौ—

दु:खार्तानां श्रमार्तानां शोकार्तानां तपस्विनाम्।
विश्रान्तिजननं काले नाट्यमेतन्मया कृतम्[१]।। इति।

नाट्यस्य प्रयोजनं प्रतिपादयता भरतेन प्रोक्तं, यद् रसस्य फलं विश्रान्तिजननमस्ति। तदनन्तरं यद्यपि भामह-दण्डि-भट्टोद्भटवामनादीनां ग्रन्थेषु रसस्य विशिष्टं विवरणं नोपलभ्यते तथापि 'येन माद्यन्ति धीमन्तो मधुनेव मधुव्रता:'[२] इत्यादि-शब्दै रसेनानन्दमग्नता प्रतिपादिता। रुद्रटश्च—'एते रसा: रसवतो रमयन्ति पुंस:'[३] इत्याद्युक्त्या रसस्य मन:प्रसादकर्तृतामङ्गीचकार। 'सरस्वती स्वादु तदर्थवस्तु निष्यन्दमाना महतां कवीनाम्'[४] इत्यादिभिरानन्दवर्धनोऽपि रसस्य स्वादरूपतां जुघोष। 'काव्ये रसयिता सर्वो न बोद्धा न नियोगभाक्'[५] इत्युक्त्या रसस्य प्राधान्यं प्रतिपादयन् भट्टनायक:, 'योगिनां समाधौ य आनन्दस्तदपेक्षया रसानन्द उत्कृष्ट:' इति प्रतिपादितवान्[६], अभिनवभारत्यामुद्धृतेन भट्टतौतवचनेन प्रतीयते यत् तन्मतेऽपि रस आह्लादमय:[७]।

रसस्यानन्दरूपताया: प्रबलप्रतिपादक आचार्योऽभिनवगुप्त: स्वकीय-शैवाद्वैतदर्शनानुसारं विवृणोति—

'अस्मन्मते तु संवेदनमेवानन्दघनमास्वाद्यते'[८]। 'सामाजिकानां हि हर्षैकफलं नाट्यम्, न शोकादिफलम्'[९], 'तथापि तत्र प्रीतिरेव प्रधानम्'[१०] इत्याद्युक्त्या रसस्यानन्दात्मकतां निर्भ्रान्तिरूपेणोद्घोषितवान्। 'ह्लादनिष्यन्दो रस:' इति प्रतिपादयता महिमभट्टेन रसेन सहृदयानां तथा तृप्तिरुद्भाविता यथा समाधौ योगिनाम्[११]। आनन्दनिष्पत्तिरेव काव्यस्य प्रमुखं प्रयोजनमिति मन्वान: कुन्तकश्च

१. नाट्यशास्त्रम्-१।११४; २. काव्यादर्श:-१।५१।
३. काव्यालङ्कार:-१५।२१; ४. ध्वन्यालोक:-१।६।
५. लोचनव्याख्यासहितो ध्वन्यालोक:, व्याख्याकार:-रामसागरत्रिपाठी, पृ.६५।
६. वाग्धेनुर्दुग्धम् एतं हि रसं यद् बालतृष्णया।
तेन नास्य सम: स स्याद् दुह्यते योगिभिर्हि य:।। (तत्रैव प्रथमोद्द्योत:, पृ.१६९)
७. झटित्येव रसा यत्र व्यज्यन्ते ह्लादिभिर्गुणै:।
८. हिन्दी-अभिनवभारती, पृ.५००।
९. तत्रैव।
१०. ध्वन्यालोकलोचनम्, प्रथमोद्द्योत:, पृ.६६।
११. ततो निर्विषयस्यास्य स्वरूपावस्थितौ निज:।
व्यज्यते ह्लादनिष्पन्दो येन तृप्यन्ति योगिन:।। (व्यक्तिविवेक:, प्रथमो विमर्श:)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'काव्यामृतरसेनान्तश्चमत्कारो वितन्यते' इति व्याहरन् अन्तश्चमत्कृतिमेव परम-प्रयोजनं प्राह[१]। काव्यप्रकाशस्य स्वकृतमङ्गलपद्ये मम्मटाचार्यः कविभारत्याः सर्वातिशायितां प्रतिपादयन् तां ह्लादैकमयीं नवरसरुचिरां चाभिदधानः[२] काव्य-प्रयोजने च सद्यःपरनिर्वृतिमेव सकलप्रयोजनमौलिभूतमिति स्वीचकार। हेमचन्द्रोऽपि आनन्दपदार्थं व्याकुर्वन् सद्योरसास्वादजन्या निरस्तवेद्यान्तरा ब्रह्मास्वादसदृशी प्रीतिरिति व्याचख्यौ। प्राह च तत्रैव—'इदं सर्वप्रयोजनोपनिषद्भूतं कविसहृदययोः काव्यप्रयोजनम्'[३]। अग्निपुराणकारोऽपि सहजानन्दस्याभिव्यक्तिरेव रस इति ब्रूते[४]।

अस्मिन्नेव क्रमे रसात्मवादी विश्वनाथश्च रसस्वरूपं निरूपयन् 'रसः' अखण्डः, चिन्मयः, स्वप्रकाशानन्दः, वेद्यान्तरसम्पर्कशून्यो ब्रह्मास्वादसहो-दरश्चेत्यभिदधे। तथा हि—

सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः।
वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः॥
लोकोत्तरचमत्कारप्राणः कैश्चित् प्रमातृभिः।
स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः[५]॥

पूर्वोक्तानां सर्वेषां रसवैशिष्ट्यानां निरूपणे कृते सति काव्यजन्यानन्दस्य स्वरूपनिर्धारणं सहजतया कर्तुं शक्यते।

रसास्वादनकाले सहृदयानां विलक्षणा मनोदशा भवति। तस्मिन् समये सत्त्वोद्रेको जायते। सत्त्वञ्च रजस्तमोभ्यामस्पृष्टं मन[६] इत्युच्यते, अर्थात् काव्यानुशीलनेन रजस्तमसी स्व-स्वकार्यकरणेऽसमर्थे भवतः। भावोऽयं रजोगुण-प्रादुर्भावे मनसि चाञ्चल्यं तमसि च प्रमादमोहादिप्राबल्यं भवति। परं

---

१. वक्रोक्तिजीवितम्-१।५।
२. नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम्।
नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति॥ (काव्यप्रकाशः-१।१)
सकलप्रयोजनमौलिभूतं समनन्तरमेव रसास्वादनसमुद्भूतं विगलितवेद्यान्तरमानन्दम्।
(तत्रैव, वृत्त्यंशः-१।२)
३. काव्यानुशासनम्-१।३।
४. आनन्दः सहजस्तस्य व्यज्यते स कदाचन।
व्यक्तिः सा तस्य चैतन्यचमत्काररसाह्वया॥ (अग्निपुराणम्-३३९।२)
५. साहित्यदर्पणः-३।२-३।
६. रजस्तमोभ्यामस्पृष्टं मनःसत्त्वमिहोच्यते। (सरस्वतीकण्ठाभरणम्-५।२०)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काव्यार्थानुसन्धानसमये सहृदयानां मनसि चाञ्चल्यप्रमादमोहादीनां तिरोधानं भवति, सुखात्मिका च वृत्तिर्भवति। भट्टनायकानुसारं भावकत्वव्यापारेण सहृदयानां मनसि साधारणीकृतिरूपसहृदयतायाः सञ्चारो भवति। तदनन्तरं भोजकत्वव्यापारेण रसो भुज्यते। सहृदयानामयं विचित्रानुभवोऽलौकिकमानसाध्यवसायश्चास्ति। एतस्य स्वरूपविश्लेषणं क्रियते चेत् तदा स सत्त्वोद्रेकप्रकाशानन्दमयनिजसंविद्विश्रान्ति-सलक्षणो भवति[१]।

अयं 'रसः' काव्यानन्दो वा वेद्यान्तरस्पर्शशून्यः, अभिनवगुप्तानुसारं चर्व्यमाणतैकसारोऽस्ति। रसानुभवकाले प्रमातुस्तन्मयीभावावस्था भवति, ययाऽवस्थया प्रमाता स्वपरतटस्थदेशादिभावनाशून्यः सर्वथाऽऽत्मलीनो भवति। अत एव रसो ब्रह्मास्वादसहोदरपदेनाभिहितः। ब्रह्मानन्दः शुद्धचिदानन्दात्मकानुभवो रसानुभवश्च रत्यादिसंवलितचिदानन्दरूप इति विशेषः। यतो हि रसानुभवकाले वेद्यान्तरस्पर्शशून्यता भवति, परं विभावानुभावव्यभिचारिस्थायिभावानामात्मन आनन्दांशस्य च समूहालम्बनात्मकं स्वरूपं रसः। अतो ब्रह्मास्वादसहोदरपदेन रसस्यालौकिकता तेन साधिता।

अयं रसोऽखण्डः। अस्यानुभवकाले विभावानुभावव्यभिचारिणां पृथक् पृथगनुभूतिर्न जायते। परं प्रपाणकरसन्यायेन सर्वेषां मिश्रणेन विलक्षणाऽऽस्वादानुभूतिर्भवति। अपि च तन्मयीभावादेतेषां मात्राभेदस्तारतम्यं वा नानुभूयते। यदपूर्णं तत्र रसानुभूतिर्न जायते। काव्यानन्दो रसः स्वप्रकाशानन्दचिन्मयश्च वर्तते। इयं साऽऽनन्दमयी चितिर्यस्यामिन्द्रियसाध्यताया अभावः, चैतन्यस्य च सद्भावो वर्तते। अपि च एतस्मिन्नानन्दे प्रमाणान्तरापेक्षा नास्ति। स्वयं प्रकाशत इति स्वप्रकाशः। अयमानन्दात्मको रसो लोकोत्तरचमत्कारप्राणो वर्तते। यतो हि स प्रत्यक्ष-परोक्ष-कार्य-ज्ञाप्य-सविकल्पक-निर्विकल्पक-नित्यानित्यलौकिकसंवित्ति-विनिर्मुक्तत्वादलौकिकः।

रसोऽयमास्वादरूपः, न तु आस्वाद्यः। व्यवहारे 'रस' आस्वाद्यत इति यः प्रयोगो दृश्यते, स ओदनं पचतीतिवद् व्यवहारः।

रसगङ्गाधरे पण्डितराजेन 'रसो वै सः। रसं ह्येवायं लब्ध्वाऽऽनन्दीभवति' इत्यादिश्रुतिवाक्यमुद्धृत्य प्रोक्तम्—

'वस्तुतस्तु वक्ष्यमाणश्रुतिस्वारस्येन, रत्याद्यवच्छिन्ना भग्नावरणा चिदेव रसः'।

इत्थं रसानुभूतिर्ब्रह्मास्वादसहोदरा विलक्षणाऽऽनन्दमय्यनुभूतिरस्तीति निर्णीतम्।

---

१. नाट्यशास्त्रम्—षष्ठोऽध्यायः, तत्रस्थाऽभिनवभारती, अभिनवरससिद्धान्तः, पृ. २४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निष्कर्षः

इत्थमानन्दपदार्थानुशीलनेन निष्कर्षतया यत् तथ्यं प्रादुर्भवति तं समाश्रित्य वक्तुं शक्यते यदानन्दो द्विविधः —

१. उदात्तात्मविश्रान्तिरूप आनन्दः, २. आह्लादो मनःप्रीतिर्वा।

इमे उभे अपि रूपे परस्परं संश्लिष्टे। आत्मविश्रान्तिरूपोऽध्यात्मानन्दो वा, ब्रह्मास्वादसहोदरोऽन्तश्चमत्काररूपः काव्यानन्दो वा, आधिभौतिकविषयसुखजन्यो मनोह्लादो वा भवेत्; इमे सर्वे आस्वादमात्रसाराः।

ब्रह्मानन्दे, काव्यानन्दे, भौतिकानन्दे च स एव आत्मानन्दोऽनुभूयते परं वर्तते एषु कश्चन भेदः। तथा हि ब्रह्मानन्दे षट्साधनैः साधकानां शुद्धेऽन्तःकरणे आत्मानन्दः प्रकाशते तदा ब्रह्मानन्दाकाराकारिता चित्तवृत्तिर्भवति। अनन्तरं चित्तस्यापि तस्मिन् लये जाते सति केवलमानन्दमात्रमवशिष्यते। तस्यानन्दस्यानुभवं केवलमानन्दस्वरूप आत्मैव करोति। यथा दर्पणे स्वसौन्दर्यं दृष्ट्वा जनो हृष्यति।

भौतिकानन्देऽपि तस्यैवानन्दस्य प्रकाशो भवति तथापि भौतिकविषयैः संवलितः। विषयसुखेऽप्यभीष्टप्राप्तौ चित्तैकाग्र्ये जाते सति तत्र आत्मन आनन्दांशः स्फुटो भवति। अतः स एवानन्दो लौकिकविषयसंवलितत्वात् क्षणिकः परिमितश्च।

काव्यानन्दे च लौकिका ये रत्यादीनां कार्यकारणभूताः सन्ति, त एव काव्ये विभावानुभावव्यभिचारिपदव्यपदेश्या भवन्ति। एवञ्चाऽलौकिकविभावादिभिः स्वस्वरूपानन्दात्मविषयकं यदज्ञानावरणं तदपसार्यते। आवरणेऽपसारिते स्वरूपानन्दः प्रकाशते विभावादींश्च विषयीकरोति। अतः सर्व इमे आनन्दमया अनुभूयन्ते। तदा परिमितप्रमातृतापसरति। सर्वविधद्वन्द्वविनिर्युक्तः परिच्छेदातीत-आनन्दोऽनुभूयते। परमयं विभावादिसंवलितत्वाद् ब्रह्मास्वादसहोदर इत्युच्यते।

इत्थमानन्दस्य प्रतिरूपप्रतीतिरात्मविश्रान्तिरात्मनो निर्द्वन्द्वात्मिका स्थितिरेव, एका विलक्षणा इन्द्रियातीतानुभूतिः। आधिभौतिकानन्दस्य प्रभेदेषु इन्द्रियानन्दे रागात्मके बौद्धिकानन्दे च तत्तद्विषयेभ्यः समुद्भूता प्रगाढतल्लीनता, तद्भावभावितचित्तताऽऽनन्दपदार्थोऽस्ति। काव्यानन्दे च सहृदयानां हृदयसंवादिनां विभावादीनां परामर्शाद् या तन्मयावस्था जायते, यस्यामवस्थायां वैयक्तिकाः सांसारिकद्वन्द्वाश्चातीता भवन्ति, तदात्मविश्रान्तिपूर्वको यो रसबोधो भवति, स ब्रह्मास्वादसहोदरः। ब्रह्मास्वादसहोदरभूतायां तस्यामवस्थायां व्यष्टिभावना

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समष्टिभावनामापद्यते, व्यष्टिहृदयं समष्टिहृदयं भवति, व्यष्टिसीमा समष्टिसीमासु पर्यवसिता भवन्ति। तामेव भरतो निजहृदयसंवादपदेन, अभिनवश्च वासनासंवादशब्देन, विश्वनाथश्च सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयशब्देन, पण्डितराजश्च भग्नावरणचिद्विशिष्टरत्यादिरूपेण वस्तुतो रत्याद्यवच्छिन्नचिद्रूपेण व्याजह्रुः।

अध्यात्मक्षेत्रे इयं सा भावमयी भूमिरस्ति, यत्र सर्वे विकारा विगलिता भवन्ति। अहन्ताया इदन्तायां पर्यवसानं भवति, स्वता विलीना भवति, स्वपरयोर्भेदो न प्रतीयते। सर्वे पदार्थाः समरसा भवन्ति। तदानीं ज्ञातृत्वस्य ज्ञानस्य च, ध्यातृत्वस्य ध्यानस्य च विलयो भवति। परिपूर्णस्यात्मानन्दस्यास्वादमात्रमनुभूयत इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Entered in Database

Signature with Date
10/5/05

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri